श्रीमद्भगवद्बादरायणप्रणीतम्

श्रीमद्भागवतम्

दशमस्कन्ध उत्तरार्धः

।। अथ एकोनपञ्चाशोऽध्यायः ।।

श्रीशुक उवाच –

अस्तिप्रास्तीति कंसस्य महिष्यौ भरतर्षभ ।
हते भर्तरि दुःखार्ते ईयतुः स्वपितुर्गृहान् ।। १ ।।

श्रीसत्यधर्मयतिकृता भागवतटिप्पणी

सत्यधर्मीया — ।। हरिः ॐ ।। यदर्थमत्यर्थमर्थितोऽर्थितदोऽवनाववतीर्णश्चकार चाङ्कुरार्पणं तत्तूर्णमुदीर्णं विधातुमिव गते गतपतिके द्वे सुते मागधस्येत्यादिरेतदादिकथनाकर्णनादिकं च मुक्तिकारणमिति निरूप्यतेऽस्मिन्स्कन्धे । तत्रादौ का कथोत्तरत्र प्रवृत्तेत्यौत्तरेयस्यान्तरीं शङ्कां स्वयमेव शुक आशुकरुणः परिहरन्वक्तीति वक्ति — **श्रीशुक इति** ।। हे भरतर्षभ । अत्रोत्तरत्र यौष्माकीणपूर्वपुरुषकर्मैव प्रतिपाद्यते प्राय इति प्रोत्साहयितुं सम्बोधनमिति मन्तव्यम् । कंसस्यास्तिप्रास्तीति द्वे महिष्यौ मूर्धाभिषिक्ते योषितौ निर्विसर्गे द्वे नामनी अस्तीति प्रास्तीति विवेकः । अस्तिः प्रास्तिश्चेत्यपि हरिवंशपाठस्तत्रेतिशब्दोऽध्याहार्यः । भर्तरि कंसे हते कृष्णेनेति शेषः । दुःखार्ते, स्वपितुर्जरासन्धस्य गृहानीयतुः । अत्र भर्तृगेहे तन्निवेशकर्तुरदर्शनात्पुत्री नष्टा चेत्पितृशरणं शरणमिति नीत्या गते । हरिरेव तदायुरवलोक्यैतेऽत्रैरयत्तत्र गन्तुमिति तात्पर्यं चावधेयम् । यच्च भागवतं तत्र क्व नामातीवदुर्वचः ।

आध्यात्मिकोऽर्थो विदुषां विदुषैतत्कृते कृतम् ।
ईदूदेद्द्विवचनमिति प्रगृह्यसञ्ज्ञायां प्लुतप्रगृह्या
अचि नित्यमिति प्रकृतिभावः ।।१।।

सुमनोरञ्जिनी

सेवितं (नन्दि) विष्णुतीर्थार्यभावितं हरिमाश्रये ॥१॥
वन्देऽहं मौद्गराचार्यचरणद्वन्द्वमादरात् ।
यत्प्रेमपात्रतां प्राप्तो दुरितैर्नाभिभूयते ॥२॥
पूर्वार्धस्य परं पारमुत्तीर्य मम मानसम् ।
दशमस्कन्धवाराशेरुत्तरार्धं तितीर्षति ॥३॥

सुमनोरञ्जिनी — भक्तवत्सलो भगवान् भवापवर्गाय भजमानानां जनानां ततस्ततः प्रत्यूहव्यूहं स्वयं परिहृत्य परिरक्षतीतीममर्थं सूचयन् स्वपादमूलं भजद्भोजान्धकादीनां सुसुखान्तरायस्य सन्ततिरूपजरासन्धादेः पराभवप्रकारः प्रदर्श्यतेऽत्र कतिपयैरध्यायैः । तत्र तावज्जरासन्धस्य युद्धोद्योगबीजं वक्ति ॥ **अस्तीति** । अस्तिप्रास्तीति नाम्न्यौ । अत्र मणीवादिवत्प्रगृह्यसञ्ज्ञाभावो ज्ञेयः । कंसस्य महिष्यौ पत्नी । दुःखार्ते दुःखेन पीडिते । स्वपितुः जरासन्धस्य । गृहान् गृहं प्रति । गृहाः पुंसि च भूम्न्येवेत्यमरः । ईयतुः आगते ॥१॥

पित्रे मगधराजाय जरासन्धाय दुःखिते ।
वेदयाश्चक्रतुः सर्वमात्मवैरूप्यकारणम् ॥ २ ॥

सत्यधर्मीया — मगधराजाय तद्देशेशाय नाम्ना जरासन्धाय । यद्यपि पूर्वं स्वपितुर्गृहानित्युदीरणादेव जरासन्धस्य पितृत्वं ज्ञातं भवति तथाऽपि मन्दस्य सन्देहः स्यात्स्वपितुर्गेहं गत्वा भ्रात्रे जरासन्धायेतीति तमतङ्कयितुं पुनः पित्र इत्युक्तिरिति ज्ञेयम् । आत्मवैरूप्यस्य वैधव्यस्य कारणं सर्वं वेदयाश्चक्रतुः । पदे द्वे । अनुप्रयोगमात्रं नियतं तं पातयां प्रथममासेत्यादयोऽपभ्रंशा इति शेखराद्युदीरणात् । विज्ञापयामासतुः । अये पुत्र्यौ किमुर्वरितै रणो न कार्य इत्यतोऽप्याहतुः । आत्मनः वैरूप्यं येन सः आत्मवैरूप्यकस्तेन, न विद्यते रणो यस्य तं च सर्वेऽपि तद्भ्रातरश्च मृता न रणधुरीणस्तत्रास्तीति चात्मवैरूप्यकारणं च वेदयाश्चक्रतुरिति । तस्मादरणं रक्षणमुद्दिश्येति । बहुव्रीहौ कप् । यद्वा स्वजनकाक्रोशजननायात्मनोर्वैरूप्यं येन स आत्मवैरूप्यः स च कः कुत्सित इति कटाक्षयत इति वा ॥ २ ॥

सुमनोरञ्जिनी— मगधस्य तन्नामकदेशस्य । राज्ञे नामतो जरासन्धाय । आत्मवैरूप्यस्य आत्मनो यद्वैरूप्यं विरूपता वैधव्यचिह्नं तस्य कारणं कंसवधम् । सर्वं सपरिकरम् । वेदयाञ्चक्रतुः ॥ २ ॥

स तदप्रियमाकर्ण्य शोकामर्षयुतो नृपः ।
अयादवीं महीं कर्तुं चक्रे परममुद्यमम् ॥ ३ ॥

सत्यधर्मीया — स नृपस्तदप्रियम् । तदाप्रियमिति पाठे तदाऽऽकर्ण्य । शोकेन कंसहिंसाश्रवणजेनामर्षेण कृष्णकर्मासहनेन च युतो, महीमयादवीं न विद्यन्ते यादवा यस्यां साऽयादवी तां कर्तुं परममुद्यमं चक्रे । आत्मनेपदेन तदुद्योगोद्भवोऽनर्थस्तस्यैवेति सूच्यते । अत्र नारदबोधितमथुरायोजने यतो गदां गदाग्रजमुद्दिश्य चिक्षेपेत्यादिकथाऽनुसन्धेया । 'क्षुब्धोऽतिकोपवशतः स्वगदा'मित्यारभ्य 'राजा स्वमातृत उतो गदया च हीन' इत्यन्तेन चाचार्योक्तेः ॥ ३ ॥

सुमनोरञ्जिनी — सः जरासन्धः । तत् ताभ्यामुदितम् । अप्रियं दुःखकरं जामातृवधम् । तयोः स्वदुहित्रोरप्रियमिति वा । शोकामर्षयुतः दुहितृवैरूप्येण शोकः श्रीकृष्णे चामर्षः क्रोधः ताभ्यां युतः । अयादवीं यादवरहिताम् । उद्यमं उद्योगम् ॥ ३ ॥

अक्षौहिणीभिर्विंशद्भिस्तिसृभिश्चापि संवृतः ।
यदुराजधानीं मथुरां न्यरुणत् सर्वतो दिशम् ॥ ४ ॥

सत्यधर्मीया — विंशद्भिस्तिसृभिरुपरि चाहत्य त्रयोविंशद्भिरक्षौहिणीभिः । दशानीकिन्यक्षौहिणीत्यमरः ।

'षट्सहस्रं पञ्चशतं षष्ठिरेका तु वाहिनीम् ।
द्विसहस्रं शतं सप्ताशीतिर्गजरथस्य च ।
यत्रायुतं नवशती त्रिंशत्पञ्चपदातयः ।
अनीकिन्यभिधेया । से'त्युक्तानीकिनीदशकमक्षौहिणी ।

अन्यत्राप्युक्तम् – प्रयुतं नवसाहस्रं पञ्चाशात्त्रिशतं भटाः । पञ्चाशत्षष्ठिसाहस्रं षट्शतं

दशवाहिनः । एकविंशतिसाहस्रं शतानामष्टसप्ततिः । द्विशतस्यन्दना यत्र साऽक्षौहिण्युच्यते बुधै'रिति । अक्षादूहिन्यामुपसङ्ख्यानमिति वृद्धिः । संवृतः । अक्षौहिणी रथास्तस्याः खसप्तवसुमूर्छनाः । गजास्तावन्त एव स्युस्त्रिपश्चघ्ना हया नरा' इति । व्याख्याता च सङ्ख्या महाभारततात्पर्यनिर्णयटीकायां बुधवल्याम् । तथा चापिभिर्धनुष्पाणिभिः संवृतोऽक्षौहिणीभिः सह यदुराजधानीं मथुरां सर्वतो दिशं न्यरुणद्रुरोध ॥ ४ ॥

सुमनोरञ्जिनी — विंशद्भिः तिसृभिश्च अक्षौहिणीभिः त्रयोविंशतिभिरक्षौहिणीभिरित्यर्थः । अक्षौहिणी च -

खाद्यष्टमूर्च्छनमिता (२१८७०) करिणो रथाश्च (२१८७०)
व्योमेन्द्ररीष्वरिमिता (६५६१०) अपि सप्तयः स्युः ।
खेषु त्रिखेचरखभूसमिताश्च (१०९३५०) पद्गा
अक्षौहिणीति कथिता कविभिः समस्ता ॥

इति सङ्ग्रहश्लोकानुसारेण ज्ञेया । एतत्सङ्ख्याकसेनाभिः सर्वतोदिशं सर्वासु दिक्षु न्यरुणत् रुरोध ॥ ४ ॥

निरीक्ष्य तद्बलं कृष्ण उद्वेलमिव सागरम् ।
स्वपुरं तेन संरुद्धं स्वकुलं च भयाकुलम् ॥ ५ ॥

सत्यधर्मीया — उद्वेलं वेलामुद्गत्यायान्तं सागरमिव विद्यमानं तद्बलं सैन्यं, तेन बलेन संरुद्धं स्वपुरं मथुरां भयाकुलं स्वकुलं च निरीक्ष्येत्यन्वयः ॥ ५ ॥

सुमनोरञ्जिनी — तस्य जरासन्धस्य । बलं सैन्यम् । उद्वेलं उत् उल्लङ्घिता वेला मर्यादा येन सः तम् । सागरमिव स्थितम् । तेन सैन्येन ॥ ५ ॥

चिन्तयामास भगवान् हरिः कारणमानुषः ।
तद्देशकालानुगुणं स्वावतारप्रयोजनम् ॥ ६ ॥

सत्यधर्मीया — कारणेनैव मानुषस्तत्त्वेनावतरितस्तद्देशकालानुगुणं स्वावतारस्य प्रयोजनं भगवांश्चिन्तयामास लोकमनुकुर्वन् ॥ ६ ॥

हनिष्यामि बलं ह्येतद् भुवि भारं समाहितम् ।
मागधेन समानीतं वंश्यानां सर्वभूभृताम् ॥ ७ ॥

सत्यधर्मीया – भारं समाहितं तत्त्वेन स्थितं पश्यतां सर्वभूभृतांताननादृत्येत्यर्थः॥ ७ ॥

सुमनोरञ्जिनी — कारणेन भूभारहरणरूपनिमित्तेन । मानुषः मनुष्यलोकेऽवतीर्णः । तद्देशकालयोः तदानीन्तनदेशकालयोः अनुगुणं अनुकूलं योग्यमित्यर्थः । स्वावतारे प्रयोजनं भूभारपरिहाररूपं प्रयोजनम् । चिन्तयामास सङ्कल्पितवान् । तमेवाह ॥ **हनिष्यामीति** । भुवि समाहितं भारं भारभूतं एतद्बलं सैन्यं हनिष्यामि । सर्वभूभृतां पश्यतां सताम् । वश्यानां सर्वभूभुजामिति क्वचित्पाठः । वश्यानां स्ववश्यानां सर्वभूभुजां बलमित्यन्वयः ॥ ७ ॥

अक्षौहिणीभिः सङ्ख्यातं भटाश्वरथकुञ्जरैः ।
मागधोऽपि न हन्तव्यो भूयः कर्ता बलोद्यमम् ॥ ८ ॥

सत्यधर्मीया — कीदृग्बलमित्यत आह । अक्षौहिणीभिः सङ्ख्यातं भटाश्वरथकुञ्जरैः सङ्ख्यातं तदेव हनिष्यामि । मागधोऽपि मागधस्तु न हन्तव्यः । कुतस्तस्य न हननमित्यत आह – **भूयः कर्ता बलोद्यममिति** ॥ ८ ॥

सुमनोरञ्जिनी — तर्हि मागधोऽपि हन्तव्य इति नेत्याह ॥ **मागध इति** । भूयः पुनः बलोद्यमं सैन्योद्योगं कर्ता करिष्यति । तद्बलं पुनरपि हन्तव्यमिति भावः ॥ ८ ॥

एतदर्थोऽवतारोऽयं भूभारहरणाय मे ।
संरक्षणाय साधूनां कृतोऽन्येषां वधाय च ॥ ९ ॥

सत्यधर्मीया — अयमवतारो भूभारहरणाय साधूनां रक्षणायान्येषां बलादीनां सकाशाद्वधाय च मे मया कृत इतीदानीमेतदर्थ एतस्य जरासन्धस्यार्थो निवृत्तिस्त्याग इति यावत् ॥९॥

सुमनोरञ्जिनी — कुत एवं कर्तव्यमित्यत आह ॥ **एतदिति** । चोऽवधारणे । एतदर्थ एवावतार इति सम्बन्धः । किमेतदित्यत उक्तम् ॥ **भूभारेति** । किं तद्भूभारहरणं नामेत्यतः स्पष्टयति ॥ **अन्येषामिति** । साधुभ्योऽन्येषाम् ॥ ९ ॥

अन्योऽपि धर्मरक्षायै देहः सम्भ्रियते मया ।
विरामायाप्यधर्मस्य काले प्रभवतः क्वचित् ॥ १० ॥

सत्यधर्मीया — अन्योऽपि वराहादिरपि देहो मया संभ्रियते । क्वचित्प्रभवतः कालेऽधर्मस्य विरामाय विनाशाय देहो व्यासादिदेहो भ्रियते ॥ १० ॥

सुमनोरञ्जिनी — न केवलमयमेवावतारो भूभारहरणाद्यर्थः किं तु अन्योऽपि देहः वराहादिः । काले स्वकाले । प्रभवतः वर्धमानस्य अधर्मस्य विरामाय विनाशाय ॥ १० ॥

एवं ध्यायति गोविन्दे मगधाधिपतिर्बली ।
मधुरां सवनोद्यानां रुरोध बहुसैनिकः ॥ ११ ॥

सत्यधर्मीया — बहवः सैनिकाः सेनायां समवेता यस्य सः ॥ ११ ॥

सुमनोरञ्जिनी — उद्यानानि राज्ञां क्रीडावनानि । वनानि साधारणानि । बहवः सैनिकाः सेनारक्षकाः यस्य सः । सेनारक्षाश्च सैनिका इत्यमरः ॥ ११ ॥

कलिङ्गश्चेकितानश्च दन्तवक्रविडूरथौ ।
उल्मुखो वेणुदारी च साल्वश्चैद्यश्च दुर्मतिः ॥ १२ ॥

सत्यधर्मीया — दुर्मतिरिति कलिङ्गादिविशेषणम् ॥ १२ ॥

सुमनोरञ्जिनी — दुर्मतिः चैद्य इति सामानाधिकरण्यम् ॥ १२ ॥

पूर्वद्वारं समासाद्य रुरुधुर्मागधाज्ञया ।
विन्दानुविन्दावावन्त्यौ विराटो दरदस्तथा ॥ १३ ॥

सत्यधर्मीया — विराटादयस्तु तत्पराजिता इति तन्निघ्नाः ॥ १३ ॥

सुमनोरञ्जिनी — आवन्त्यौ अवन्तीपुरीशौ ॥ १३ ॥

एकलव्यो बाह्लिकश्च तथा पञ्चजनेश्वरः ।
रुरुधुर्दक्षिणद्वारं पौण्ड्रकश्च महाबलः ॥ १४ ॥

सत्यधर्मीया — पौण्ड्रको वासुदेवः ॥१४॥

युधामन्युर्बृहत्क्षत्रः शल्यो भूरिश्रवास्तथा ।
उत्तमौजाश्च रुग्मी च द्रुमश्चैव सुदक्षिणः ॥ १५ ॥

सत्यधर्मीया — बृहत्क्षत्रस्तन्नामा ॥ १५ ॥

एते नियुक्ता राजानो जरासन्धेन जयद्रथः ।
पश्चिमद्वारमासाद्य रुरुधुर्मधुरां पुरीम् ॥ १६ ॥

सत्यधर्मीया — नियुक्ता आज्ञप्ताः ॥ १६ ॥

द्रुपदः शिशुपालश्च त्रिगर्तोऽथ भारत ।
शुकनिः सोमदत्तश्च कुलिन्दश्च महाबलः ॥ १७ ॥

सत्यधर्मीया — कुलिन्दो महाबल इति योग्यान्वयि ॥ १७ ॥

जरासन्धेन सहिताः सर्वे मदबलान्विताः ।
उत्तरद्वारमासाद्य रुरुधुर्भरतर्षभ ॥ १८ ॥

सत्यधर्मीया — मदश्च बलं च ताभ्यामन्विताः ॥ १८ ॥

सुमनोरञ्जिनी — मदबलाभ्यामन्विताः ॥ १८ ॥

ते निरुध्य चतुर्द्वाराण्युद्वेलाम्भोधिसन्निभाः ।
सिंहनादं प्रकुर्वन्तो दध्मुः शङ्खाननेकशः ॥ १९ ॥

सत्यधर्मीया — चतुर्द्वाराण्येवं गतम् । अनेकश इति प्रथमाबहुवचनान्तं द्वितीयाबहुवचनान्तं च सत्त इत्यस्य शङ्खानां च विशेषणम् ॥ १९ ॥

सुमनोरञ्जिनी — उद्वेलः सीमामतिक्रान्तो योंऽभोधिस्तत्सन्निभाः ॥ १९ ॥

क्ष्वेलन्तो युद्धसन्नद्धा जघ्नुर्भेरीः सहस्रशः ॥ २० ॥

सत्यधर्मीया — क्ष्वेलन्तः सिंहनादं कुर्वन्तः ॥ २० ॥

सुमनोरञ्जिनी — क्ष्वेलंतः उच्चध्वनिं कुर्वन्तः । क्ष्वेडः कर्णामयेशब्द इति विश्वः ॥ २० ॥

तद् वीरभूपालकदम्बजृम्भितं युगावसानार्णवघूर्णितोपमम् ।
निशम्य कृष्णो न चचाल चेतसा सृगालघोषं मृगराडिवोद्धतः ॥ २१ ॥

सत्यधर्मीया — वीराश्च ते भूपालाश्च तेषां कदम्बः सङ्घस्तस्य जृम्भितमास्फोटजं शब्दम् । जृम्भितं करणे स्त्रीणामीहास्फुटितयोरपीति विश्वः । युगावसानस्य प्रलयस्य यद्घूर्णितं ध्वनिविशेषस्तेनोपमा यस्य तत् । उद्धतो मृगराट् सृगालानां गोमायूनां घोषं निशम्येव कृष्णो निशम्य चेतसा न चचाल ॥ २१ ॥

सुमनोरञ्जिनी — ते च ते वीराः आरब्धान्तगामिनो भूपालास्तेषां कदंबेन समूहेन जृम्भितं वर्धितम् । युगावसाने प्रलये अर्णवस्य यत् घूर्णितं प्रचलनेन जायमानो घोषः तस्य उपमा सादृश्यं यस्य तं घोषं निशम्य कृष्णो न चचाल मनश्चांचल्यं नाप । सृगालघोषं श्रुत्वा मृगराट् सिंह इव ॥ २१ ॥

एतस्मिन्नेव काले तु गगनात् सूर्यवर्चसौ ।
रथावुपस्थितौ सद्यः ससूतौ सपरिच्छदौ ॥ २२ ॥

सत्यधर्मीया — सपरिच्छदौ सोपस्करणौ ॥ २२ ॥

सुमनोरञ्जिनी — उपस्थितौ समीपं प्राप्तौ । कीदृशौ । सूताभ्यां सहितौ । सपरिच्छदौ पताकाद्युपस्करसहितौ ॥ २२ ॥

आयुधानि च दिव्यानि पुराणानि यदृच्छया ।
चक्रं सुदर्शनं घोरं सहस्रारं मनोरमम् ॥ २३ ॥

सत्यधर्मीया — सुदर्शनसहस्रारशब्दौ यौगिकौ । सु शोभनं दर्शनं यस्य तत् । सहस्रमराणि दलानि यस्य तत् । घोरं रिपूणां, मनोरमं साधूनाम् ॥ २३ ॥

सुमनोरञ्जिनी — आयुधान्यपि उपस्थितानि । कान्यायुधानीत्यतस्तान्याह ॥ **चक्रमिति** । सुदर्शनं तन्नामकं घोरं रिपूणां, मनोरमं स्वीयानाम् । सहस्रसङ्ख्याः अराः दलानि यस्य तत् ॥२३॥

गदा कौमोदकी गुर्वी नाम्ना कौमोदकी शुभा ।
त्रिनतं कार्मुकश्रेष्ठं शार्ङ्गसञ्ज्ञं गुणान्वितम् ॥ २४ ॥

सत्यधर्मीया — कुमोदकस्य हरेरियं कौमोदकी नाम्ना च कौमोदकी गुर्वी गदा । शुभा सताम् । त्रिषु भागेषु कोट्योर्मध्ये चेति नतम् । शार्ङ्गेति सञ्ज्ञा यस्य तत् । गुणेन ज्ययाऽन्वितं कार्मुकश्रेष्ठम् ॥ २४ ॥

सुमनोरञ्जिनी — कौमौदकी सन्तोषकरी । कौ मह्यां मोदको नारायणः तत्सम्बन्धिनी वा । त्रिनतम् । त्रिषु स्थानेषु मध्ये कोटिद्वये च नतं वक्रम् । गुणेन मौर्व्या अन्वितम् । कार्मुकश्रेष्ठं धनुःश्रेष्ठम् ॥ २४ ॥

तीक्ष्णधारः शितमुखः खड्गो नन्दकसञ्ज्ञितः ।
लघू शरचितौ रम्यौ तूणी चाक्षयसायकौ ॥ २५ ॥

सत्यधर्मीया — तीक्ष्णा धारा यस्य सः । शितं निशितं मुखं यस्य सः । नन्दकसञ्ज्ञितः खड्गः । शरचितौ शरैर्नालैः पुङ्खैरिति यावच्चितौ सम्बद्धौ । बाणस्त्वयोमयः प्रोक्तः शरो नालोऽस्य कीर्तित इति बृहद्भाष्योक्तेः । तौ चैवम्भूतावित्याह – **अक्षयसायकाविति ।** अक्षयाः सायका ययोस्तौ ॥ २५ ॥

सुमनोरञ्जिनी – तीक्ष्णा धारा यस्य सः । शितं तीक्ष्णं मुखं अग्रं यस्य सः । शरैः चितौ पूर्णौ । इतरतूणीरवन्नेत्याह । अक्षयाः सायकाः ययोस्ताविति ॥ २५ ॥

तुरगाः सैन्यसुग्रीवमेघपुष्पबलाहकाः ।
हलं च बलभद्रस्य मुसलं च दृढं गुरु ॥ २६ ॥

सत्यधर्मीया — शैब्येत्यपि केचित्पठन्ति । दृढं गुर्विति हलमुसलयोर्विशेषणम् । कुसलं मुसलं तु स्यादिति विश्वः ॥ २६ ॥

सुमनोरञ्जिनी — शैब्यः सुग्रीवः मेघपुष्पः बलाहक इति सञ्ज्ञाः । तुरगाः शीघ्रगामिनोऽश्वाः । मुसलं दृढं स्थूलम् । शक्ते स्थूले त्रिषु दृढमित्यमरः ॥ २६ ॥

इत्येतान्यायुधान्याजौ गगनादागतानि सः ।
दृष्ट्वा राजन् हृषीकेशः सङ्कर्षणमथाब्रवीत् ॥ २७ ॥

सत्यधर्मीया — गगनादागतानि स्वयम् । स कृष्णोऽथ सङ्कर्षणमब्रवीत् ॥ २७ ॥

सुमनोरञ्जिनी — आयुधानि । बहुवचनमाद्यर्थे । आयुधादीनि । युद्धसाधनानीति वा । मध्येऽश्वकथनात् । आजौ रणे प्रस्तुते सति । रणार्थमिति वा ॥ २७ ॥

पश्यार्य व्यसनं प्राप्तं यदूनां त्वावतां प्रभो ।
एष ते रथ आयातो दयितान्यायुधानि च ॥ २८ ॥

सत्यधर्मीया — हे आर्य अग्रज ! त्वावतां त्वद्युक्तानां त्वत्स्वामिकानामिति यावत् । आद्यत्वावान्त्मनेत्यृग्भाष्ये त्वद्वान् । टीकायां त्वत्स्वामिक इत्युक्तेः । युष्मदोर्मपर्यन्तस्य प्रत्ययोत्तरपदयोश्चेति त्वादेशे दृग्दृशवतुष्वेव विहितेऽपि चान्मतुप्यपि आसर्वनाम्न इति दकारस्यात्वे त्वमस्यास्तीति मतुपो मस्य झञ इति वत्वे च त्वावानिति रूपं ज्ञेयम् । दयितानि प्रीतिपात्राणि । आयुधानि हलमुसलादीनि ॥ २८ ॥

सुमनोरञ्जिनी — हे आर्य ! त्वावतां त्वमेव अवन् रक्षको येषां ते त्वावन्तः तेषाम् । त्वन्नाथानामिति यावत् । त्वावतामिति प्रयोगश्छान्दसः । दयितानि इष्टानि ॥ २८ ॥

यानमास्थाय जह्येतद् व्यसनात् स्वान् समुद्धर ।
एतदर्थं हि नौ जन्म साधूनामीश सत्कृतम् ॥ २९ ॥

सत्यधर्मीया — एतज्जरासन्धसैन्यम् । स्वान्व्यसनात्कष्टात् । साधूनां साधुभिः सत्कृतम् । कर्तृकर्मणोरिति कर्तरि षष्ठी । ईशेति बलसम्बोधनम् ॥ २९ ॥

सुमनोरञ्जिनी — यानं रथम् । एतत् जरासन्धसैन्यम् । जहि । स्वान् स्वीयान् यदून् व्यसनात् समुद्धर । यत् साधूनां सत्कृतं सत्कारः । एतदर्थं हि एतदर्थमेव । नौ आवयोर्जन्म ॥ २९ ॥

त्रयोविंशत्यनीकानां भूमेर्भारमपाकुरु ।
एवं सम्मन्त्र्य दाशार्हौ दंशितौ रथिनां वरौ ॥ ३० ॥

सत्यधर्मीया — अत्रानीकशब्दोऽक्षौहिणीपरः । यद्वा त्रयोविंशतिपदेन तावदक्षौहिणग्रहोऽनीकशब्दः सेनावाची । तेषां भारं सङ्घमपाकुरु । दंशितौ कवचखचिताङ्गौ ॥३०॥

सुमनोरञ्जिनी — त्रयोविंशत्यनीकानां त्रयोविंशदक्षोहिणीसैन्यानां सकाशात् । यो भूमेः भारः तम् अपाकुरु परिहर । दाशार्हौ दशार्हकुलोत्पन्नौ रामकृष्णौ संमन्त्र्य सम्भाष्य । दंशितौ सन्नद्धौ ॥ ३० ॥

दंशितैश्च यदुश्रेष्ठैर्बहुभिश्च समन्वितौ ।
निर्जग्मतुः पुरवराद् बलेनाल्पीयसा नृप ॥ ३१ ॥

सत्यधर्मीया — अल्पीयसा बलेन गणनतोऽल्पतमेन ॥ ३१ ॥

सुमनोरञ्जिनी — अल्पीयसा मागधबलापेक्षया अल्पसङ्ख्येन बलेन सैन्येन निर्जग्मतुः ॥ ३१ ॥

निर्गत्य सदनात् कृष्णो वृष्णीनाहूय सर्वशः ।
आज्ञापयामास तूर्णं चतुर्द्वारस्य पालने ॥ ३२ ॥

सत्यधर्मीया — सदनात्समादितश्चतुर्द्वारस्य समाहारः ॥ ३२ ॥

सुमनोरञ्जिनी — सर्वशः सर्वान् चतुर्द्वारस्य द्वारचतुष्टयस्य ॥ ३२ ॥

वसुदेवं च निशठं कृतवर्माणमुद्धवम् ।
कृष्णो निर्यातयामास पूर्वद्वारेण भारत ॥ ३३ ॥

सत्यधर्मीया — वसुदेवं पितरं निर्यातयामास गमयामास ॥ ३३ ॥

सुमनोरञ्जिनी — निर्यातयामास निष्क्रान्तानकरोत् ॥ ३३ ॥

उग्रसेनं सुदामानं पृथुं विपृथुमेव च ।
हरिर्निर्यातयामास द्वारेणानुत्तरेण वै ॥ ३४ ॥

सत्यधर्मीया — अनुत्तरेणोत्तरभिन्नेन सामुख्येन तत्सदृशेन दक्षिणेनेति यावत् ॥

सुमनोरञ्जिनी — अनुत्तरेण दक्षिणेन ॥ ३४ ॥

सात्यकिं च गदं चैव प्रसेनं गान्दिनीसुतम् ।
हरिः प्रतीचीद्वारेण प्रेषयामास दुर्मदान् ॥ ३५ ॥

सत्यधर्मीया — दुर्मदान् रणकर्मणि ॥ ३५ ॥

सुमनोरञ्जिनी — गान्दिनीसुतमक्रूरम् । प्रतीचीद्वारेण प्रतीच्यां दिशि यद्वारं तेन ॥

गोविन्दस्तु महातेजाः स्वयं दारुकसारथिः ।
आत्ताभीष्टप्रहरणः सङ्कर्षणसहायवान् ॥ ३६ ॥

सत्यधर्मीया — सङ्कर्षणश्चासौ सहायश्च तद्वान् ॥ ३६ ॥

सुमनोरञ्जिनी — दारुक एव सारथिर्यस्य सः । आत्तानि स्वीकृतानि अभीष्टानि प्रहरणानि सुदर्शनाद्यायुधानि येन सः ॥ ३६ ॥

उत्तरेण विनिर्गम्य द्वारेण जगदीश्वरः ।
शङ्खं दध्मौ महाप्राणं दैत्यदानवभीषणम् ।
आह दारुकमासीनं रथाग्रे माधवः स्मयन् ॥३७॥

सत्यधर्मीया — महाप्राणं बहुलबलं यथा तथा ॥ ३७ ॥

सुमनोरञ्जिनी — विनिर्गम्य निष्क्रम्य । महाप्राणं महाघोषम् ॥ ३७ ॥

श्रीभगवानुवाच –

रथं वाहय धर्मज्ञ यत्र तौ चैद्यमागधौ ।
तर्पयामि नृपान् सर्वान् सायकैर्युद्धदुर्मदान् ॥ ३८ ॥

सत्यधर्मीया — धर्मज्ञ सारथिधर्ममर्मज्ञ । आवृत्त्या हयधर्मज्ञेति वा । पशुपालेन शिशुपालपुर आलपनं मागधादपि न बलिष्ठतया किन्तु स्वेनैवान्ततो गत्वा संहार्य त्वं निमित्तीकृत्येति बोध्यम् । तौ यत्र वर्तेते तत्र रथं वाहय ॥ ३८ ॥

सुमनोरञ्जिनी — रथाग्रे आसीनमुपविष्टम् । वाहय पुरतश्चालय । चैद्यः शिशुपालः । युद्धे दुष्टो मदः हर्षो गर्वो वा येषां तान् । शरैः तर्पयामि अलम्बुद्धिं जनयामि ॥ ३८ ॥

श्रीशुक उवाच –

इत्युक्तो दारुकस्तेन हयांस्तूर्णमचोदयत् ।
व्यनदत् सिंहनादं च गोविन्दः परवीरहा ॥ ३९ ॥

सत्यधर्मीया — परवीरहा गोविन्दः सिंहनादं व्यनदच्चकार ॥ ३९ ॥

सुमनोरञ्जिनी — सिंहनादं व्यनदत् अकरोत् ॥ ३९ ॥

शङ्खमाध्माय रामोऽपि सिंहनादं व्यनीनदत् ।
ततोऽभूत् परसैन्यानां हृदि चिन्ता सवेपथुः ॥४०॥

सत्यधर्मीया — ततोऽद्वन्द्वशाङ्खद्वन्द्वशब्दश्रवणसमनन्तरं सवेपथुर्वेपथुना कम्पेन सहिता सा चिन्ता परसैन्यानां हृद्यभूत् ॥ ४० ॥

सुमनोरञ्जिनी — ततः सिंहनादात् । परसैन्यानां शत्रुसैन्यानाम् । सवेपथुः कम्पसहिता चिन्ता अभूत् ॥ ४०॥

पूर्वद्वारि नृपैः सार्द्धं यदूनां कदनं महत् ।
आसीच्चतुर्भिरष्टानां तदद्भुतमिवाभवत् ॥ ४१ ॥

सत्यधर्मीया — अल्पीयसा बलेनेत्युक्तं तत्प्रकारं जल्पति । चतुर्भिर्वसुदेवादिभिरष्टानां कलिङ्गादिकानां तदद्भुतमिवाभवदिति ॥ ४१ ॥

सुमनोरञ्जिनी — यदूनां नृपैः सार्धं कदनं युद्धम् अभूत् । अत्रापि चतुर्भिः

वसुदेवादिभिः साकं अष्टानां कलिङ्गाद्यष्टसङ्ख्यानां यत्कदनमासीत् तदद्भुतमिव अदृष्टाश्रुतं युद्धमिव ॥ ४१ ॥

दक्षिणद्वार्यपि तथा गोविन्दाध्मातचेतसाम् ।
आसीद् यदूनां कदनं राजन्यकटकेन वै ॥ ४२ ॥

सत्यधर्मीया — तथा दक्षिणद्वारि उग्रसेनादिभिश्चतुर्भिर्विन्दादिपौण्ड्रकान्तानामष्टानां तथेतरेण राजन्यकटकेन । सैन्येऽपि कटकोऽस्त्रियामित्यभिधानम् । गोविन्दस्याध्मातेन शङ्खध्मानेनेन चेतो मनो युद्धे येषां तेषां यदूनां कदनं युद्धम् ॥ ४२ ॥

अपरद्वार्यपि तथा यदूनां दृढधन्विनाम् ।
आसीद् राजसमाजेन सङ्गमो रोमहर्षणः ॥ ४३ ॥

सत्यधर्मीया — अपरद्वारि पश्चिमद्वारि सात्यक्यादिभिश्चतुर्भिर्युधामन्वादि सुदक्षिणान्तानां राजसमाजेनेतरेण रणः ॥ ४३ ॥

सुमनोरञ्जिनी — अपरद्वारि पश्चिमद्वारीत्यर्थः । दृढाः बलिष्ठाश्च धन्विनश्च । तेषां यदूनां राजसमाजेन पौण्ड्रकादिराजसमुदायेन । तथा पूर्वद्वारीव अष्टानां चतुर्भिरित्यर्थः ॥४३॥

ते हन्यमाना यदवो राजभिः शक्रविक्रमैः ।
न चेलुः सङ्गराद् राजन् लोकद्वयजिगीषवः ॥ ४४ ॥

सत्यधर्मीया — लोकद्वयजिगीषवः । साम्राज्यं वा स्वाराज्यं वेति लोकद्वयं जिगीषवो जेतुमिच्छवः न लोकेति षष्ठीनिषेधात् ॥ ४४ ॥

सुमनोरञ्जिनी — सङ्गरात् युद्धात् । कुतः । यतो लोकद्वयं इहलोकं परलोकं जिगीषवः जेतुमिच्छावन्तः । (अत्र जिधातुः सकृत्प्रयुक्तोऽपि तन्त्रेण जयप्राप्तिं चाह । लोकद्वयमपि पराजयितुमिच्छन्तो वा) ॥ ४४ ॥

तत्र यादवशार्दूलो विष्णुस्त्रैलोक्यवल्लभः ।
आससाद महाघोरौ यत्र तौ चैद्यमागधौ ॥ ४५ ॥

सत्यधर्मीया — यादवेषु श्रेष्ठो यादवशार्दूलः ॥ ४५ ॥

सुमनोरञ्जिनी — यादवशार्दूलः यादवानां श्रेष्ठः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचका इत्यभिधानात् । विष्णुः कृष्णः रामेण सहेति शेषः । यत्र चैद्यमागधौ तत्रेत्यर्थः ॥ ४५ ॥

जरासुतस्तावभिवीक्ष्य माधवौ महाबलौघेन बलीयसाऽऽवृणोत् ।
ससैन्ययानध्वजवाजिसारथी सूर्यानलौ वायुरिवाभ्ररेणुभिः ॥ ४६ ॥

सत्यधर्मीया — तौ माधवौ मधुकुलोत्पन्नाविति । यानध्वजा रथकेतवः । अभ्रै रेणुभिश्च वायुः सूर्यानलौ विवस्वद्विभावसू । आवृणोत् यथावृणोत् ॥ ४६ ॥

सुमनोरञ्जिनी — माधवौ मधुकुलोत्पन्नौ । सैन्येन, यानैः रथैः शिबिकाभिश्च, ध्वजैः, वाजिभिः अश्वैः सारथिभ्यां च सहितौ । तौ रामकृष्णौ । बलीयसा सैन्येनावृणोत् । सूर्यानलौ वायुरिव । वायुरभ्रैः सूर्यम् । रेणुभिश्चाग्निमिवेत्यर्थः ॥ ४६ ॥

सुपर्णतालध्वजचिह्नितौ रथौ विलक्षयन्त्यो हरिरामयोर्मृधे ।
स्त्रियः पुराट्टालकहर्म्यगोपुरं समाश्रिताः सम्मुमुहुः शुचार्पिताः ॥ ४७ ॥

सत्यधर्मीया — हरिरामयोः सुपर्णतालध्वजचिन्हितौ सुपर्णश्च तालश्च तौ ध्वजौ च केतू ताभ्यां चिन्हितौ रथौ मृधे विलक्षयन्त्यः पुराट्टालकहर्म्यगोपुरं समाश्रिताः स्त्रियः शुचार्पिताः सम्मुमुहुः ॥ ४७ ॥

सुमनोरञ्जिनी — सुपर्णो गरुडः । तालो वृक्षविशेषः ताभ्यां सहितौ यौ ध्वजौ ताभ्यां चिह्नितौ । हरिरामयोः रथौ । मृधे युद्धे विलक्षयन्त्यः पश्यन्त्यः । अट्टालकं गृहोपरिभागे इष्टिकोपरचितचतुष्कोणगृहम् । हर्म्यः धनिनां निवासस्थानम् । गोपुरं पुरद्वारम् । एतेषां समूहमित्यर्थः । समाश्रिताः स्त्रियः, शुचा 'इमो द्वौ शत्रवो बहवः' इति धिया समुन्नतशोकेन अर्दिताः पीडिताः । अलक्षयन्त्य इति पाठे अपश्यन्त्य इत्यर्थः शोक-कारणमदर्शनमेवेति भावः ॥ ४७ ॥

हरिः परानीकपयोमुचां मुहुः शिलीमुखात्युल्बणवर्षपीडितम् ।
स्वसैन्यमालोक्य सुरासुरार्चितं व्यघूर्णयच्छार्ङ्गशरासनोत्तमम् ॥ ४८ ॥

सत्यधर्मीया — परेषामनीकानि तान्येव पयोमुचो मेघास्तेषां तत्सम्बन्धिशिलीमुखा अत्युल्बणं वर्षं तेन पीडितं स्वसैन्यमालोक्य शरासनोत्तमं शार्ङ्गं शृङ्गविकृततया तन्नामकं धनुः । तन्महिमानमाह – **सुरासुरार्चितमिति** । व्यघूर्णयद्विस्फारयमास ॥ ४८ ॥

सुमनोरञ्जिनी — हरिः श्रीकृष्णः । परानीकानि शत्रुसैन्यान्येव पयोमुचो मेघाः तेषां शिलीमुखाः बाणाः । खलबाणौ शिलीमुखा इत्यमरः । तेषां वर्षेण वृष्ट्या पीडितं स्वसैन्यमालोक्य । सुरासुरैरप्यर्चितं श्लाघितं शार्ङ्गसञ्ज्ञकं शरासनोत्तमं धनुःश्रेष्ठम् । व्यघूर्णयत् प्रकृष्टचलनयुक्तमकरोत् ॥ ४८ ॥

गृह्णन् निषङ्गादथ सन्दधच्छरान् विकृष्य मुञ्चञ्छितबाणसञ्चयम् ।
निघ्नन् रथान् कुञ्जरवाजियूथपान् निरन्तरं यद्वदलातचक्रम् ॥ ४९ ॥

सत्यधर्मीया — निषङ्गादिषुधेः शरान्नाराचान् गृह्णन् । अथ सन्दधच्छितबाणसञ्चयं विकृष्य मुञ्चन् मुक्तेन तेन रथान्कुञ्जरवाजियूथपान्निघ्नंश्च । अलातचक्रमुल्मुकमण्डलं यद्वत्तद्वन्निरन्तरं यथा तथा भगवानदृश्यत ॥४९॥

सुमनोरञ्जिनी — तत्प्रकारमेवाह – **गृह्णन्निति** । निषङ्गात् तूणीरात् । शरान् गृह्णन् । सन्दधत् धनुषि सन्धदन् । विकृष्य धनुर्ज्यां विकृष्य । शितबाणसञ्चयं निशित-बाणसमूहं मुञ्चन्, रथादीन् निघ्नन्, यद्वत् यथा । अलाते उल्मुके भ्राम्यमाणे यत्तेजोमण्डलं वलयाकारेण दृश्यते तदलातचक्रम् । तद्वत् निरन्तरम् अन्तरदर्शनं यथा न भवति तथा व्यघूर्णयदिति पूर्वेणान्वयः ॥ ४९ ॥

ततः शशाङ्काकृतिपाञ्चजन्यं महारवं दैत्यकुलापचारम् ।
मुखे निधायाशु पुपूर यादवानाश्वासयन् क्षत्रियकूटघट्टितान् ॥ ५० ॥

सत्यधर्मीया — शशाङ्काकृतिपाञ्चजन्यं शशाङ्कस्याकृती रूपमिव रूपं यस्य स चासौ पाञ्चजन्यश्च तम् । आकृतिः कथिता रूप इति विश्वः । दैत्यकुलस्य गर्भनिर्भेद-

नेनापचारो नाशो येन तम् । योग्यतया स्वावन्वयीदम् । दैत्यकुलापचारमहारवोपेतमिति निर्गलितोऽर्थः । मुखे तदूद्धारि निधायाशु यादवानाश्वासयन् सबलान् कुर्वन् क्षत्रियकूटेन समूहेन घट्टितान् पुपूर पूरयामास । पपारेति वक्तव्ये पुपूरेत्यार्षः प्रयोगः ॥ ५० ॥

सुमनोरञ्जिनी —— शशाङ्काकृतिः शशाङ्कस्य चन्द्रस्य आकृतिरिव आकृतिर्यस्य सः । चन्द्रवत् शुभ्र इत्यर्थः । स चासौ पाञ्चजन्यश्च तम् । दैत्यकुलस्य अपचारो नाशो यस्मात्तमिति पदरत्नावल्याम् । पुपूर श्वासेन पूरयामास । किमर्थमित्यत उक्तम् ॥ **यादवानिति** । क्षत्रियकूटेन क्षत्रियसमुदायेन । घटितान् युद्धे व्यासक्तान् यदून् आश्वासयन् समाधास्यन् ॥ ५० ॥

नृपास्तदाकर्ण्य तु कर्णनिष्ठुरं क्रमेण निर्भिण्णहृदो बभूविरे ।
यदुप्रवीराश्च समुद्यतायुधा रणे नृपान् जघ्नुरनीकसंयुताः ॥ ५१ ॥

सत्यधर्मीया —— नृपा रिपुनृपाः कर्णनिष्ठुरं स्वश्रोत्रकठोरमाकर्ण्य क्रमेण निर्भिन्नं हृदयं येषां ते तथा । बभूविरे बभूवुः । निर्भिन्नहृदः कायानिति शेषः । बभूविरे प्रापुः । भू प्राप्तावात्मनेपदीति स्मरणादिति वा । यदुवीराश्च तदाकर्ण्येति समुच्चायकः । समुद्यतान्यायुधानि यैस्ते रणेऽनीकसंयुताः सेनासमेताः नृपाञ्जघ्नुः ॥ ५१ ॥

सुमनोरञ्जिनी —— कर्णनिष्ठुरं कर्णकठोरम् । क्रमेण यथायोग्यम् ॥ ५१ ॥

ततश्चतुर्द्वारगतान् महीपतीन् यदुप्रवीराः परिभूय सर्वशः ।
चक्रुः शरौघैः सहसैकवाहिन आप्यायिताः शार्ङ्गरवेण शौरिणा ॥ ५२ ॥

सत्यधर्मीया —— शौरिणा कर्त्रा शार्ङ्गरवेण करणेनाप्यायिताः समेधिता यदुप्रवीरा यादवश्रेष्ठाः । यदस्ति तत उच्चत्वाद्यदुरित्यृग्भाष्योक्तेर्यदुर्हरिः स प्रवीरो येषां त इति वा । चतुर्द्वारगतान् महीपतीन् सर्वशः सर्वान् परिभूय पराभाव्य शरौघैः सहसैकवाहिन एकश्चासौ वाहश्च सोऽस्त्येषामित्येकवाहिन स्वरक्षकपृष्ठविहीनांश्चक्रुः ॥ ५२ ॥

सुमनोरञ्जिनी —— ततः शौरिणा कृष्णेन । शार्ङ्गरवेणाप्यायिताः आप्यायनं सन्तोषं प्रापिताः यदुप्रवीराः परिभूय पराजितान् कृत्वा । एकवाहिनः चक्रुः एकैकशो वहन्ति

गच्छन्तीति एकवाहिनः पलायितानिति यावत् । एकैकवाहनयुक्तानिति वा । सैन्यहीनानिति यावत् ॥ ५२ ॥

ततो हरिं चैद्यपतिर्मण्डलीकृतकार्मुकः ।
भर्त्सयन् कृष्ण कृष्णेति तिष्ठ तिष्ठेति चाब्रवीत् ॥ ५३ ॥

सत्यधर्मीया — कृष्ण कृष्ण तिष्ठेति भर्त्सयन्नब्रवीत् ॥ ५३ ॥

सुमनोरञ्जिनी — चैद्यपतिः शिशुपालः । मण्डलीकृतकार्मुकः । कर्णान्तमाकर्षणे कार्मुकं मण्डलाकारं भवति तथाकृतकार्मुक इत्यर्थः ॥ ५३ ॥

तमभ्यधावद् गोविन्दो विमुञ्चन् सायकान् बहून् ।
मण्डलीकृतकोदण्डस्तैलधौताञ्छितान् शरान् ॥ ५४ ॥

सत्यधर्मीया — मण्डलीकृतकोदण्डस्तैलधौतान् शितान्निशितान् सायकान् शरान् बहून् विमुञ्चंस्तं गोविन्दोऽभ्यधावत् । आसायकं मघवा दत्तवज्रमित्यृग्भाष्ये सायङ्करं लयकृत इति टीकायां च सायक इत्यपि वज्रनाम । ततः पुनरुक्तिपरिहाराय निर्वक्ति ॥ **सायङ्करमिति** । सायमिति षोन्तकर्मणीत्यस्य रूपम् । सायमन्तं करोतीत्युक्तेः ॥ ५४ ॥

सुमनोरञ्जिनी — अभ्यधावत् अभिमुखमाधावत् । तैलेन धौतान् अपनीतमलान् ॥ ५४ ॥

ततः पञ्च शरान् घोरानादाय दमघोषजः ।
चतुर्भिस्तुरगानाशु विव्याधैकेन सारथिम् ॥५५॥

सत्यधर्मीया — चतुर्भिः शरैश्चतुरस्तुरगान् ॥ ५५ ॥

सुमनोरञ्जिनी — दमघोषजः शिशुपालः ॥ ५५ ॥

भूयो दशाशु सन्धाय विव्याध मधुसूदनम् ।
व्यनदत् सिंहनादं च तदद्भुतमिवाभवत् ॥ ५६ ॥

सत्यधर्मीया — दश शरान् ॥ ५६ ॥

सुमनोरञ्जिनी — भूयः पुनरपि सिंहनादं व्यनदत् सिंहनादं चकार ॥ ५६ ॥

ततस्तमाह गोविन्दः साधु साध्विति पूजयन् ।
भो भो चैद्य महेष्वास वीरोऽसि बलवानसि ॥ ५७ ॥

सत्यधर्मीया — साधु साध्विति पूजयन् । भो भो चैद्य महेष्वास वीरोऽसि बलवांश्चासि । महेष्वासेत्युक्तौ धानुष्कतामात्रप्रतीतिः स्यादेकेनैवासीत्यनेनैव पूर्तौ वीरोऽसि बलवानिति चैकपद्येऽसिनापि बलवानसि वीरश्चासीत्यर्थविशेषं ध्वनयितुं पुनरसिपदं यथा समस्तं भवेच्च तथा समव्यदिति मन्तव्यम् ॥ ५७ ॥

अतो मे पश्य दुर्बुद्धे धानुष्मत्त्वं स्वयं रणे ।
इति ब्रुवति गोविन्दे राजानः सर्व एव ते ॥ ५८ ॥

सत्यधर्मीया — धनुष्मतो भावो धानुष्मत्त्वं तदेव धानुष्मत्त्वं मेऽपि स्वयं साक्षात् पश्य ॥ ५८ ॥

सुमनोरञ्जिनी — अतः एतदनन्तरम् । यतो वीरोऽसि अत इति वा । धानुष्मत्वं धनुर्धरोत्तमत्वम् ॥ ५८ ॥

विव्यधुर्निशितैर्बाणैर्यौगपद्येन माधवम् ।
तांस्तान् प्रत्येकशः कृष्णो विद्ध्वा पञ्चभिराशुगैः ॥ ५९ ॥

सत्यधर्मीया — यौगपद्येनैकदैव मिलित्वा । प्रत्येकश इत्याशुगैः पञ्चभिरित्यनेनान्वितं वीप्सासमर्थं भवति । तांस्तान् पञ्चभिः सायकैर्विद्ध्वा ॥ ५९ ॥

सुमनोरञ्जिनी — तांस्तान् राज्ञः । आशुगैः बाणैः ॥ ५९ ॥

सारथिं चतुरो वाहाननयत् यमसादनम् ।
त्रिभिस्त्रिभिः शरैर्भूयोऽप्येकैकं नृपतीन् रणे ॥ ६० ॥

सत्यधर्मीया — पञ्चकाशुगविनियोगं प्रपञ्चयति ।। **सारथिमिति** । एकैकं नृपतीं-स्त्रिभिस्त्रिभिः शरैः रणे ।। ६० ।।

सुमनोरञ्जिनी — वाहान् अश्वान् यमसादनं यमसदनम् । भूयः पुनरपि एकैकनृपतीन् । वक्ष आदिस्थलत्रये । त्रिभिस्त्रिभिः विव्याधेति सम्बन्धः ।। ६० ।।

वक्षस्यास्ये ललाटे च विव्याध यदुनन्दनः ।
ततश्च त्रिंशतां राज्ञां त्रिंशत्कार्मुकमाहवे ।। ६१ ।।

सत्यधर्मीया — त्रयाणां सायकानां काये निकाय्यमाह ।। **वक्षस्यास्ये ललाटे चेति ।** ततोऽनन्तरं त्रिंशतां तत्सङ्ख्याकानां राज्ञां त्रिंशत्कार्मुकं तत्सङ्ख्यं धनुः ।। ६१ ।।

सुमनोरञ्जिनी — त्रिंशत्सङ्ख्याकं कार्मुकं कार्मुकसमूहम् । आहवे युद्धे ।। ६१ ।।

त्रिंशद्भिः सायकैराशु चिच्छेद यदुपुङ्गवः ।
दमघोषसुतस्यापि धनुश्छित्त्वा त्रिभिः शरैः ।। ६२ ।।

सत्यधर्मीया — त्रिंशद्भिः सायकैस्त्रिंशद्राजमध्येऽसावपीति तद्धनुश्छित्वा त्रिभिः शरैः ।। ६२ ।।

ध्वजं च मुकुटच्छत्रे चकर्त प्रहसन्निव ।
ततो दश हरिर्भल्लान् शार्ङ्गे सन्धाय माधवः ।। ६३ ।।

सत्यधर्मीया — ध्वजं मुकुटच्छत्रे चकर्त । प्रहासस्तु मुकुटच्छेदवच्छिरच्छेदोऽपि कर्तुं शाक्यम् । किन्तु कालान्तरे भवत्वित्युपेक्षितमिति भावोऽवसेयः ।। ६३ ।।

सुमनोरञ्जिनी — मुकुटं च छत्रं च ते । चकर्त चिच्छेद । भल्लान् बाणविशेषान् ।।६३।।

आकर्णान्तं समाकृष्य चैद्यं विव्याध सङ्गरे ।
तेन राजन्यकटकं विभ्रान्तं शरताडितम् ।। ६४ ।।

सत्यधर्मीया — आकर्णान्तं कर्णप्रान्तपर्यन्तं तेन कृष्णेन शरताडितं राजन्यकटकं विभ्रान्तम् ।। ६४ ।।

सुमनोरञ्जिनी — आकर्णान्तं कर्णप्रान्तपर्यन्तम् । आकृष्य चैद्यं विव्याधेति सम्बन्धः । राजन्यकटकं राज्ञां सैन्यम् । तेन कृष्णेन । शरताडितं, विभ्रान्तं विकीर्णम् ॥ ६४ ॥

कालान्तमारुतोद्धूतशैलद्रुमलतोपमम् ।
त्रातारं नाध्यगच्छद् वै हताश्वरथसारथिः ॥ ६५ ॥

सत्यधर्मीया — शैलोपरि विद्यमानश्चासौ द्रुमश्च तस्मिन्विद्यमाना च सा लता वल्ली । कालान्तो हि प्रलयकालिको मारुतो मारुतोद्धूता च सा सा च तयोपमा यस्य तत् । हताश्वरथसारथिस्त्रातारं रक्षकं नाध्यगच्छन्नाप ॥ ६५ ॥

सुमनोरञ्जिनी — कालान्तमारुतेन प्रलयकालीनवायुना । उद्धूतानां इतस्ततः क्षिप्तानां शैलस्थद्रुमलतानामुपमा यस्य तत् । एवंभूतं स्वत्रातारं नाध्यगच्छदित्यन्वयः ॥ ६५ ॥

शरान् विमुञ्चन् जलजं च पूरयन् विष्फूर्जयन् कार्मुकमुग्रपौरुषः ।
विलोलयन् मागधसैन्यमाहवे निरन्तरं यद्वदलातचक्रम् ॥ ६६ ॥

सत्यधर्मीया — विष्फूर्जयन् टङ्कारयन् उग्रपौरुष उग्रान् प्रत्युग्रं पौरुषं यस्य सः ॥६६॥

सुमनोरञ्जिनी — कार्मुकं यद्वत् यथा अलातचक्रं निरन्तरं निच्छिद्रतया प्रकाशमानं तथा विस्फूर्जयन् प्रकाशयन् । मागधसैन्यं व्यलोकयत् ददर्श ॥ ६६ ॥

निर्भिन्नकुम्भाः करिणो निपेतुरनीकशोऽश्वाः शररुग्णकन्धराः ।
रथा हताश्वध्वजसूतनायकाः पदातयश्छिन्नभुजोरुकन्धराः ॥ ६७ ॥

सत्यधर्मीया — निर्भिन्नकुम्भा दलितशिरस्काः अनीकशः सङ्घशः शरै रुग्णा भग्नाः कन्धरा ग्रीवा येषां ते तथा । नायका रथिकाः पदातयः पत्तयः ॥ ६७ ॥

सुमनोरञ्जिनी — निर्भिन्नकुंभाः विदारितकुंभस्थलाः करिणः निपेतुः पतिताः । अश्वाः शरैः रुग्णकन्धराः कृन्तग्रीवाः सन्तः । अनीकशः समूहशः । छिन्नाः भुजाः ऊरवः कन्धराः ग्रीवाश्च येषां ते तथोक्ताः ॥ ६७ ॥

सञ्छिद्यमानद्विपदेभवाजिनामङ्गप्रसूताः शतशोऽसृगापगाः ।
भुजाहयः पूरुषशीर्षकच्छपा हतद्विपद्वीपहयग्रहाकुलाः ॥ ६८ ॥

सत्यधर्मीया —— सञ्छिद्यमानाश्चते द्विपदेभवाजिनश्च तेषां सेनाङ्गत्वादेकवद्भावे चैकैका व्यक्तिरित्यपि भायादतस्तमुद्रणं नादृतमिति मन्तव्यम् । अङ्गभङ्गप्रसूताः शतशोऽऽसृगापगा रुधिरसरितो विशेषकेन रणमण्डलस्य तदाऽपगासारूप्यमाह । भुजा एवाहयः सर्पा यासु ताः । पुरुषशीर्षाण्येव कच्छपाः कूर्मा यासु ताः । हता द्विपा एव द्वीपा गतम् । हया एव ग्रहा हतद्विपद्वीपैर्हयग्रहैश्चाकुला व्याप्ताः ॥ ६८ ॥

सुमनोरञ्जिनी —— सञ्छिद्यमानाः द्विपदाः मनुष्याः इभाः वाजिनश्च तेषामङ्गेभ्यः प्रसूताः असृगापगाः रुधिरनद्यः सङ्कर्षणेन प्रवर्तिता इति वक्ष्यमाणेनान्वयः । प्रसिद्धनदी-साम्यमाह ॥ **भुज इति** । भुजा एवाहयः सर्पाः यासु ताः । पुरुषाणां शीर्षाण्येव कच्छपाः कूर्माः यासु ताः । हताः द्विपा एव द्वीपाः अन्तर्वर्तिस्थलानि । हया एव ग्रहाः ग्राहाः नक्राः तैराकुलाः व्याप्ताः ॥ ६८ ॥

करोरुमीना नरकेशशैवला धनुस्तरङ्गायुधगुल्मसङ्कुलाः ।
आस्फूर्जितावृत्तभयानका महामणिप्रवेकाभरणाश्मशर्कराः ॥ ६९ ॥

सत्यधर्मीया —— करा एवोरवो मीना यासु ताः । नरकेशशैवला नराणां केशा एव शैवलानि जलाञ्चलानि यासु ताः । शैवलं पद्मकाष्ठेऽपि जलाञ्चल इति विश्वः । धनूंष्येव तरङ्गा यासु ताश्च ता आयुधान्येव गुल्मास्तैः सङ्कुलाः आस्फूर्जितैः ध्वनिविशेषैः आवृत्तै-र्भ्रमणैरन्यत्राम्भसां भ्रमैर्भयानका भीतिप्रदाः । महामणिप्रवेकाभरणाश्मशर्करा महामणिप्रवेका अत्युत्तममणय आभरणानि चाश्मानः शर्कराः क्षुद्रपाषाणाश्च यासु ताः । क्रमिकोऽन्वयः ॥ ६९ ॥

सुमनोरञ्जिनी —— कराः ऊरवश्च मीनाः नराणां केशा एव शैवलं यासु ताः । धनूंष्येव तरङ्गाः आयुधान्येव गुल्माः लताः तैः सङ्कुलाः । आस्फूर्जितैः नदीघोषैः आवर्तैः जलभ्रमैश्च भयानकाः । महामणीनां प्रवेका उत्तमाः आभरणानि च यथायथं अश्मानः शर्कराश्च यासु ताः ॥ ६९ ॥

प्रवर्तिता भीरुभयावहा मृधे मनस्विनां हर्षवहाः परस्परम् ।
विनिघ्नताऽरीन् मुसलेन दुर्मदान् सङ्कर्षणेनापरिमेयतेजसा ॥ ७० ॥

सत्यधर्मीया — भीरूणां भयावहा मनस्विनां धीराणां हर्षवहाः परस्परमरीनृते तथा मुसलेन दुर्मदानरीन्निघ्नता । अपरिमेयतेजसा बलेन मृधे प्रवर्तिता इत्यन्वयः । परस्परं कृष्णेन रामेणेति परस्परं वा ॥ ७० ॥

सुमनोरञ्जिनी — भीरूणां भयावहाः । मनस्विनां धीराणां परस्परं हर्षवहाः ॥७०॥

बलं तदङ्गार्णवदुर्गभैरवं दुरन्तपारं मगधेन्द्रपालितम् ।
क्षयं प्रणीतं वसुदेवपुत्रयोर्विक्रीडितं तज्जगदीशयोः परम् ॥ ७१ ॥

सत्यधर्मीया — अङ्ग हे राजन् । अर्णवदुर्गं भैरवं च तद्बलं दुरन्तपारं दुःशब्दः प्रतिषेधे । दुर्न विद्यतेऽन्तेऽपि पारो यस्य तत् । अन्तः प्रान्तेऽन्तिक इति विश्वः । अन्तस्तलं च पारं परतटं दुर्न विद्येते यस्येति वा । मगधेन्द्रपालितं बलं रामकृष्णाभ्यां क्षयं प्रणीतम् । कियानप्यायासो नाऽस तयोरित्याह । **जगदीशयोर्वसुदेवपुत्रयोः परं केवलं तद्विक्रीडितं लीलैवेति** ॥ ७१ ॥

सुमनोरञ्जिनी — हे अङ्गेति परीक्षितं प्रति सम्बोधनम् । अर्णववत् दुर्गं गन्तुमशक्यं भैरवं च । दुरन्तपारम् । दुःशब्दो निषेधे । अन्तो निर्णयः । निषिद्धो निर्णयो यस्य पारस्य तत् दुरन्तपारम् । अनिश्चितपारमिति यावत् । अगाधं देशतो निरवधिकं चेति वा । मगधेन्द्रेण जरासन्धेन पालितं बलं सैन्यम् । क्षयं प्रणीतमिति यत् तत् वसुदेवपुत्रयोः रामकृष्णयोः विक्रीडितमेव लीलयैव । अनायासेनैव कृतं न तु पराक्रमेणेत्यर्थः ॥ ७१ ॥

स्थित्युद्भवान्तं भुवनत्रयस्य यः समीहतेऽनन्तगुणः स्वलीलया ।
न तस्य चित्रं परपक्षनिग्रहस्तथापि मर्त्यानुविधस्य वर्ण्यते ॥ ७२ ॥

सत्यधर्मीया — ग्रन्थकृत् मन्दामन्दरधरवद्बलयमपि निरवध्यधिकं जगतो जानीयुर्भवेयुश्च दुष्प्रज्ञा इति तदुद्दिधीर्षया विविच्याच्युतगुण एवायं मयोपचारतः प्राङ्निर्देशः कृत इति वक्ति ॥ **स्थितीति** । भुवनत्रयस्य स्थित्युद्भवान्तम् सर्वो द्वन्द्व इत्येकवद्भाव उत्तरपदलोपी वा

समासः । पालनोत्पत्तिनाशान् समीहते करोति स्वलीलया इत्यनायासेनेत्याह । अनन्तगुणः प्राग्जगदीशत्वेन सहोक्तस्यानन्तस्य गुणा येनेति वा । अनन्तो गुणोऽप्रधानं यस्मादिति वा । तस्य कृष्णस्य परपक्षनिग्रहश्चित्रं न । तर्हि वर्णनं कुत इत्यत आह ॥ **तथाऽपीति ।** मर्त्याननु विधा प्रकारो यस्य स तस्य । तत् युद्धादिकं वर्ण्यते ॥ ७२ ॥

सुमनोरञ्जिनी — योऽनन्तगुणः भुवनत्रयस्य स्थित्युद्भवान्तं लीलयैव समीहते यथायोग्यं करोति तस्य परपक्षनिग्रहो यद्यपि न चित्रं तथापि मर्त्यान् मनुष्यान् अनुविधत्ते अनुकरोतीति तथाविधस्य तस्य परपक्षनिग्रहः वर्ण्यते प्रशंस्यते । मर्त्येषु चित्रत्वादिति भावः । स्वकीयकर्तव्यतया वर्ण्यत इति वा ॥ ७२ ॥

हतेषु सर्वसैन्येषु जरासन्धो महाबलः ।
विद्रुतेष्ववशिष्टेषु रथेनैकेन शीरिणम् ॥ ७३ ॥

सत्यधर्मीया — अवशिष्टेषु हतेभ्य एकेन स्वेन रथेन शीरिणमाप ॥ ७३ ॥

सुमनोरञ्जिनी– शीरं लाङ्गलं तदस्यायुधमिति शीरी बलभद्रः तम् । प्रापेति शेषः ॥७३॥

तावुभौ गिरिसङ्काशौ मत्ताविव महागजौ ।
परस्परमयुध्येतां सामर्षौ बलशालिनौ ॥ ७४ ॥

सत्यधर्मीया — बलेन शाले इति तौ ॥ ७४ ॥

सुमनोरञ्जिनी — तौ बलभद्रमागधौ ॥ ७४ ॥

मागधस्तु गदां गुर्वीमादायामर्षविह्वलः ।
भ्रामयित्वा शतगुणं चिक्षेप बलवक्षसि ॥ ७५ ॥

सत्यधर्मीया — शतगुणं शतवारं बहुवारमिति यावत् ॥ ७५ ॥

सुमनोरञ्जिनी — अमर्षविह्वलः क्रोधपरवशः । शतगुणं शतवारम् ॥ ७५ ॥

तामापतन्तीं तरसा गदां शृङ्गोपमां गिरेः ।
व्यंसयित्वा हलधरो मुधा चक्रे स्मयन्निव ॥ ७६ ॥

सत्यधर्मीया — व्यंसयित्वा मृधा वृथा ॥ ७६ ॥

सुमनोरञ्जिनी – तरसा वेगेन । आपतन्तीम् । व्यंसयित्वा वञ्चयित्वा । मुधा व्यर्थां चक्रे ॥ ७६ ॥

व्यर्थीकृत्य गदां तस्य मुसलेन हलायुधः ।
पोथयित्वा रथे क्षुब्धो निहत्य रथसारथी ॥ ७७ ॥

सत्यधर्मीया – रथे पोथयित्वा । करणमीरयति ॥ **मुसलेनेति** । क्षुब्धः क्षुभितो रथश्च तौ निहत्य ताडयित्वा मारयित्वा क्षुब्धो यथा मथ्नन्नपि स्वयं निस्सङ्गस्तथाऽसज्जमान इति लुप्तोपमा वा । क्षुब्धेत्यादिनिपातितः शब्दो मन्थनदण्डवाची ॥ ७७ ॥

सुमनोरञ्जिनी — रथे पोथयित्वा आस्फालयित्वा ताडयित्वेति यावत् । क्षुब्धः क्रुद्धः ॥ ७७ ॥

जग्राह विरथं रामो जरासन्धं महाबलम् ।
हतानीकावशिष्टासुं सिंहः सिंहमिवौजसा ॥ ७८ ॥

सत्यधर्मीया — हतान्यनीकानि यस्य स चासावशिष्टा असवो यस्य च तम् ॥७८॥

सुमनोरञ्जिनी — हतान्यनीकानि यस्य स चासौ अवशिष्टा असव एव यस्य सः तम् ॥ ७८ ॥

बध्यमानं हतानीकं पाशैर्वारुणमानुषैः ।
वारयामास गोविन्दस्तेन कार्यचिकीर्षया ॥ ७९ ॥

सत्यधर्मीया — वारुणमानुषैः पाशैर्बध्यमानं गोविन्दो वारयामास । तेन जीवितेन कार्यचिकीर्षया तद्द्वारेण भूभारहरणरूपकार्यकरणेच्छया वारयामास ॥ ७९ ॥

स मुक्तो लोकनाथाभ्यां व्रीडितो वीरसम्मतः ।
वनं विविक्षुस्तपसे वारितः पथि राजभिः ॥ ८० ॥

हतेषु सर्वानीकेषु नृपो बार्हद्रथस्तदा ।
उपेक्षितो भगवता मागधो दुर्मना ययौ ॥ ८१ ॥

सत्यधर्मीया — मुक्तो जीवेति विसृष्टो राजभिर्विद्रुतमिलितैर्वार्भिरितो वारितो नेत्रयोरिति शेष इत्यप्यर्थः ॥ ८०,८१ ॥

सुमनोरञ्जिनी — लोकनाथाभ्यां रामकृष्णाभ्याम् । वचनैर्वारित इत्यन्वयः ॥ दुर्मनाः दुःखितमनाः ॥ ८०, ८१ ॥

(तपसे कृतसंकल्पो वारितः पथिराजभिः ॥
वाक्यैः पवित्रार्थपदैर्नयनैः प्राकृतैरपि ।
स्वकर्मबन्धप्राप्तोऽयं यदुभिस्ते पराभवः ॥)

सत्यधर्मीया — श्लोकद्वयं प्रक्षिप्तमिति सम्प्रदायविदः ।

सुमनोरञ्जिनी — कानि वचनानीत्यतस्तानि दर्शयति ॥ **स्वेति** । ते, यदुभिः प्राप्तो यः पराजयः सः स्वकर्मबन्धनः स्वीयकर्ममूलकः इत्येवंरूपैर्वचनैरित्यन्वयः ।

मुकुन्दोऽप्यक्षतबलो निस्तीर्णारिबलार्णवः ।
गृहीत्वा मागधेन्द्रस्य धनं स्त्रीकोशवाहनम् ॥ ८२ ॥

सत्यधर्मीया — अक्षतं बलं सेना यस्य सः ॥ ८२ ॥

सुमनोरञ्जिनी — न क्षतं बलं यस्य सः । निस्तीर्णः अरिबललक्षणोऽर्णवो येन । स्त्रीकोशवाहनं स्त्रियो दास्यः ॥ ८२ ॥

विकीर्यमाणः कुसुमैस्त्रिदशैरनुमोदितः ।
माधुरैरभिसङ्गम्य विज्वरैर्मुदितात्मभिः ।
उपगीयमानविजयः सूतमागधबन्दिभिः ॥ ८३ ॥

सत्यधर्मीया — त्रिदशैः कर्तृभिः कुसुमैः कर्णैर्विकीर्यमाणोऽनुमोदितश्च माधुरैस्त-न्नगरागारैः उपगीयमानो विजयो यस्य सः ॥ ८३ ॥

सुमनोरञ्जिनी – त्रिदशैः देवैः । अनुमोदितः साधु साध्विति भाषितः । माथुरैः मथुरावासिभिः जनैः । अभिसङ्गम्य मिलित्वा । सूतादिभिः उपगीयमानविजयः अभूदिति शेषः ॥ ८४ ॥

शङ्खदुन्दुभयो नेदुर्भेरीतूर्याण्यनेकशः ।
वीणावेणुमृदङ्गानि पुरं प्रविशति प्रभौ ॥ ८४ ॥

सत्यधर्मीया — भेर्यश्च तूर्याणि च तानि कीदृशानि वीणाभिः सहिता वेणुमृदङ्गा येषां तानि । अतो न मृदङ्गो न बबाधे । प्रभौ पुरं प्रविशति नेदुः ॥ ८४ ॥

सुमनोरञ्जिनी — प्रभौ पुरीं प्रविशति सति । शङ्खादयो नेदुरित्यन्वयः ॥ ८४ ॥

सिक्तमार्गां हृष्टजनां पताकाभिरलङ्कृताम् ।
निर्घुष्टां ब्रह्मघोषेण कौतुकाबद्धतोरणाम् ॥ ८५ ॥

सत्यधर्मीया — ब्रह्मघोषः स्वाध्यायध्वनिः । कौतुकेनोत्सवेन हर्षेण वा । उत्सवे नर्महर्षयोरिति विश्वः । आसमन्ताद्बद्धानि तोरणानि यस्यां सा ताम् ॥ ८५ ॥

सुमनोरञ्जिनी — कथंभूतां पुरीम् । ब्रह्मघोषेण वेदघोषेण निर्घुष्टां नादिताम् । कौतुकेन हर्षेण उत्सवेन वा । परम्परागतमङ्गलतया वा । आ सर्वतः बद्धानि तोरणानि यस्यां सा ताम् ।

'कौतुकं चाभिलाषः स्यादुत्सवे नर्महर्षयोः ।
परंपरासमायातमङ्गले च कुतूहले' इति विश्वः ॥ ८५॥

निचीयमानो नारीभिर्माल्यदध्यक्षताङ्कुरैः ।
निरीक्ष्यमाणः सस्नेहं प्रीत्युत्कलितलोचनैः ॥ ८६ ॥

सत्यधर्मीया — निचीयमानो विकीर्यमाणो विवेशेति विपरिणतानुषङ्गः । प्रीत्योत्कलितानि च तानि लोचनानि च तैर्निरीक्ष्यमाणः ॥ ८६ ॥

सुमनोरञ्जिनी —— नारीभिः माल्यादिभिः निचीयमानः विकीर्यमाण इत्यर्थः । प्रीत्या उत्कलितैः विकसितैः लोचनैः निरीक्ष्यमाणः प्रभुः ॥ ८६ ॥

आयोधनागतं वित्तमनन्तं वीरभूषणम् ।
यदुराजाय तत्सर्वमाहृतं प्रादिशत् प्रभुः ॥ ८७ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे एकोनपञ्चाशोऽध्यायः ॥ १०-४९ ॥

सत्यधर्मीया —— अनन्तं बहु अबद्धं तथैव राशीकृतं वा यदुराजायोग्रसेनाय ॥८७॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे
एकोनपञ्चाशोऽध्यायः ॥ १०-४९ ॥

सुमनोरञ्जिनी —— आयोधने युद्धस्थाने गतं स्वेनाहृतम् । वित्तादिकम् । यदुराजाय उग्रसेनाय । व्यादिशत् ॥ ८७ ॥

॥ इति श्रीमद्भागवतदशमस्कन्धोत्तरार्धव्याख्यायां
सुमनोरञ्जिन्यां एकोनपञ्चाशोऽध्यायः ॥ १०-४९ ॥

॥ अथ पञ्चाशोऽध्यायः ॥

श्रीबादरायणिरुवाच –

तृतीये मासि भूयश्च राजा बार्हद्रथो बली ।
दिवानिशं तप्यमानः स्मरन् पूर्वपराभवम् ॥ १ ॥

सत्यधर्मीया — तृतीये मासि । पद्दन्निति मासशब्दस्य मासित्यादेशः ॥ १ ॥

सुमनोरञ्जिनी — बार्हद्रथः बृहद्रथस्यापत्यं जरासन्धः ॥ १ ॥

आहूय सर्वान् भूपालान् चकार कदनोद्यमम् ।
समत्स्यान् (स्ववश्यान्) मालवांश्चेदीन् कुरुपाञ्चालकेरलान् ॥ २ ॥

सत्यधर्मीया — मत्स्यसहितान्मालवान् ॥ २ ॥

सुमनोरञ्जिनी — सर्वभूपालानाहूय कलहोद्यमं चकार । तदेव विवृणोति ॥ **स्वेति** ॥ स्ववश्यान् स्वाधीनान् । मालवान् मालवदेशीयान् तदादीन् । आहूय ॥ २ ॥

कुलिन्दकुन्तलावन्तिकाशिगान्धारसृञ्जयान् ।
कलिङ्गकेकयानान्ध्रान् दशार्णान् वङ्गसैन्धवान् ॥ ३ ॥

सत्यधर्मीया — कुलिन्दादिदेशीयान् ॥ ३ ॥

सुमनोरञ्जिनी — कुलिन्दादिदेशीयान् ॥ ३ ॥

माद्रान् त्रिगर्तान् सौवीरान् पार्वतेयांश्च सर्वशः ।
आहूयाक्षौहिणिगणैस्त्रयोविंशतिभिर्युतः ॥ ४ ॥

सत्यधर्मीया — माद्रान् मद्राधिपान् अक्षौहिणिगणैः । सञ्ज्ञात्वात्ङीपो ह्रस्वः ॥४॥

सुमनोरञ्जिनी — माद्रान् मद्रदेशीयान् । त्रयोविंशतिभिः अक्षोहिणिगणैर्युतः ॥४॥

स मागधानतिक्रम्य पश्चिमाभिमुखो ययौ ।
आकर्षन्निव भूपालान् गजाश्वरथवल्लभान् ॥ ५ ॥

सत्यधर्मीया — आकर्षन्निवेत्यनेन तेषामुत्साहाभावेऽप्यनिर्वाहेन समूहानामगतिरिति ध्वनयति ॥ ५ ॥

सुमनोरञ्जिनी — स जरासन्धः । मागधान् मगधदेशान् । अतिक्रम्य । गजाश्वरथ-वल्लभान् गजादिस्वामिनः भूपालान् । आकर्षन्निव । पश्चिमाभिमुखो ययाविति सम्बन्धः ॥ ५ ॥

आगत्य मधुरां रोद्धुं प्राविशद् यमुनातटे ।
स्कन्धावारेण महता राजभिर्बहुभिर्युतः ॥ ६ ॥

सत्यधर्मीया — महता स्कन्धावारेण शिबिरेण ॥ ६ ॥

सुमनोरञ्जिनी — स्कन्धावारेण सैन्यनिवेशार्थं रचितवस्त्रगृहसमूहेन ॥ ६ ॥

उपगीयमानो न्यरमत् सूतमागधबन्दिभिः ।
तदाकर्ण्य रणोद्योगं मागधस्य बलीयसः ॥ ७ ॥

सत्यधर्मीया — न्यरमन्न्यरमत ॥ ७ ॥

सुमनोरञ्जिनी — सूतादिभिः उपगीयमानः स्तूयमानः । न्यरमत् सुष्वाप । कृष्णस्तु तदा मागधस्य रणोद्योगम् । आकर्ण्य ॥ ७ ॥

मन्त्रयामास शर्वर्यां कृष्णः सङ्कर्षणादिभिः ।
वसुदेवोद्धवाक्रूरशैनेयाहुकसारणैः ॥ ८ ॥

सत्यधर्मीया — सङ्कर्षणादिभिरित्यादिपदेन कनिष्ठानां बलतो ज्येष्ठानां कृष्णतो मन्त्रिणां ग्रहणम् । वसुदेवेत्यादिना स्ववर्यवर्णानां मन्त्रिणां च ग्रहणमिति विवेको ज्ञेयः । यद्वा सङ्कर्षणादिभिर्विहितमन्त्रा बहिःपातार्थमिह एहीति स्वसमीपं प्रति सम्यक्कर्षणं छोटिकावादनं पृष्ठस्फालनं चेत्येतदादिभिर्वसुदेवसारणादिभिरित्यर्थः ॥ ८ ॥

सुमनोरञ्जिनी — शर्वर्यां रात्रौ मन्त्रयामास आलोचितवान् ॥ ८ ॥

पतिरालोच्य शर्वर्यां सम्यङ् निर्धारितक्रियः ।
उषस्यनुदिते सूर्ये समाहूय भटोत्तमान् ॥ ९ ॥

सत्यधर्मीया — निर्धारिता क्रियोत्तरकार्यं कार्यं येन सः । उषसि तत्रापि सूर्येऽनुदिते जाग्रतां सति प्रकाशेऽजाग्रतां निद्रायाः किञ्चित्तमसि च निकृतेरुपरि निकृत्या पतितव्यमिति शिक्षयितुं ततानैवं श्रीनाथो न त्वशक्ततयेति मन्तव्यम् ॥ ९ ॥

सुमनोरञ्जिनी — सम्यक् निर्धारिता क्रिया कर्तव्यव्यापारो येन सः ॥ ९ ॥

त्रिधा विभज्य गोविन्दः स्वसेनां चतुरङ्गिणीम् ।
न्ययोजयदमेयात्मा मगधेन्द्रबलं प्रति ॥ १० ॥

सत्यधर्मीया — चतुरङ्गिणीमङ्गचतुष्कवतीम् ॥ १० ॥

सुमनोरञ्जिनी — चतुरङ्गिणीं गजाश्वरथपत्याख्यचतुरङ्गोपेताम् । न्ययोजयत् ॥ १० ॥

सङ्कर्षणं च हार्दिक्यं गदं सारणमेव च ।
वामेन प्रेषयामास मार्गेण मधुसूदनः ॥ ११ ॥

सत्यधर्मीया — वामेनादक्षिणेन ॥ ११ ॥

सुमनोरञ्जिनी — तदेव विविच्याह – **सङ्कर्षणमित्यादिना** । वामेन मार्गेण । मागधसैन्यस्येति शेषः ॥ ११ ॥

सात्यकिं विपृथुं चैव पृथुमुद्धवमेव च ।
दक्षिणेनैव मार्गेण प्राहिणोत् सेनया सह ॥ १२ ॥

सत्यधर्मीया — सेनया सहेत्यत्रेव पूर्वत्रापि सम्बन्धनीयम् ॥ १२ ॥

सुमनोरञ्जिनी — प्राहिणोत् प्रेषयामास ॥ १२ ॥

स्वयं कतिपयैर्युक्तो रथैः कमललोचनः ।
अग्रे मगधराजस्य प्रविवेश महद्बलम् ॥ १३ ॥

सत्यधर्मीया — सर्वेषां निद्रितत्वाद्व्रस्तुतोऽग्रे ॥ १३ ॥

सुमनोरञ्जिनी — मगधराजस्य बलम् । अग्रे अभिमुखम् ॥ १३ ॥

सा सेना बहुनागाश्वरथपादातिसङ्कुला ।
प्रसुप्ता यमुनातीरे विस्रब्धा रमते सुखम् ॥ १४ ॥

सत्यधर्मीया — पादातिभिः पदातीनां समूहः पादातं तस्य समूह इत्यण् । पादातं पत्तिसंहतिरित्यमरः । तदस्ति येषामिति । नान्तः शब्दः । अन्यथाऽज्यतिभ्याश्चेतीणि पादस्य पदाज्यातिगोपहतेष्विति पदादेशे पदातिरिति इदन्ततया स्यादिति भावः । सर्वे विधयश्छन्दसि विकल्प्यन्त इति निर्गलो मार्ग इति वा । नारब्धमधुना युद्धमिति विस्रब्धा विश्वस्ता । सुखं यथा तथा रमतेऽरमत ॥ १४ ॥

सुमनोरञ्जिनी – कदा प्रविवेशेत्यतः किञ्चित्प्रपञ्चयन्नाह । यदा सा सेना मागध सेना । पादातिनः पदातयः । विस्रब्धा निर्भया । सुखं अनायासेन । रमते स्वापसुखमनुभवति ॥ १४ ॥

उदयाद्रिं समारोहत्यर्के तमसि नश्यति ।
नीडस्थेष्वेव कूजत्सु विहङ्गेषु ततस्ततः ॥ १५ ॥

सत्यधर्मीया — अर्के सूर्ये उदयाद्रिं समारोहति सति विहगेषु नीडस्थेष्वेव । कुलायस्थेष्वेव बहिरबहुतमस्कत्वाद्विहायसः ॥ १५ ॥

सुमनोरञ्जिनी — तदा । विहङ्गेषु नीडस्थेष्वेव कूजत्सु । न तु बहिर्निर्गतेषु ॥१५॥

विकसत्सु सरोजेषु गायत्स्वलिकुलेषु च ।
प्रविवेश बलं भीमं मगधेन्द्रस्य दुर्जयम् ॥ १६ ॥

सत्यधर्मीया — दुर्जयमितरैः ॥ १६ ॥

हयाश्चाबद्धवैराणाः श्रेणीबद्धाः समन्ततः ।
कुञ्जराश्च तदा राजन्ननारोपितपञ्जराः ॥ १७ ॥

सत्यधर्मीया — अबद्धं वैराणं पल्याणं खलीनं वा येषां ते तथा । श्रेणी पङ्क्तिस्तया बद्धा हया वाजिनः कुञ्जरा अपि । अनारोपितमुपरिभागेऽनर्पितं पञ्जरं येषां ते । रूप उपरिभाग इति धातुः । सुभद्रां रथमारोप्येत्यादिवच्चेति द्वितीयतात्पर्योक्तेः । वाहनमाहितादिति निपातितो वाहनशब्दः ॥ १७ ॥

सुमनोरञ्जिनी — अबद्धानि वैराणानि पल्याणानि येषु ते । श्रेण्यां पङ्क्तौ । बद्धाश्च । अनारोपितं पञ्जरं येषु तथा । पञ्जरं = गजानां पृष्टे शत्रुमुक्तशरस्तंभियन्त्रगृहमिति पदरत्नावल्याम् ॥ १७ ॥

अनादत्तप्रहरणा भटाश्चाबद्धमूर्धजाः ।
अप्रविष्टात्मवर्माणस्तदा नारूढवाहनाः ॥ १८ ॥

सत्यधर्मीया — अनादत्तान्यस्वीकृतानि प्रहरणानि यैस्ते तथाऽबद्धमूर्धजाः शिरोरुहा यैस्ते । अप्रविष्टान्यात्मनो देहान् वर्माणि येषां ते । अनारूढानि वाहनानि यैस्ते ॥१८॥

सुमनोरञ्जिनी — अनादत्तानि अस्वीकृतानि प्रहणानि आयुधानि यैस्ते । अबद्ध-मूर्धजाः विकीर्णकेशाः । न प्रविष्टः आत्मा देहो येषु तानि अप्रविष्टात्मानि । तथाविधानि वर्माणि कवचानि येषां ते अधृतकवचा इति यावत् ॥ १८ ॥

रथाश्चाबद्धतुरगाः सर्वतोऽनुद्धृतध्वजाः ।
सेनाया मगधेन्द्रस्य प्रवेशे पीतवाससः ॥ १९ ॥

सत्यधर्मीया — अबद्धास्तुरगा येषां ते । सर्वतः सर्वत्रानुद्धृता अनुच्छ्रिता ध्वजा येषां त इति वा । पीतवाससः पीताम्बरस्य मगधेन्द्रस्य सेनायाः प्रवेशे तत्काले दशा इयमवर्तिष्टेति भावः ॥ १९ ॥

सुमनोरञ्जिनी — सर्वतः सर्वे रथाः अबद्धाः तुरगाः येषां ते ॥ १९ ॥

त्रिदिक्ष्वापतितं सैन्यं दृष्ट्वा तद्राजमण्डलम् ।
इतिकर्तव्यतामूढं विभ्रान्तं समपद्यत ॥ २० ॥

सत्यधर्मीया — त्रिदिक्षु तिस्रश्च ता दिशश्च तास्वापतितं तत्सैन्यं राजमण्डलमुत्थितं स दृष्ट्वा । मण्डलं त्रिष्वित्युक्तेः, शक्यं स दृष्ट्वा राजमण्डल इति मण्डयितुम् । तथाऽपि सर्वथा तेषु न पौरुषमिति द्योतयितुं मण्डलमित्युक्तिरिति तात्पर्यं ज्ञेयम् । कर्तव्यताविषये मूढं सदित्येवं विभ्रान्तम् । भावे क्तः । बभ्रामानवस्थानं समपद्यत प्रापत् ॥ २० ॥

सुमनोरञ्जिनी — विभ्रान्तं बुद्धेः एकत्रानवस्थानम् । समपद्यत प्राप्नोत् ॥ २० ॥

केचिद्भटाः समापेतुर्भयात् केचिच्च दुद्रुवुः ।
केचिदात्तप्रहरणास्त्वभिसस्रुररीन् रणे ॥ २१ ॥

सत्यधर्मीया — रणे केचिद्भटा अरीन्प्रति समापेतुरपतन् । निद्रया द्रावयन्त्या समापेतुरपतन्निति वा । अभिसस्रुरभ्यसरन् ॥ २१ ॥

सुमनोरञ्जिनी — केचित् समापेतुः पतिताः । केचिच्च आत्तप्रहरणाः स्वीकृता युधाः ॥ २१ ॥

केचिद् विभिन्नवर्माणश्छिन्नपादोरुबाहवः ।
रिपूनेवाभ्यवर्तन्त क्रोधोद्वृत्तारुणेक्षणाः ॥ २२ ॥

सत्यधर्मीया — विभिन्नानि कलिङ्गस्य वर्म चैद्यश्चैद्यस्य क लिङ्ग इति । विभिन्नानि वर्माणि येषां ते । अप्रविष्टात्मवर्माण इत्युक्तिस्वारस्यमेवं चेद्भविष्यति । त्वया स्थापितान्यपि तानि विभिन्नानि येषां त इति वा । क्रोधोद्रिक्तान्यरुणानीक्षणानि येषां ते ॥ २२ ॥

सुमनोरञ्जिनी — केचिद्विभिन्नवर्मादयोऽपि रिपूनेवाभ्यवर्तन्त न तु पश्चान्निवृत्ताः । तत्र निमित्तम् ॥ **क्रोधेति** । क्रोधेन उद्वृत्ताः विशदीकृताः अरुणेक्षणाः येषां ते तथाभूताः सन्त इत्यर्थः ॥ २२ ॥

केचिद् हयानपल्याणानारुह्य दृढविक्रमाः ।
मर्दयन्तो रिपून् युद्धे विमलं लेभिरे यशः ॥ २३ ॥

सत्यधर्मीया — अपल्याणानखलीनान् । विमलं यशो लेभिरे प्रापुः ॥ २३ ॥

सुमनोरञ्जिनी — अपर्याणान् अपल्याणान् । कविकाहीनानिति वा ॥ २३ ॥

राजानः सहसोद्बुद्ध्य दृष्ट्वा सैनिकसङ्क्षयम् ।
विना रणोपस्करणं चक्रुः केचन सङ्गरम् ॥ २४ ॥

सत्यधर्मीया — रणोपस्करणं तत्साधनमायुधादि ॥ २४ ॥

सुमनोरञ्जिनी — रणोपस्करणं युद्धसामग्रीम् ॥ २४ ॥

केचिद विसृज्य शिबिरं विविशुर्गहनं वनम् ।
केचिन्मागधमासाद्य विजयस्वेति चाब्रुवन् ॥ २५ ॥

सत्यधर्मीया – गहनकान्तारं केचिदम्भस्तम्भनज्ञा वनं जलं विविशुः । विजयस्वेत्यब्रुवंश्च ॥ २५ ॥

सुमनोरञ्जिनी — विजयस्वेत्याक्रोशवचनम् ॥ २५ ॥

रथेनैकेन गोविन्दः प्रविश्य रिपुवाहिनीम् ।
जघान सुबहून् वीरान् सायुधान् सरणोद्यमान् ॥ २६ ॥

सत्यधर्मीया — स गोविन्दो रण उद्यमो येषां तान् रणोद्यमेन सहितानिति वा सरणे रणान्निस्सरणे उद्यमो येषामिति वा ॥ २६ ॥

सुमनोरञ्जिनी — सायुधान् तथा रणोद्योगेन सहितानेव जघान न तु निरायुधान् अनुद्यमांश्च ॥ २६ ॥

सङ्कर्षणोऽपि बलवान् महत्या सेनया वृतः ।
बलं प्रविश्य वामेन मर्दयामास मागधम् ॥ २७ ॥

सत्यधर्मीया — मागधं मगधस्वामिकं बलम् ॥२७॥

सुमनोरञ्जिनी — वामेन वर्त्मनेत्याकृष्यते । मागधम् मगधदेशीयम् ॥२७॥

शैनेयोऽपि महाबाहुर्दक्षिणेनैव वर्त्मना ।
प्रविश्य चतुरङ्गेण सैन्येन महताऽर्दयत् ॥ २८ ॥

सत्यधर्मीया — अर्दयदर्दयामास ॥ २८ ॥

सुमनोरञ्जिनी — शैनेयः सात्यकिः ॥ २८ ॥

एवं सा व्यथिता सेना मगधेन्द्राभिरक्षिता ।
दुद्राव त्रास्यमाना वै क्षणमात्रं दिशो दश ॥ २९ ॥

सत्यधर्मीया — व्यथिता त्रास्यमाना क्षणमात्रं दिशो दश दुद्राव ॥ २९ ॥

सुमनोरञ्जिनी — त्रास्यमाना श्रीकृष्णसैन्येन भयं प्रापिता । दिशः प्रति दुद्राव ॥ २९ ॥

ततोऽनुद्रुत्य वार्ष्णेयः सात्यकिः पञ्चयोजनम् ।
निहत्य मागधं सैन्यं जयी व्यावर्तताहवात् ॥ ३० ॥

सत्यधर्मीया — वार्ष्णेयः सात्यकिः पञ्चयोजनं विशेषणसमासः । मागधं गतम् । सैन्यं निहत्य जयी सन् व्यावर्तत ॥ ३० ॥

सुमनोरञ्जिनी — वार्ष्णेयः वृष्णिकुलोत्पन्नः । मागधस्य जरासन्धस्य सम्बन्धि मागधम् । आहवात् युद्धात् ॥ ३० ॥

मतङ्गजान् पर्वतसन्निभान् बहून् निगृह्य सोपस्करतोमराङ्कुशान् ।
रथांश्च शस्त्रध्वजवाजिसंयुतान् निनाय कृष्णो मधुरां मनोरमाम् ॥ ३१ ॥

सत्यधर्मीया — मतङ्गजान् गजान् सोपस्करास्तोमराङ्कुशा येषां तान्निनाय । यद्यन्मतं तत्सर्वं निनायेति नीतवान् ॥ ३१ ॥

सुमनोरञ्जिनी —— उपस्करैः कक्ष्याकुथादिभिः । तोमरैः आयुधविशेषैः । अङ्कुशैश्च सहितान् । मतङ्गजान् । शस्त्रादिसहितान् रथांश्च । मथुरां प्रति । निनाय निन्य इति ।। ३१ ।।

छत्राणि हेमाम्बररत्नमिश्रितान्यनेकबालव्यजनानि माधवः ।
किरीटपट्टाङ्गदकुण्डलांशुकान्यवाप कृष्णोऽगणितानि संयुगे ।। ३२ ।।

सत्यधर्मीया —— हेमाम्बररत्नमिश्रितानि छत्राण्यनेकबालव्यजनानि पट्टेन क्षौमेण सहितं च तदङ्गदं चांशुकानि सूक्ष्मवस्त्राणि । अंशुकं सूक्ष्मवस्त्रे स्याद्वस्त्रमात्रोत्तरीययोरिति विश्वः ।। ३२ ।।

सुमनोरञ्जिनी —— छत्राणि । कीदृशानि । हेमांबररत्नमिश्रितानि । दण्डादिषु हेम्ना सुवर्णेन प्रावरणार्थमम्बरेण । कलशादिषु रत्नैश्च मिश्रितानि । किरीटानि । पट्टाः ललाट-भूषाः । पट्टा ललाटभूषायामिति विश्वः । अंशुकानि वस्त्राणि ।। ३२ ।।

हलायुधो मागधकोशवाहान् प्रजावरोधायुधभूषणादिकम् ।
नियोजितः कंसभिदा रणार्जितं यदुप्रवीराय धनं न्यवेदयत् ।। ३३ ।।

।। इति श्रीमद्भागवते दशमस्कन्धे पञ्चाशोऽध्यायः ।।

सत्यधर्मीया —— अवरोधः शुद्धान्तः । अगणितान्पदार्थानिति शेषः । अवरोधस्तिरोधाने शुद्धान्ते राजवेश्मनीति विश्वः । कंसभिदा कृष्णेन नियोजितो रणार्जितं रणसम्पादितं यदुप्रवीरायोग्रसेनाय । एवमादिधनं न्यवेदयत् ।। ३३ ।।

।। इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे पञ्चाशोऽध्यायः ।। १०-५० ।।

सुमनोरञ्जिनी —— मागधस्य कोशादिकम् । रणार्जितम्, अन्यदपि धनम् । कंसभिदा कृष्णेन नियोजितः सन् । यदुराजाय उग्रसेनाय न्यवेदयदित्यन्वयः । प्रजाः अवरुध्यन्ते येष्विति प्रजावरोधाः पटकुटिकाः ।। ३३ ।।

।। इति श्रीमद्भागवतदशमस्कन्धोत्तरार्धव्याख्यायां सुमनोरञ्जिन्यां पञ्चाशोऽध्यायः ।।

॥ अथ एकपञ्चाशोऽध्यायः ॥

श्रीशुक उवाच –

मागधस्तु रणश्लाघी माधवेन पराजितः ।
जगाम शोणितपुरं बाणं द्रष्टुं बलेः सुतम् ॥ १ ॥

सत्यधर्मीया — यो रणश्लाघी तेन माधवेन परैरपराजितोऽपि पराजित इत्यावृत्त्याऽन्वयः । तुरणेन पलायनत्वरणेन श्लाघीति वा ॥ १ ॥

सुमनोरञ्जिनी — रणं श्लाघते आकाङ्क्षत इति तथाविधः ॥ १ ॥

तं तथाऽऽयान्तमाकर्ण्य वृतराजन्यमण्डलम् ।
मित्रं पराजितं युद्धे विष्णुना दानवेश्वरः ॥ २ ॥

सत्यधर्मीया – विशेषकेणाह **तमिति** । मृतोर्वरितक्षितिपतिततिवृतं दानवेश्वरो बाणः ॥ २ ॥

सुमनोरञ्जिनी — वृतं युक्तं राजन्यमण्डलं राज्ञां समूहो येन तम् । स्वस्य मित्रमायान्तम् । आकर्ण्य श्रुत्वा ॥ २ ॥

अलङ्कृतैर्गजैरश्वैर्विचित्रस्यन्दनैर्भटैः ।
वारकान्ताकदम्बैश्च सूतमागधवन्दिभिः ॥ ३ ॥

सत्यधर्मीया — वारकान्ताकदम्बैर्वेश्यासमूहैः ॥ ३ ॥

सुमनोरञ्जिनी — विचित्रस्यंदनैः नानाविधरथैः । वारकान्तानां वारस्त्रीणां कदम्बैः समुदायैः ॥ ३ ॥

ध्वजैः पताकैश्छत्रैश्च माङ्गल्यैः पटहस्वनैः ।
सुवर्णतोरणैश्चित्रैर्दीपैः कलशदर्पणैः ॥ ४ ॥

सत्यधर्मीया — पताका येषां सन्तीति पताका इति यथायथं ध्वजछत्रादिविशेषणम्। तेन न ''पताका वैजयन्त्यां च सौभाग्यां वा ध्वजेऽपि च। पताका वैजयन्ती स्यात्केतनं ध्वजमस्त्रियाम्'' इति विश्वामरादिशंसितलिङ्गभङ्ग इति ज्ञेयम्। माङ्गल्यैर्मङ्गल्यस्य श्वेतागुरोरिमे माङ्गल्यास्तत्परिमलैर्मल्लिकादिपरिमलैरिति वा ॥

'मङ्गल्यं मल्लिगन्धि यत्, मङ्गल्यं दधिमङ्गल्योः,
मङ्गली रोचनायां च प्रियङ्गुशतपुष्पयोः।
अधः पुष्पेत्याद्यमरयुक्तोपयुक्तविश्वौ।
मङ्गलातोद्यादिभिर्मङ्गलद्योतकैरि'ति वा ॥ ४ ॥

सुमनोरञ्जिनी — माङ्गल्यैः मङ्गलसूचकैः। पटहस्वनैः आनकध्वनिभिः। आनकः पटहो स्त्री स्यादित्यमरः। कलशैः पूर्णकलशैः। दर्पणैश्च ॥ ४ ॥

उपतस्थे जरासन्धं बाणो बाहुसहस्रवान्।
तौ दृष्ट्वा परमस्निग्धौ परस्परमनोनुगौ ॥ ५ ॥

सत्यधर्मीया — तथाऽयातं मित्रं जरासन्धमाकर्ण्य बाहुसहस्रवान्बाण उपतस्थे। एवमन्वयने उपाच्चेत्युक्ताकर्मकात्तिष्ठतेरात्मनेपदता सङ्गच्छत इति ज्ञेयम्। परस्परं दृष्ट्वा ॥ ५ ॥

सुमनोरञ्जिनी — तौ अन्योन्यं दृष्ट्वा ॥ ५ ॥

पूजां चक्रतुरन्योन्यमन्योन्यप्रियकारिणौ।
ततोऽब्रवीज्जरासन्धो बाणमाभाष्य संसदि ॥६॥

सत्यधर्मीया — ततः परस्परं सत्करानन्तरम् ॥ ६ ॥

सुमनोरञ्जिनी — अन्योन्यपूजां चक्रतुः। आभाष्य सम्बोध्य ॥ ६ ॥

दानवेन्द्र निबोधेदं गोपेनाधर्मचारिणा।
रात्रौ चौर्यप्रतापेन वञ्चितोऽस्मि दुरात्मना ॥ ७ ॥

सत्यधर्मीया — गोपेन तमधर्मत्वमेव व्यक्तं वक्ति ॥ **रात्राविति** । चौर्यमेव प्रतापः प्रभावस्तेन ॥ ७ ॥

सुमनोरञ्जिनी — चौर्ये प्रतापः सामर्थ्यं यस्य तेन ॥ ७ ॥

गृहीता बह्वस्तुङ्गा मातङ्गा मदशालिनः ।
तुरङ्गमाश्च बह्वो रथाश्च सपरिच्छदाः ॥ ८ ॥

सत्यधर्मीया — तुरङ्गमा गतम् ॥ ८ ॥

सुमनोरञ्जिनी — तुङ्गाः उन्नताः सपरिच्छदाः सपरिकराः रथाश्च गृहीता इत्यन्वयः ॥८॥

द्वन्द्वेन सज्जमानं मामिमे भूपा न सेहिरे ।
निरुद्धस्तैरहं भूपैरेतैः समसुखासुखैः ॥ ९ ॥

सत्यधर्मीया — द्वन्द्वेन नियुद्धेन समे असुखं दुःखं चेति मया येषां ते तैः ॥ ९ ॥

सुमनोरञ्जिनी — द्वन्द्वेन द्वन्द्वयुद्धेन । सज्जमानं सम्बध्यमानम् । समसुखासुखैः सुखदुःखाभ्यां मत्समैरित्यर्थः । मम सुखे तेषामपि सुखम् । मम दुःखे तेषामपि दुःखमिति यावत् ॥ ९ ॥

त्वत्सन्निधिमिहायातः साहाय्यं कुरु मे प्रभो ।
इत्युक्तस्तं निजपुरं प्रवेश्य बलिनन्दनः ॥ १० ॥

सत्यधर्मीया — प्रवेशयित्वा प्रवेश्य ॥ १० ॥

सुमनोरञ्जिनी — बलिनन्दनो बाणासुरः । तं मागधम् ॥ १० ॥

स राजमण्डलायाशु कारयामास सत्क्रियाम् ।
भोजनस्नानशयनगन्धताम्बूलपूर्वकैः ॥ ११ ॥

सत्यधर्मीया — सत्क्रियां सम्माननम् । तत्साधनमभिधत्ते ॥ **भोजनेति** । भोजन मामकन् सत्कुर्वीतैतानित्युक्त्वा कारयामासेत्यन्वयः ॥ ११ ॥

सुमनोरञ्जिनी — भोजनादिभिः सत्क्रियां सत्कारम् ॥११॥

अर्हणैरर्हयामास सराजन्यं जरासुतम् ।
तं भुक्तवन्तं विश्रान्तं दृष्टदर्शनकौतुकम् ॥ १२ ॥

सत्यधर्मीया — दर्शनेन कौतुकं येन पदार्थेन स दृष्टो येन स तम् । कदाऽप्यदृष्टं दृष्टवन्तमिति यावत् । जाग्रद्दशायां कदाप्यदृष्टं दृष्टं दर्शनस्य स्वप्नस्य तत्सम्बन्धि कौतुकमिवाद्भुतं येनेति वा । दर्शनं नयनस्वप्नबुद्धिधर्मोपलब्धिष्विति विश्वः ॥ १२ ॥

सुमनोरञ्जिनी — सराजन्यं राजभिः सहितम् । अर्हणैः वस्त्रालङ्कारादिभिः । अर्हयामास पूजयामास । दृष्टानि दर्शनकौतुकानि नयनानन्दकराणि मृगपक्षिमल्लादियुद्धानि वारस्त्रीनर्तनादीनि च येन तम् ॥ १२ ॥

अलङ्कृतं सह नृपैरासीनं काञ्चनासने ।
उवाच दानवपतिर्नृपानाभाष्य सादरम् ॥ १३ ॥

सत्यधर्मीया — सह नृपैरासीनमाभाष्य । सादरमित्यनुपचारतां वचनस्य ध्वनयति ॥ १३ ॥

सुमनोरञ्जिनी – नृपानाभाष्य हे नृपाः शृणुतेत्युक्त्वा । तं जरासन्धम् । उवाचेति सम्बन्धः ॥ १३ ॥

बाण उवाच –

जरासन्ध निबोधेदं न मृषा कथ्यते मया ।
एते गजा इमे चाश्वा इदं राज्यमिमाः प्रजाः ।
त्वदधीनमिदं विश्वं यच्चान्यद् वस्तु विद्यते ॥ १४ ॥

सत्यधर्मीया — हे जरासन्ध महामते । इदं वक्ष्यमाणं निबोध जानीहि । मया मृषा न कथ्यते । एते गजा इमे चाश्वा इदं राज्यं इमाः प्रजाश्चेतीदं प्रात्यक्षिकं विश्वं त्वदधीनम् । अन्यदन्तर्वस्तु धनादिकं विद्यते तदपि त्वदधीनम् ॥ १४ ॥

सुमनोरञ्जिनी — इदं विश्वं सर्वं त्वदधीनमिति । निबोध जानीहि ॥ १४ ॥

श्रीशुक उवाच –

इत्युक्त्वा प्रददौ तस्मै मागधाय बलेः सुतः ।
गजानां षष्टिसाहस्रं रथानां नियुतं तथा ॥ १५ ॥

सत्यधर्मीया — इत्युक्त्वा गजानां षष्टिसाहस्रम् । स्वार्थिकोऽणिति केचित् । शतमानेत्यादिवत् । रथानां नियुतो लक्षम् ॥ १५ ॥

सुमनोरञ्जिनी — नियुतं लक्षम् ॥ १५ ॥

प्रयुतं चतुरङ्गाणां मनोमारुतरंहसाम् ।
दानवानां प्रसिद्धानां मायासङ्ग्रामवेदिनाम् ॥ १६ ॥

सत्यधर्मीया — मनोमारुतरंहसां मनोवन्मारुतवच्च रंहो येषां ते तथा तेषां । केषाञ्चिन्नावनिस्पर्शः केषाञ्चित्तत्स्पर्शश्चेति विशेषद्योतनाय निदर्शनद्वयमिति केचित् । मारुतं निःशब्दं मनसो रंह इव रंहो येषां तेषामिति वा । शब्देऽरिसमुद्बोधः स्यादिति तथाऽभ्यासवतां तुरगाणां प्रयुतं दशलक्षम् । मायासङ्ग्रामः कपटयुद्धानि ॥ १६ ॥

सुमनोरञ्जिनी — प्रयुतं दशलक्षणम् । मनोवत् मारुतवच्च रंहः वेगो येषां ते ॥ १६ ॥

त्रिशतं स्वात्मसाम्यानां ददौ बाणो बलेः सुतः ।
विचित्रशिबिकाच्छत्रव्यजनाकल्पवाससाम् ॥ १७ ॥

सत्यधर्मीया — आत्मना धृत्या साम्यं येषां ते आत्मसाम्याः स्वस्यात्मसाम्यास्तेषां त्रिशतम् ॥ १७ ॥

सुमनोरञ्जिनी — स्वात्मनः स्वस्य साम्यं येषां ते तथा ॥ १७ ॥

असङ्ख्यातं ददौ राजन् भाण्डशय्यासनादिकम् ।
कुम्भाण्डं कूपकर्णं च मन्त्रिणौ दैत्यसत्तमौ ॥ १८ ॥

सत्यधर्मीया — असङ्ख्यातं भाण्डानि पात्राणि राज्याभरणानि वा तेषां राशिम् ॥

'भाण्डं भूषणमात्रेऽपि भाण्डं मूलवणिग्धने ।
नदीपात्रे तुरङ्गाणां भूषणे भाजनेऽपि च'

इति विश्वः । मन्त्रिणौ स्वामात्यौ ॥ १८ ॥

सुमनोरञ्जिनी — असङ्ख्यातं बहुसङ्ख्योपेतं समूहम् । आकल्पान्याभरणानि । कुम्भाण्डं कूपकर्णं चेति एतौ मन्त्रिणौ ॥ १८ ॥

आज्ञापयामास बाणः साहाय्यार्थं कुरूद्वह ।
क्व सुरासुरसङ्घातसंहारणपटुर्हरिः ॥ १९ ॥

सत्यधर्मीया — साहाय्यार्थमित्युक्त्या नन्दनन्दनविषये कथं जेष्यत्येताविति मन्द-सन्देहमङ्कुरितं श्रीशुकः पारवश्येन पराकुर्वन् स्वरसनां व्यापारयते ॥ **क्वेति** । सुरासुर-सङ्घातसंहरणपटुर्लयलवे ॥ १९ ॥

सुमनोरञ्जिनी – तर्हि तौ अतिबलिष्टौ कृष्णः जेष्यते इति शङ्का मनागपि मनसि मा भूदित्याशयेन शुकः परीक्षितं प्रत्याह ॥ **क्वेति** । सुरासुराणां सङ्घातः सन्दोहः तस्य संहारं तत्र पटुः ॥ १९ ॥

कुम्भाण्डकूपकर्णौ क्व वराकौ बाणमन्त्रिणौ ।
अजानन्तो विष्णुशक्तिं भूपाला विनशिष्णवः ॥२०॥

सत्यधर्मीया — वराकौ विधवासुतौ । वराको विधवासुत इति वचनात् । विष्णुशक्तिमजानन्तो भूपाला विनिशिष्णव इति च पाठः ॥ २० ॥

सुमनोरञ्जिनी — वराकौ शोच्यौ । राण्डेयौ वा । तुच्छाविति यावत् । वराकः सङ्गरे शोच्ये इति विश्वः । वराको विधवासुत इत्यमरः । विनशिष्णवः ॥ २० ॥

चक्रुर्भूयो रणोद्योगं मागधेन प्रचोदिताः ।
बाणेन समनुज्ञातो मागधः शोणितात् पुरात् ॥ २१ ॥

सत्यधर्मीया — मागधेन प्रचोदिताः परं रणोद्योगं भूयश्चक्रुरिति योजना ॥ २१ ॥

निर्गत्यानेकभूपालचतुरङ्गबलान्वितः ।
दिनैः कतिपयैर्भूयो मधुरामन्वपद्यत ॥ २२ ॥

सत्यधर्मीया — अनेकभूपालाश्चतुरङ्गबलं च तैरन्वितः कतिपयैर्दिनैरल्पवासरैः ॥२२॥

सुमनोरञ्जिनी — अनेकभूपालैः चतुरङ्गबलेन चान्वितः । भूयः पुनः । अन्वपद्यत प्राप्तवान् ॥ २२ ॥

सन्निरुध्य पुरद्वारं गोपुराट्टालतोरणैः ।
दीर्घिकोपवनोद्यानैरुपेतं सालभूषितम् ॥ २३ ॥

सत्यधर्मीया — दीर्घिका वाप्य उपसमीपे वनं जलं येषां तान्युद्यानानि च तैः सालैर्वृक्षैस्तालैर्वा । सालःपादपमात्रे स्यात्प्राकारे शङ्कुकद्रुमे । ताले वेति विश्वः ॥ २३ ॥

सुमनोरञ्जिनी — स जरासुतः । गोपुरैः पुरद्वारैः । गोपुरं तु पुरद्वारि द्वारमात्रे च मस्तक इति विश्वः । अट्टालैः उपरितनगृहैः । तोरणैः बहिर्द्वारैश्च उपेतम् । दीर्घिकाभिः वापीभिः । सालः प्राकारः । तेन भूषितं पुरं कुन्तादिभिः बभञ्जेत्यन्वयः ॥ २३ ॥

कुन्तैः कुठारैः कुद्दालैर्दण्डभारैश्च भूरिभिः ।
कर्षणस्थैश्च पाषाणैर्बभञ्ज परितः पुरम् ॥ २४ ॥

सत्यधर्मीया — कुन्ताद्यास्तु गताः कर्षणानि क्षेपिण्यः ॥ २४ ॥

सुमनोरञ्जिनी — दण्डभारैः निशिताग्रैः अयोमयैः दण्डैः । कर्षणस्थैः यन्त्रनिहितैः पाषाणैरिति पदरत्नावली ॥ २४ ॥

भज्यमाने वने तस्मिन् श्रुत्वा मागधमागतम् ।
सन्नाहभेरीः सन्नाद्य रामकृष्णावमर्षिणौ ॥ २५ ॥

सत्यधर्मीया — सन्नाहभेरीराहवदुन्दुभीन् सन्नाद्य वादयित्वा ॥ २५ ॥

सुमनोरञ्जिनी — सन्नाहभेरीः सन्नाहसूचकभेरीः । अमर्षणौ क्रुद्धौ ॥ २५ ॥

रथाश्वकुञ्जरानीकैः सायुधैः सपरिच्छदैः ।
सात्यकिं कृतवर्माणमुग्रसेनं तथा गदम् ॥ २६ ॥

आहुकं वसुदेवं च पुरस्कृत्य महाबलौ ।
निर्जग्मतुरसम्भ्रान्तौ दीप्तौ केसरिणौ यथा ॥ २७ ॥

सत्यधर्मीया — अनीकं (?) पतिः निर्जग्मतुः ॥ २६,२७ ॥

सुमनोरञ्जिनी — असंभ्रान्तौ भयरहितौ । दीप्तौ प्रकाशमानौ । केसरिणौ सिंहौ ॥२७॥

मधुराया विनिर्गत्य कृष्णः कमललोचनः ।
पाञ्चजन्यं महाशङ्खं प्रदध्मौ रिपुभूषणम् ॥ २८ ॥

सत्यधर्मीया — मधुराया विनिर्गत्य बहिरागत्य च ॥ २८ ॥

सुमनोरञ्जिनी — मथुरायाः सकाशात् ॥ २८ ॥

ततः प्रववृते युद्धं यदूनां क्षत्रियैः सह ।
कुम्भाण्डकूपकर्णौ च दानवौ बाणमन्त्रिणौ ॥ २९ ॥

सत्यधर्मीया — क्षत्रियैः शत्रुसम्बन्धिभिः ॥ २९ ॥

दैन्यसैन्येन महता वृतौ मायाविशारदौ ।
युयुधाते महावीर्यौ मायया वृष्णिभिः सह ॥ ३० ॥

सत्यधर्मीया — मायायां तत्सृष्टौ कुशलौ । तदेव व्यनक्ति ॥ **मायया वृष्णिभिः सहेति ।** बहुवचनमाद्यर्थे । वृष्ण्यादिभिः वृष्णिभिरिति पाठः सुन्दरः ॥ ३० ॥

स्वसैन्यं मायया क्लिष्टं दृष्ट्वा यादवसत्तमः ।
विज्ञानास्त्रेण तन्मायामपास्य निमिषान्तरे ।
सात्यकिं कृतवर्माणं चोवाचाहवलालसौ ॥ ३१ ॥

सत्यधर्मीया — विज्ञानास्त्रेण निमिषान्तरेऽपास्य निराकृत्य । आहवलालसौ समरतृष्णायुक्तौ ॥ ३१ ॥

सुमनोरञ्जिनी — मायया क्लिष्टं क्लेशयुक्तम् । स्वसैन्यम् । तन्मायां तयोः बाणमन्त्रिणोः मायाम् । निमिषान्तरे निमेषकालमध्ये । आहवलालसौ युद्धोत्सुकौ ॥ ३१ ॥

आभ्यां भवन्तौ रणदुर्मदाभ्यां रणं सुघोरं कुरुतं रणप्रियौ ।
तावेवमुक्तौ कदनं भयानकं महाबलौ सम्प्रति चक्रतुर्नृप ॥ ३२ ॥

सत्यधर्मीया — आभ्यां कुम्भाण्डकूपकर्णाभ्यां सुघोरं रणं कुरुतम् । कुरुतामिति पाठे भवन्तौ वर्तमानकाले युवां कुरुतामित्यर्थः । सम्प्रतीदानीं ॥ ३२ ॥

सुमनोरञ्जिनी — भयानकं भयङ्करम् ॥ ३२ ॥

चापेनैकेन गोविन्दः क्षत्रियैः शतसम्मितैः ।
युयुधे न हि तच्चित्रं राजन् विश्वात्मनो हरेः ॥ ३३ ॥

सत्यधर्मीया — शतसम्मितैर्बहुत्वेन गणितैर्विश्वात्मनस्तदन्तर्यामिणस्तत्स्वामिनो वा ॥ ३३ ॥

सुमनोरञ्जिनी — शतसम्मितैः शतसङ्ख्यापरिमितैः । विश्वात्मनः जगत्संहर्तुः । तदुक्तम् – आदानादनकर्तृत्वादात्मेति ॥ ३३ ॥

केचिद् हताः समापेतुः कुञ्जराश्छिन्नपुष्कराः ।
निपेतुर्बहवो राजंस्तुरङ्गाः कृत्तकन्धराः ॥ ३४ ॥

सत्यधर्मीया — च्छिन्नपुष्कराश्छिन्नानि पुष्कराणि शुण्डानि येषां ते । कृन्ताश्छिन्नाः कन्धरा ग्रीवा येषां ते तथा ॥ ३४ ॥

सुमनोरञ्जिनी — छिन्नपुष्कराः छिन्नशुण्डाः । समापेतुः पतिताः । कृन्तकन्धराः छिन्नग्रीवाः ॥ ३४ ॥

विशीर्णैरास्तृता पृथ्वी स्यन्दनैश्छिन्नबन्धनैः ।
भटाश्च रुधिराक्ताङ्गाश्छिन्नपादोरुबाहवः ॥ ३५ ॥

सत्यधर्मीया — छिन्नबन्धना इति विशीर्णास्तैः ॥ ३५ ॥

सुमनोरञ्जिनी — विशीर्णैर्विस्रंसितैः । रुधिरेण आक्ताङ्गाः लिप्ताङ्गाः ॥ ३५ ॥

पेतुः कृत्तमहामूलाः किंशुका इव पुष्पिताः ।
शार्ङ्गमुक्ताः शरगणाः कङ्कबर्हिणवाससः ॥ ३६ ॥

सत्यधर्मीया — पुष्पिताः । तारकादीतच् । किंशुकाः पालाशवृक्षाः । कङ्कश्छद्मद्विजे ख्यातो लोहपृष्ट-कृतान्तयोरिति विश्वः । बर्हिणो मयूरास्तत्पक्षा वासांसि येषां ते शरगणाः ॥ ३६ ॥

सुमनोरञ्जिनी — कङ्कानां बर्हिणानां च वासांसि पक्षाः खचिताः येषु ते ॥ ३६ ॥

तैलाक्ता नतपर्वाणः स्वर्णपुङ्खा अयोमुखाः ।
एकैकस्मिन् दशदश भटे चाश्वे शतंशतम् ॥ ३७ ॥

सत्यधर्मीया — स्वर्णस्य पुङ्खा येषां तथाऽयोमुखेऽग्रभागे येषां ते । एकैकस्मिन् भटे दशदश तथैकैकस्मिन्नश्वे शतंशतम् ॥ ३७ ॥

सुमनोरञ्जिनी — नतानि समीपवर्तीनि पर्वाणि येषां ते । स्वर्णमयानि हस्तग्राह्यानि तलभागानि येषां ते । अयोमयं मुखं येषां ते । एकैकस्मिन् भटे दश दश । प्रत्यश्वं शतं शतम् ॥ ३७ ॥

रथे रथे च साहस्रमयुतं च गजे गजे ।
अदृश्यन्त परानीके तदद्भुतमिवाभवत् ॥ ३८ ॥

सत्यधर्मीया — रथे रथे च साहस्रं गतम् । यद्वा सहस्रपरिमाणमस्येति साहस्रं तत्सङ्घस्तदस्य परिमाणमित्यर्थे । शतमानविंशतिकसहस्रवसनादित्यण् । गजे गजे प्रति-गजम् । अयुतं दशसहस्रम् । एवं परानीके परसेनायां शरगणा अदृश्यन्त ॥ ३८ ॥

सुमनोरञ्जिनी — प्रतिरथं साहस्रं, गजे गजे अयुतम् । एवं कृष्णमुक्ताः शरगणा परानीके अदृश्यन्तेत्यन्वयः ॥ ३८ ॥

तथा तैरर्द्यमानेषु चतुरङ्गेषु मागधः ।
रथेन क्रोडचिह्नेन बलभद्रमुपाद्रवत् ॥ ३९ ॥

सत्यधर्मीया — क्रोडचिह्नेन वराहध्वजेन ॥ ३९ ॥

सुमनोरञ्जिनी — ध्वजे वराहचिन्ह्युक्तेन रथेन ॥ ३९ ॥

स पूर्ववैरं नृपतिः स्मरन् रुषा रथं महाकाञ्चनतालकूबरम् ।
आलक्ष्य दूरादधिगम्य रंहसा जरासुतः प्राह हलायुधं गदी ॥ ४० ॥

सत्यधर्मीया — महाकाञ्चनमयस्तालः कूबरो युगन्धरश्च यस्मिंस्तं दूरादालक्ष्य रंहसा सङ्गम्य गदी हलायुधं प्राह ॥ ४० ॥

सुमनोरञ्जिनी — काञ्चनमये तालकूबरे यस्य तम् । कूबरस्तु युगन्धर इत्यमरः । आलक्ष्य दृष्ट्वा ॥ ४० ॥

आदत्स्व ते मुसलं राम तूर्णं येनाहितानिच्छसि जेतुमाहवे ।
बलं च बाह्वोस्तव दर्शयाशु मे यावद् गदां न प्रहराम्यहं त्वयि ॥ ४१ ॥

सत्यधर्मीया — येन मुसलेनाहितानाहवे जेतुमिच्छसि तन्मुसलं राम आदत्स्व गृहाण त्वयि यावद्गदां न प्रहरामि तन्मध्ये तव बाह्वोर्बलं मे आशु दर्शय ॥ ४१ ॥

सुमनोरञ्जिनी — आदत्स्व हस्ते गृहाण ॥ ४१ ॥

इत्येवमुक्तो मगधेश्वरेण सङ्कर्षणोऽमर्षणविह्वलेक्षणः ।
आदाय घोरं मुसलं तटित्प्रभं दण्डं यथा सूर्यसुतो युगक्षये ॥ ४२ ॥

सत्यधर्मीया — युगक्षये प्रलयकाले सूर्यसुतो यमो दण्डमिवादाय ॥ ४२ ॥

सुमनोरञ्जिनी — तडित्प्रभेव प्रभा यस्य तम् । युगक्षये युगावसाने । सूर्यसुतो यमः ॥

आवर्तयित्वा मुसलं हलायुधः सहस्रकृत्वो रिपुदर्पहारिणम् ।
धूमाङ्कुरोद्गारिणमाशु तस्मै चिक्षेप राजन् व्यनदद्धरिर्यथा ॥ ४३ ॥

सत्यधर्मीया — हलायुधः सहस्रकृत्वो रिपुदर्पहारिणं मुसलं मुसलः किसलायत इत्यादेः पुल्लिङ्गोऽपि मुसलशब्दः । तूलोपलशालकमलमुसलेति लिङ्गानुशासने पुंसि चेत्युक्तेः । धूमस्याङ्कुरस्योद्गारो वमनमस्येति णिनिर्वा तम् । चिक्षेप व्यनदच्च । हरिः सिंहो यथा तथा ॥ ४३ ॥

सुमनोरञ्जिनी — आवर्तयित्वा भ्रामयित्वा । धूमाङ्कुरोद्गारिणं निःसरद्धूमाङ्कुरम् । हरिः सिंहः ॥ ४३ ॥

रामबाहुविमुक्तेन मुसलेन जरासुतः ।
साश्वसूते रथे क्षुण्णे क्षणेन व्यंसितः स्वयम् ॥ ४४ ॥

सत्यधर्मीया — क्षुब्धे क्षुण्णे क्षणेन स्वयं जरासुतो व्यंसितो वञ्चितः ॥ ४४ ॥

सुमनोरञ्जिनी — साश्वसूते अश्वैः सूतेन च सहिते । रथे क्षुण्णे चूर्णिते सति । स्वयं व्यंसितो वञ्चितः वञ्चयित्वेति यावत् ॥ ४४ ॥

ततः कालायसीं गुर्वीं गिरिकूटोपमां गदाम् ।
बिभ्रद् गुर्वीं पदा पृथ्वीं चालयन्नभ्यगाद् बलम् ॥ ४५ ॥

सत्यधर्मीया — कालायसीं कृष्णायोविकृतां गिरिकूटेन शिखरेणोपमा यस्याः सा तां गुर्वीं बिभ्रत् गुर्वीमुर्वीं पदा चालयन् बलमभ्यगात् ॥ ४५ ॥

सुमनोरञ्जिनी — कालायसीं कृष्णायोमयीम् । गिरिकूटोपमां गिरिशृङ्गोपमाम् ॥ ४५ ॥

तमापतन्तमालोक्य विरथं रोहिणीसुतः ।
तमेवाभ्यद्रवत् पद्भ्यां विसृज्य स्यन्दनं रणे ॥ ४६ ॥

सत्यधर्मीया — पद्भ्यां नीतिवित्त्वमेव ध्वन्यते ॥ ४६ ॥

सुमनोरञ्जिनी — रणे स्वाधिष्ठितरणस्थाने ॥ ४६ ॥

पश्यतां सर्वभूतानां मागधः क्रोधविह्वलः ।
आवर्तयन् गदां गुर्वीमयःसारमयीं दृढाम् ।
अभ्येत्य गदया रामं प्रजहार ननाद च ॥ ४७ ॥

सत्यधर्मीया — गुर्वीमयःसारमयीमिति पर्यायतोऽनुवादः । गदां गद्यते व्यक्तं स्तुत्यत इति गदा तां गदाम् । अतो न गदातिरेको गदनीयः ॥ ४७ ॥

सुमनोरञ्जिनी — दृढां स्थूलाम् ॥ ४७ ॥

तां गदां पतितां वक्षस्यश्मकुट्टनिभां दृढाम् ।
वामेन जगृहे रामः स्वहस्तेन कुरूद्वह ॥ ४८ ॥

सत्यधर्मीया — अश्मकुट्टनिभान्यप्यङ्गानि द्यति खण्डयतीत्यङ्गदेति वा । अश्मानं कुट्टयन्तीत्यश्मकुट्टोऽयः सारस्तत्सन्निभां रामो वामेन स्वहस्तेन जगृहे । अनेनास्मत्सुन्दर्या धर्तुं शक्या त्वद्गदेत्युपजहास राम इति ध्वन्यते ॥ ४८ ॥

सुमनोरञ्जिनी — अश्मकुट्टनिभां अश्मसारनिभाम् । अश्ममयमुद्गरनिभां वा ॥ ४८ ॥

विसृज्य स गदां तूर्णमुरसाऽऽहत्य मागधम् ।
जग्राहाश्लिष्य बलिनं बलवान् रोहिणीसुतः ॥ ४९ ॥

सत्यधर्मीया — विसृज्य प्रक्षिप्य तूर्णं मागधमुरस्याहत्य बलिनमाश्लिष्य जग्राह ॥४९॥

सुमनोरञ्जिनी– स रामः विसृज्य भूमौ क्षिप्त्वा । आहत्य स्वस्य उरसा आघातयित्वा ॥

बबन्ध पद्भ्यां जठरं मागधस्य हलायुधः ।
चकार कुक्षौ तत्कण्ठं ततस्तौ पेततुर्भुवि ॥ ५० ॥

सत्यधर्मीया — पद्भ्यां स्वचरणाभ्यां कुक्षौ तत्कण्ठं मागधकण्ठं चकार ॥ ५० ॥

तयोर्निपततो राजन् उपर्यासीद्धलायुधः ।
तं मागधः क्षणेनाधश्चकारामितविक्रमः ॥ ५१ ॥

सत्यधर्मीया — निपततोस्तयो राममागधयोर्मध्ये उपरि जरासुतस्योपरि । अमितविक्रम उपचारतः ॥ ५१ ॥

सुमनोरञ्जिनी — निपततोस्तयोर्मध्ये । उपरि मागधस्योपरि ॥ ५१ ॥

तत उत्थाय तौ वीरौ क्रोधसंरक्तलोचनौ ।
भूयो जग्रहतुर्घोरौ मत्तौ द्वाविव कुञ्जरौ ॥५२॥

सत्यधर्मीया — भूयो जगृहतुः ॥ ५२ ॥

तावुभौ परमक्रुद्धौ परस्परवधैषिणौ ।
उरसोरः समाहत्य भीमौ चकृषतू रणे ॥ ५३ ॥

सत्यधर्मीया — उरसा उरो वक्षसा वक्षः ॥ ५३ ॥

सुमनोरञ्जिनी — चकृषतुः चकर्षतुः ॥ ५३ ॥

एवं धनुःशतशतं तावाकृष्य परस्परम् ।
निकटस्थान् द्रुमान् शैलांश्चूर्णयामासतुर्नृप ॥ ५४ ॥

सत्यधर्मीया — निकटस्थान्समीपवर्तिपादपान् ॥ ५४ ॥

तं विसृज्य जरासन्धो गदामादाय दुर्मदः ।
उदतिष्ठदमेयात्मा रामोऽपि बलिनां वरः ।
क्षणादादत्त मुसलं प्रहर्तुमुपचक्रमे ॥ ५५ ॥

सत्यधर्मीया — तं रामम् ॥ ५५ ॥

तं कामपालो मुसलेन मूर्ध्नि जत्रुण्यंसे भुजयोर्नाभिदेशे ।
शङ्के च जानौ जठरे च वक्षस्यनेकशो वै प्रजहार युद्धे ॥ ५६ ॥

सत्यधर्मीया — कामपालो हलायुधो जत्रुणि गलतले । सन्धी तस्यैव जत्रूणीत्यमरः । अंसे स्कन्धे भुजयोः । शङ्खे चेति पाठे शङ्खो निध्यन्तरे कम्बुललाटास्थिनखेषु चेति विश्वात् ललाटास्थिषु वा नखेषु वेत्यर्थः । ऊराविति चेदुत्सङ्ग इत्यर्थः । जानौ जानुनि जायते । वृसनिजनि चरीति अप् । जनिवध्योश्चेति न प्रवर्तते । उणित्यनुबन्धद्वयसामर्थ्यात् । जानुः अर्धर्चादिः । आस्त्रियामिति त्रिभिः सम्बध्यंते । रात्रौ जानुर्दिवाभानुरित्यादेः । जठरे उदरे वक्षस्युरसि । एकैकस्थानेऽनेकशः प्रजहार ॥ ५६ ॥

सुमनोरञ्जिनी — कामपालो बलभद्रः । जत्रुणि कण्ठपश्चाद्भागे । अंसे स्कन्धे ॥ ५६ ॥

तं मागधो वक्षसि कन्धरे च मुखे ललाटे चुबुके तथांऽसे ।
नाभौ नितम्बे च तथैव पार्श्वे समं स मानी प्रजहार रामम् ॥ ५७ ॥

सत्यधर्मीया — कन्धरे कन्धरायां हे कन्धर इति सम्बोध्य प्रजहारेति वा । मुखे तथा ललाटे चुबुके । अधस्ताच्चुबुकमित्युक्तेरोष्ठाधःप्रदेशः । स मानी । सममिति वचनादत्रानुक्तमङ्गं ततस्तत्रानुक्तम् । अतः सङ्ग्राह्यमिति सूचयति समं युगपदिति वा ॥ ५७ ॥

सुमनोरञ्जिनी — कन्धरे कण्ठे ॥ ५७ ॥

एवं प्रहरतोस्तत्र राममागधयोर्मृधे ।
राजानो रणसंविग्ना बभूवुर्भृशपीडिताः ॥ ५८ ॥

सत्यधर्मीया — रणसंविग्ना एतद्युद्धभीताः ॥ ५८ ॥

सुमनोरञ्जिनी — रणे संविग्नाः निर्विण्णाः ॥ ५८ ॥

क्रमेण ते विमनसो निवृत्तकदनोद्यमाः ।
आसन्नासन्ननिधनं मन्वाना मागधेश्वरम् ॥ ५९ ॥

सत्यधर्मीया — स्वयं निवृत्तकदनोद्यमा आसन्नं समीपवर्तिनिधनं मरणं यस्य तमिति च । मागधेश्वरं मन्वानास्तन्वानाः सङ्गरमासन् ॥ ५९ ॥

सुमनोरञ्जिनी — निवृत्तकदनोद्यमाः आसन् । कुतः ? आसन्नं समीपस्थं निधनं मरणं यस्य तथाविधं मागधेश्वरं मन्वाना इति ॥ ५९ ॥

सात्यकिस्तु महातेजाः सङ्गरे बाणमन्त्रिणा ।
युध्यमानस्त्रिभिर्बाणैः कुभाण्डेन समर्पितः ॥ ६० ॥

सत्यधर्मीया — सह किञ्चित्सेनः शैनेयो गतः किल तत्र किमभूदित्यतस्तां कथां कथयति ॥ **सात्यकिरिति** । बाणमन्त्रिणा कुभाण्डेन त्रिभिर्बाणैः समर्पितस्ताडितः ॥ ६० ॥

सुमनोरञ्जिनी — बाणमन्त्रिणा कुभाण्डेनेत्यन्वयः ॥ ६० ॥

सोऽतिविद्धो महाबाहुः क्रुद्धः सर्प इव श्वसन् ।
आददे पञ्च नाराचान् कुम्भाण्डं हन्तुमाहवे ॥ ६१ ॥

सत्यधर्मीया — नाराचान् शरविशेषान् ॥ ६१ ॥

सुमनोरञ्जिनी — सः सात्यकिः ॥ ६१ ॥

ततो हाहारवो जज्ञे सेनायां दैत्यमन्त्रिणः ।
सात्यकिस्तु महाबाहुराकृष्याकर्णमाशुगैः ॥ ६२ ॥

सत्यधर्मीया — दैत्यस्य बाणस्य मन्त्रिणोऽमात्यस्य सेनायाम् । अत्राशुगैः इत्यस्य शीघ्रगामिभिरित्यर्थः ॥ ६२ ॥

सुमनोरञ्जिनी — दैत्यमन्त्रिणः कुभाण्डस्य सेनायाम् । आकृष्य चापमिति शेषः ॥ ६२ ॥

विव्याध कुरुशार्दूल कुम्भाण्डं बाणमन्त्रिणम् ।
नाभौ कण्ठे ललाटे च हृदि मूर्ध्न्यपि दानवम् ॥ ६३ ॥

सत्यधर्मीया — कुभाण्ड इत्यपि नाम भारते हरिवंशे ।

'एवमुक्ते तु वचने कुभाण्डेन महात्मना ।
तथेत्याह कुभाण्डम्' इति निरवकाशमुक्तेः ।

पञ्चानां विषयानाह — **नाभावित्यादिना** ॥ ६३ ॥

अतिविद्धो रथोपस्थे निषसाद विचेतनः ।
तं विचेतनमालोक्य दुर्मनास्तस्य सारथिः ॥ ६४ ॥

सत्यधर्मीया — तस्य कुभाण्डस्य ॥ ६४ ॥

सुमनोरञ्जिनी — रथोपस्थे रथमध्ये । विचेतनः स्मृतिरहितः ॥ ६४ ॥

अपोवाह रणात् तूर्णं रथेन भरतर्षभ ।
कूपकर्णस्तु दैतेयः प्रसक्तः कृतवर्मणा ॥ ६५ ॥

सत्यधर्मीया — रणात्तं तूर्णमपोवाहापानयत् । प्रसक्तः सङ्गतः ॥ ६५ ॥

सुमनोरञ्जिनी — अपोवाह परावर्तयत् । कृतवर्मणा साकं प्रसक्तः युद्धासक्तः ॥ ६५ ॥

गतं कुम्भाण्डमालोक्य प्राप्तं च प्राणसंशयम् ।
विसृज्य कृतवर्माणमपायात् समराङ्गणात् ॥ ६६ ॥

सत्यधर्मीया — समराङ्गणात् गतम् । कुभाण्डमालोक्य तथा प्राणसंशयं च गतमालोक्य समराङ्गणात्कृतवर्माणं विसृज्यापायादपगतः । प्राणसंशयं गतमात्मानं च । इत उपर्यवस्थाने ममापीयं दुर्दशैवेति विलोक्यालोच्य अपायादेष्यतोऽपायादिति वा ॥ ६६ ॥

सुमनोरञ्जिनी — अपायात् परावृत्तः ॥ ६६ ॥

तौ विसृज्य रणं दैत्यावनापृच्छ्य च भूपतिम् ।
अविसृष्टौ मागधेन हतशेषबलान्वितौ ।
दैत्यौ तेनैव मार्गेण जग्मतुः शोणितं पुरम् ॥ ६७ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे एकपञ्चाशोऽध्यायः ॥

सत्यधर्मीया — भूपतिं जरासन्धमनापृच्छ्यापृष्ट्वाऽत एव मागधेनाविसृष्टावनाज्ञप्तौ तेनैव येन पथाऽऽगतौ तेनैव प्रत्यङ्गशोणितं जग्मतुः रक्तमिति शोणितं तदाख्यं पुरं च ॥ ६७ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे एकपञ्चाशोऽध्यायः ॥ १०-५१ ॥

सुमनोरञ्जिनी — अनापृष्ट्य अपृष्ट्वा । अविसृष्टौ अप्रेषितौ ॥६७॥

॥ इति श्रीमद्भागवतदशमस्कन्धोत्तरार्धव्याख्यायां सुमनोरञ्जिन्याम् एकपञ्चाशोऽध्यायः॥

॥ अथ द्विपञ्चाशोऽध्यायः ॥

श्रीशुक उवाच –

बाणसेनां गतां दृष्ट्वा शस्त्रौघेण भृशार्दिताः ।
राजपुत्रा विमनसो बभूवुर्नृपसत्तम ॥ १ ॥

सत्यधर्मीया —— राजपुत्रा नृपसत्तमेत्याभ्यां परम्परया राजपुत्रा इति न भाव्यं भीतैस्तथाऽपि भीता इति प्रतिपक्षिबलिष्ठतामिव तवैतादृशी दशा कदाऽपि नायाता विद्वानेव विजानाति विद्वज्जनपरिश्रममिति त्वमेतन्न जानीष इति च ध्वनयति ॥ १ ॥

सुमनोरञ्जिनी —— विमनसः व्यग्रमनसः ॥ १ ॥

गतां च दानवीं सेनां श्रान्तांश्च धरणीपतीन् ।
दृष्ट्वा कृष्णं च युद्ध्यन्तं रामस्य ववृधे बलम् ॥ २ ॥

सत्यधर्मीया —— दानवीं बाणसम्बन्धिनीम् । धरणीपतीन् राज्ञः श्रान्तान् कृष्णं युद्ध्यन्तं च दृष्ट्वा रामस्य बलस्य बलं ववृधे ॥ २ ॥

सुमनोरञ्जिनी —— दानवीं दानवस्य बाणस्य सम्बन्धिनीम् ॥ २ ॥

स मागधं गृहीत्वाऽऽजौ मौलौ वामेन पाणिना ।
प्रहर्तुमैच्छच्छिरसि मुसलेन हलायुधः ॥ ३ ॥

सत्यधर्मीया —— स हलायुध ऐच्छत् । मौलौ चूडायाम् । मौलिः किरीटे धम्मिल्ले कङ्कोलद्रुमचूडयोरिति विश्वः ॥ ३ ॥

सुमनोरञ्जिनी —— आजौ युद्धौ मौलौ संयतकेशपाशे । मौलिः संयतकेशेषु चूडायां मुकुटे इत्यभिधानमिति पदरत्नावली ॥ ३ ॥

ततोऽन्तरिक्षे घनघोषघर्घरां शुश्राव वाणीं विशदाशरीरिणीम् ।
न राम वध्यो भवता जरासुतः सुखी निवर्तस्व रणादिति स्फुटम्॥ ४ ॥

सत्यधर्मीया — ततः । हे राम । भवता जरासुतो न वध्यो रणात्सुखी निवर्तस्वेति स्फुटमन्तरिक्षे घनघोषघर्घरां तद्वद्गम्भीराम् । गाम्भीर्ये नूपुरारावे घर्घरः समुदाहृत इति घर्घरस्तु चलद्वारि वारिदध्वान इति विश्वः । घनघोषाज्जायमानो घर्घरो गलज्जलारावस्तद्वद्धियमाना-मिति वा । विशदा च सा अशरीरिणी च तां वायुसम्बन्धिनीम् । वैशद्यं चार्थप्रतिभासो यथा भवेच्छ्रुतवतां तथेति मन्तव्यम् । विशदवत् क्षीरमाधुर्यवन्मधुरा च साऽशरीरिणी च तामिति । विशदं क्षीरमाधुर्यमित्युक्तेः । वाणीं शुश्रावाशृणोत् ॥ ४ ॥

सुमनोरञ्जिनी — घनघोष इव मेघध्वनिरिव घर्घरां गम्भीराम् । गाम्भीर्ये नूपुरारावे घर्घरः समुदाहृत इति च । अशरीरिणीम् । वाणीं शुश्राव ॥ ४ ॥

वचस्तदाकर्ण्य हलायुधो बली विसृज्य चास्थाय रथं रणाङ्गणात् ।
न्यवर्तत ब्रह्मर्षिसिद्धसङ्घैरभिष्टुतो मागधसूतबन्दिभिः ॥ ५ ॥

सत्यधर्मीया — बली हलायुधस्तद्वच आकर्ण्य श्रुत्वा विसृज्य जरासन्धं रथमास्थाय रणाङ्गणात् ब्रह्मर्षिसिद्धसंङ्घैर्मागधसूतबन्दिभिरभिष्टुतो न्यवर्तत निववृते ॥ ५ ॥

सुमनोरञ्जिनी — विसृज्य मागधमिति शेषः । रथमास्थाय रथे उपविश्य ॥ ५ ॥

जरासुतः सम्प्रति नम्रकन्धरो नृपैश्च युद्धाभिजितैः समन्वितः ।
हतावशिष्टाल्पबलेन संवृतो निवृत्तयुद्धः प्रययौ स्वकं पुरम् ॥ ६ ॥

सत्यधर्मीया — नम्रः पराजयजातलज्जया कन्धरो यस्य स युद्धाभिजितैर्नृपैस्समन्वितो युक्तः समनुभिर्मनुभिर्मन्त्रैर्गुप्तालोचनैः सहिता इति समनवस्तैरिति वा । सामर्थ्यात्समनु-पदार्थस्य नृपपदार्थे तादात्म्यसम्बन्धेनान्वयः । समनुभी राजभिरित इति । आगमार्थः परस्य चेति कथालक्षणटीकायां परस्येत्येतत्सामर्थ्यादागमशब्देन सम्बध्यत इत्युक्तेः । हतावशिष्टे-नेत्युक्तौ अन्नशेषैः किं क्रियतामित्यादिवदवशिष्टस्य बहुलताभायान्न तथेति बोधयितु-मल्पेत्यजल्पदिति ज्ञेयम् ॥ ६ ॥

सुमनोरञ्जिनी — नम्रकन्धरः अधोमुख इत्यर्थः ॥ ६ ॥

गोविन्दस्तु महातेजाः सपत्नांञ्छरसञ्चयैः ।
आच्छाद्य भूपान् विद्राव्य हत्वा च सुबहून् रणे ॥ ७ ॥

सत्यधर्मीया — सपत्नान् रिपून् भूपान् कांश्चिद्विद्राव्य सुबहून् हत्वा ॥ ७ ॥

सुमनोरञ्जिनी — सपत्नान् भूपानित्यन्वयः । आच्छाद्य विद्राव्य हत्वा च ॥ ७ ॥

संस्तूयमानः सन्तुष्टैः सूतमागधवन्दिभिः ।
ब्राह्मणैश्च महाविद्यैः स्तोत्रं कुर्वद्भिरुच्चकैः ॥ ८ ॥

सत्यधर्मीया — महाविद्यैर्बहुज्ञैः यैरसन्तुष्टैः सेनागमनसमयेऽन्वीयमानस्तैरेव सन्तुष्टैर्महावित् सर्वज्ञोऽन्वीयमान इति वा ॥ ८ ॥

सुमनोरञ्जिनी — महत्यो विद्याः वेदशास्त्रादिरूपाः येषां तैः ॥ ८ ॥

अन्वीयमानो भगवान् प्राविशन्मधुरां पुरीम् ।
हृष्टपुष्टजनाकीर्णां तुङ्गप्राकारतोरणाम् ॥ ९ ॥

सत्यधर्मीया — अत एव मधुरां मनोज्ञां मधुरां तन्नाम्नीम् ॥ ९ ॥

सुमनोरञ्जिनी — तुङ्गाः प्राकाराः तोरणा वाहा द्वारश्च यस्याम् ॥ ९ ॥

चलत्कदलिकोपेतां दीपाङ्कुरविराजिताम् ।
प्रविशन् राजमार्जेण स्त्रीभिः प्रासादसंस्थितैः ॥ १० ॥

सत्यधर्मीया — दीपैरङ्कुरैश्च दीपाङ्कुरैर्दीपकलिकाभिरिति वा स्त्रीभिस्तथा प्रासादसंस्थितैर्बालैर्बलिष्ठैर्वृद्धैः पुरुषैश्च ॥१० ॥

सुमनोरञ्जिनी — दीपाङ्कुरैः दीपैः अङ्कुरैश्च । स्त्रीभिः, प्रासादसंस्थितैः पुरुषैश्च ॥ १० ॥

पुष्पैश्च लाजाञ्जलिभिः कीर्यमाणो व्यराजत ।
उपायनानि दिव्यानि पुष्पस्रगनुलेपनान् ॥ ११ ॥

सत्यधर्मीया — पुष्पैर्लाजाञ्जलिभिर्भ्रष्टव्रीह्यञ्जलिभिः कीर्यमाणो व्यराजत । अनुलेपनशब्दः करणे ल्युडन्त इति पुल्लिङ्गः । उपलिप्यतेऽनेनेति गन्धादिस्तम् ॥ ११ ॥

प्रियङ्करा माधवाभ्यामुपाजह्रुः पुरौकसः ।
एवं स राजमार्गेण गत्वा यादवसत्तमः ॥ १२ ॥

सत्यधर्मीया — प्रियङ्करा गतम् । माधवाभ्यां रामकृष्णाभ्याम् ॥ १२ ॥

सुमनोरञ्जिनी — पुरौकसः पुरस्थाः । पुष्पस्रजः पुष्पमालाः । उपाजह्रुः उपानिन्युः ॥

सभां प्रविश्य विपुलामुपविश्य वरासने ।
रामेण सहितो वीरः शैनेयेन च धीमता ॥ १३ ॥

सत्यधर्मीया — धीमतेत्युभयविशेषणम् ॥ १३ ॥

सुमनोरञ्जिनी — शैनेयेन सात्यकिना ॥ १३ ॥

पूजितो यदुभिर्विप्रैर्दिवि शक्र इवामरैः ।
तत्रासीनैर्बृद्धिमद्भिर्यदुवृद्धैर्महात्मभिः ॥ १४ ॥

सत्यधर्मीया — शक्र इवेत्येकवचनेन यदि द्वौ स्यातां शक्रौ तदा समौ स्यातामिति स्वोक्तितात्पर्यं ध्वनयामासेति वा । बलान्तर्गतस्य शुक्लकेशस्य श्रीकृष्णस्य च तादात्म्यमेव चेति ज्ञेयम् ॥ १४ ॥

उग्रसेनोद्धवमुखैरक्रूरप्रमुखैर्हरिः ।
समाभाष्याभ्यनुज्ञातः सङ्कर्षणसहायवान् ॥१५ ॥

सत्यधर्मीया — अक्रूरः प्रमुखे सम्मुखे येषां तैरुग्रसेनोद्धवमुखैरुग्रसेनादिभिः । उग्रायां क्रूरायां सेनायां सत्यामागतायां ये उद्धवोपेतमुखास्तैरक्रूरप्रमुखैरक्रूरादिभिरिति वा । इदं-द्वारत्वादक्रूरपुरस्कृतिः । नानेनातिरेकतो मुखभङ्ग इति ध्येयम् । समाभाष्यालोच्येति यावत् ॥ १५ ॥

सुमनोरञ्जिनी — उग्रसेनादिभिः अनुज्ञात इति सम्बन्धः । तान् समाभाष्य ॥ १५ ॥

द्रष्टुकामो महादुर्गं गोमन्तं पर्वतोत्तमम् ।
निर्गम्य मधुरां प्रातर्दक्षिणाभिमुखो ययौ ॥ १६ ॥

सत्यधर्मीया — मधुरां मधुरायाः । षट्सु द्वितीयेति स्मरणात्पञ्चम्यर्थे द्वितीया ॥१६॥

सुमनोरञ्जिनी — महादुर्गम् । महान्तं परिमाणतः । दुर्गं च गन्तुमशक्यम् । नामतो गोमन्तम् । मथुरां मथुरायाः । षट्सु द्वितीयेति सूत्रात् । निर्गम्य ॥ १६ ॥

स रामानुगतः श्रीमानुत्तीर्य यमुनां हरिः ।
देशान् बहूनतिक्रम्य पर्वतान् सरितो गिरौ ॥ १७ ॥

सत्यधर्मीया — रामानुगतः स श्रीमान् । गिरौ महेन्द्रे ॥ १७ ॥

सुमनोरञ्जिनी — गिरौ ॥ १७ ॥

गच्छन् क्वचिद् वनोद्देशे वृक्षमूलनिवासिनम् ।
ददर्श कञ्चन मुनिं जटामण्डलमण्डितम् ॥ १८ ॥

सत्यधर्मीया – तत्रापि वनोद्देशे वृक्षमूलनिवासिनं जटामण्डलमण्डितं कञ्चन मुनिं ददर्श ॥ १८ ॥

सुमनोरञ्जिनी — वनोद्देशे वनप्रदेशे । कञ्चन मुनिं भार्गवरामाख्यम् । ददर्शेति सम्बन्धः । तं विशिनष्टि ॥ जटेति । जटायाः मण्डलेन वलयेन मण्डितम् अलङ्कृतम् ॥ १८ ॥

चीरकृष्णाजिनधरं कमण्डलुविराजितम् ।
समाधौ समुपाविष्टं तेजसा भास्करोपमम् ॥ १९ ॥

सत्यधर्मीया — प्रावृणमेकमेकं परिधानीयमिति चीरकृष्णाजिनयोर्धरतीति तम् ॥१९॥

सुमनोरञ्जिनी – चीरस्य जीर्णवस्त्रस्य कृष्णाजिनस्य च धरं धारकम् । समाधौ समाध्यर्थे । समाध्यवस्थायाम् । समुपाविष्टं प्रविष्टमिति वा । समाधिगतमित्यर्थः ॥१९ ॥

फलमूलकृताहारं वृतं शिष्यशतैर्मुनिम् ।
दृष्ट्वा परमसन्तुष्टौ रामकृष्णौ जगत्पती ॥ २० ॥

सत्यधर्मीया — फलमूलकृत आहारो यस्य तम् । लोकदृष्ट्या फलमूलकृत आहारोऽस्मिन्कर्मणि तद्यथा भवति तथा शिष्यशतैर्वृतमिति वाऽन्वयः । फलमूलाहारवत् शिष्यकर्तृकवरणं तेन युत इत्यर्थः ॥ २० ॥

प्रणामं चक्रतुर्वीरौ यथान्यायमतन्द्रितौ ।
इदं चोवाच भगवान् कृष्णस्तं मुनिपुङ्गवम् ॥ २१ ॥

तात्पर्यम्– 'सर्वावताराभिन्नोऽपि समशक्तिरपि स्वयम् । पूज्यपूजकनीचोच्चं मोहनाय दुरात्मनाम् । अखण्डैकरसो विष्णुर्दर्शयेत्तत्र तत्र हि ॥' इति षाड्गुण्ये ॥ २१ ॥

सत्यधर्मीया — प्रमाणं चक्रतुर्वीरौ यथान्यायमिति श्लोके नम्यत्वं भार्गवस्य नन्तृता च कृष्णस्य तेनोच्चत्वं भृगुजातस्य शौरेर्नीचता साऽपि न चेतसा चिन्तयितुं योग्या । उत्तरत्र नमस्ते पुण्डरीकाक्षेति कृष्णस्य नम्यता नन्तृता च जामदग्र्यस्येत्युक्तेरनिर्णयः । तयोर्भेद एवादौ वासुदेवः सङ्कर्षणः प्रद्युम्नोऽनिरुद्धोऽहं मत्स्यः कूर्मो वराहो नरसिंहो वामनो रामो रामः कृष्णो बुद्धः कल्किरहं शतधेत्यादिबाधितः । न च तादात्म्ये नम्यत्वादिः सम्भवतीत्यतः प्रमाणेन तात्पर्यमाह ॥ सर्वेति । सर्वावतारैरभिन्नः समा शक्तिर्यस्य स तथा स्वयं हरिः पूज्यपूजकनीचोच्चम् । द्वन्द्वैकवद्भावः । भावप्रधानश्च । पूज्यत्वं पूजकत्वमेतत्प्रयोजकमुच्चत्वं नीचत्वं च तानि । अत्र यथाक्रममुच्चनीचमिति यद्यपि वक्तव्यम् । कथमुक्तावप्यभेदे किमित्येवं व्यत्यस्योक्तिः । पाठक्रमादर्थक्रमो गरीयानित्युक्तेरुक्तप्रकारेणान्वयार्थौ ज्ञेयौ । अखण्डैकरसोऽपि ज्ञानघनोऽपि विष्णुर्दुरात्मनां मोहाय तत्र तत्रावतारेषु दर्शयेत् । हीति विद्धवन् मुग्धवच्चैव केशवो वेदनार्तवदित्येकस्मिन्नपि दुरात्मनां मोहाय दर्शयेदित्याद्यर्थविशेषं सूचयति । इति षाड्गुण्योक्तेर्न नम्यनन्तृभावोऽभेदं बाधितुमलमिति भावः ॥

वीरौ वीरः प्रेरकरहित एकश्च वीरो विवद्गरुडवदीर ईर्यश्चैको वीरोऽपरश्चेति वीरौ यथान्यायमतन्द्रितौ निरालस्यौ प्रणामं चक्रतुः । अनन्तरं कृष्णो भगवान् तं मुनिपुङ्गवमिदमुवाच ॥ २१ ॥

सुमनोरञ्जिनी — एतादृशं मुनिं दृष्ट्वा । अतन्द्रितौ अनलसौ भूत्वा शीघ्रमिति यावत् । प्रणामं चक्रतुरित्यन्वयः । अत्र कृष्णभार्गवरामयोर्नन्तृनम्यभावोक्त्या भेदः प्रतीयते । तां निवारयितुं प्रवृत्तं तात्पर्यम् ।

'सर्वावताराभिन्नोऽपि समशक्तिरपि स्वयम्
पूज्यपूजकनीचोच्चं मोहनाय दुरात्मनाम् ।
अखण्डैकरसो विष्णुर्दर्शयेत् तत्र तत्र च' ॥ इति षाड्गुण्य इति ।

यद्यपि विष्णुः सर्वावतारैरभिन्नः स्वरूपतो भेदरहितः समशक्तिश्च । अपिना अन्ये ज्ञानादयो गुणाः गृह्यन्ते । शक्तिज्ञानादयो गुणा अपि समाना इत्यर्थः । सर्वशक्तिरिति पाठे पूर्णशक्तिरित्यर्थः । अपि तथापि दुरात्मनां मोहनाय । पूज्यपूजकतया नीचोच्चतां दर्शयेत् । नन्वस्तु सर्वावताराभिन्नः । उच्चस्यापि कदाचित्स्वगतगुणनाशे नीचतादर्शनात्तथास्त्वित्यत उक्तम् । **अखण्डैकरस इति** । भेदाभेदे हि खण्डितत्वं स्यात् । अयं तु गुणादिभिरखण्डैकरसः अत्यन्ताभिन्नः । अतो न कदाचिदपि नीचोच्चता । किन्तु मोहार्थं प्रदर्शनमात्रमिति तात्पर्यवचनार्थो द्रष्टव्यः ॥ २१ ॥

नमस्ते भार्गव श्रीमन् जामदग्न्य तपोधन ।
रामकृष्णौ स्मृतावावां कचित् ते श्रवणं गतौ ॥ २२ ॥

सत्यधर्मीया — हे भार्गव श्रीमंस्ते नमः । वक्तारो नानुयोक्तारं प्रति लोका नायं नायको यदूनामप्राक्षीन्नोत्तरमूचे कश्चित्किञ्च पूर्वं कश्चन मुनिपुङ्गवमित्यरूपनामवित्त्वं चोक्तं प्रतीयते अतः कथं जामदग्न्य भार्गवेत्युक्तिरित्यतोऽत एव कश्चनेत्यादिकं कश्चन विलासं जानीहीति भाव उपसंहार एवमीरणेन ज्ञेयः । स्मृतौ आवां ते श्रवणं श्रोत्रं कच्चिद्गतौ किम् ॥ २२ ॥

सुमनोरञ्जिनी — भार्गव भृगुकुलोत्पन्न ! जामदग्न्य जमदग्नेरपत्य ! आवां रामकृष्णाविति स्मृतौ कचित्काले श्रवणं गतौ । किमिति काकुः ॥ २२ ॥

इत्युक्तस्तेन धर्मात्मा वासुदेवेन भार्गवः ।
निरीक्ष्य माधवौ प्राह प्रीत्युत्फुल्लमुखेक्षणः ॥ २३ ॥

सत्यधर्मीया — मुखं चेक्षणे चोत्फुल्लानि यस्य सः ॥ २३ ॥

सुमनोरञ्जिनी — प्रीत्या उत्फुल्ले विकसिते मुखेक्षणे यस्य ॥ २३ ॥

स्वागतं ते यदुश्रेष्ठ साग्रजाय महात्मने ।
जाने त्वां यदुषूत्पन्नं भगवन्तमधोक्षजम् ॥ २४ ॥

सत्यधर्मीया — हे यदुश्रेष्ठ । ते आगतं स्वागतं समीचीनमागमनम् । भगवन्तमधोक्षजं यदुषूत्पन्नं त्वामहं जाने ॥ २४ ॥

सुमनोरञ्जिनी — साग्रजाय महात्मने इति चतुर्थी षष्ठ्यर्थे ते, आगतमागमनं तत्समीचीनमिति ॥ २४ ॥

कार्याणां कारणं पूर्वं जगतामादिपूरुषम् ।
नमस्ते पुण्डरीकाक्ष विश्वलोकैककारण ॥ २५ ॥

सत्यधर्मीया — कार्याणां कारणं कर्तारं पूर्वं जगतामदिपूरुषमित्यनन्यथा-सिद्धनियतपूर्वभावस्य तत्प्रयोजकस्योक्तिः । तस्मै साग्रजाय महात्मने ते नमः । विश्वे च लोकाश्च तेषामेकं स्वरूपभूतं कं सुखं मौक्तम् । तस्यारण मुख्यावास तद्दातरिति यावत् । विश्वस्य योग्यजगतो लोको रोचमानः को वा वैकुण्ठे लोकस्तस्यैककारण तत्सुखव्यक्ति-हेताविति वा । प्राग्बृहद्भाष्यमुदाहृतमनुसन्धेयम् ॥ २५ ॥

सुमनोरञ्जिनी — कार्याणां महदादीनामचेतनानां जगतां जङ्गमानां च । पूर्वं कारणं आदिकारणम् । प्रधाननिवृत्यर्थमादिपूरूषमिति । पुराणपुरुषमित्यर्थः । विश्वलोकस्य समस्तलोकस्य । एककारण स्वतन्त्रकारण । अत्र पूर्वोक्तमनूद्य स्वातन्त्र्यं विधीयत इति न पुनरुक्तिः ॥ २५ ॥

किमर्थमिह सम्प्राप्तौ भवन्तौ विश्ववन्दितौ ।
इत्युक्तौ जामदग्न्येन प्राहतू रामकेशवौ ॥ २६ ॥

सत्यधर्मीया – प्राज्ञोऽप्यज्ञवत्पृच्छति – **किमर्थमिति** ॥ तावपि तथैवाहतुरित्याह ॥ **इत्युक्ताविति** ॥ २६ ॥

सुमनोरञ्जिनी — विश्वेन वायुना वन्दितौ ॥ २६ ॥

गोमन्तं द्रष्टुमिच्छावो दुर्गहेतोरिति प्रभो ।
तदाकर्ण्याब्रवीद् रामो जामदग्न्यो जनार्दनम् ॥ २७ ॥

सत्यधर्मीया — दुर्गहेतोरितराशक्यस्थाननिमित्तम् । इच्छाव इति पाङ्क्तः पाठः । इच्छाम इति पाठेऽस्मदो द्वयोश्चेति वयमिच्छाम इति बहुवचनं ज्ञेयम् ॥ २७ ॥

सुमनोरञ्जिनी — दुर्गहेतोः दुर्गनिर्माणनिमित्तम् ॥ २७ ॥

एवमस्तु महाबाहो गोमन्तं गच्छ साग्रजः ।
करवीरपुरं नाम तन्मूले परिपालितम् ॥ २८ ॥

सृगालवासुदेवेन स युवां न सहिष्यति ।
तं हत्वा समरे शैलं गोमन्तं साध्ववाप्स्यथ ॥ २९ ॥

सत्यधर्मीया — तद्वचनसंवलितलपितस्य तात्पर्यमेकस्मिन्पर्यवसाययन् दर्शयति ॥ **एवमस्तु महाबाहो इति ॥** तन्मूले गोमन्तादधःप्रदेशे सृगालवासुदेवेन त्वज्ज्येष्ठेन । स युवां न सहिष्यति गतम् ॥ २९ ॥

सुमनोरञ्जिनी — तन्मूले तस्य गोमन्तस्य मूले ॥ युवामिति चतुर्थी । युवां दृष्ट्वेति वा । न सहिष्यति न सहनं करिष्यतीत्यर्थः ॥ २८,२९ ॥

इत्युक्तौ तेन रामेण जामदग्न्येन माधवौ ।
तमनुज्ञाप्य सर्वज्ञं जग्मतुर्दक्षिणामुखे ॥ ३० ॥

सत्यधर्मीया — तं सृगालवासुदेवं सर्वज्ञं तमनुज्ञाप्य दक्षिणामुखे जग्मतुः ॥ ३० ॥

तौ तथा यदुशार्दूलौ गच्छन्तौ दक्षिणापथम् ।
ददर्शतुश्च गोमन्तमभ्रङ्कषमहाद्रुमम् ॥ ३१ ॥

सत्यधर्मीया — अभ्रङ्कषा महाद्रुमाः । अभ्राणि मेघान् अभ्रमम्बरं वा कषन्तीति ते

द्रुमा यस्मिंस्तम् । सर्वकूलाभ्रकरीषेषु कष इति खच् । खित्यनव्ययस्येति ह्रस्वे मुम् । ददर्शतुर्ददृशतुः ॥ ३१ ॥

सुमनोरञ्जिनी — दक्षिणापथं दक्षिणदिङ्मार्गम् । अभ्रं मेघं कषन्त्युल्लिखन्तीत्यभ्रङ्कषाः । अत्युन्नता इत्यर्थः । तादृशद्रुमाः यस्मिन् तत् ॥ ३१ ॥

करवीरपुरं चैव तन्मूले तुङ्गतोरणम् ।
दृष्ट्वा विचित्रप्राकारं हर्म्यप्रासादगोपुरम् ॥ ३२ ॥

सत्यधर्मीया — तुङ्गतोरणं तुङ्गानि तोरणानि यस्मिंस्तत् । तुङ्गतस्तुङ्गत्वतः अरणं युद्धानास्पदमिति वा । विचित्रप्राकारहर्म्यप्रासादगोपुरम् ॥ ३२ ॥

शङ्खमाध्मापयामास शङ्खचक्रगदाधरः ।
तस्य शङ्खध्वनिं श्रुत्वा भूपालः क्रोधविह्वलः ॥ ३३ ॥

सत्यधर्मीया — शङ्खचक्रगदाधरः शङ्खमाध्मापयामास दध्मौ ॥ ३३ ॥

सृगालो वासुदेवाख्यः प्रत्यगाद् यदुनन्दनौ ।
सोऽभ्येत्य बहुपादातितुरङ्गरथकुञ्जरः ॥ ३४ ॥

सत्यधर्मीया — सृगालो वासुदेवेत्याख्या यस्य सः । व्यासो व्यासेन निर्दिशन् गोमायु-समतां तस्य स्पष्टयामासेति ज्ञेयम् । प्रत्ययादभ्युद्ययौ । पादातिः गतम् ॥ ३४ ॥

सुमनोरञ्जिनी — सृगालवासुदेव इत्याख्या यस्य सः । पादाभ्यां अतन्ति गच्छन्तीति पादातयः ॥ ३४ ॥

अभ्यवर्षच्छरौघेण छादयन्निव माधवौ ।
तदनीकमनाधृष्यं दृष्ट्वा यादवसत्तमौ ॥ ३५ ॥

सत्यधर्मीया — तदनीकं तदीयं सैन्यम् ॥ ३५ ॥

सुमनोरञ्जिनी — छादयन्निव आच्छादयन्निव ॥ ३५ ॥

योधयामासतुर्वीरौ द्वावेवाजौ पदातिनौ ।
सैन्यं च बाणपूगेन व्यथितं भृशविह्वलम् ॥ ३६ ॥

सत्यधर्मीया – पदातिनौ पदाभ्यामन्योन्यमतः सञ्चारोऽनयोरस्तीति तौ नीरथत्वात् ॥ ३६ ॥

सुमनोरञ्जिनी — पदातिनौ पादचारिणौ । रथरहितावित्यर्थः । विह्वलं विवशम् ॥ ३६ ॥

दृष्ट्वा सृगालभूपालस्तावधावदमर्षणः ।
तमायान्तमभिप्रेक्ष्य रथिनं धृतकार्मुकः ।
न्यवारयद् वासुदेवो वेलेव वरुणालयम् ॥ ३७ ॥

सत्यधर्मीया — वेला तीरं वरुणालयं समुद्रम् । रथिनमित्यनेन सद्योद्धृ-सम्प्रदायानभिज्ञतां ध्वनयति ॥ ३७ ॥

सुमनोरञ्जिनी — अमर्षणः असहमानः । तौ रामकृष्णौ प्रति । वरुणालयं समुद्रम् । वेलेव तीरमिव ॥ ३७ ॥

तावुभौ परमक्रुद्धौ वासुदेवौ महाबलौ ।
युयुधाते तथाऽन्योन्यमन्योन्यवधकाङ्क्षिणौ ॥ ३८ ॥

सत्यधर्मीया — वासुदेवसुतावन्योन्यं वधस्य काङ्क्षाऽनयोरस्तीति । काङ्क्षत इति णिनिर्वा ॥ ३८ ॥

सुमनोरञ्जिनी — वासुदेवौ कृष्णसृगालौ ॥ ३८ ॥

स तथा विद्यमानस्य वासुदेवस्य सङ्गरे ।
शिरो जहार गोविन्दः क्षणेन मुकुटोज्ज्वलम् ॥ ३९ ॥

सत्यधर्मीया — मुकुटेन किरीटेनोज्ज्वलं प्रकाशमानम् ॥ ३९ ॥

सुमनोरञ्जिनी — वासुदेवस्य सृगालस्य ॥ ३९,४० ॥

ततस्तत्सैनिकाः सर्वे हतशेषाः कुरूद्वह ।
कृष्णेन स्वामिनि हते दुद्रुवुः सर्वतो दिशम् ॥ ४० ॥

सत्यधर्मीया — सर्वतो दिशं दुद्रुवुः ॥ ४० ॥

ततस्तौ रामगोविन्दौ करवीरपुरं महत् ।
प्रविश्य पूजितौ विप्रैर्वणिग्भिश्च यथा प्रियः ॥ ४१ ॥

सत्यधर्मीया — प्रियो जामात्रादिर्यथा तथा पूजितौ ॥ ४१ ॥

सुमनोरञ्जिनी —प्रियः सुहृत् पूज्यते तथा ॥ ४१ ॥

॥ इति श्रीमद्भागवतदशमस्कन्धोत्तरार्धव्याख्यायां
सुमनोरञ्जिन्यां द्विपञ्चाशोऽध्यायः ॥

तद्गजाश्वरथानीककोशादिधनसञ्चयम् ।
मधुरां प्रेषयामास तदीयैर्भृत्यपूरुषैः ॥ ४२ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे उधरार्धे द्विपञ्चाशोऽध्यायः ॥

सत्यधर्मीया — तद्गजाश्वरथानीकं च कोशादिधनसञ्चयं कोशादौ विद्यमानो यो धनसञ्चयस्तम् । तदीयैः सृगालवासुदेवसम्बन्धिभिर्भृत्याश्च ते पुरुषा नराश्च तैर्भृत्यै उदरम्भरणार्थमपूरुषाः परम्परागता इति यावत् ॥ ४२ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे
द्विपञ्चाशोऽध्यायः ॥ १०-५२ ॥

॥ अथ त्रिपञ्चाशोऽध्यायः ॥

श्री शुक उवाच—

गोमन्तं पर्वतश्रेष्ठं तुङ्गद्रुमलतान्वितम् ।
सालतालतमालाढ्यं प्रियालाशोकशोभितम् ॥ १ ॥

सत्यधर्मीया — सालः सर्जस्तालस्तृणराजो तमालः कालस्कन्धस्तैराढ्यं सम्पन्नं प्रियालो राजादनोऽशोको वञ्जुलः । सालं सर्जं सूरयस्तृणराजस्तालः कथ्यते । कालस्कन्धस्तमालः स्यात् राजादनः प्रियालः स्यात् वञ्जुलोऽशोक उच्यत इत्यभिधानात् ॥ १ ॥

सुमनोरञ्जिनी — सालः सर्जः । तालः तृणराजः । तमालः तापिञ्छः । कालस्कधस्तमालः स्यात्तापिञ्छ इत्यमरः । प्रियालः राजादनः । मधुराम्र इत्यर्थः । अशोकः प्रसिद्धः ॥ १ ॥

कदम्बनीपहिन्तालपूगपुन्नागशोभितम् ।
आरुह्य कदलीषण्डमण्डितं मत्तकोकिलम् ॥ २ ॥

सत्यधर्मीया — कदम्बो हरिप्रियो निम्बः पिचुमन्दः । पिचुमन्दस्तु निम्बः स्यात् । हिन्तालो वनक्रमुको नागो नागकेशरः पूगः क्रमुकः पुन्नागः सुरवर्णिकः ॥ २ ॥

सुमनोरञ्जिनी — कदम्बः प्रसिद्धः । निम्बः पिचुमन्दः पारिभद्रः । हिन्तालो वनक्रमुकः । पूगः उद्यानक्रमुकः । पुन्नागः तुङ्गः । पुन्नागे पुरुषस्तुङ्ग इत्यमरः । एतैः शोभितं गोमन्तम् । आरुह्य तत्र प्रदेशं ददृशतुरिति वक्ष्यमाणेनान्वयः । तं प्रदेशं विशिनष्टि ॥ **कदलीति** । कदलीषण्डः कदलीसमूहः ॥ २ ॥

भ्रमद्भ्रमरसङ्घातं प्लवगाकम्पितद्रुमम् ।
फलभारनतैः स्कन्धैर्नारिकेलैर्विराजितम् ॥ ३ ॥

सत्यधर्मीया — प्लवगैराकम्पिता द्रुमा यस्मिन्स तम् । फलभारेण नताः स्कन्धा येषां ते तैर्भरैर्नारिकेलैर्लाङ्गलिभिः । नारिकेलस्तु लाङ्गलीत्यमरः । विराजितं विभिः पक्षिभिश्च राजितमित्यपि । नारिकेलैः सहितमिति तदाऽर्थः ॥ ३ ॥

सुमनोरञ्जिनी — भ्रमन् भ्रमरसङ्घातः भृङ्गसमुदायो यस्मिन् । फलभारेण नतैः नम्रैः स्कन्धैः चूतादिस्कन्धैः नारिकेलैश्च विराजितम् ॥ ३ ॥

बहुप्रस्रवणोपेतं सुच्छायं निर्मलोदकम् ।
रम्यं ददृशतुर्वीरौ प्रदेशं रामकेशवौ ॥ ४ ॥

सत्यधर्मीया — प्रस्रवणैर्निर्झरैरुपेतं युक्तम् ॥ ४ ॥

सुमनोरञ्जिनी — बहुभिः प्रस्रवणैः झर्झरैरुपेतम् ॥ ४ ॥

तत्र प्रवर्षणं नाम शृङ्गं पर्वतमूर्धनि ।
अवापतुर्यत्र मेघा नित्यं वर्षन्त्यविक्लवाः ॥ ५ ॥

सत्यधर्मीया — यत्र प्रवर्षणनामके शृङ्गेऽत एव प्रवर्षणेति नाम ॥ ५ ॥

सुमनोरञ्जिनी — अविक्लवाः अव्यग्राः ॥ ५ ॥

तत्रारुह्य यदुश्रेष्ठौ पश्यन्तौ हि दिशो दश ।
रममाणौ यथाकाममूषतुः पर्वतोत्तमे ॥ ६ ॥

सत्यधर्मीया – दिशो दश पश्यन्तौ । अत्युच्चत्वात्तदवलोकनं सम्भवतीति मन्तव्यम् ॥

सुमनोरञ्जिनी — रममाणौ क्रीडां कुर्वन्तौ ॥ ६ ॥

एतस्मिन्नेव काले तु क्षीरोदे सागरोत्तमे ।
निवासे देवदेवस्य शङ्खचक्रगदाभृतः ॥ ७ ॥

तात्पर्यम् – बहूनि स्थानजातानि कृष्णस्य क्षीरसागरे । कानिचिन्मुक्तगम्यानि नामुक्तैस्त्रिदशैरपि । गन्तुं शक्यान्यथान्यानि गम्यान्यन्यैरपि क्वचित् ॥ तत्र देवाश्च योगिन्द्रा भक्ताश्चान्ये जनार्दनम् । गत्वाऽर्चयन्ति देवेशं बलिस्तत्रागमत्क्वचित् । तस्य तत्रासुरावेशात् पापबुद्धिरजायत । तद्व्यक्त्यर्थं जगन्नाथः शिश्ये सुप्तवदव्ययः । तदा स पापया बुद्ध्या किरीटमहरत्प्रभोः ॥ तं जित्वा गरुडस्तत् हृत्वा गोमन्तमाव्रजत् । तत्र कृष्णस्य शिरसि किरीटममुचत्प्रभोः ॥ इति माहात्मे ॥ ७-१० ॥

सत्यधर्मीया — एतस्मिन्नेव काले तु क्षीरेदे सागरोत्तम इत्यारभ्य हृतं दानव-वीरेणेत्यन्तपद्येषु क्षीरसमुद्रस्थभगवत्समीपवर्तिता बलेरुच्यते । न च मुक्तैकगम्यस्य बलि-सङ्गिता सम्भावनार्हा कथञ्चिदपि । कथन्तरां कर्मजदेवो देवोत्तमस्य यः पदमदीधरत्तस्य स्तेयकर्म कथन्तमाम् । विद्रावितदोषस्याजमनिद्रमिति श्रुतेर्निर्द्रेत्यतो माहात्म्यवचनेन तात्पर्यं विवक्षुर्बलिर्यत्स्थले वर्तत न तन्मुक्तस्थानमिति वक्तुं स्थानस्थितिमादावाह ॥ **बहूनीति** । कृष्णस्य हरेः क्षीरसागरे स्थानजातानि स्थानसमूहा बहूनि बहवः स्थानत्वेन जातानि प्राप्तानि कृतानीति यावत् । बहूनि तत्र मुक्तगम्यानि कानिचित् । देवाश्चेद्गच्छेयुः किमित्यत आह ॥ **नेति** । अमुक्तैस्त्रिदशैरपि न गन्तुं शक्यानि । अथान्यानि कानिचिदन्यैरमुक्तै-र्गम्यानि क्वचिद्भागान्तरे कानिचित्सन्ति । तत्रामुक्तस्थाने देवा योगीन्द्रा अन्ये भक्ताश्च । जनार्दन इति पाठे विष्णौ भक्ता इत्यन्वयः । द्वितीयान्तपाठेऽर्चयन्तीत्यनेनान्वयः । गत्वा देवेशं जनार्दनमर्चयन्ति । तत्कचिद्बलिः आगमत् । द्वितीयमपाकरोति ॥ **तस्येति** । तत्र तदानीमसुरावेशात् पापबुद्धिरजायत । एतेनौपाधिकोऽयं भावो देवस्यापि बलेरित्युक्तं भवति । तृतीयमपाकरोति ॥ **तव्यक्तर्थमिति** । तदसुरावेशव्यक्त्यर्थमव्ययो जगन्नाथः सुप्तवच्छिश्ये । वनितानटनमाटीकत हरिरेवमिति सूचयति । सुप्तिरेव किन्न स्यादित्यत आह ॥ **अव्यय इति** । अविः सूर्योऽयतेयं चक्षुर्द्वरित्यव्ययः । नित्यजागर इत्यर्थः । पापया । अर्श आद्यच् । पापमस्य अस्तीति तया बुद्ध्या प्रभोः किरीटमहरत् । स्वशिरश्चरणकरणरुषा मुकुटापहारोऽन्याय्यः । भगवानपि येन प्रागबन्धयत्तेनैव तत्पराभवः कार्य इति विनतातनयं प्रायङ्क्तैतज्जय इत्याह – **तमिति** । गरुडो तं बलिं जित्वा तत्तदपि हृत्वाऽऽव्रजत् गोमन्तं ददृशे । तत्र च दृष्ट्वा कृष्णं तस्य शिरसि किरीटममुचत् । प्रभुरियत्कार्यपर्याप्तशक्तिः ॥

ततश्चायं पद्यानामर्थः ॥ सारगश्रेष्ठे क्षीरोदे देवदेवस्य निवासेऽमुक्तगम्ये ॥ ७ ॥

सुमनोरञ्जिनी — क्षीरोदे तत्सञ्ज्ञके । क्षीरम् उदकस्थानीयं यत्रास्ति तत्र । देवदेवस्य हरेः निवासे श्वेतद्वीप इत्यर्थः ॥ ७ ॥

उपासीनो महाबाहुः श्रीमान् वैरोचनो बलिः ।
जहार देवदेवस्य किरीटं रत्नचित्रितम् ॥ ८ ॥

सत्यधर्मीया — वैरोचन इति पितुर्गुणा इति स्मारयति । रत्नचित्रितम् ॥ ८ ॥

सुमनोरञ्जिनी — शङ्खचक्रागदाभृतः हरेः । उप समीपे । आसीनः वैरोचनः विरोचनस्यापत्यं बलिः । हरेः किरीटं जहारेत्यन्वयः ॥ ८ ॥

इन्द्रनीलसहस्राढ्यं गोमेदकशताचितम् ।
पद्मरागमहानीलमुक्ताफलविराजितम् ॥ ९ ॥

सत्यधर्मीया — रत्नानि तद्गुणानि च भणति ॥ **इन्द्रनीलेति** । पद्मरागाश्च महेन कान्त्या अनीलानि सितानि मुक्ताफलानि च तैर्विराजितम् । अतो नेन्द्रनीलपुनरुक्तता ॥ ९ ॥

पुष्यरागप्रवालाढ्यं दिव्यकाञ्चननिर्मितम् ।
हृतं दानववीरेण विदित्वा पुरपालकः ।
तमन्वधावत् त्वरितं वैनतेयो विहङ्गराट् ॥ १० ॥

सत्यधर्मीया — पुष्परागप्रवालैराढ्यं दिव्यकाञ्चनं निष्टप्ताष्टापदं तेन निर्मितं पुरपालक-स्तत्पालनविनियुक्तः ॥ १० ॥

सुमनोरञ्जिनी — दानववीरेण बलिना । हृतं विदित्वा ज्ञात्वा । पुरपालकः वैनतेयो विनतापुत्रो विहङ्गराट् गरुडः ॥ १० ॥

तमन्तरे समासाद्य दानवेन्द्रं दुरासदम् ।
कृत्वा युद्धं महाघोरं जित्वा दानवपुङ्गवम् ॥ ११ ॥

सत्यधर्मीया — अन्तरे भूरन्ध्रे पाताल इति यावत् । अन्तरं तु पराधीन भेदे रन्ध्र इति विश्वः ॥ ११ ॥

सुमनोरञ्जिनी — अन्तरे मध्ये । तथोक्तं भारततात्पर्ये । मत्वा पातालं युधि जित्वा । पातालबलिं चेति षोडशीये सप्तमश्लोके ॥ ११ ॥

गृहीत्वा रत्ननिचयं किरीटं भास्करोपमम् ।
आगच्छन् ददृशे देवं देवकीनन्दनं हरिम् ॥ १२ ॥

सत्यधर्मीया — रत्ननिचयं बहुव्रीहिः ॥ १२ ॥

सुमनोरञ्जिनी — रत्नानां निचयो यस्मिन् तम् ॥ १२ ॥

वसन्तं साग्रजं रम्ये गोमन्ते पर्वतोत्तमे ।
तस्य मूर्ध्नि निधायाशु किरीटं दिव्यभूषणम् ।
प्रणम्य पादयोर्मूर्ध्ना स्तोतुं तमुपचक्रमे ॥ १३ ॥

सत्यधर्मीया — तस्य मूर्ध्नि शिरसि तं कृष्णम् ।

'तदा दुग्धाब्धौ संसृतिस्थैः सुराद्यैः पूजां प्राप्तुं स्थानमेषां च योग्यम् ।
मुक्तस्थानादाप नारायणोऽजो बलिश्चागात्तत्र सन्द्रष्टुमीशम् ॥
तत्रासुरावेशममुष्य विष्णुः सन्दर्शयन्सुप्तिहीनोऽपि नित्यम् ।
संसुप्तवच्छिश्य उदारकर्मा सञ्ज्ञायै देवानां मुखमीक्ष्याप्रमेयः ।
देवाश्च तद्भावविदोऽखिलाश्च निमीलिताक्षाः शयनेषु शिश्यिरे ।
तदा बलिस्तस्य विष्णोः किरीटमादायागाज्जहसुः सर्वदेवाः ।
ब्रह्मादिभिः सर्वदेवैः समेतैर्ब्रह्मादिभिर्ह्रासमाने सुपर्णः ।
गत्वा पातालं युधि जित्वा बलिं च किरीटमादायाभ्ययाद्यत्र कृष्णः ।
तत्तस्य शीर्ष्णि प्रतिमुच्य नत्वा खगः स्तुत्वा देवदेवं रमेशम् ।
स्मृत आगच्छेत्येव विसर्जितोऽमुना ययौ दुग्धाब्धिं यत्र नारायणोऽसौ ।
किरीटं तत्कृष्णमूर्ध्नि प्रविष्टं तत्तुल्यमासीत्तस्य रूपेष्वभेदात् ।
यदिच्छया चैव नारायणस्य शीर्ष्णेऽप्यासीत्तस्य रूपेष्वभेदात् ॥'

इत्यादिश्रीमदुक्तेर्विशेषो ज्ञेयः । मेलकोट्यामिदानीं तदेव देवमुकुटं वर्वर्तीति किंवदन्ती ॥ १३ ॥

नमो नमः कारणपूरुषाय नारायणायाखिलवल्लभाय ।
सुरारिसंहारणकारणाय नारायणायाखिलकर्मसाक्षिणे ॥ १४ ॥

सत्यधर्मीया — वेदशिरोवेदितगुणकत्वेन हरिं नमति ॥ **नमो नम इति** । मद्वदन्यनमस्या त्वयाऽनुष्ठिता चेत्किं वैशिष्ट्यं ममेत्यत आह ॥ **अनम इति** । नाराय त्वद्भिन्नसङ्घाय । अनमः स्वतन्त्रतया नमनाभावोऽस्त्वित्यर्थः । णाय सुखात्मकाय । णश्च निर्वृत्तिवाचक इत्यादेः । तुभ्यं नमः । नमो नम इत्यादरेणोक्तिर्वा । कारणेनैव पुरुषस्तस्मै नारायणायाखिलात्पुत्रादेः प्रियाय । प्रस्तुतकार्यकारित्वेन स्तौति ॥ **सुरारीति** । न बहिरेव रक्षकः किन्त्वखिलकर्मणां साक्षीत्यन्तःस्थित्वा द्रष्टा । तस्मै नारायणाय नाम्ना । नारायणाय गुणाश्रयायेति वा ॥ १४ ॥

सुमनोरञ्जिनी — ननु कथमिदमुपपद्यते । मुक्तगम्ये क्षीरसागरेऽमुक्तस्य बलेर्गमनायोगात् । कथंचिद्गमनेऽपि बलेः कथं पापबुद्धिः । किरीटाहरणमपि हरौ जागरूके सति कथमुपपद्यते । भगवानपि कथं तूष्णीमासेत्याशङ्काः परिहर्तुं प्रवृत्तं तात्पर्यम् —

'बहुस्थानानि जातानि कृष्णस्य क्षीरसागरे ।
कानिचिन्मुक्तगम्यानि नामुक्तैस्त्रिदशैरपि ।
गन्तुं शक्यान्यथान्यानि गम्यान्यन्यैरपि क्वचित् ।
तत्र देवाश्च योगीन्द्रा भक्ताश्चान्ये जनार्दने ।
गत्वाऽर्चयन्ति देवेशं बलिस्तत्रागमत्क्वचित् ।
तस्य तत्रासुरावेशात्पापबुद्धिरजायत ।
तद्व्यक्त्यर्थं जगन्नाथः शिष्ये सुप्तवदव्ययः ।
तदा स पापया बुद्ध्या किरीटमहरत्प्रभोः ।
तं जित्वा गरुडस्तं तु हित्वा गोमन्तमाव्रजत् ।
तत्र कृष्णस्य शिरसि किरीटममुचत्प्रभोः ॥' इति माहात्म्य इति ॥

कृष्णस्येत्यावर्तते । क्षीरसागरे । कृष्णस्य बहुस्थानानि । कृष्णस्य सकाशाज्जातानि । कृष्णनिर्मितानि सन्तीत्यर्थः । तत्र कानिचित्स्थानानि मुक्तगम्यानि । अमुक्तैस्त्रिदशैरपि देवैरपि गम्यानि न किम्वन्यैः । अथ प्रकृतस्थानापेक्षया अन्यानि कानिचित् अमुक्तैः त्रिदशैः

गन्तुं शक्यानि । अन्यानि ततोऽप्यन्यानि । अन्यैरपि ऋषिगन्धर्वादिभिः असुरादिभिर्वा । क्वचित् कदाचित् । गम्यानि । अत्र क्षीरसागरेऽप्यमुक्तगम्यस्थानसद्भावाद्बलेर्गमनं युक्त-मित्याद्या शङ्का परिहृता । असुरावेशादित्यनेन द्वितीया । तद्व्यक्त्यर्थं तदिति तन्त्रम् । तस्य बलेः तस्य असुरावेशस्य व्यक्त्यर्थम् । जागरूकोऽपि सुप्तवत् शिष्ये निमीलिताक्षोऽभवत्, इत्यनेन चतुर्थी च परिहृता ज्ञेया । अत्र भगवत्समीपे । स्थिता देवाः कथं तूष्णीमासन्निति पञ्चमी शङ्कापि महाभारततात्पर्यनिर्णयेन परिहृता ।

तदुक्तम् –

'सञ्ज्ञायै देवानां मुखमीक्ष्याप्रमेयः ।
देवाश्च तद्भावविदोऽखिलाश्च निमीलिताक्षाः शयनेषु शिष्यिरे ॥

स्तुतिप्रकारमेवाह ॥ **नमो नम इति** । नारायणाय नमो नम इत्यन्वयः । कारणेन भूभारहरणनिमित्तेन । पूरुषाय पुरुषदेहधारिणे । कारणाय जन्मादिकारणाय । पुरुषाय पूर्णड्गुणायेति वा । न विद्यन्ते अराः दोषा यस्याः सा नारा महालक्ष्मीः । तस्याः अयनमाश्रयः । स चासौ, आयेन लाभेन आनन्देनेति यावत् । अखिलाः पूर्णाः मुक्तास्तेषां वल्लभश्च तस्मै । नारायणाय । अखिलेभ्यो मम वल्लभायेति वा । न त्वखिलानां वल्लभः । अयोग्यानां वल्लभत्वाभावात् । सुराणामरयो दैत्यादयस्तेषां संहारणे कारणाय । तर्हि निर्निमित्तमसुरसंहरणे वैषम्यनैर्घृण्ये स्यातामित्यत आह ॥ **अखिलेति** । अखिलानां सुरा-सुरादीनां कर्मसाक्षिणे कर्मणां साक्षात् द्रष्ट्रे । सुरासुरकृतकर्माणि साक्षात् दृष्ट्वा तदनुसारेण फलदानान्न वैषम्यमिति भावः ॥ १४ ॥

हिरण्यगर्भत्वमुपेत्य मूले सृजस्यशेषं भुवनं स एव ।
नारायणात्मन् परिपासि भूयो जहार चान्ते भगवन् शिवात्मन् ॥ १५ ॥

तात्पर्यम् – ब्रह्मस्थो ब्रह्मनामाऽसौ रुद्रस्थो रुद्रनामकः । तयोरपि नियन्तैकः स्वयमेव जनार्दनः ॥ इति स्कान्दे ॥

सत्यधर्मीया – हिरण्यगर्भत्वमुपेत्य मूल इति मूले कमलभवतादात्म्यमुच्यत इति प्रतीयते । तां मानानुतो विवक्षितमर्थं प्रदर्श्य शमयति ॥ **ब्रह्मस्थ इति** । स्वातन्त्र्यं तद्गतत्वं

च शब्दवृत्तेर्हि कारणमितीरणात् ब्रह्मणि तिष्ठतीति ब्रह्मस्थः । ब्रह्मेति नाम यस्यासौ तथा । ब्रह्मादिस्थ इत्युक्तौ सर्वसङ्ग्रहे लघुनैव भविष्यति रुद्रस्थ इत्युक्तिः स्वतन्त्रकार्यद्वयाप-प्रथानुगुण्येन । तत्रापि यावती कण्डूतिस्तावत्कण्डूयनमिति रुद्रग्रहणमिति मन्तव्यम् । तत्स्थतावत्स्वातन्त्र्यमप्याह ॥ **तयोरपीति** । स्वमेवेति तथैक इति स्वस्यान्यानियम्यताया इव जगतो नियामकान्तरसाहित्या अपि परासो ज्ञेयः । स्कान्दोक्तेन तादात्म्यमर्थ इत्यर्थः ॥

ततश्चायं मूलार्थः ॥ मूले जगदादौ हिरण्यगर्भत्वं तन्नियामकत्वात्तात्स्थ्यात्तच्छब्द-वाच्यत्वमुपेत्याशेषं भुवनं सृजसि । नारायणात्मन् स एव त्वं परिपासि अन्ते शिवात्मन् भगवन्भवान् भूयो जहार च । तस्मै नम इत्यतीतेन वोत्तरेण वाऽन्वयः ॥ १५ ॥

सुमनोरञ्जिनी —— ननु कारणपूरुषायेति यज्जन्मादिकारणत्वमुक्तं तत्कथं सम्भवति । हिरण्यगर्भस्य स्रष्टृत्वेन शिवस्य संहर्तृत्वेन प्रसिद्धत्वादित्यत आह ॥ **हिरण्येति** । मूले आदिकाले । हिरण्यगर्भत्वं तच्छब्दवाच्यत्वम् । शिवात्मन् शिवान्तर्यामिन् । शिवात्मनेति वा । शिवस्थितेन शिवनामकरूपेणेति भावः । एतदेवाभिप्रेत्यापाततः प्राप्तां ब्रह्माद्यभेदशङ्कां परिहरति भगवानाचार्यसूर्यः ॥ **ब्रह्मेति** ।

'ब्रह्मस्थो ब्रह्मनामाऽसौ रुद्रस्थो रुद्रनामकः ।
तयोरपि नियन्तैकः स्वयमेव जनार्दनः ॥' इति स्कान्द इति ।

ब्रह्मणः चतुर्मुखस्य नामानि हिरण्यगर्भ इत्यादीनि यस्यासौ ब्रह्मनामा । एतेन मूले ब्रह्मपदाभावाद्ब्रह्मनामेति कथमुपयुज्यत इति शङ्का निरस्ता । नारायणात्मन् नारायणा त्मना । सम्बुद्धिर्वा ॥ १५ ॥

तं त्वा यदोर्वंशकरं सुरेशं जानेऽवतीर्णं भुवने वृषाकपिम् ।
अहं हि भृत्यस्तव वैनतेयो ब्रूहि क्रियां किं करवाणि देव ॥ १६ ॥

सत्यधर्मीया —— उपसंहरति ॥ **तमिति** । यदोर्वंशकरं तद्वंशविस्तारकारकं भुवनेऽ-वतीर्णं वृषाकपिम् । हरविष्णू वृषाकपीत्यमरः । अहं जाने । अहं हि यतस्तव भृत्यो वैनतेयः । एतेन यन्माता विनता तत्पुत्रत्वान्नाहमप्रवण इति ध्वन्यते । किमित्यव्ययं, कां क्रियां करवाणि हे देव तां ब्रूहि । सेवायां कस्याञ्चिद्विनियोजयेति भावः । हे भृत्यस्तव

भृत्यानां स्तवः स्तोत्रं यस्येति वा । वृषाकपिरिति षष्ठे स्पष्टम् । वृषाकपिः पुमान् कृष्णे शङ्करे जातवेदसीति भानुः ॥ १६ ॥

सुमनोरञ्जिनी — त्वा, तं पूर्वोक्तगुणयुक्तम् । वृषाकपिं विष्णुं जान इत्यन्वयः । भक्तानामभीष्टवर्षणात् वृषा । आ पूर्ण कं आनन्दं पिबतीति वृषाकपिः । अहं वैनतेयस्तव भृत्यः । क्रियां सेवारूपाम् ॥ १६ ॥

श्रीशुक उवाच –

इत्युक्त्वा देवदेवेशं प्रणिपत्य विहङ्गराट् ।
जानुनी(ना) धरणीं कृ(ग)त्वा तस्थौ प्राञ्जलिरग्रतः ॥ १७ ॥

सत्यधर्मीया — इत्युक्त्वा जानुनी गतम् । धरणीं तत्र कृत्वाऽग्रतो हरिधुरि प्राञ्जलिः सन् तस्थौ ॥ १७ ॥

सुमनोरञ्जिनी — एकेन जानुना धरिणीं, गत्वा स्पृष्ट्वा ॥१७॥

तं दृष्ट्वा यादवश्रेष्ठो गरुडं पक्षिपुङ्गवम् ।
प्रीत्युत्फुल्लमुखो दोर्भ्यां पस्पर्शाङ्गं तदुत्तमम् ॥ १८ ॥

सत्यधर्मीया — तद्येनोरसा शिरसा दृष्ट्चेत्युक्तेर्यन्नतं तत उत्तममङ्गं शिरो दोर्भ्यां पस्पर्श । तदित्यव्ययं षष्ठ्यर्थे । तस्योत्तममङ्गमिति वा ॥ १८ ॥

सुमनोरञ्जिनी — उत्तमम् अङ्गं शिर इत्यर्थः ॥ १८ ॥

गच्छ भद्र यथाकाममेहि काले मया स्मृतः ।
इत्युक्त्वा तं विसृज्योभावीश्वरौ रामकेशवौ ॥ १९ ॥

सत्यधर्मीया — भद्र मङ्गलात्मन् । इदानीं गच्छ मया यथाकामं स्मृत एहि यथाकामं गच्छेति वाऽन्वयः ॥ १९ ॥

सुमनोरञ्जिनी — मया स्मृतः सन् एहि ॥ १९ ॥

फलमूलकृताहारौ पीतकौशेयवाससौ ।
अवरुह्य गिरेः शृङ्गात् करवीरपुरं गतौ ॥ २० ॥

सत्यधर्मीया — पीतकौशेयं वासो नीलं च ययोस्तौ नीलाम्बरत्वात् औपाधिकं कादाचित्कं पीताम्बरं वा तस्येति । पीतनिर्झरवारिणाविति पाठः सरलः ॥ २० ॥

तत्र तौ चतुरो मासानुषित्वा भरतर्षभ ।
महत्या सेनया सार्धं जग्मतुर्मधुरां पुरीम् ॥ २१ ॥

सत्यधर्मीया — तत्र करवीरपुर्याम् महत्या सेनया तत्र सङ्गृहीतया ॥ २१ ॥

सुमनोरञ्जिनी — तत्र करवीरे ॥ २१ ॥

शृगालं निहतं श्रुत्वा मागधः क्रोधविह्वलः ।
आजगाम कुरुश्रेष्ठ महत्या सेनया वृतः ॥ २२ ॥

सत्यधर्मीया — शृगालं दुरात्मतानुबन्धेन क्रोधविह्वलः ॥ २२ ॥

तेन सार्धमभूद् युद्धं सप्ताहं रामकृष्णयोः ।
तदा पराजितो युद्धे मागधो बहुसैनिकः ॥ २३ ॥

सत्यधर्मीया — सप्ताहं दिनसप्तकं गतम् ॥ २३ ॥

जगाम मागधानेव बहुभिः क्षत्रियैः सह ।
रामकृष्णौ च धर्मज्ञौ सूतमागधवन्दिभिः ॥ २४ ॥

सत्यधर्मीया — बहुभिर्हतावशिष्टैः । धर्मज्ञावित्यनेन पश्चाद्गत्वा पलायनविलयनकर्तारो वध्या इति धर्ममर्मज्ञावित्याह ॥ २४ ॥

सुमनोरञ्जिनी — मागधान् मगधदेशान् ॥ २४ ॥

स्तूयमानौ विविशतुः सानुगौ मधुरां पुरीम् ।
एवं सप्तदशकृत्वस्तावदक्षौहिणीबलः ॥ २५ ॥

सत्यधर्मीया — सप्तदशकृत्व इति पदमेकम् । मुमागमो वा । बिन्दुर्वा । तत्र किञ्चिन्न न्यूनतेति सूचयति । एवं सप्तदशवारं कृत्वःसुजन्तः शब्दः । तावती त्रयोविंशत्यात्माक्षौहिणीबलं यस्य सः ॥ २५ ॥

सुमनोरञ्जिनी — सप्तदशकृत्वः सप्तदशवारम् । तावदक्षोहिणीबलः पूर्वोक्त-त्रयोविंशत्यक्षोहिणीसैन्ययुक्तः ॥ २५ ॥

युयुधे मागधो राजा यदुभिः कृष्णपालितैः ।
अक्षिण्वत बलं सर्वं वृष्णिभिः कृष्णतेजसा ॥ २६ ॥

सत्यधर्मीया — कृष्णपालितैर्यदुभिर्मागधो राजा युयुधे । कृष्णतेजसा मुख्येन वृष्णिभिस्तद्बलमक्षिण्वताहीयत ॥ २६ ॥

सुमनोरञ्जिनी — अक्षिण्वत क्षीणमभूत् ॥ २६ ॥

हतेषु तेष्वनीकेषु त्यक्तोऽयादरिभिर्नृप ।
अष्टादशमसङ्ग्रामे आगामिनि तदन्तरा ॥ २७ ॥

सत्यधर्मीया — त्यक्तो जीवेति मुक्तः । अष्टादशमेऽष्टादशे । मट् स्वार्थे । आगामिनि सङ्ग्रामे एष्यति तदन्तरा तन्मध्ये ॥ २७ ॥

सुमनोरञ्जिनी – त्यक्तः विसृष्टः । अयात् अगच्छत् । आगामिनि उत्तरत्र भाविनि सति । तदन्तरा तन्मध्ये ॥ २७ ॥

नारदप्रेषितो वीरो यवनः प्रत्यदृश्यत ।
रुरोध मधुरामेत्य तिसृभिर्म्लेच्छकोटिभिः ॥ २८ ॥

सत्यधर्मीया — नारदेन देवताकार्यविदा विदा च तदायुषः प्रेषितः । अत्र हरिवंशशंसिता कथाऽप्यनुसन्धेया । तथा हि –

तप्त्वा सुदारुणं घोरं तपः परमदुश्चरम् ।
गर्गः – एवमस्त्विति रुद्रो प्रददौ मुनये सुतम् ।

एवं गर्गस्य तनयः ....।
यथा वदति राजेन्द्र मगधाधिपतिर्नृपः ।
तथाऽहं सम्प्रवक्ष्यामि श्रूयतां यवनाधिपेति ।

साल्वः – इत्येवं नरपतिभास्करप्रगीतं वाक्यं ते कथितं मया हितं नृपाणाम् ।
तत्सर्वं सह सचिवैर्विमृश्य बुद्ध्या प्रयुक्तं (यद्युक्तं) कुरु मनुजेन्द्र आत्मनेष्टम् ।

यवनः – धन्योऽस्म्यनुगृहीतोऽस्मि सफलं जीवितं च मे ।
हुत्वाऽग्निं विधिवद्राजा कृतकौतुकमङ्गलः ।
प्रस्थानं कृतवान्सम्यग्जेतुकामो जनार्दनमित्यादिना ।

नन्दकुमारमारकः कुमारो गर्गेन वृतो हरवरतो जातश्च । तमाज्ञापयामास ससाल्वत्वतः सहनृपो जरासुतः । तथाऽत्रापि नारदप्रेषितो वीर इतीरणाच्चाकस्मादिति कस्मादीरणं श्रीधरीय इति न जानीमः । कृष्णेन दूततो घटघटितसर्पप्रेषणं तेन च पिपीलिकापूरणेन मारणं च तस्येति चानुसन्धेया । तथा हि तत्रैव –

अपयाने मतिं कृत्वा दूतं तस्मै ससर्ज ह ।
ततः कुम्भे महासर्पं भिन्नाञ्जनचयोपमम् ॥
घोरमाशीविषं कृष्णं कृष्णः प्राक्षेपयत्तदा ।
ततस्तं मुद्रयित्वा तु स्वेन दूतेन हारयत् ॥
निदर्शनार्थं गोविन्दः । कृष्णसर्पोपमः कृष्ण इति ।
तत्काले यवनो बुद्ध्या त्रासनं यादवैः कृतम् ।
पिपीलिकाभिश्चण्डाभिः पूरयामास तं घटम् ।
स सर्पो बहुलैस्तीक्ष्णः सर्वतस्तैः पिपीलकैः ।
भक्ष्यमाणः किलाङ्गेषु भस्मीभूतोऽभवत्तदा ।
तं मुद्रयित्वा तु घटं तथैव यवनाधिपः ।
प्रेषयामास कृष्णाय बाहुल्यमुपदर्शयन् ।
वासुदेवस्तु तं दृष्ट्वा स्वयोगं विहितं प्रभुरिति ।

आचार्यवर्या अपि –

स कृष्णः पन्नगं घटे निधाय केशवोऽर्पयत् ।
निरायुधोऽप्यहं क्षमो निहन्तुमप्रियानिति ।
घटं पिपीलिकागणैः प्रपूर्य यावनोऽर्पयत् ।
बहुत्वतो विजेष्य इत्यहिं मृतं व्यदर्शयत् ।
किमत्र सत्यमित्यहं प्रदर्शयिष्य इत्यजः ।

उदीर्य दूतमभ्ययात् । इति जगदुः ।

काश्चन शङ्कां तन्वते । हरेरवन्ध्यसन्धत्वे कथमिदं दन्दशूकहिंसनं तेन तदन्यथात्वमिति। तत्रेदमुत्तरं मन्वते च । कृष्णवर्णतश्चूर्णयाम्यहमेक एवानेकान् बहिः । अन्तश्चान्तरङ्गिकभावं वायसाद्यनासज्जनेनाहेर्बलो बहिः कालयवनकालने तव बलस्य शक्त इति सूचयामास । कृष्णेऽहिर्वाऽहिशयो वेत्यविवेकेन हरवरयथार्थतां पौत्र इत्यादि यदुदेव इति प्रसङ्गसङ्गतमिदमुक्तमिति ज्ञेयम् । तिसृभिर्म्लेच्छकोटिभिः सह मधुरां रुरोध ।। २८ ।।

सुमनोरञ्जिनी — यवनः कालयवनः ।। २८ ।।

नृलोके चाप्रतिद्वन्द्वो वृष्णीन् श्रुत्वाऽऽत्मसम्मितान् ।
तं दृष्ट्वाऽचिन्तयत् कृष्णः सङ्कर्षणसहायवान् ।। २९ ।।

सत्यधर्मीया — तद्वृत्तान्तमाह — **नृलोके स्वयमप्रतिद्वन्द्व इति** । आत्मसम्मितान्वृष्णीन् श्रुत्वा तमागतं यवनं दृष्ट्वा सङ्कर्षणसहायवान्कृष्णोऽचिन्तयत् ।। २९ ।।

सुमनोरञ्जिनी — आत्मसंमितान् आत्मनः समान् ।। २९ ।।

अहो यदूनां वृजिनं प्राप्तं ह्युभयतो महत् ।
यवनोऽयं रुणद्ध्यस्मानद्य श्वो वा महाबलः ।। ३० ।।

सत्यधर्मीया — वृजिनं दुःखम् । व्रजिनं वृजिनं दुःखमिति बृहद्भाष्योक्तेः । उभयतो भयं प्रकाशयति । यवनोरुद्ध्यस्मान्नद्य श्वो वा परश्वो वा मागधो महाबलोऽभ्येति । लोकानुकृतिरत्रोत्तरत्र चेति ज्ञेयम् ।। ३० ।।

सुमनोरञ्जिनी — उभयतः यावनान्मागधाच्च । वृजिनं दुःखम् तदेवाह ॥ **यवन इति ।** अद्य श्वो मागधोऽभ्येतीति । परश्वस्तु नैव संशयः । यद्वा अद्य श्वो वा यवनः अस्मान्निरुन्धे । मागधस्तु परश्वः अभ्येतीति योजना । रुरोध मथुरामित्येतद्वर्तमानसामीप्यविवक्षयेति ज्ञेयम् ॥ ३० ॥

मागधोऽभ्येति दुष्टात्मा परश्वो नैव संशयः ।
आवयोर्युद्ध्यतोरस्य यद्यागच्छेज्जरासुतः ॥ ३१ ॥

सत्यधर्मीया — अस्यानेन यवनेन युद्ध्यतोः सतोर्यदि जरासुत आगच्छेत् ॥ ३१ ॥

सुमनोरञ्जिनी — अनेन यवनेन सार्धम् । आवयोः युध्यतोः सतोः ॥ ३१ ॥

बन्धून् वधिष्यत्यथवा नेष्यते स्वपुरीं बली ।
तस्मादद्य विधास्यामो दुर्गं द्विपददुर्गमम् ॥ ३२ ॥

सत्यधर्मीया — बन्धून्वधिष्यति बहुवारं पराभूतिरुषा । अथवा स्वपुरं नेष्यते खेदयितुम् । बल्यस्मत्परोक्षं बलवान् । द्विपदं दुर्गमं पदशब्दोऽयम् । द्वे पदे येषां तद्दुर्गमं दुर्गं विधास्यामः । आलस्यादमृतं विषमित्युक्तेः अद्येत्युक्तिः ॥ ३२ ॥

सुमनोरञ्जिनी — द्विपदैः मनुष्यैः । दुर्गं गन्तुमशक्यम् ॥ ३२ ॥

तत्र ज्ञातीन्समाधाय यवनं घातयामहे ।
इति सम्मन्त्र्य भगवान् दुर्गं द्वादशयोजनम् ॥ ३३ ॥

सत्यधर्मीया — तत्र दुर्गे ज्ञातीन्वसुदेवादीन्समाधाय निधाय भीतानां समाधानमपि कृत्वेत्यर्थः । यवनं घातयामहे । अनेन हन्ताऽन्योऽस्ति । अतो हतिमेतस्य कारयाम इति ध्वनयति ॥ ३३ ॥

सुमनोरञ्जिनी — तत्र दुर्गे । समाधाय स्थापयित्वा ॥ ३३ ॥

अन्तः समुद्रे नगरं कृष्णोऽद्भुतमचीकरत् ।
दृश्यते यत्र हि त्वाष्ट्रं विज्ञानं शिल्पनैपुणम् ॥ ३४ ॥

सत्यधर्मीया — अन्तःसमुद्रगतं यत्र त्वष्टुर्विश्वकर्मणः सम्बन्धि शिल्पनैपुणं करव्यापारकौशलं दृश्यते । विज्ञानं च महदिति दृश्यत ऊह्यत इति वा । अचीक्लृपत् कारयामास ॥ ३४ ॥

सुमनोरञ्जिनी — अन्तः समुद्रे समुद्रस्यान्तः । दुर्गं तन्मध्ये नगरम् । यत्र यस्मिन्नगरे । त्वाष्ट्रं त्वष्टा विश्वकर्मा तदीयं विज्ञानम् । शिल्पनैपुण्यं शीघ्रकारितालक्षणम् । शिल्पचातुर्यञ्च ॥ ३४ ॥

रथ्याचत्वरवीथीभिर्यथाव(बा)स्तु विनिर्मितम् ।
सुरद्रुमलतोद्यानविचित्रोपवनान्वितम् ॥ ३५ ॥

सत्यधर्मीया — रथ्या रथादिमार्गा वीथ्य उपमार्गा यथावस्तु तत्तत्पदार्थलक्षणानुसारेण यथावस्तु स्वशक्त्यनुसारेणेति वा । शक्तं वस्त्विति भण्यत इत्युक्तेः । सुरेति द्रुमलतान्वयि । तद्युतान्युद्यानानि विचित्राण्युपवनानि तैरन्वितम् । उद्याने महति विचित्रोपवनैः अवान्तरैरन्वितमिति वा ॥ ३५ ॥

सुमनोरञ्जिनी — तदेवाह ॥ रथ्येति । रथ्या राजमार्गाः । वीथ्यः उपमार्गाः । यथावास्तु गृहनिर्माणशास्त्रमनतिक्रम्य । गृहनिर्माणस्थानमनतिक्रम्येति वा । सुराणां ये द्रुमाः लताश्च येषु तैरुद्यानैः विचित्रैः उपवनैश्चान्वितम् ॥ ३५ ॥

हेमशृङ्गैर्दिवस्पृग्भिः स्फाटिकाट्टालगोपुरैः ।
राजतारपुटैः कोष्ठैर्जुष्टं हेमस्वलङ्कृतैः ॥ ३६ ॥

सत्यधर्मीया — दिवस्पृग्भिस्तावदुच्चैर्धनुः सहस्रोर्ध्वभागदिवस्पृग्भिर्वा । मा तूक्ता । स्फाटिकानि स्फटिकविकृतानि च तानि चाट्टालगोपुराणि च तैः । राजतारपुटैर्लोहविशेषैः कोष्ठैरन्तर्गृहैर्हेमैः कलशैरिति शेषः ॥ ३६ ॥

सुमनोरञ्जिनी — हेममयानि शृङ्गाणि येषु तैः । दिवस्पृग्भिः अत्युन्नतैरित्यर्थः । स्फाटिकाः स्फटिकमयाः । अट्टालाः उपरिभूमयः गोपुराणि पुरद्वाराणि च तैः । राजतारपुटैः रजतं, आरपुटं पीतलोहविशेषः ताभ्यां निर्मितैः । कोष्टैः अन्तर्गृहैः ॥ ३६ ॥

रत्नकूटैर्गृहैर्हैमैर्महामरतकस्थलैः ।
वास्तोष्पतीनां च गृहैर्वलभीभिश्च निर्मितम् ॥ ३७ ॥

सत्यधर्मीया — रत्नकूटैस्तच्छृङ्गैर्महामरकतस्थलैर्वास्तोष्पतीनां वास्तोर्गृहक्षेत्रस्य पतयोऽधिष्ठातारः । वास्तोष्पतिगृहमेधाच्छेति निपातनादलुक्त्वं चेत्येके । वस्तुतस्त्विणः परत्वात्कस्कादिषु चेति षत्वं ज्ञेयम् । वलभीभिश्चंद्रशालाभिः ॥ ३७ ॥

सुमनोरञ्जिनी — रत्नकूटैः रत्नशिखरैः । हेममयानि महामरकतमयानि स्थलानि येषु तैः गृहैः । वास्तोष्पतीनां वास्तुदेवानाम् । ग्रामदेवानामिति यावत् । वलभीभिश्चन्द्रशालाभिः निर्मितम् ॥ ३७ ॥

चातुर्वर्ण्यजनाकीर्णं यदूनां च गृहैर्लसत् ।
सुधर्मां पारिजातं च महेन्द्रः प्राहिणोद्धरेः ॥ ३८ ॥

सत्यधर्मीया — चातुर्वर्ण्येति स्वार्थे ष्यञ् । सुधर्मां शर्मतः सभाम् । पारिजातं शक्तशक्तिमंशम् । अन्यथा सत्यभामाप्रार्थनं तदुत्पाट्यानयनादिकं सङ्गतेतरः स्यात् । प्राहिणोत् प्रेषयामास ॥ ३८ ॥

सुमनोरञ्जिनी – चत्वारो वर्णा एव चातुर्वर्ण्यम् । ते च ते जनाश्च तैः आकीर्णं व्याप्तम् । लसत् शोभमानं सुधर्मां तन्नामकसभां पारिजातं च प्राहिणोत् प्रस्थापयामास ॥ ३८ ॥

यत्र चावस्थितो मर्त्यो मर्त्यधर्मैर्वियुज्यते ।
यत् प्रियं देवदेवस्य विष्णोः क्षीरोदवासिनः ॥ ३९ ॥

सत्यधर्मीया — यत्र सुधर्मायां मर्त्यधर्मैर्जरादिभिर्वियुज्यते वियुक्तो भवति । क्षीरोदवासिनो देवदेवस्य विष्णोर्यत्प्रियं तत्सर्वं प्राहिणोत् ॥ ३९ ॥

सुमनोरञ्जिनी — यत्र यस्यां सभायाम् । मर्त्यधर्मैः जरावलीपलितादिभिः क्षुत्पिपासादिभिर्वा ॥ ३९ ॥

श्यामैककर्णान् वरुणो हयान् शुक्लान् मनोजवान् ।
ददौ सहस्रसङ्ख्यातान् देवदेवाय तोयराट् ॥ ४० ॥

सत्यधर्मीया — तोयराट् नीरनायकः ॥ ४० ॥

सुमनोरञ्जिनी — तोयराट् जलाभिमानी ॥ ४० ॥

अष्टौ निधिपतिः कोशान् रत्नपूर्णानविक्षयान् ।
तथाऽन्ये लोकपालाश्च ददुः स्वाधिकृतं धनम् ॥ ४१ ॥

सत्यधर्मीया — निधिपतिर्धनदोऽष्टौ निधीन् ।

'पद्मश्चैव महापद्मो मत्स्यकूर्मौ तथौदकः ।
नीलो मुकुन्दः शङ्खश्च निधयोऽष्टौ प्रकीर्तिताः' इति कीर्तनात् ।

महापद्मपद्मयोरेकीकरणेन — महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ । मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नवेति वाऽमरोक्तानष्टौ निधीन् । श्रीमुकुन्दे निधिनिधौ सति किं मुकुन्दनिधिनेति तदप्रेषणेऽष्टकसम्पत्तेरिति केचित् । केचिच्चैकस्मिन्नप्रहितेऽपि तत्कार्यं यथा भविष्यति तथेतरेषामप्रेषणेऽपि हरिशक्तितः सर्वकार्यं भविष्यत्येव । तथाऽपि सेवार्थमेव तत्प्रेषणमिति द्योतयितुमेकत्यागेनाष्टेति स्पष्टोक्तिरिति भावं भावयन्ति । अपरे तु नाम्ना शिखण्डिव्रजमित्यादिवत् खर्वेति ह्रस्वम् । स्वल्पमित्यर्थकं भवन्न महत्त्वोपयोगि भवेदिति तत्त्याग इति वर्णयन्ति । अविक्षयान्विक्षयरहितान् । व्यये कियति सति कृतेऽप्यव्ययान् स्वाधिकृतं स्वाभिगतिमत्तया भगवत्कृतम् । अभिमतिमदलाभे स्वेषामाधिकृन्मानसपीडाकारि । स्वमनःपूर्वकं कृतम् । सम्पादितमिति वा । आधिर्मनो वरूथं चेति तृतीयतात्पर्यात् ॥ ४१ ॥

सुमनोरञ्जिनी — निधीनां पतिः कुबेरः । अष्टौ कोशान् ।

'पद्मश्चैव महापद्मो मत्स्यकूर्मौ तथौदकः ।
नीलो मुकुन्दः शङ्खश्च निधयोऽष्टौ प्रकीर्तिताः ॥' इति प्रसिद्धानष्टनिधीन् ।

कीदृशान् ? अविक्षयान् अक्षय्यान् । स्वाधिकृतं स्वस्वामिकम् ॥ ४१ ॥

यद् यद् भगवता दत्तमाधिपत्यं स्वसिद्धये ।
सर्वं प्रत्यर्पयामासुर्हरौ भूमिगते नृप ॥ ४२ ॥

सत्यधर्मीया – यद्यद्यस्याधिपत्यं भगवता दत्तं तत्सर्वं हरौ भूमिगतेऽर्पयामासुः । तदर्पणफलं लपति । स्वसिद्धये स्वस्वरूपलाभाय । स्वं ज्ञातावात्मधनयोः सिद्धिनिष्पत्ति-लाभयोरिति विश्वौ ॥ ४२ ॥

सुमनोरञ्जिनी —— अन्येऽपि लोकपाला स्वेभ्यो भगवता यद्यत् यस्य यस्याधिपत्यं दत्तं तत्सर्वं हरौ हर्यर्थं प्रत्यर्पयामासुः । कुत इत्यत उक्तं स्वसिद्धय इति । स्वेषां सिद्धये मोक्षे आनन्दवैशेष्यसिद्धये इत्यर्थः । ज्ञानोत्तरकृतभगवत्सेवाया तद्धेतुत्वात् देवानां च ज्ञानित्वादिति भावः ॥ ४२ ॥

तत्र योगप्रभावेण नीत्वा स्वान् भगवान् हरिः ।
मधुरायाश्च रामेण कृष्णः समनुमन्त्रितः ।
निर्जगाम पुरद्वारात् पद्ममाली निरायुधः ॥ ४३ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे त्रिपञ्चाशोऽध्यायः ॥

सत्यधर्मीया —— रामेण सम्यनगुमन्त्रितं येन स मधुरायाः सकाशात्तत्र योगप्रभावेन नीत्वा प्रस्थाप्य रामं च मधुरापालने (द्वारकापालने इति स्याद्वेति भाति) नियुज्य स्वयं पद्ममाली निरायुधः पुरद्वारान्निर्जगम ॥ ४३ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे त्रिपञ्चाशोऽध्यायः ॥ १०-५३ ॥

सुमनोरञ्जिनी —— योगप्रभावेन अचिन्त्यशक्त्या । स्वान् । मधुरायाः सकाशात् । तत्र रामेण समनुमन्त्रितः 'त्वमत्रैव तिष्ठ । अहं तु यवनहननार्थं गमिष्यामि' इति ॥

॥ इति श्रीमद्भागवतदशमस्कन्धोत्तरार्धव्याख्यायां सुमनोरञ्जिन्यां त्रिपञ्चाशोऽध्यायः ॥

॥ अथ चतुःपञ्चाशोऽध्यायः ॥

श्रीशुक उवाच –

तं विलोक्य विनिष्क्रान्तमुज्जिहानमिवोडुपम् ।
दर्शनीयतमं श्यामं पीतकौशेयवाससम् ॥ १ ॥

सत्यधर्मीया — उज्जिहानमुद्यन्तमुडुपं नक्षत्रत्रातारं श्यामं वर्णतो वयतश्च ॥ १ ॥

सुमनोरञ्जिनी — पुरात् विनिष्क्रान्तम् । उज्जिहानम् उद्यन्तम् । उडुपमिव चन्द्रमिव । दर्शनीयतमं अवश्यं दर्शनीयं तं विलोक्य ॥ १ ॥

श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकन्धरम् ।
पृथुदीर्घचतुर्बाहुं नवकञ्जारुणेक्षणम् ॥ २ ॥

सत्यधर्मीया — कौस्तुभाख्यरत्नसम्प्कुसम्बद्धग्रीवम् । नवकञ्जारुणेक्षणमिति कृष्णस्य वा मुखारविन्दस्य वा विशेषणम् ॥ २ ॥

सुमनोरञ्जिनी — भ्राजता कौस्तुभेन अमुक्तं सदायुक्तं कन्धरं यस्य तम् ॥ २ ॥

नित्यप्रमुदितं श्रीमत्सुकपोलं शुचिस्मितम् ।
मुखारविन्दं बिभ्राणं स्फुरन्मकरकुण्डलम् ॥ ३ ॥

सत्यधर्मीया — नित्यप्रमुदितं सदा सन्तुष्टं श्रीमन्तौ सुशोभनौ कपोलौ यस्य तच्छुचिस्मितं मुखारविन्दं बिभ्राणं दधतं स्फुरन्मकरकुण्डलमिदमपि तथा ॥ ३ ॥

सुमनोरञ्जिनी — नित्यप्रमुदितमित्यादीनि मुखारविन्दविशेषणानि । नित्यं प्रमुदितं प्रमोदसूचकविकासोपेतम् । श्रीमत् कान्तिमत्, शुचि शुभ्रम्, स्मितं यस्मिन् ॥ ३ ॥

वासुदेवो ह्ययमिति पुमान् श्रीवत्सलाञ्छनः ।
चतुर्भुजोऽरविन्दाक्षो वनमाल्यतिसुन्दरः ॥ ४ ॥

सत्यधर्मीया — श्रीवत्सलाञ्छनः पुमानयं वासुदेव एव ॥ ४ ॥

सुमनोरञ्जिनी — 'श्रीवत्सलाञ्छनादिः वासुदेवः' इति नारदप्रोक्तलक्षणैरयं पुमान् वासुदेवो हि वासुदेव एव ॥ ४ ॥

लक्षणैर्नारदप्रोक्तैर्नान्यो भवितुमर्हति ।
निरायुधश्चलन् पद्भ्यां योत्स्येऽनेन निरायुधः ॥ ५ ॥

सत्यधर्मीया — नारदप्रोक्तैर्लक्षणैरित्यनुवादेन नारदप्रेषित इत्यत्र लक्षणान्युक्त्वा प्रेषयामासेति वाद ऊह्यः । धर्मज्ञतां स्फोरयति ॥ **निरायुध इत्यादिना** ॥ ५ ॥

सुमनोरञ्जिनी — नान्यो भवितुमर्हति । किञ्च अयं पद्भ्यां चरन् निरायुधश्च । अहमपि पद्भ्यां चरन् निरायुधः सन् अनेन योत्स्य इति निश्चित्येति सम्बन्धः ॥ ५ ॥

इति निश्चित्य यवनः प्राद्रवन्तं पराङ्मुखम् ।
अन्वधावज्जिघृक्षुस्तं दुरापमपि योगिनाम् ॥ ६ ॥

सत्यधर्मीया — पराङ्मुखं न तु पराजयात् अनारब्धत्वाद्युद्धस्य । योगिनां दुरापमित्यनेनाविज्ञत्वं यवनस्य प्रकटयामास ॥ ६ ॥

सुमनोरञ्जिनी — जिघृक्षुः गृहीतुमिच्छावान् ॥ ६ ॥

हस्तप्राप्तमिवात्मानं हरिणा स पदे पदे ।
नीतो दर्शयता दूरं यवनेशोऽद्रिकन्दरम् ॥ ७ ॥

सत्यधर्मीया — आत्मानं स्वं पदे पदे हस्तप्राप्तमिव दर्शयता हरिणा दूरमद्रिकन्दरं नीतः । इदानीं गृहिष्यामीत्याशामुत्पाद्य दूरं तं चकर्षेत्यर्थः ॥ ७ ॥

सुमनोरञ्जिनी — पदे पदे । आत्मानं स्वं हस्तप्राप्तमिव दर्शयता हरिणा । यवनेशो दूरम् । अद्रिकन्दरं प्रति नीत इत्यन्वयः ॥ ७ ॥

पलायनं यदुकुले जातस्य तव नोचितम् ।
इति क्षिपन्ननुगतो नैनं प्रापाहताशुभः ॥ ८ ॥

सत्यधर्मीया — यदुकुले जातस्य तव पलायनं नोचितमिति वाचा क्षिपंस्तिरस्कुर्वन् । अहतमनष्टमशुभं यस्य स एनं न प्राप ॥ ८ ॥

सुमनोरञ्जिनी — क्षिपन् निन्दन् । अहताशुभः अक्षीणपापः ॥ ८ ॥

एवं क्षिप्तोऽपि भगवान् प्राविशद् गिरिकन्दरम् ।
सोऽपि प्रविष्टस्तत्रान्यं शयानं ददृशे नरम् ॥ ९ ॥

सत्यधर्मीया — एवं वाचा क्षिप्तो भगवान् अद्रिकन्दरमेव प्राविशत् । सोऽपि यवनोऽपि तत्र गिरिकन्दरे शयानमन्यं नरं ददृशे । वस्तुस्थितिकथनमिदम् ॥ ९ ॥

सुमनोरञ्जिनी — क्षिप्तोऽपि दुर्भाषितोऽपि ॥ ९ ॥

नन्वसौ दूरमानीय शेते मामिह साधुवत् ।
इति मत्वाऽच्युतं मूढस्तं पदा समताडयत् ॥ १० ॥

सत्यधर्मीया – अस्मिन्नुत्पन्नकृष्णभ्रमो मनस्येवमालोच्य स्वमरणानुगुणं कार्यमकरोदित्याह ॥ **नन्विति ।** असौ कृष्णो मां दूरमानीय साधुरिव शेत इत्यच्युतं मत्वा तं शयानं पदा समताडयत् । ताडनादिकमेतत्कारणकमित्याह ॥ **मूढ इति** ॥ १० ॥

सुमनोरञ्जिनी — तं शयानं नरम् ॥ १० ॥

स उत्थाय चिरं सुप्तः शनैरुन्मील्य लोचने ।
दिशो विलोकयन् पार्श्वे तमद्राक्षीदवस्थितम् ॥ ११ ॥

सत्यधर्मीया — चिरं सुप्त इति शनैर्लोचने उन्मील्य दिशो विलोकयन्पार्श्वेऽवस्थितमद्राक्षीत् ॥ ११ ॥

सुमनोरञ्जिनी — चिरं बहुकालं सुप्तः । पार्श्वे अवस्थितमिति शेषः ॥ ११ ॥

स तावत् तस्य रुष्टस्य दृष्टिपातेन भारत ।
देहजेनाग्निना दग्धो भस्मसादभवत् क्षणात् ॥ १२ ॥

सत्यधर्मीया — सः कालयवनो यावत्तस्य रुष्टस्य को वा मामनागसमताडयत्पदेति कुपितस्य दृष्टिपातेन हेतुना देहजेन स्वदेहादेव जातेन जातवेदसाऽग्निना दग्धस्तावदेव क्षणाद्भस्मसादभवत् ॥ १२ ॥

सुमनोरञ्जिनी — तावत् तदा रुष्टस्य क्रुद्धस्य तस्य दृष्टिपातेन यः संदीपितोऽग्निः तेन । देहजेन स्वदेहजेन । अग्निना ॥ १२ ॥

राजोवाच –

को नाम स पुमान् ब्रह्मन् कस्य किं वीर्य एव वा ।
कस्माद् गुहाङ्गतः शिश्ये किंतेजा यवनार्दनः ॥ १३ ॥

सत्यधर्मीया — राजा श्रुततदेतव्द्यापारस्तत्स्वरूपादिकं पृच्छति मुनिमित्याह ॥ **राजेति** । स पुमान् लोचनानलनिर्मूलितकालयवनो नामैव प्रसिद्धः कः किन्नामा जातिर्वा । कस्य पुत्रः किंवीर्यः किं कीदृग्वीर्यं यस्य सः । गुहां गतः कस्माच्छिश्ये । किं तेजो यवनार्दन इति पाठे यवनमर्दयतीति तत्तेजः किं किं रूपमित्यर्थः । किं तेजा यवनार्दन इति पाठे यवानार्दनो यो दृष्टिर्वा तज्जो जातवेदाः किं तेजो इत्युद्देश्यविधेयभावेनान्वयः । यद्वा पदमेकम् । यवनमर्दयतीति यवनार्दनं यस्य स पुमान् क इत्यन्वयः ॥ १३ ॥

सुमनोरञ्जिनी – स पुमान् कः ? किन्नामकः ? कस्य कुले जातः ? किं वीर्यः? कस्य पुत्रः ? अस्य किं तेजः ? येन तेजसा । यवनार्दनः अभवत् । शिष्ये शयनं कृतवान् ॥

श्रीशुक उवाच –

स इक्ष्वाकुकुले जातो मान्धातृतनयो महान् ।
मुचुकुन्द इति ख्यातो ब्रह्मण्यः सत्यसङ्गरः ॥ १४ ॥

सत्यधर्मीया — शुकः परीक्षित्प्रश्नान्परिहरति ॥ **स इति** । इक्ष्वाकुकुले जातः क्षत्रियजातीयः । कस्येत्युत्तरयति – **मान्धातृतनय इति** । किन्नामेति परिहरति ॥ **मुचुकुन्द इति ख्यात इति** । ब्रह्मण्यो ब्रह्मणि हरौ ब्राह्मणजातौ वा साधुर्ब्रह्मण्यस्तत्पूजापरः । उत्तरकथोपयोगिमाहात्म्यमङ्कुरयति ॥ **सत्यसङ्गर** इति । प्रामाणिकयुद्धः सत्यप्रतिज्ञो वा । अथ प्रतिज्ञाजिसंविदेत्यमरः ॥ १४ ॥

सुमनोरञ्जिनी — सत्यः सङ्गरो युद्धं यस्य सः ॥ १४ ॥

स याचितः सुरगणैरिन्द्राद्यैरात्मरक्षणे ।
असुरेभ्यः परिभ्रष्टैस्तद्रक्षां सोऽकरोच्चिरम् ॥ १५ ॥

सत्यधर्मीया — कस्माच्छिश्ये किन्तेज इत्यादिकं वक्तुं तदुपोद्घातं रचयति ॥ स इति । इन्द्राद्यैः सुरगणैरात्मरक्षणेऽसुरेभ्यः परित्रस्तैर्याचितः । एतादृशं किमिति मतिमन्तो देवाः समुद्रे प्लवन् गतो निर्भाग्यकरमदीधरदिति नीत्याऽदीधरन्नित्यतो न तथाऽयमित्यप्याह ॥ **येति ।** या इदं कार्यपर्यवासायकसम्पदाऽऽचितः सम्यक्सम्बद्ध इति हेतोरिति । चिरं तद्रक्षामकरोत् ॥ १५ ॥

सुमनोरञ्जिनी — तेषां सुराणां रक्षाम् ॥ १५ ॥

लब्ध्वा गृहांस्ते स्वःपालं मुचकुन्दमथाब्रुवन् ।
राजन् विरमतां कृच्छ्राद् भवान् नः परिपालनात् ॥ १६ ॥

सत्यधर्मीया — ते देवाः स्वस्वगृहान्प्रति व्यूहगृहीन् लब्ध्वा । गुहं स्वःपालं लब्ध्वेति पाठे गुहं षण्मुखं स्वःपालं स्वर्गरक्षकं लब्ध्वा प्राप्येत्यर्थः । एवञ्च स्वःपालं मुचुकुन्दं चाथाब्रुवन् । हे राजन्नः परिपालनादेतज्जातात्कृच्छ्राद्भवानितः परं विरमतात् । व्याङ्परिभ्यो रम इति परस्मैपदता । विरमतामिति पाठे विपूर्वकत्वे परस्मैपदताभाव आर्षः । विश्रमं यातु ॥१६॥

सुमनोरञ्जिनी — ते देवाः स्वःपालं स्वर्गरक्षकम् । अब्रुवन् । किमिति । नः परिपालनात् यत् कृच्छ्रं तस्मान्निमित्तात् । विरमतां विश्राम्यताम् ॥ १६ ॥

नरलोकं परित्यज्य राज्यं निहतकण्टकम् ।
अस्मान् पालयतो वीर कामास्ते सर्व उज्झिताः ॥ १७ ॥

सत्यधर्मीया — निहतकण्टकं राज्यं परित्यज्य नरलोकं च परित्यज्यास्मान्पालयतस्तव सर्वे कामा उज्झितास्त्यक्ताः ॥ १७ ॥

सुमनोरञ्जिनी — उज्झिताः त्यक्ता इत्यर्थः ॥ १७ ॥

सुता महिष्यो भवतो ज्ञातयोऽमात्यमन्त्रिणः ।
प्रजाश्च तुल्यकालीना नाधुना सन्ति कालिताः ॥ १८ ॥

सत्यधर्मीया — कामांस्तानेव विशदयन्ति ॥ सुता इति । महिष्यो भार्या ज्ञातयो बान्धवा अमात्याश्च ते मन्त्रिण आलोचनपराश्च । सामान्यविशेषभाव इत्यन्ये । तुल्यकालीनाः सम-समयवर्तिन्यः प्रजाश्चाधुना न सन्ति कालिताः संहृताः ॥ १८ ॥

सुमनोरञ्जिनी — मन्त्रिणः अमात्यातिरिक्ताः आलोचकाः । यद्वा, अमा सहैव समीपे वा तिष्ठन्तीत्यमात्याः । अमा सह समीपे चेत्यमरः । वस्तुतस्तु प्रथमतात्पर्योक्तरीत्या तुल्यकालीनाः त्वत्समानकालीनाः कालिताः चालिताः नष्टा इत्यर्थः ॥ १८ ॥

कालो बलीयान् बलिनां भगवानीश्वरोऽव्ययः ।
प्रजाः कालयते क्रीडन् पशुपालो यथा पशून् ॥ १९ ॥

सत्यधर्मीया — बलिनां मध्ये कालो बलीयान् । ईयसुन्निर्धारणषष्ठीलब्धाऽतिबलतोपपादकः । पुरुतमं पुरूणामित्यृग्भाष्यटीकोक्तप्रकारेण स्वार्थे वेयसुन् । बलिनामित्यस्येश्वर इत्यनेनान्वयो वा । क्रीडन् स्वयमव्यय इति क्रीडेयमिति । प्रजाः कालयते । णिचश्चेत्यात्मनेपदम् । यथा पशुपालः स्वावसरे तान्भक्षयति तथेति । अनेन कालः कालनकर्तैव न पालयितेति निरस्तम् । पलानां मांसानामयं तत्कामुकः । योग्यतया पश्वित्यस्य सम्बन्धे पशुमांसापेक्षावान्पशून्यथेति वा । पलमेव पालं वा । पलं च माषमांसयोरिति विश्वः । पशूनां पालं यस्यापेक्षणीयमिति सः । पशवश्चाजाद्याः । पशुपालो यथा पशून्न कालयते न तथाऽयमिति व्यतिरेक इति केऽपि । कालयत इत्यनेन तस्मै नम इत्यपि सूचयति ॥ १९ ॥

सुमनोरञ्जिनी — कश्चालयितेति तत्राह ॥ काल इति । कालः क इत्यत उक्तम् । भगवानिति । अव्ययः स्वरूपतो देहतो गुणतश्च नाशरहितः । पशुपालो यथा पशून् कालयते इतस्ततश्चालयति तथेति ॥ १९ ॥

वरं वृणीष्व भद्रं ते ऋते कैवल्यमात्मनः ।
एक एवेश्वरस्तस्य भगवान् विष्णुरव्ययः ॥ २० ॥

सत्यधर्मीया — हे राजन् वरं वृणीष्व वरय । ते भद्रमस्तु । यर्हि देयो दयातो वरो हन्त तर्हि दिशतु मुक्तिमिति न वदेति मुखं बध्नन्ति – ऋत इति । आत्मन इति षष्ठ्यन्तं सत् स्वस्येत्यर्थकं द्वितीयाबहुवचनं सदस्मान्वरयेत्यर्थकं चेति ज्ञेयम् । कैवल्यमपवर्गमृते । ज्ञानसूर्यमृते नान्यस्य स्वातन्त्र्यं तद्वितरण इतीरयन्ति । तस्य कैवल्यस्यैक एव विष्णुर्भगवानव्यय ईश्वरः समर्थः । न समर्थास्तद्दाने वयमिति भावः ॥ २० ॥

सुमनोरञ्जिनी — कैवल्यं मोक्षम् । ऋते विना । ईश्वरः दातुं समर्थः ॥२०॥

एवमुक्तः स वै देवानभिवाद्य महायशाः ।
अयाचत गुहाविष्टो निद्रां तु बहुकालिकीम् ॥ २१ ॥

सत्यधर्मीया — एवं देवैरुक्तः सर्वदेवानभिवाद्य नमस्कृत्य गुहाविष्टः सन् बहुकालजां बहुकालभवां निद्रां कुर्यामित्ययाचिष्ट ययाचे ॥ २१ ॥

सुमनोरञ्जिनी – बहुकालिकीं बहुकालभोग्याम् । गुहायाम् आविष्टः । अयाचष्ट अयाचत् ॥ २१ ॥

यः कश्चिन्मम निद्राया भङ्गं कुर्यात्सुरोत्तमाः ।
स तु भस्मीभवेदाशु तथोक्तश्च सुरैः सह ॥
स्वापं यन्तं यस्तु मध्ये बोधयेत्त्वात्मचेतनः ।
स त्वया दृष्टमात्रस्तु भस्मी भवतु तत्क्षणात् ॥

तथेत्युक्तस्तु तैर्देवैर्मुचुकुन्दो महामनाः ।
अशयिष्ट गुहाविष्टो निद्रया देवदत्तया ॥ २२ ॥

सुमनोरञ्जिनी – स्वापयन्तं स्वापं प्राप्तम् । अचेतनं बाह्यस्मरणरहितम् ॥ २२ ॥

यवने भस्मसान्नीते भगवान् सात्वतर्षभः ।
आत्मानं दर्शयामास मुचुकुन्दाय धीमते ॥ २३ ॥

सत्यधर्मीया — तथेति तैर्देवैरुक्तो महामना मुचकुन्दो गुहाविष्टोऽशयिष्ट । अत्रैकश्लोक उत्सन्नः ।

श्लोकस्यैतद्याचनश्लोकपूर्वकत्वावश्यम्भावात् । तत्त्यागे सर्वत्यागोऽस्तु । हरिवंश-शंसितरीत्या कथाया ज्ञातुं शक्यत्वात् । तथा हि हरिवंशे ।

'पुरा देवासुरे युद्धे कृतकर्मा महाबलः ।
वरेण छन्दितो देवैर्निद्रामेव गृहीतवान् ।
श्रान्तस्य तस्य वागेवं तदा प्रादुरभूत् किल ।
प्रसुप्तं बोधयेद्यो मां तद्दहेयमहं सुराः ।
चक्षुषा क्रोधदीप्तेनेत्येवमाह पुनः पुनः ।
एवमस्त्विति तं शक्र उवाच त्रिदशैः सह ।
स सुरैरभ्यनुज्ञातो मानुषं लोकमागतः ।
स पर्वतगुहां काञ्चित्प्रविश्य श्रमकर्शितः ।
सुष्वाप कालमेतं वै यावत्कृष्णस्य दर्शनम् ।
तत्सर्वं वासुदेवस्य नारदेन निवेदितम् ।
वरदानं च देवेभ्यस्तेजस्तस्य च भूपतेः ।
अनुगम्यमानः कृष्णस्तु तेन म्लेच्छेन शत्रुणा ।
तां गुहां मुचुकुन्दस्य प्रविवेश विनीतवत् ।
शिरस्थाने तु राजर्षेर्मुचुकुन्दस्य केशवः ।
सन्दर्शनपथं त्यक्त्वा तस्थौ बुद्धिमतां वर' इति ।

निद्रया देवदत्तया वरसम्पदा यवने भस्मसान्नीते भस्माधीने तद्रूप इति यावत् । सात्वतर्षभो भगवान् हे मुचकुन्देत्यात्मानं तं दर्शयामासेत्यन्वयः । गतिबुद्धीत्यादेः । अयधीरिति गतबुद्धिरिति मतोऽयधीमतस्तस्मिन् यवन इत्यन्वयः । विवक्षाभावे मुचकुन्दाय धीमते आत्मानं दर्शयामासेत्यन्वय इति वा ॥ २२,२३ ॥

सुमनोरञ्जिनी — अशयिष्ट शेते २.१ ॥ २३ ॥

तमालोक्य घनश्यामं पीतकौशेयवाससम् ।
श्रीवत्सवक्षसं भ्राजत्कौस्तुभेन विराजितम् ॥ २४ ॥

सत्यधर्मीया– महाबुद्धिस्तं पर्यपृच्छदित्यनेनान्वय इति विशेषकम् । घनवच्छ्यामः ॥ २४ ॥

चतुर्भुजं रोचमानं वैजयन्त्या च मालया ।
चारुप्रसन्नवदनं स्फुरन्मकरकुण्डलम् ॥ २५ ॥

सत्यधर्मीया — यावद्वनमाल्या ॥ २५ ॥

सुमनोरञ्जिनी — रोचमानं शोभमानम् । वैजयन्त्या वनमालया च ॥ २५ ॥

प्रेक्षणीयं त्रिलोकस्य सानुरागस्मितेक्षणम् ।
आपीच्यवयसं मत्तमृगेन्द्रोदारविक्रमम् ॥ २६ ॥

सत्यधर्मीया — त्रिलोकस्य प्रेक्षणीयं दृश्यम् । कृत्यानां कर्तरि वेति षष्ठी । त्रिलोकस्य मध्ये दर्शनीयमिति वा । आपीच्यवयसं गतम् ॥ २६ ॥

सुमनोरञ्जिनी — त्रिलोकस्य कर्तरि षष्टी । त्रिलो(क्ये)केत्यर्थः । त्रिलोकस्य मध्ये प्रेक्षणीयमिति वा । आपीच्यवयसं षोडशवार्षिकम् ॥ २६ ॥

पर्यपृच्छन्महाबुद्धिस्तेजसा तस्य विस्मितः ।
शङ्कितः शनकै राजा दुर्धर्षमतितेजसा ॥ २७ ॥

सत्यधर्मीया — तस्यातितेजसा तेजांस्यतिक्रम्य विद्यमानं तेन तेजसाऽपूर्वेण शङ्कितः झडिति प्रष्टं संशयः शनकैर्दुर्धर्षं पर्यपृच्छत् ॥ २७ ॥

सुमनोरञ्जिनी — राजा मुचकुन्दः । तेजसा अतिदुर्धर्षं भगवन्तं प्रति पर्यपृच्छदिति सम्बन्धः ॥ २७ ॥

मुचुकुन्द उवाच –

को भवानिह सम्प्राप्तो विपिने गिरिगह्वरे ।
पद्भ्यां पद्मपलाशाभ्यां विचरस्युरुकण्टके ॥ २८ ॥

सत्यधर्मीया —— उरुकण्टके गिरिगह्वरे पद्मपलाशाभ्यां पद्भ्यां विचरसि भवान् कान्तिमानिह सम्प्राप्तस्त्वं कः । इहसं ऐः मन्मथस्य हसोपहासो यथा प्राप्त इति वा । मन्मथव्यथाजनकसौन्दर्यवानिति तात्पर्यम् । दीप्तिर्भाभिश्चेत्यनेकार्थध्वनिपदमञ्जरी ॥ २८ ॥

सुमनोरञ्जिनी —— पद्मस्य पलाशाविव पद्मपलाशौ । ताभ्याम् ॥ २८ ॥

किंस्वित्तेजस्विनां तेजो भगवांस्त्वं विभावसुः ।
सूर्यः सोमो महेन्द्रो वा लोकपालोऽपरोऽपि वा ॥ २९ ॥

सत्यधर्मीया —— तेजस्विनां तेजः समुदितं किंस्वित् । भगवान्विभावसुरग्निः किंस्वित् सूर्यः सोमश्चन्द्रश्चन्द्रशेखरो वा । उमया सहितः सोम इति विग्रहः । अपरो लोकपालो नाकपालादिर्वा ॥ २९ ॥

सुमनोरञ्जिनी —— तेजस्विनां ज्योतिष्मतां तेजः तेजःप्रदो भगवान् विष्णुः किंस्वित् । ज्योतिषां ज्योतिरिति श्रुतेः । उत विभावसुः अग्निः ॥ २९ ॥

मन्ये त्वां देवदेवानां त्रयाणां पुरुषर्षभम् ।
यद् भाससे गुहाध्वान्तं प्रदीपः प्रभया यथा ॥ ३० ॥

सत्यधर्मीया —— सहसैवं वितर्क्य सर्वत्रारुचिमान्निष्कृष्य वक्ति ॥ **मन्य इति** । हे देव देवानां त्रयाणां हरिहरहिरण्यगर्भाणां मध्ये पुरुषर्षभं पुरुषं श्रेष्ठं विष्णुं मन्ये । स्वमननमन्यथानुपपत्त्योपोद्बलयति ॥ **यदिति** । प्रदीपः प्रभया यथा ध्वान्तं परिहरति तथा यद्यतो गुहाध्वान्तं गुहायां ध्वान्ताभावो यथा तथा भाससे । न विष्णोरन्यस्यैवंविधं भानं सम्भवत्यतस्त्वं स एवेति भावः । गुहाया आध्वान्तं मार्गान्तप्रदेशपर्यन्तं भासस इति वा । हृदयगुहाध्वान्तमज्ञानं यथा न तथा भाससे । त्वद्दर्शनमात्रेणेयान्विमर्शो मम जात इति भावः । यद्वाधस इति पाठः सरलो विरलार्थश्च ॥ ३० ॥

सुमनोरञ्जिनी —— इति संशय्य सम्भावयति ॥ **मन्य इति** । देवदेवानां ब्रह्मविष्णुशिवानां मध्ये । पुरुषर्षभं क्षराक्षरपुरुषश्रेष्ठम् । विष्णुं मन्ये सम्भावये । तत्र हेतुमाह ॥ **यदिति** । गुहाध्वान्तं गुहायां विद्यमानमन्धकारम् । ब्रह्माण्डाख्यगुहाव्यापिध्वान्तं वा ।

हृदयगुहाव्यापि अज्ञानलक्षणं तिमिरं वा । बाधसे परिहरसि । प्रदीपः दीपः सूर्यो वा । त्वद्दर्शनेन ममाज्ञानं नष्टमिवाभाति । अतस्त्वं विष्णुरेवेति भावः ॥ ३० ॥

शुश्रूषतामव्यलीकमस्माकं नरपुङ्गव ।
स्वजन्मकर्मगोत्रं वा कथ्यतां यदि रोचते ॥ ३१ ॥

सत्यधर्मीया — शुश्रूषतां श्रोतुमिच्छूनामव्यलीकमनृतं सत्यमिति यावत् । स्वजन्म तत्कर्म गोत्रं वा यदि रोचते तुभ्यं मां प्रति वक्तव्यमिति तर्हि कथ्यताम् ॥ ३१ ॥

सुमनोरञ्जिनी — एवं सम्भावयित्वा निश्चयार्थं पृच्छति । शुश्रूषतां श्रोतुमिच्छताम् । अव्यलीकं यथार्थम् । कथ्यतामित्यन्वयः ॥ ३१ ॥

वयं तु पुरुषव्याघ्र ऐक्ष्वाकाः क्षत्रबन्धवः ।
मुचुकुन्द इति ख्यातो यौवनाश्वात्मजः प्रभो ॥ ३२ ॥

सत्यधर्मीया – अहं तु मम सर्वं वच्मि त्वं कः प्रवद इति प्रश्नतः प्राक् स्वस्वरूपादिकं स्वयमेवाह – **वयं त्विति** । पुरुषव्याघ्र ऐक्ष्वाका इत्यत्र विवक्षाभावान्न वृद्धिः । पुरुषव्याघ्रे त्वयि विज्ञापयाम इति विशेषणान्वयो वा । ऐक्ष्वाका इक्ष्वाकुकुलजा बहुत्वे तद्राजलुगभाव आर्षः । दाण्डिनायननिपातितश्चैक्ष्वाकशब्दः । क्षत्रबन्धवः क्षत्रियास्तत्रापि युवनाश्वापत्यं मान्धाता तदपत्यमहमिति यौवनाश्वात्मजो मुचुकुन्द इति प्रोक्तः । यद्यप्यनुशासनसिद्धं वयन्त्विति बहुवचनम् । तथाऽपि प्रतीयेताहंता तेन नाहं तादृश इति पुनरेकवचनतो वक्ति । मुचुकुन्द इति प्रोक्त इत्यादिना ॥ ३२ ॥

सुमनोरञ्जिनी — ऐक्ष्वाकाः इक्ष्वाकुकुले जाताः । वयमिति स्ववंश्यविवक्षया बहुवचनम् । तत्र अहं यौवनाश्वात्मजः । यौवनाश्वो मान्धाता । तस्य पुत्रः ॥ ३२ ॥

चिरप्रजागरश्रान्तो निद्रयोपहतेन्द्रियः ।
शयेऽस्मिन् विपिने कामं केनाप्युत्थापितोऽधुना ॥ ३३ ॥

सत्यधर्मीया — चिरं प्रजागरेण रणकरणक्षणे । कामं यथेच्छं शये । अधुना केनापि पुरुषेणोत्थापितः ॥ ३३ ॥

सुमनोरञ्जिनी — श्रान्त इति हेतुगर्भविशेषणम् । उपहतेन्द्रियः । शये सुप्तोऽभूवम् ॥ ३३ ॥

सोऽपि भस्मीकृतो नूनमात्मीयेनैव पाप्मना ।
अनन्तरं भवान् श्रीमान् लक्षितोऽमित्रशासनः ॥ ३४ ॥

सत्यधर्मीया — आत्मीयेन पाप्मनैव सोऽपि मदुत्थापको भस्मीकृतोऽनन्तरममित्रशासनः श्रीमान्भवांल्लक्षितः ॥ ३४ ॥

सुमनोरञ्जिनी — सोऽपि मन्निद्राभङ्गकार्यपि स्वपापेनैव भस्मीकृतः ॥ ३४ ॥

तेजसा तेऽविषह्येण भूरि द्रष्टुं न शक्नुमः ।
हतौजसो महाभागा माननीयोऽसि देहिनाम् ॥ ३५ ॥

सत्यधर्मीया — अविषह्येण ते तेजसा त्वा भूरि द्रष्टुं हतौजसो हतं मुष्टं तेजो नायनं येषां ते तथा सन्तो विस्पष्टं द्रष्टुं न शक्नुमः । बहुवचनेन मादृशा बहवोऽसमर्था इति ध्वनयति । अतो देहिनां प्रशस्तशरीरवतां सतां माननीयस्त्वमसि । लोकचेष्टक त्वं देहिनामननीयश्श्रेष्टकोऽसीति वा ॥ ३५ ॥

सुमनोरञ्जिनी — अविषह्येण अप्रतिहतेन । हतौजसः प्रतिहतान्तःसामर्थ्याः ॥ ३५ ॥

एवं सुभा (सम्भा)षितो राज्ञा भगवान् भूतभावनः ।
प्रत्याह प्रहसन् वाण्या मेघह्रादगभीरया ॥ ३६ ॥

सत्यधर्मीया — एवं राज्ञा सुभाषितो भूतभावनः भगवान् । तं प्रति प्रहसन्मेघानां ह्रादो निर्ह्रादस्तद्वद्गभीरया वाण्याऽऽह प्रति सम्यगाहेति वा । तृतीयस्कन्धे प्रत्यङ्गमुख्याङ्कितमन्दिराणीति श्लोकतात्पर्यटीकाभ्यां ब्रह्मा प्रत्यङ्गवान्विष्णुः सम्यग्लक्षणवत्तम इति तन्त्रमालायां प्रतिशब्दः सम्यगर्थ इत्युक्तेः प्रतिशब्दः सम्यगर्थकः । प्रति तदाभिमुख्येन स्थितः । यथोक्तं तु प्रतिनरमित्यृग्भाष्यटीकयोः प्रतिः प्रतिस्थश्च प्रतिरयमुपसर्गः । उपसर्गाश्च सति क्रियावचने तत्सम्बन्धिनो भवन्ति । असति ससाधनं क्रियामाहुः । तुविर्महांश्चासौ प्रतिः प्रतिस्थश्चेतीति । प्रत्याहेत्यखण्डतायां झडिति निराहेत्येव भायान्न भातव्यं तथेति व्याकृतिरेवमिति ज्ञेयम् ॥ ३६ ॥

सुमनोरञ्जिनी —— ह्लादो ध्वनिः ॥ ३६ ॥

श्रीकृष्ण उवाच –

जन्मकर्माभिधानानि सन्ति मेऽङ्ग सहस्रशः ।
न शक्यन्तेऽनुसङ्ख्यातुमनन्तत्वान्ममापि हि ॥ ३७ ॥

सत्यधर्मीया —— स्वजन्म कर्मगोत्रं वा कथ्यतां यदि रोचत इत्युत्तरयति ॥ **जन्मेति ।** जन्मानि कर्माण्यभिधानानि च । अङ्ग मुचुकुन्द । सहस्रशोऽपराणि सन्ति । तव जन्मादीयताज्ञा वर्तेतेति नेत्याह ॥ **नेति ।** न शक्यन्तेऽनुमातुं, शक्यन्तेऽनुसङ्ख्यातुमिति च पाठौ । सङ्ख्यं भजतो मातुं सङ्ख्यातुमित्यर्थः । कुतोऽनन्तत्वात् ममापि हि । न ह्यनन्तमन्यान्प्रति यत्तन्नानन्तमनन्तप्रतीतिः (?) सम्भवति ॥

उक्तं चैकादशतात्पर्ये –

'अनन्तमिति वेत्तीशास्त्वनन्तमन्तवत्तया ।
अनन्तस्य तु सङ्ख्याने न तु सर्वज्ञता भवेत्' इत्यादि ॥

मेङ्गेत्यत्र मा इङ्गेति छेदः । सङ्ख्यातुं मा इङ्ग न गच्छ प्रयत्नं न कुर्विति यावदिति वा । अतो म इत्यस्य ममेत्यस्य वाऽऽवृत्त्या च सम्भवे एकस्यातिरेक इति निरस्तम् ॥३७॥

सुमनोरञ्जिनी —— जन्मानि अवताररूपाणि । कर्माणि । अभिधानानि नामानि च । सहस्रशः अनेकशः सन्ति । तानि ममापि सङ्ख्यातुं न शक्यन्ते । किम्वन्येषामिति कैमुत्ये अपिशब्दः । तव सर्वज्ञत्वात् कुतो न सङ्ख्यातुं शक्यन्त इत्यत उक्तम् ॥ अनन्तत्वादिति । सङ्ख्याशून्यत्वादिति यावत् । सङ्ख्यारहितेषु सङ्ख्याज्ञाने भ्रान्तिप्रसङ्गात् । नैतावता सर्वज्ञत्वहानिः । विद्यमानसर्वपदार्थज्ञत्वस्यैव तद्रूपत्वादिति भावः ॥ ३७ ॥

कश्चिद्रजांसि विममे पार्थिवान्युरुजन्मभिः ।
गुणकर्माभिधानानि न मे जन्मानि कर्हिचित् ॥ ३८ ॥

सत्यधर्मीया —— विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसीति श्रुतिफक्किकामर्थतः सङ्गृह्य कथयति ॥ **कश्चिदिति** । कश्चित्पुमानुरुजन्मभिः पार्थिवानि

रजांसि धूलीर्विममे गणयाञ्चकार । सोऽपि मे मम गुणकर्माभिधानानि जन्मानि च कर्हिचिदपि न विमिमीते । यदाकदाचिद्येनकेनापि रजःकणगणनं कर्तुं शक्यम् । न मम गुणकर्मादिगणनमिति भावः । स्वजन्मकर्मगोत्रं वेति मुचुकुन्दप्रार्थनायां जन्मकर्माभिधानानि सन्ति मे । जन्मकर्माणि मे नृपेति पूर्वेत्तरस्ववाक्ययोश्च जन्मनां कर्मादित्वेनोक्तावपि मध्ये गुणकर्माभिधानानि न जन्मानीति तेषां कर्माद्यनन्तरोदाहरणेन न जननानीति भगवद्भाव इत्यवसेयम् ॥ ३८ ॥

सुमनोरञ्जिनी — कश्चित् ब्रह्मैवेति पदरत्नावली । अनेन विष्णोर्नुकं वीर्याणीति श्रुत्यर्थ उक्तो भवति । कश्चित् ब्रह्मा पार्थिवानि रजांसि । विममे गणयामास सोऽपि उरुजन्मभिरपि अनेकजन्मभिरपि मे जन्मानि गुणकर्माभिधानानि च । कर्हिचित् कदाचिदपि न विममे न गणयति ॥ ३८ ॥

कालत्रयोपपन्नानि जन्मकर्माणि मे नृप ।
अनुक्रमन्तो नैवान्तं गच्छन्ति परमर्षयः ॥ ३९ ॥

सत्यधर्मीया — कालत्रयोपपन्नानि युगत्रयसम्बद्धानि मे मम जन्मानि कर्माणि परमर्षयो महाज्ञाना अनुक्रमन्तो निरन्तरं वक्तुमुद्यता अपि नान्तं गच्छन्ति न पारयन्ति ॥३९॥

सुमनोरञ्जिनी — कालत्रये उपपन्नानि तत्तत्कालानुगुणानि । अनक्रमन्तः निरन्तरं पठन्तो गणयन्तो वा ॥ ३९ ॥

तथाप्यद्यतनान्यङ्ग शृणुष्व गदतो मम ।
प्रार्थितस्तु विरिञ्चेन पुराऽहं धर्मगुप्तये ॥ ४० ॥

सत्यधर्मीया — तर्हि प्रष्टुर्ममैवाविवेक इति न वद किञ्चिद्ब्रच्मीति वक्ति ॥ **तथाऽपीति ।** अद्यतनान्येतत्कालभवानि गदतो मम सकाशाच्छृणुष्व । धर्मगुप्तये तद्रक्षायै ॥ ४० ॥

भूमेर्भारायमाणानामसुराणां क्षयाय च ।
अवतीर्णो यदुकुले गृह आनकदुन्दुभेः ॥ ४१ ॥

सत्यधर्मीया — सैवं सिद्ध्यतीत्याह ॥ भूमेरिति । आनकदुन्दुभेर्गृहे भार्यायाम् । आनकदुन्दुभेर्गृहे गदतो गदनामकात्पुरा पूर्वमेवावतीर्ण इत्यन्वयः । गदाग्रज इत्यर्थः ॥४१॥

सुमनोरञ्जिनी — गृहे भार्यायाम् ॥ ४१ ॥

वदन्ति वासुदेवेति वसुदेवसुतेति माम् ।
कालनेमिर्हतः कंसः प्रलम्बाद्याश्च सद्द्विषः ॥ ४२ ॥

सत्यधर्मीया — नामापि सनिरुक्तिकं वक्ति ॥ **वदन्तीति** ॥ **वासुदेवेति** । वसुदेव-सुतं तत्त्वाद्वदन्ति । हीति पुराणान्तरनिर्वचनसूचकम् । कालनेमिः प्राक् कंस इदानीं प्रलम्बाद्या सद्द्विषः सद्वैरिणः । अनेन बलोऽपि मद्बलत एवावधीत्प्रलम्बमिति ध्वन्यते ॥ ४२ ॥

सुमनोरञ्जिनी — वासुदेवेति वदन्ति सम्बोधयन्ति । वासुदेवेति नाम्ना वदन्तीति वा । तत्र निमित्तमाह ॥ **वसुदेवेति** । सद्द्विषः सद्भ्यो द्विषन्तीति तथोक्ताः ॥ ४२ ॥

अयं च यवनो दग्धो राजंस्ते तिग्मचक्षुषा ।
सोऽहं तवानुग्रहार्थं गुहामेतामुपागतः ॥ ४३ ॥

सत्यधर्मीया — तिग्मचक्षुषा तदग्निना सोऽहं तव त्वदुपरि ॥ ४३ ॥

सुमनोरञ्जिनी — तिग्मचक्षुषा तिग्मेन तीक्ष्णेन अग्न्युद्गारिणेति यावत् । चक्षुषा नेत्रेण । नेत्राग्निनेति फलितोऽर्थः ॥ ४३ ॥

प्रार्थितः प्रचुरं पूर्वं त्वयाऽहं भक्तवत्सलः ।
वरान् वृणीष्व राजर्षे सर्वान् कामान् ददामि ते ॥ ४४ ॥

मां प्रपन्नो जनः कश्चिन्न भूयोऽर्हति शोचितुम् ॥ ४५ ॥

सत्यधर्मीया — मम तव चानुबन्धः प्राचीनो वर्तत इत्याह ॥ **प्रार्थित इति** । भक्तवत्सलोऽहं त्वया पूर्वं प्रचुरं यथा तथा प्रार्थितः । वरानुत्तमान्कामान्वृणीष्व तान्सर्वांस्ते ददामि । मां प्रपन्नो जनो भूयः शोचितुं नार्हति सः । मां सम्पदं प्रपन्न एवेत्यावृत्त्याऽन्वयः ॥ ४४,४५ ॥

सुमनोरञ्जिनी —— सोऽहं यो वसुदेवगृहेऽवतीर्णः स इत्यर्थः । यस्मात्पूर्वं त्वया प्रार्थितः तस्मादेतां गुहामुपागतः । प्रार्थनेऽपि कुत आगन्तव्यमित्यत उक्तम् ॥ **भक्तेति** । यतोऽहं भक्तवत्सलः अतो भक्तेन त्वया प्रार्थित एतां गुहामुपागत इति सम्बन्धः । कामान् काम्यान् । गर्गवाक्यम् ॥ ४५ ॥

श्रीशुक उवाच –

इत्युक्तस्तं प्रणम्याह मुचुकुन्दो मुदान्वितः ।
ज्ञात्वा नारायणं देवं गर्गवाक्यमनुस्मरन् ॥ ४६ ॥

सत्यधर्मीया —— गर्गवाक्यं स्वं प्रति प्रागुक्तम् ॥ ४६ ॥

सुमनोरञ्जिनी —— मुमुक्षुणा विषयवैराग्यमेव सम्पादनीयं न तु कामवरः प्रार्थनीय इति दर्शयितुं मुचुकुन्दमहाराजस्य विरक्तिप्रकारं प्रदर्शयन्नाह ॥ **मुचकुन्द इति** ॥ ४६ ॥

मुचुकुन्द उवाच –

विमोहितोऽयं जन ईश मायया त्वदीयया त्वां न भजत्यनर्थदृक् ।
सुखाय दुःखप्रभवेषु सज्जते गृहेषु योषित् पुरुषश्च वञ्चितः ॥ ४७ ॥

सत्यधर्मीया —— मुकुन्दमुचकुन्दसंवादो हरिभक्त्यङ्कुरप्ररोहकः श्रोतॄणामिति मतिमान्स एवं वासुदेवमुवाचेत्याह ॥ **मुचुकुन्द उवाचेति** । हे ईश अयं जनस्त्वदीयया त्वदधीन-प्रकृतिरूपिण्या तवेच्छारूपिण्या च विमोहितः सन् त्वां न भजति । अर्थमर्यत इत्यर्थः । स्वप्राप्यस्तं पश्यति सोऽर्थदृक् स नेत्यनर्थदृक् । नित्यपुमर्थभूतत्व-दनवलोकक इत्यर्थः । अनर्थमर्थान्यं संसारादिकं पश्यतीति वा । सुखाय तत्प्राप्त्यर्थं दुःखप्रभवेषु दुःखस्य प्रभव उत्पत्तिर्येभ्यस्तेषु गृहेषु । जन इत्युक्तविभजनं करोति ॥ **योषित्पुरुषश्चेति** । पुरुषेण वञ्चित इत्युचितविपरिणामेनान्वेति । वञ्चिता योषिद्वंचितः पुरुष इति । योषित्पुरुषः पुरुषापदेशो योषिदधीरत्वात् । दुःखसाधनेषु सुखसाधनताभ्रमजनककर्मणा वञ्चितः सज्जते न धीरः पुमानित्ययं भामिनीसम इति वा ॥ ४७ ॥

सुमनोरञ्जिनी —— किमुवाचेत्यतस्तदाह ॥ **विमोहित इति** । हे ईश । योषित्पुरुष-

श्चेत्ययं जनः । अनर्थदृक् अनर्थं दुःखं पश्यतीति तथोक्तः । सर्वतो दुःखदर्शनवानपि । त्वदीयया मायया । विमोहितः सन् । दुःखहरं त्वाम् । सुखाय न भजति । किन्तु त्वदीयया मायया वञ्चितः सुखाय सुखमुद्दिश्य । दुःखप्रभवेषु दुःखहेतुषु गृहेषु । तदादिषु सज्जते सक्तो भवति । अनर्थदृक् स्वपुरुषार्थदर्शी न भवतीति वा ॥ ४७ ॥

लब्ध्वा जनो दुर्लभमत्र मानुषं कथञ्चिदप्यङ्गमयत्नतोऽनघ ।
पादाम्बुजं ते न भजत्यसन्मतिर्गृहान्धकूपे पतितो यथा पशुः ॥ ४८ ॥

सत्यधर्मीया — मुख्यया त्वदिच्छयाऽमुख्यया प्रकृत्या निमित्तेन स्वकर्मणा च विमोहित इत्युक्तं मोहितत्वं विशदयति ॥ **लब्ध्वेति** । हे अनघ । जनोऽयत्नतः प्रयत्नं विना कथञ्चित् केनाप्येकेन सुकर्मणा । अत्र संसारेऽसारे दुर्लभं दुष्प्रापं मानुषं मङ्गलं लब्ध्वाऽप्य-सन्मतिः असत् सद्भिन्नत्वादसद्विषयजातं तत्र मतिर्यस्य गृहरूपान्धकूपे पतितः पशुः स्वोत्तार-कर्मचक्षाणोऽपि तत्र तृणादिचरणतो भवति तथा पादारविन्दं त्यजति ॥ ४८ ॥

सुमनोरञ्जिनी — तदेव विशदयति ॥ **लब्ध्वेति** । अत्र कर्मभूमौ । कथञ्चित् जन्मान्तराराधितभगवत्प्रसादेन । अयत्नतः स्वप्रयत्नमन्तरा । भगवदनुग्रहेणैवेति यावत् । दुर्लभं मानुषम् । अङ्गं देहम् । लब्ध्वापि । असन्मतिः दुर्बुद्धिः अयं जनः, असत्सु विषयेष्वेव मतिर्यस्येति वा । बुद्धिशून्य इति वा । सन् ते पादारविन्दं न भजति किन्तु विषयाशया गृहांधकूपे एव पतितो भवति । तत्र दृष्टान्तः ॥ **यथा पशुरिति** ॥४८॥

ममैष कालोऽजित निष्फलो गतो राज्यश्रियोन्नद्धमदस्य भूपतेः ।
मर्त्यात्मबुद्धेः सुतदारकोशेष्वासज्जमानस्य दुरन्तचिन्तया ॥ ४९ ॥

सत्यधर्मीया — स्वानुभूतं भूतनाथं प्रति विज्ञापयति ॥ **ममेति** । हेऽजित । एष एतावान्कालो राज्यश्रियोन्नद्धो मदोऽहन्ता यस्य स तस्य । भूपतेर्मर्त्ये शरीरे आत्मन इति ममेति बुद्धिर्यस्य तस्य । सुतदारकोशेष्वासज्जमानस्य मम दुरन्ता चैतत्पोषादिविषयिणी च सा चिन्ता च तया निष्फलो गतः । न नित्यं फलं सम्पादितमित्यर्थः ॥ ४९ ॥

सुमनोरञ्जिनी — मम । एषः अतीतः कालः निष्फल एव गतः । कुत इत्यतः

राज्यश्रियेत्यादि । राज्यश्रिया । उन्नद्धः अभिवृद्धः मदो यस्य । मर्त्यात्मबुद्धेः । मर्त्ये देहे आत्मेति अहमिति बुद्धेः स्फुटतरविवेकरहितस्येति यावत् ।। ४९ ।।

कलेवरेऽस्मिन् घटकुड्यसन्निभे निरूढमानो नरदेव इत्यहम् ।
वृतो रथेभाश्वपदात्यनीकपैर्गां पर्यटंस्त्वामगणय्य दुर्मदः ।। ५० ।।

सत्यधर्मीया — घटसन्निभे कुड्यसन्निभे घटैरेव विना मृदमेकस्योपर्येकस्थापनेन निर्मिते कुड्य इति वा । अनेन तीव्रव्रजनं ध्वनयति । कलेवरे शरीरेऽहं नृदेवो नृप इति निरूढो दृढो मानो मनःसमुन्नतिरहन्ता वा तद्वानहम् । रथेभाश्वपदात्यनीकपैर्वृतस्त्वा-मगणय्याविगणय्य । ल्यपूछान्दसः । दुर्मदो गां भूमिं पर्यटन् । त्वामगणयन्सुदुर्मद इति च पठन्ति । स च निशठः पाठः । य एवंविधस्तस्य मम कालो निष्फलो गत इत्यतीतेनान्वयः ।। ५० ।।

सुमनोरञ्जिनी — अस्मिन् कलेवरे । घटकुड्यादिसन्निभे, अनित्ये, अचेतन इति यावत् । नरदेव इति निरूढमानः दृढाभिमानवान् । रथादिभिः वृतः । त्वाम् अगणय्य । त्वत्पूजामकृत्वा गां पर्यटन् । अस्मीति शेषः ।। ५० ।।

प्रमत्तमुच्चैरितिकृत्यचिन्तया प्रवृद्धलोभं विषयेषु लालसम् ।
त्वमप्रमत्तः सहसाऽभिपद्यसे क्षुल्लेलिहानोऽहिरिवाखुमन्तकृत् ।। ५१ ।।

सत्यधर्मीया — इतिकृत्यचिन्तया । एवमनुष्ठाने स्वकीयहितं विहितं स्यादित्यादि-चिन्तया । उच्चैः प्रवृद्धलोभं विषयेषु लालसं तृष्णावन्तं विषयेषु प्राप्तेषु सत्सु प्रमत्त उच्चैः स्वस्वरूपातिरेकेण लब्धैर्विषयैः प्रमत्त इति वा । सहसा मदतर्कणेन । हे सहस अप्रमत्तः त्वं प्रतिपद्यसे । अप्रमत्तस्य तवाभिपत्तिर्मां प्रमत्तं प्रति भवति भगवन्नेवमिति निदर्शनं दर्शयति। क्षुधा लेलिहानो द्वे सृक्किण्यौ । अन्तको नाशकोऽहिराखुमिव मूषकमिवेति । स यथाऽऽखुं ग्रसति तथा त्वमप्रमत्तः प्रमत्तं मामभिपद्यसे । अत्र विशेषणीभूतमदादिनाशो ज्ञेयः ।। ५१ ।।

सुमनोरञ्जिनी — विषयभोगानन्तरं वैराग्यं सम्पादनीयमित्यत आह ।। **प्रमत्तमिति ।** इति एवं प्रकारेण कृत्यचिन्तया 'इदं मया सम्पादितं, इदं तु सम्पादनीयमिति चिन्तया ।

प्रवृद्धलोभम् । अत एव उच्चैः प्रमत्तम् । एतादृशं माम्, अन्तकः मृत्युरूपी त्वम् । अप्रमत्तः सन् सहसा अभिपद्यसे । क्षुधा लेलिहानः अहिः आखुमिवेति ॥ ५१ ॥

पुरा रथैर्हेमपरिष्कृतैश्चरन् मतङ्गजैर्वा नरदेवशंसितः ।
स एव कालेन दुरत्ययेन कलेवरो विट्कृमिभस्मसञ्ज्ञितः ॥ ५२ ॥

सत्यधर्मीया — हेमपरिष्कृतै रथैर्मतङ्गजैर्गजैश्चरन् मत्तवशाश्चरन्निति वा । नरदेवेति शंसितो यो देहः स एव कालेन दुरत्ययेनात्येतुमशक्येन कलेवरः कलेवरम् । अथ कलेवरं गात्रमित्यमरात् कलेवरम् । हलदन्तादिति सप्तम्या अलुक् । सारमेयादिभुक्तश्चेद्विट् संज्ञितः । अदग्धोऽभक्षितश्च कृमिसंज्ञितो भवति दग्धश्च भस्मसंज्ञितो भवति । कालमूलत इयतीं दशां यातीति ॥ ५२ ॥

सुमनोरञ्जिनी — पुरा यः कलेवरः नरदेवसञ्ज्ञितः सन् । हेम्ना परिष्कृतैः अलङ्कृतैः रथैः मतङ्गजैश्चरत् अचरत् । स एव दुरत्ययेन कालेन । विडिति क्रिमिरिति । भस्मेति च सञ्ज्ञितो भवति । अतो देहस्यातितुच्छत्वात् तत्र तदनुबन्धिष्वपि विरक्तेन भाव्यमिति भावः ॥ ५२ ॥

निर्जित्य दिक्चक्रमभूतविग्रहो परासनस्थः समराजवन्दितः ।
गृहेषु मैथुन्यपरेषु योषितां क्रीडामृगः पूरुष ईश गीयते ॥ ५३ ॥

सत्यधर्मीया — सहस्राश्वनायको गृहगृहिणीकार्पाससिचयप्रचयकृदितिवदेतादृशः प्रागेतादृशो पुरत इतीरयति ॥ **निर्जित्येति** । अभूतविग्रहोऽजाताजिर्दिक्चक्रं निर्जित्य परासनस्थः समराजैर्वन्दितश्चेदपि कदाचिदेवमपि भवतीत्याह । समरेऽजवं यथा भवति तथाऽन्दितः परैः खण्डित इति वा । पूरुषो मैथुन्यपरेषु मैथुन्यं ग्राम्यधर्मस्तदेव परं येषां ते तेषु गृहेषु योषितां क्रीडामृगो लीलामृगः कपिरिति यावत् । गीयते तस्यैतस्य च न तिलतुल्यव्यत्यास इति भावः । यो मैथुनी तन्निरत इति तद्वान् । अपरेषु पुरुषो गीयते । योषितां गृहेषु क्रीडामृगो गीयत इति वा ॥ ५३ ॥

सुमनोरञ्जिनी — किञ्च वनितादिविषयभोगस्त्यक्तुमशक्यः । स्वापेक्षया वनितादेरेव बलिष्ठत्वादित्याह ॥ **निर्जित्येति** । दिक्चक्रं दिङ्मण्डलम् । अभूतविग्रहः अजातविरोधः

सन्नेव । निर्जित्य । वरासने सिंहासने । तिष्ठन् । समाः स्वसमाः ये राजानः तैः वन्दितः । एतादृशोऽपि पूरुषः राजादिः मैथुन्यपरेषु ग्राम्यसुखार्थं रचितेषु गृहेषु सौधादिषु । प्रवेशमात्रेण योषितां क्रीडामृगः लीलामृग इव गीयते ॥ ५३ ॥

करोति कर्माणि तपः सुनिष्ठितो निवृत्तभोगस्तदपेक्षया ददत् ।
पुनश्च भूयाय महीश राधसे प्रवृद्धतर्षो न सुखाय कल्पते ॥ ५४ ॥

सत्यधर्मीया — त्वदितरसुराभक्तकृतं कर्म निष्फलमिति लपति ॥ **करोतीति** । हे महीश धरावर । कश्चिदधिकारी निवृत्तभोगो निवृत्ताः सहसा गता अप्राप्ता इति यावत् । भोगा यस्य सः । यदा तदा तदपेक्षया तद्भोगकामनया तपः प्रागालोचनं करोत्यनन्तरं कर्माणि तत्फलोपलम्भककाम्यकर्माणि करोति । **नानादरेणेतीरयति** ॥ सुनिष्ठितस्तत्रैव स्थिरान्तर इति । धनादिकं तत्साहितीकृद्भ्यो ददत् सन् । पुनश्च भूयःशब्दपर्यायो भूयःशब्दः । भूयसे राधसे सिद्ध्यै तदर्थं प्रवृद्धतर्ष एधमानधनाद्यभिलाषस्तच्चिन्तया तान्तः सुखाय न कल्पते । महीशानां राधसे तत्सम्पदर्थमिति वा । पुनश्च भूयेयमहं स्वराडिति पठन्ति स च स्फुटार्थः । हे कल्प समर्थ श्रीहरे । ते सुखाय त्वद्देयमौक्तसुखाय स न कर्माणि करोतीत्याद्यन्वयो वा । न कल्पत इत्यावृत्त्याऽन्वयो वा । अनिवृत्तभोगोऽनिवृत्ततदिच्छस्तदपेक्षया पुनर्द्विगुणधनापेक्षया धनं ददिति वा ॥ ५४ ॥

सुमनोरञ्जिनी — ननु वनितादिविषये विरक्ताः सन्तो धनादिकमन्येभ्यः प्रयच्छमानाः दृश्यन्ते । तेषां मुक्तिः स्यादित्यतो न विषयपरित्यागमात्रं वैराग्यम् । किन्तु तृष्णापरित्याग एव । स चाशक्य इत्याह ॥ **करोतीति** । हे महीश ! यद्यपि निवृत्तभोगः । वने वसन् वा । अश्रामान्तरं स्वीकुर्वन् वा । वनितादिभोगरहितः । सुनिष्ठितः नितरां स्थिरमनाः । धनादिकं ददत् । तदपेक्षया भोगान्तरप्राप्त्यपेक्षया । कर्माणि तपश्च करोति । तेन च फलप्राप्तौ सत्यां पुनश्च भूयाय महते । राधसे सम्पदे । प्रवृद्धतर्षः अभिवृद्धतृष्णो भवति । ततश्च सुखाय परमसुखाय । मुक्तय इति यावत् । न कल्पत इत्यन्वयः ॥ ५४ ॥

भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युत सत्समागमः ।
सत्सङ्गमो यर्हि तदैव त(स)द्गतौ परावरेशे त्वयि जायते मतिः ॥ ५५ ॥

सत्यधर्मीया — तर्हि कथङ्कारमेतत्संसारकारागारापहारो राजन्नित्यतो वक्ति ॥ **भवापवर्ग इति ।** यो भ्रमतो यर्हि हे अच्युत सत्समागम उपदेशकदैशिकसहवासो भवेदच्युते भगवति सन्तस्त्वद्रता वा तेषां समागम इति वा । व्याप्तिं दर्शयितुमनूद्य वक्ति ॥ **सत्सङ्गमो यर्हीति** । त(स)दैव त(स)द्गतौ तद्गतिरूपे परावरेशे मुक्तामुक्तप्रेरके स्वामिनि वा त्वयि मतिर्जायते सा यर्हि जायते तदा भवापवर्गः । अत्रापवर्गशब्दस्त्यागमात्रार्थकः । भवत्यागो मोक्षः स्यात् । ग्रहकल्लोलेऽपवर्गस्त्यागमोक्षयोरिति विश्वः । अन्यथा भवपदमभवं भजत इति ज्ञेयम् । नान्यः पन्था इत्यादेः ॥ ५५ ॥

सुमनोरञ्जिनी — तर्हि केन साधनेन कदा मोक्षो भवतीत्यत आह ॥ **भवापवर्ग इति ।** भ्रमतः संसारे भ्रमतो जनस्य यदा भवापवर्गः भवात् संसारादपवर्गो मोक्षकालः भवेत् सन्निहिता भवेत्तर्हि तदैव । सत्समागमो भवति यर्हि यदा सत्सङ्गमः तदैव परावरेशे मुक्तामुक्तस्वामिनि त्वयि रतिः भक्तिः स्यात् । मतिरिति पाठे ज्ञानं स्यात् । तेन च भवापवर्गो मोक्षः स्यादिति ॥ ५५ ॥

मन्ये ममानुग्रह ईश ते कृतो राज्यानुबन्धापगमो यदृच्छया ।
यः प्रार्थ्यते साधुभिरेकचर्यया वनं विविक्षुद्भिरखण्डभूमिपैः ॥ ५६ ॥

सत्यधर्मीया — एतावत्स्तुत्वा प्रस्तुतं स्वाशयं विशदयन्वृणीष्वेत्युत्तरयति कैश्चित् श्लोकैः ॥ मन्य इति । अखण्डभूमिपैरखण्डभूमण्डलेशैरेकचर्यया । एक एव चरेद्भिक्षुरित्यादेः । सन्न्यासधर्मेणैकनिष्ठया वा विविक्षुद्भिर्भवनं प्रवेष्टुमिच्छुद्भिः । इच्छा क्वचिदकरणमिति विविक्षुद्भिरित्युक्तिरिति ध्येयम् । विविक्षुशब्दपर्यायोऽयं विविक्षुच्छब्दः । अखण्डप्रकृतिः । विविक्षुद्भिरिति पाठे विविक्षेति धातुस्ततः कर्तरि शप् इति ज्ञेयम् । विशिष्टा क्षुद्विगता येभ्यस्तैरित्यर्थान्तरं द्योतयितुं चैवं पाठः । साधुभिर्यः प्रार्थ्यते स यदृच्छया राज्यानुबन्धापगमो राज्यस्यानुबन्धस्य तदनुबन्धस्य कोशादेश्चापगमो राज्यात् पङ्क्तिशः क्रमादनुबन्धस्य कलत्रपुत्रमित्राद्यनुबन्धस्यापगमोऽपहारः । ईश ते त्वया मम ममोपर्यनुग्रहः कृत इति मन्य इत्यन्वयः । हे अम अपरिच्छिन्न । एवमनुगृहीतारो नान्य इति मन्य इत्यप्याह । अनुग्रहे एतादृशे कृतः कर्तृत्वेन सम्प्रतिपन्ना अपि मा ईशते न समर्था भवन्तीति ॥ ५६ ॥

सुमनोरञ्जिनी — एवं परम्परया मोक्षसाधनवैराग्यसम्पादकराज्याद्यपगमस्यानायासेन प्राप्तत्वात्पुनर्वरं वृणीष्वेति न मत्प्रलोभनं कार्यमित्याह ॥ **मन्य इति** । हे ईश ! यदृच्छया । राज्यानुबन्धस्य राज्याधिपत्यस्य अपगमः सः ते त्वया कृतो मयि अनुग्रह इति मन्ये । कुतः । एकचर्यया एकाकितया । त्वत्पूजां कर्तुं वनं विवक्षुद्भिः प्रवेष्टुमिच्छद्भिः साधुभिः । अखण्डभूमिपैः अखण्डभूमण्डलाधिपैरपि यः राज्यानुबन्धापगमः प्रार्थ्यते यतोऽत इति ॥ ५६ ॥

न कामयेऽन्यं तव पादसेवनादकिञ्चनप्रार्थ्यतमाद् वरं विभो ।
आराध्य कस्त्वां ह्यपवर्गदं हरे वृणीत आर्यो वरमात्मबन्धनम् ॥ ५७ ॥

सत्यधर्मीया — हरे विभो । तव पादसेवनादन्यं वरं न कामये नेच्छामि । तदर्थनं न मयैकलेन क्रियते किन्तु सन्ति ते सन्त इत्याह । अकिञ्चनप्रार्थ्यतमान्न विद्यते किञ्चन त्वव्यतिरिक्तं येषां तैः प्रार्थ्यतमादत्यर्थनीयादिति । क आर्यो बुद्ध्याऽपवर्गदं त्वामारध्यात्मबन्धनं वरं दुर्विषयं वृणीते हीत्येकान्तानां न कस्यचिदित्यादिमानप्रसिद्धिद्योतकम् ॥ ५७ ॥

सुमनोरञ्जिनी — तर्हि वरं वृणीष्वेति व्यर्थं स्यादित्यतो नेत्याह ॥ **नेति** । हे विभो ! अकिञ्चनैः एकान्तभक्तैः प्रार्थ्यतमात् अत्यन्तं प्रार्थनीयात् मोक्षमपि हित्वा प्रार्थनीयादिति यावत् । तव पादसेवनात् । अन्यं वरं न कामये । कुतः । अपवर्गदं त्वाम् आराध्य कः आर्यो ज्ञानी । आत्मनः बन्धनं बन्धकं वरं राज्यादिलक्षणम् । वृणीत प्रार्थयेत् । न कोऽपि ॥ ५७ ॥

तस्माद् विसृज्याशिष ईश सर्वशो रजस्तमःसत्वगुणानुबन्धनाः ।
निरञ्जनं निर्गुणमद्वयं परं त्वां ज्ञप्तिमात्रं पुरुषं व्रजाम्यहम् ॥ ५८ ॥

सत्यधर्मीया — तस्माद्रजस्तमःसत्त्वगुणानुबन्धनाः । मानुष्यो राजस्यस्तामस्यो राक्षसाद्याः सात्विक्यो दैव्यो यास्तास्तद्गुणानुबन्धनास्तदनुबन्धवतीराशिषः सर्वशः सर्वा विसृज्य निरञ्जनं निर्दुष्टं निर्गुणं सत्त्वादिगुणरहितं भिन्नगुणरहितं वा । अव्ययं परं ज्ञप्तिमात्रं ज्ञानघनं पुरुषं व्रजामि शरणम् ॥ ५८ ॥

सुमनोरञ्जिनी — तर्हि किं वृणीष इत्यत आह ॥ **तस्मादिति** । हे ईश ! तस्मात् । आशिषामात्मबन्धकत्वात् । रजस्तमःसत्वगुणानुबन्धना रजआदिगुणनिमित्ताः राजसतामससात्विकरूपाः सर्वशोऽप्याशिषः सम्पदः विसृज्य । निरञ्जनं निर्दोषम् । निर्गुणं गुणबन्धरहितम् । ज्ञप्तिमात्रं ज्ञानैकस्वरूपम् । त्वां व्रजामि । शरणमिति शेषः । त्वच्छरणागतिरेव प्रार्थ्यते नान्यदिति भावः ॥ ५८ ॥

चिरमिह वृजिनार्तस्तप्यमानोऽनुतापैः
अवितृष उरुकृच्छ्रेऽलब्धशान्तिः कथञ्चित् ।
शरणद समुपेतस्त्वत्पदाब्जं परात्मन्
अभयमृतमशोकं पाहि मापन्नमीश ॥ ५९ ॥

सत्यधर्मीया — चिरमिह नानायोनौ वृजिनमार्तः सम्यक् प्राप्त इत्यनुतापैः सांसारिकतापसाधनैस्तप्यमानोऽहं कथञ्चित्केनचित्सुकृतेनावितृषो न विद्यते विविधा तृषा यस्य स उरुकृच्छ्रे भविष्यद्बहुकष्टे संसारे लब्धा शान्तिरितःपरं न मम संसारः स्यादित्युपरतिर्येन सः । हे ईश शरणद परमात्मन् । अभयमृतं शाश्वतमशोकं स्वयं शोकराहित्येनेतरशोकपरिहारकत्वेन चाशोकं त्वत्पादाब्जं समुपेतः संसारे पन्नं पतितं मां पाहि ॥ ५९ ॥

सुमनोरञ्जिनी — अधुना स्वाभीष्टं प्रार्थयन्नुपसंहरति ॥ **चिरमिति** । हे शरणद ! उरुकृच्छे संसारे । वृजिनार्तः दुःखार्तः । वृजिनं दुःखमकं तोद इतीर्यत इत्यभिधानात् । अनुतापैः परितस्तापकरैः तप्यमानः सन्तप्यमानः । तथाप्यवितृषः अनपगततृष्णः । एतादृशः । कथञ्चित्त्वच्चरणसन्दर्शनेन लब्धशान्तिः प्राप्तसुखः । ऋतं ज्ञानरूपम् । शश्वदेकप्रकारं वा । अभयप्रदम् । अशोकं शोकहरम् । त्वत्पादाब्जम् । समुपेतोऽस्मि । अतः आपन्नं मा मां पाहि । उरुकृच्छ्रे संसारे पन्नं पतितमिति वा ॥ ५९ ॥

श्री भगवानुवाच –

सार्वभौम महाराज मतिस्ते विमलोर्जिता ।
वरैः प्रलोभितस्यापि न कामैर्विहता यतः ॥ ६० ॥

सत्यधर्मीया — वरैः कामैरुत्तमैः काम्यैः प्रलोभितस्यापि यतो न विहता ततो हे सार्वभौम गतम् । सर्वेश महाराज । विमलोर्जितोद्रिक्ता च ते मतिः ॥ ६० ॥

सुमनोरञ्जिनी — कामैः वरैः प्रलोभितस्यापि ते । मतिः प्रलोभनेन न विहता न भिन्ना ॥ ६० ॥

प्रलोभितो वरैर्यत् त्वमप्रमादाय विद्धि तत् ।
न धीर्मय्येकभक्तानामाशीर्भिर्भिद्यते क्वचित् ॥ ६१ ॥

सत्यधर्मीया — यद्यतो मय्येकभक्तानां मुख्यदासानामाशीर्भिर्धीः क्वचिदपि न भिद्यते तस्माद्वरैः प्रलोभितोऽपि तद्वरोपदेशनमप्रमादायैवेति विद्धि जानीहीति केचित् । वस्तुतस्तु वित् हीति छेदः । पूर्वोत्तरग्रन्थस्वारस्यात् ॥ ६१ ॥

सुमनोरञ्जिनी — त्वं वरैः प्रलोभित इति यत् तत् तेऽप्रमादायैव विद्धि । बुद्धिभेदनार्थमेव प्रलोभनं किं न स्यादित्यत आह ॥ **न धीरिति** । अहं मद्भक्तानां बुद्धिभेदको नेति भावः ॥ ६१ ॥

ज्ञानिनामेकभक्तानां प्राणायामादिभिर्मनः ।
न क्षीणवासनं राजन् दृश्यते क्वचिदुत्थितम् ॥ ६२ ॥

सत्यधर्मीया — एकभक्तानां ज्ञानिनामेके मुख्याश्च ते भक्ताश्च तेषां ज्ञानवतां प्राणायामादिभिर्मनःक्षीणवासनं क्षीणा वासना यस्य तत् सत् । हे राजन् क्वचिद्विषये उत्थितं तदभिमुखमिति यावत् ॥ ६२ ॥

सुमनोरञ्जिनी — न केवलमहं तथा न करोमि ज्ञानिमनोऽपि तथैवेति भावेनाह ॥ ज्ञानिनामिति । प्राणायामादिभिः क्षीणा वासना यस्मिन् तत् । तथाविधं ज्ञानिनां मनः, क्वचित् । उत्थितं विषयोन्मुखम् । न भवति ॥ ६२,६३ ॥

विचरस्व यथाकामं मय्यावेशितमानसः ।
अस्त्वेव नित्यदा तुभ्यं भक्तिर्मय्यनपायिनी ॥ ६३ ॥

सत्यधर्मीया — हे स्व महीं काममिच्छानुसारं मय्यावेशितमानसो विचर नित्यदाऽनपायिनी भक्तिस्तुभ्यं तव मय्येवास्तु । मय्यावेशितमानसो मय गतौ मय्यो गम्य इति आवेशितं मानसं यस्य स इति वा । मयीति पुनर्वचनं दाढ्यार्थं वा ॥ ६३ ॥

क्षत्रजन्मस्थितो जन्तूनवधीर्मृगयादिभिः ।
समाहितस्तत् तपसा जह्यघं मामुपाश्रितः ॥ ६४ ॥

सत्यधर्मीया — क्षत्रधर्मस्थितो नित्यं जन्तून्प्राणिनो मृगयादिभिर्भवानवधीत् । तत्तद्वधजमघं तपसा समाहितो मामुपाश्रितो जहि गमय ॥ ६४ ॥

सुमनोरञ्जिनी — अघं प्रारब्धं जहि भोगेन क्षपय ॥ ६४,६५ ॥

॥ इति श्रीमद्भागवतदशमस्कन्धोत्तरार्धव्याख्यायां
सुमनोरञ्जिन्यां चतुःपञ्चाशोऽध्यायः ॥

जन्मन्यनन्तरे राजन् सर्वभूतसुहृत्तमः ।
भूत्वा द्विजवरस्त्वं वै मामुपेष्यसि केवलम् ॥ ६५ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे चतुःपञ्चाशोऽध्यायः ॥

सत्यधर्मीया — मधुनाथाधुनाऽपि भ्रामणमेव किमित्यतो वक्ति । अनन्तरे जन्मनि सर्वभूतसमो द्विजवरो विप्रो भूत्वा केवलमनन्यसदृशत्वाच्च केवलोऽसौ हरिः स्मृत इति चतुर्थतात्पर्योक्तेरसदृशं मामुपेष्यसीति । द्विजवरस्त्वं सर्वभूतसमो भूत्वेति वा ॥ ६५ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे
चतुःपञ्चाशोऽध्यायः ॥ १०-५४ ॥

॥ अथ पञ्चपञ्चाशोऽध्यायः ॥

इत्थं सोऽनुगृहीतोऽङ्ग कृष्णेनेक्ष्वाकुनन्दनः ।
तं परिक्रम्य सन्नम्य निश्चक्राम गुहामुखात् ॥ १ ॥

सत्यधर्मीया — इक्ष्वाकून्नन्दयतीति स तथा येन कृष्णेनेत्थमनुगृहीतो अङ्ग परीक्षित् । तं कृष्णं परिक्रम्य तथा सन्नम्य प्रणम्य गुहामुखात्तद्द्वारान्निश्चक्राम ॥ १ ॥

सुमनोरञ्जिनी — अङ्गेति परीक्षितं प्रति सम्बोधनम् । इक्ष्वाकुं तद्वंशं नन्दयतीति तथोक्तः । सः मुचकुन्दः । कृष्णेनानुगृहीतः । कृष्णं परिक्रम्य प्रदक्षिणीकृत्य ॥ १ ॥

स वीक्ष्य क्षुल्लकान् मर्त्यान् पशून् वीरुद्वनस्पतीन् ।
मत्वा कलियुगं प्राप्तं जगाम दिशमुत्तराम् ॥ २ ॥

सत्यधर्मीया — क्षुल्लकान्परिमाणादितो ह्रस्वान्मर्त्यांस्तथा पशून् वीरुद्वनस्पतीन् इत्येवमादीन् क्षुल्लकांश्च वीक्ष्य कलियुगं प्राप्तं मत्वोत्तरां दिशं जगाम । कदा सुप्तः कदोत्थित इति तु –

त्रेतायुगे प्रसुप्तोऽसि विदितो मेऽसि नारदात् ।
इदं कलियुगं विद्धि किमन्यत्करवाणि ते ।
मम शत्रुस्त्वया दग्धो देवदत्तवरो नृप ।
अवध्यो यो मया सङ्ख्ये भवेद्वर्षशतैरपि ।
इत्युक्तः स तु कृष्णेन निर्जगाम गुहामुखात् ।
अन्वीयमानः कृष्णेन कृतकार्येण धीमता ।
ततो ददर्श पृथिवीमावृतां ह्रस्वकैर्नरैः ।
अल्पोत्साहैरल्पबलैरल्पवीर्यपराक्रमैः ।
परेणाधिष्ठितं राज्यं दृष्ट्वा केवलमात्मना ।
ततो विसृज्य गोविन्दं प्रविवेश महावनम् ॥

इत्यादि हरिवंशशंसनेन ज्ञातव्यम् ॥ २ ॥

सुमनोरञ्जिनी — सः मुचकुन्दः । क्षुल्लकान् अल्पपरिमाणान् । वीरुधः गुल्मान्, वनस्पतीन् स्थूलवृक्षान् ॥ २ ॥

तपःश्रद्धायुतो वीरो निःसङ्गो मुक्तसंशयः ।
समाधाय मनः कृष्णे प्राविशद् गन्धमादनम् ॥ ३ ॥

सत्यधर्मीया — तपश्च श्रद्धा च ताभ्यां । तपसि श्रद्धा तया वा युक्तो वीर ईरयतीतीरो विरीरो यस्य स भगवत्प्रेरित इति यावत् । निःसङ्गो मुक्तसंशयो भगवदुपदिष्टे मार्गे यथार्थत्वायथार्थत्वमतिरहितो यथार्थज्ञानवानेवेत्यर्थः । कृष्णे मनस्समाधाय गन्धमादनं प्राविशत् ॥ ३ ॥

सुमनोरञ्जिनी — तपःश्रद्धाभ्यां युतः । तपसि श्रद्धायुतो वा । मुक्तसंशयः तत्त्वविषये संदेहरहितः ॥ ३ ॥

बदर्याश्रममासाद्य नरनारायणालयम् ।
सर्वद्वन्द्वसहः शान्तस्तपसाऽऽराधयद्धरिम् ॥ ४ ॥

सत्यधर्मीया — बदर्याश्रममासाद्य प्राप्य तत्रापि नरनारायणाश्रमं चासाद्य नर-नारायणाश्रमं तद्रूपं बदर्याश्रममासाद्येति वा । नरनारायणाभ्यामेवाश्रमः संसारश्रमाभावो यत्र तं बदर्याश्रममिति वा । सर्वद्वन्द्वसहः शान्तस्त्यक्तकोपस्तपसा हरिमाराधयत् ॥ ४ ॥

सुमनोरञ्जिनी — नरनारायणयोः आश्रमं आवासस्थानं बदर्याख्यमाश्रमम् । शीतोष्णादिसर्वद्वन्द्वसहः । शान्तः भगवन्निष्ठबुद्धिः, वैष्णवसिद्धान्तादचलितो वा । वैष्णवसिद्धान्तादचलनं शम इति तत्त्वप्रदीपोक्तेः ॥ ४ ॥

भगवान् पुनराव्रज्य मधुरां यवनाहृतम् ।
हत्वा म्लेच्छबलं निन्ये तदीयं द्वारकां धनम् ॥ ५ ॥

सत्यधर्मीया — यवनाहृतं तेनानीतं म्लेच्छबलं सर्वं हत्वा तदीयं धनं द्वारकां निन्ये ॥ ५ ॥

सुमनोरञ्जिनी — भगवान् श्रीकृष्णः । यवनाहृतं कालयवनेनानीतम् । तदीयमेव धनम् । द्वारकां प्रति निन्ये प्रेषितवान् ॥ ५ ॥

नीयमाने धने गोभिर्नृभिश्चाच्युतचोदितैः ।
आजगाम जरासन्धस्त्रयोविंशत्यनीकपः ॥ ६ ॥

सत्यधर्मीया — बलस्य जाते निधने च नृभिरच्युतचोदितैर्गोभिर्वृषभैर्नीयमाने सति त्रयोविंशत्यनीकं त्रयोविंशत्यक्षौहिणीसेनां पातीति स तथा । जरासन्ध आजगाम ॥ ६ ॥

सुमनोरञ्जिनी — गोभिः अनडुद्भिः । त्रयोविंशत्यनीकपः त्रयोविंशत्यक्षौहिणी-सङ्ख्याकसेनापतिः ॥ ६ ॥

ततो राजा जरासन्धः कल्पान्तानलसन्निभः ।
निधाय मकरव्यूहं रथनागाश्वपत्तिमत् ।
अन्तश्चकार गोविन्दं व्यूहस्य निमिषान्तरे ॥ ७ ॥

सत्यधर्मीया — कालान्ताग्निः प्रलयानलो रथनागाश्वपत्तिमत् बलमित्यनुषज्यते । मकरव्यूहवद्व्यूहो यस्य तद्विधाय गोविन्दं व्यूहस्यान्तर्निमिषान्तरे चकार ॥ ७ ॥

सुमनोरञ्जिनी — मकरव्यूहं मकराकारसेनारचनम् । गोविन्दं, व्यूहस्यान्तः मध्ये ॥७॥

ततो विलोक्य गोविन्दो वृक्षमुत्पाट्य रंहसा ।
गजान् रथान् हयान् युद्धे पोथयामास दुर्मदः ॥ ८ ॥

सत्यधर्मीया — रंहसा वेगेन दुर्मदो युद्धे ॥ ८ ॥

सुमनोरञ्जिनी — पोथयामास पेषयामास ॥ ८ ॥

कृष्णेन हन्यमानास्ते वृक्षेण रिपुकुञ्जराः ।
पेतुर्गतासवो भूमौ वज्रनुन्ना इवाद्रयः ॥ ९ ॥

सत्यधर्मीया — वज्रनुन्ना अद्रयः पर्वता इव ॥ ९ ॥

सुमनोरञ्जिनी — रिपूणां कुञ्जराः गजाः, वज्रेण नुन्नाः ताडिताः ॥ ९ ॥

रथाश्च रथिभिर्युक्ताः सतुरङ्गाः सचोदकाः ।
निष्पिष्टा इव न क्वापि दृश्यन्ते कुरुसत्तम ॥ १० ॥

सत्यधर्मीया — तुरङ्गसहिताः सचोदकाः सूत सहिताः ॥ १० ॥

सुमनोरञ्जिनी — सतुरङ्गाः । चोदकैः सारथिभिः सहिताः । रथिभिश्च युक्ताः रथा निष्पिष्टा इव पेषितधान्यकणा इव । न क्वापि दृश्यन्ते स्म । चूर्णिता इति यावत् ॥ १० ॥

रामस्तु मुष्टिनैवाजौ कुञ्जरान् मदशालिनः ।
जघान कुपितः शैलान् वज्रेणेव सुरेश्वरः ॥ ११ ॥

सत्यधर्मीया — मदेन शालन्त इति मदशालिनः ॥ ११ ॥

राममुष्टिप्रहारेण विशीर्णाः स्यन्दना नृप ।
न व्यदृश्यन्त भूपृष्ठे चूर्णिताः शीर्णपर्णवत् ॥ १२ ॥

सत्यधर्मीया — शीर्णपर्णवद्विचूर्णिता भूपृष्ठे विकीर्णाः सन्तो न व्यदृश्यन्त ॥१२॥

सुमनोरञ्जिनी — शीर्णपर्णवत् अतिशिथिलपर्णवत् । दग्धपर्णवदिति यावत् ॥१२॥

यवनस्य धनं विश्वं गच्छन्तं द्वारकामनु ।
निहत्य यादवान् विश्वांस्तद् गृहीत्वा जरासुतः ॥ १३ ॥

सत्यधर्मीया — द्वारकामनुगच्छन्तं गच्छत् ॥ १३ ॥

सुमनोरञ्जिनी — द्वारकामनु द्वारकाभिमुख्येन । निहत्य निर्जित्य ॥ १३ ॥

अभ्यवर्तत सङ्ग्रामे रामकृष्णौ कुरूद्वह ।
विलोक्य वेगरभसं रिपुसैन्यस्य माधवौ ॥ १४ ॥

सत्यधर्मीया — अभि साम्मुख्येनावर्तत रिपुसैन्यस्य वेगरभसं वेगाटोपम् ॥ १४ ॥

सुमनोरञ्जिनी — रामकृष्णौ प्रति । इदं चोभयोपकारकम् । रामकृष्णौ, वेगेन सहितं संरंभं धनलाभजनितं संभ्रमम् ॥ १४ ॥

तं चापतन्तमालोक्य सहितं सबलैर्नृपैः ।
कीर्यमाणौ शरौघेण वृष्ट्येव करिपोतकौ ॥ १५ ॥

सत्यधर्मीया — सबलैः ससेनैः करिपोतकौ गजशिशू ॥ १५ ॥

सुमनोरञ्जिनी — तं जरासन्धम् ॥ १५ ॥

विरथौ विप्रहरणौ विवर्माणौ विसैनिकौ ।
मनुष्यचेष्टामापन्नौ राजन् दुद्रुवतुर्द्रुतम् ॥ १६ ॥

सत्यधर्मीया — राजन् दुदुवतुः । एतत्तात्पर्यं स्वयं मलूकृदाह मनुष्याणां चेष्टामापन्नौ प्राप्ताविति । नावापत् प्राप्तेति द्रुतं दुद्रुवतुरित्यावृत्त्याऽन्वयः ॥ १६ ॥

सुमनोरञ्जिनी — मनुष्यचेष्टामापन्नौ मनुष्यचेष्टानुसारेण चेष्टमानौ । यतोऽतः दुद्रुवतुः ॥ १६ ॥

विहाय वित्तं प्रचुरमभीतौ भीरुभीतवत् ।
पद्भ्यां पद्मपलाशाभ्यां चेरतुर्बहुयोजनम् ॥ १७ ॥

सत्यधर्मीया — प्रचुरं वित्तं विहाय यादवान्हत्वा नीतं तद्विहाय तदाशां त्यक्त्वेति यावत् । स्वभावतोऽभीतौ भीरुभीताविव भयवद्भ्योऽपि भयवन्ताविवातिशयेन भीता वित्यर्थः ॥ १७ ॥

सुमनोरञ्जिनी — पद्मपलाशाभ्यां पद्मस्य पलाशाविव पद्मपलाशौ । ताभ्याम् । अतिकोमलाभ्यामिति यावत् । बहुयोजनं मार्गम् ॥ १७ ॥

पलायमानौ तौ दृष्ट्वा मागधः प्रहसन् बली ।
अन्वधावद् रथानीकैरीशयोरप्रमाणवित् ॥ १८ ॥

सत्यधर्मीया — प्रहसन्नुपहसन्सन् रथानीकैः सहान्वधावत् । तन्मौर्ख्यं मुखयति । ईशयोः प्रमाणं बलादीयत्तां वेत्तीति सः । स न भवतीति तथा ॥ १८ ॥

सुमनोरञ्जिनी — अप्रमाणवित् प्रमाणं ज्ञानबलादेरियत्तां न वेत्तीति तथोक्तः ॥ १८ ॥

प्रद्रुत्य दूरं विश्रान्तौ करवीरपुरे निशि ।
तावरुरुहतुर्वीरौ गोमन्तमुदिते रवौ ॥ १९ ॥

सत्यधर्मीया — वीरौ दूरमित्यपि पाठौ । निशि करवीरपुरे विश्रान्तौ विश्रामं प्राप्तौ रवावुदिते सति ॥ १९ ॥

सुमनोरञ्जिनी — प्रहृत्य करवीरपुरं बलादपहृत्य । गोमन्तं तन्नामकं पर्वतम् ॥१९॥

सिद्धचारणगन्धर्वविद्याधरनिषेवितम् ।
आरुह्य शैलं गोमन्तं कृष्णरामौ त्वरान्वितौ ॥ २० ॥

सत्यधर्मीया — त्वरान्वितौ गोमन्तं शैलमारुह्य ॥ २० ॥

प्रवर्षणाख्यं तच्छृङ्गं यत्राब्दा नित्यवर्षिणः ।
तत्र तावासतू राजन् फलमूलाशनौ सुखम् ॥ २१ ॥

सत्यधर्मीया — तस्य शृङ्गं तत्र सुखमासतुः ॥ २१ ॥

सुमनोरञ्जिनी — प्रवर्षणाख्यं तस्य गोमन्तस्य शृङ्गं तत्र । आसतुरित्यन्वयः । फलानि मूलान्येवाशनं ययोस्तौ तौ रामकृष्णौ ॥ २१ ॥

जरासन्धस्तु तुष्टात्मा तावनुद्रुत्य माधवौ ।
रुरोध शैलं गोमन्तं महत्या सेनया वृतः ॥ २२ ॥

सत्यधर्मीया — तौ माधवावनुद्रुत्य स्वयं महत्या सेनया वृतः स रुरोध ॥ २२ ॥

सुमनोरञ्जिनी — अनुद्रुत्य पृष्ठत आगत्य रुरोध ॥ २२ ॥

स भूपालान् समाहूय स्वानुगान् युद्धदुर्मदान् ।
कलिङ्गं कुञ्जरपतिं सुराष्ट्राधिपतिं तथा ॥ २३ ॥

सत्यधर्मीया — स्वमनुगच्छन्तीति स्वानुगास्तान् । कुञ्जरपतिं नरकम् ॥ २३ ॥

सुमनोरञ्जिनी — तत्प्रकारमाह ॥ **स इति** । कुञ्जराणां पतिं कलिङ्गम् ॥ २३ ॥

जयद्रथं सिन्धुपतिं सोमदत्तं च कौरवम् ।
गान्धारराजं शकुनिं वैदर्भं रुग्मिमेव च ॥ २४ ॥

सत्यधर्मीया — सिन्धुपतिं जयद्रथमित्येकाधिकरण्यम् । तथैव कौरवं सोमदत्तमिति। एवमुत्तरत्रापि योग्यस्थले ॥ २४ ॥

सुमनोरञ्जिनी — सिन्धुदेशाधिपतिं जयद्रथं, कौरवं कुरुकुलोद्भवं सोमदत्तम् । गान्धारदेशपतिं शकुनिं, वैदर्भं विदर्भदेशाधिपम् ॥ २४ ॥

सुदक्षिणं च काम्बोजं विराटं मत्स्यभूपतिम् ।
एतानाज्ञापयामास पूर्वस्यां दिशि भूपतीन् ॥ २५ ॥

सत्यधर्मीया — एतान्भूपतीन्पूर्वस्यां दिशि आज्ञापयामास ॥ २५ ॥

सुमनोरञ्जिनी — कांभोजदेशपतिं नामतः सुदक्षिणम् । एतान् भूपतीन् । पूर्वस्यां दिशि । गोमन्तमारोढुमित्याकृष्यते । आज्ञापयामास ॥ २५ ॥

पाञ्चालराजं द्रुपदं दमघोषं च चेदिपम् ।
ब्रह्मदत्तं च साल्वेशमेकलव्यं निषादपम् ॥ २६ ॥

सत्यधर्मीया — निषादस्वामिनम् ॥ २६ ॥

सुमनोरञ्जिनी — चेदिपं तद्देशाधिपं नामतः दमघोषं, साल्वेशं नामतो ब्रह्मदत्तं, निषादानां पतिं एकलव्यम् ॥ २६ ॥

बाह्लीकं च कुरुश्रेष्ठं युधामन्युं च दुर्जयान् ।
विन्दानुविन्दावावन्त्यौ काशिराजं च पौण्ड्रकम् ॥ २७ ॥

सत्यधर्मीया — दुर्जयानिति यथायोग्यान्वयि ॥ २७ ॥

सुमनोरञ्जिनी — आवन्त्यौ अवन्तीपुराधीश्वरौ । काश्याः राजानं नामतः पौण्ड्रकम् ॥

आज्ञापयामास नृपानेतान् वीरान् जरासुतः ।
गिरिं गोमन्तमारोढुं दक्षिणस्यां दिशि प्रभो ॥ २८ ॥

सत्यधर्मीया — आरोढुमित्येतदत्रेव पूर्वत्राप्यन्वेति ॥ २८ ॥

द्रुमं किम्पुरुषाधीशं दन्तवक्रं सहानुजम् ।
वीरं विदेहराजानं भूरिश्रवसमेव च ॥ २९ ॥

सत्यधर्मीया — सहानुजं सविदूथम् । विदेहराजानम् । समासान्तो विधिरनित्य इति न टच् ॥ २९ ॥

सुमनोरञ्जिनी — किंपुरुषाधीशं नामतो द्रुमं, विदेहराजं वीरम् ॥ २९ ॥

करुशेषं बृहच्चापं दशार्णं च शतध्वजम् ।
शैब्यं सुवीरराजानं दरदं च महारथम् ॥ ३० ॥

सत्यधर्मीया — दरदं नाम्ना ॥ ३० ॥

सुमनोरञ्जिनी — करूषदेशाधिपं बृहच्चापं, दशार्णेशं शतध्वजनामानं, सौवीरराजानं शैब्यम् ॥ ३० ॥

एतान् महीपतीन् राजा जरासन्धोऽमितद्युतिः ।
प्राह गोमन्तमारोढुं पश्चिमस्यां दिशि द्रुतम् ॥ ३१ ॥

सत्यधर्मीया — अमितद्युतिः पराक्रमभ्रमसमय इति ॥ ३१ ॥

त्रिगर्तं च सुशर्माणं बलिनं वेणुदारिणम् ।
कुलिन्दं च महासत्वं केकयानपि भूपतीन् ॥ ३२ ॥

सत्यधर्मीया — वेणुदारिणं राजानम् ॥ ३२ ॥

शिशुपालं च भूपालं भीष्मकं चापि दुर्जयम् ।
पुरस्कृत्यारुरोहाशु कौबेर्यां मागधो दिशि ॥ ३३ ॥

सत्यधर्मीया — मागधः स्वयम् ॥ ३३ ॥

एवं गोमन्तमारुह्य सर्वर्तुफलपादपम् ।
विचिंत्य तत्र सर्वत्राप्यधः शृङ्गात् प्रवर्षणात् ॥ ३४ ॥

सत्यधर्मीया — सर्वर्तुफलपादपम् । एकस्मिनृतावपि । विचिन्त्य मृगयित्वा ॥ ३४ ॥

सुमनोरञ्जिनी — सर्वेषु ऋतुषु फलन्तीति वा फलं येषामिति वा सर्वर्तुफलाः तथाविधाः पादपा यस्मिन् तम् । विचिन्त्य मार्गयित्वा । प्रवर्षणात् शृङ्गादधः सर्वत्रेत्यन्वयः ॥ ३४ ॥

चिच्छिदुः सकलान् वृक्षान् नापश्यत् राममाधवौ ।
गिरौ विलीनावाज्ञाय नाधिगम्य पदं नृप ॥ ३५ ॥

सत्यधर्मीया — नापश्यत् । गिरावेव यत्र कुत्रचिद्विलीनौ । आज्ञाय ज्ञात्वा पदं तत्स्थलं नाधिगम्याज्ञात्वा ॥ ३५ ॥

सुमनोरञ्जिनी — पदं तयोः आवासस्थानम् । गिरौ विलीनौ तिष्ठतः इति आज्ञाय ज्ञात्वा ॥ ३५ ॥

ददाह गिरिमेधोभिः समन्तादग्निमुत्सृजन् ।
तत उत्पत्य तरसा दह्यमानात्तु तावुभौ ॥ ३६ ॥

सत्यधर्मीया — एधोभिः काष्ठैः । मुख्यकर्तृविवक्षयोत्सृजन् ददाहेत्येकवचनम् ॥ ३६ ॥

सुमनोरञ्जिनी — एधोभिः काष्ठैः दह्यमानात् ततः पर्वतात् ॥ ३६ ॥

दशैकयोजनोत्तुङ्गान्निपेततुरधो भुवि ।
अलक्ष्यमाणौ रिपुणा सानुगेन यदूत्तमौ ॥ ३७ ॥

सत्यधर्मीया — दशैकयोजनोत्तुङ्गादेकदशयोजनोच्छ्रिताच्छृङ्गात्सानुगेन भृत्येन सानुस्थेनेति वा । अलक्ष्यमाणावधो भुवि निपेततुः ॥ ३७ ॥

सुमनोरञ्जिनी — निपेततुः उड्डीय अधः आगतौ ॥ ३७ ॥

स्वपुरं पुनरायातौ समुद्रपरिखां नृप ।
सोऽपि दग्धाविति मृषा मन्वानो बलकेशवौ ॥ ३८ ॥

सत्यधर्मीया — समुद्र एव परिखा यस्याः सा ताम् । स्वेषां पूस्तां स्वपुरम् । समुद्रपरिखमिति पाठे पुरशब्द इति ज्ञेयम् । मृषा मन्वानो जानन् ॥ ३८ ॥

बलमाकृष्य सुमहन्मगधान् मागधो ययौ ।
अष्टादशे तु सङ्ग्रामे जित्वा यादवसत्तमौ ॥ ३९ ॥

सत्यधर्मीया — जित्वेव भ्रमितो ॥ ३९ ॥

सुमनोरञ्जिनी — मगधान् तन्नामकदेशान्प्रति ययौ । जित्वा जिताविति मत्वेति व्याख्येयम् । हरिवंशे गोमन्तादधः पुनर्युद्धकथनात् । निर्णये जरासन्धपराजयस्यैव कथनाच्च । अत्र करवीरगमनानन्तरं गोमन्तारोहणमुच्यते । भारते तु गोमन्तादवरोहणोत्तरं करवीरगमनं सृगालवध इत्यादिकमुच्यते । तत्र भारतोक्तप्रकारेणैव कथा ज्ञेया । अत्र कथाव्यत्यासस्त्वसुरमोहनार्थः । तदुक्तमत्रैव सप्तत्यध्यायतात्पर्ये 'पूर्वाः कथाः परं ब्रूयुः' इत्यादि । भारत-तात्पर्यनिर्णयेऽपि तथोक्तत्वाच्च तथैव ज्ञेयम् ॥ ३९ ॥

दृप्तः स्वराष्ट्रे न्यवसज्जितदिङ्मण्डलो नृप ।
माधवौ तु महात्मानौ प्रविश्य द्वारकां पुरीम् ॥ ४० ॥

सत्यधर्मीया — दृप्तोऽहङ्कृतः ॥ ४० ॥

स्तूयमानौ दिवारात्रं सूतमागधबन्दिभिः ।
वृतावानन्दबहुलैर्बन्धुभिः सुखमूषतुः ॥ ४१ ॥

इति श्रीमद्भागवते दशमस्कन्धे पञ्चपञ्चाशोऽध्यायः ॥

सत्यधर्मीया — आनन्दो बहुलो येषां ते तैर्वृतौ सुखं यथा तथोषतुः । अत्रालक्ष्यमाणावित्युक्तिश्च दग्धा इति मृषा मन्वान इति च करवीरराजहननस्य पूर्वमुक्तिर्हरिवंशे तौ नगादाप्लुतौ दृष्ट्वेत्यारभ्य करवीरपुरं वीर गच्छामः सबलानुगा इति गर्भीकृत्य नगरीं मधुरापुरीं प्राप्तावित्यन्तेनोक्तिश्च कल्पभेदतः प्रवृत्ता इति न विरोधः । आचार्या भारततात्पर्यनिर्णये भारतमनुसृत्योचुः ॥ ४१ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे पञ्चपञ्चाशोऽध्यायः ॥ १०-५५ ॥

सुमनोरञ्जिनी — आनन्दबहुलैः आनन्दपूर्णैः ॥ ४१ ॥

॥ इति श्रीमद्भागवतदशमस्कन्धोत्तरार्धव्याख्यायां सुमनोरञ्जिन्यां पञ्चपञ्चाशोऽध्यायः ॥

॥ अथ षट्पञ्चाशोऽध्यायः ॥

श्रीशुक उवाच –

कदाचिद् देवकीपुत्रो रामशैनेयसंयुतः ।
सेव्यमानः सभायां वै नानादेशेश्वरैर्नृपैः ॥ १ ॥

सत्यधर्मीया — भक्तवत्सलः श्रीदेव इति वेदयितुं पाण्डवकृतं विजयताण्डवं द्रुपदनृपविषये श्रुत्वा तन्मर्म ज्ञापयितुमाज्ञापयामास कृतवर्माणमत्रस्थस्तत्र गन्तुमित्यर्थो निरूप्यतेऽस्मिन्नध्याये । नानादेशानामीश्वरास्तैर्नानाप्रकारा आदेशा आज्ञाविशेषास्तेषामीश्वरैस्तदधिकृतैरिति वा ॥ १ ॥

सुमनोरञ्जिनी — शैनेयः सात्यकिः ॥ १ ॥

पाञ्चालराजं द्रुपदं बालैः कुन्तीसुतैर्मृधे ।
बद्धं शुश्राव कौरव्य ब्राह्मणैः सत्रयाजिभिः ॥ २ ॥

सत्यधर्मीया — सत्रयाजिभिः सत्रे याजयितुं शीलं येषां तैर्ब्राह्मणैस्तन्मुखतः ॥२॥

सुमनोरञ्जिनी — कुन्तीसुतैः बालैरेव । मृधे युद्धे । बद्धं द्रुपदम् । सत्रयाजिभिः ब्राह्मणैरुक्तं शुश्राव ॥ २ ॥

तच्छ्रुत्वा हृष्टहृदयः कृतवर्माणमच्युतः ।
नगरं हस्तिनपुरं प्रेषयामास वेदितुम् ॥ ३ ॥

सत्यधर्मीया — हृष्टं हृदयमन्तःकरणं यस्य स नगरमनामयं यथा वेदितुं च प्रेषयामास । गरो व्याधाविति विश्वः ॥ ३ ॥

सुमनोरञ्जिनी — तत् वृत्तान्तम् । वेदितुं निश्चेतुम् ॥ ३ ॥

स गत्वा हस्तिनपुरं वृद्धं कुरुपितामहम् ।
ददर्श द्रोणविदुरधृतराष्ट्रकृपैर्युतम् ॥ ४ ॥

सत्यधर्मीया — कुरुपितामहं भीष्मम् ॥ ४ ॥

सुमनोरञ्जिनी — कुरुपितामहं भीष्मम् ॥ ४ ॥

युधिष्ठिरं च राजानं चतुर्भिर्भ्रातृभिर्वृतम् ।
सभाजयमास भृशं कुन्तीं च हृदिकात्मजः ॥ ५ ॥

सत्यधर्मीया — राजानं भाविनं तथा ॥ ५ ॥

सुमनोरञ्जिनी — हृदिकात्मजः कृतवर्मा ॥ ५ ॥

युधिष्ठिरोऽपि पप्रच्छ सानुगं कंसमर्दनम् ।
हतं च कालयवनं जरासन्धं च निर्जितम् ॥ ६ ॥

सत्यधर्मीया — सानुगं गोमन्तसानुगं सभृत्यं वा हतं घातितम् ॥ ६ ॥

वासुदेवं च निहतं करवीरपुरेश्वरम् ।
द्वारवत्याश्च करणं नगर्या वरुणालये ॥ ७ ॥

सत्यधर्मीया — वासुदेवं शृगालम् । वरुणालये समुद्रे ॥ ७ ॥

सुमनोरञ्जिनी — करवीरपुरेश्वरं वासुदेवं सृगालवासुदेवम् । वरुणालये समुद्रे ॥ ७ ॥

हतौ च हंसडिभिकौ ब्रह्मदत्तं च दुर्जयम् ।
श्रुत्वा हार्दिक्यवचनाद् याथार्थ्येन युधिष्ठिरः ॥ ८ ॥

सुमनोरञ्जिनी — हार्दिक्यस्य कृतवर्मणः । हंसडिभिकौ हतौ तथा ब्रह्मदत्तं च हतम् । याथार्थ्येन यथार्थतया हतौ हतमित्यनुवादेन वादः –

'कथं देवेन विप्रर्षे तौ हंसडिभिकौ हतौ' इत्यारभ्य 'गदेन चापि सहितो वासुदेवः पुरीं ययौ' इत्यन्तेन बहुना ग्रन्थेन हरिवंशे । तथा 'जनार्दनः स नामतो रमेशपादसंश्रयः' इत्यारभ्यासप्तदशाध्यायावसानं महाभारततात्पर्यनिर्णये च शंसितरीत्या ज्ञेयः ॥ ८ ॥

मेने त्रैलोक्यसाम्राज्यं स्वहस्तगतमक्षयम् ।
सभाजितश्च हार्दिक्यः सुखसम्भाषणादिभिः ॥ ९ ॥

सत्यधर्मीया — त्रैलोक्यसाम्राज्यमक्षयं स्वहस्तगतं मेने । तत्र निमित्तमप्यनेनैवाह । मेने लक्ष्मीनाथे त्रैलोक्यसाम्राज्यम् अक्षय्यं स्वहस्तगतं कुर्वति सतीति । तदायत्तं चेन्मदायत्तमेवेति भाव इति । सुखसम्भाषणादिभिः कुशलालापादिभिः ॥ ९ ॥

पाण्डुपुत्रैस्तथा कुन्त्या सौहार्दस्रुतबाष्पया ।
हार्दिक्यस्ताननुज्ञाप्य बान्धवान् पृथया सह ॥ १० ॥

सत्यधर्मीया — सौहार्दस्रुतबाष्पया कुन्त्या सभाजित इत्यन्वयः ॥ १० ॥

सुमनोरञ्जिनी — स्नेहेन स्रुतं बाष्पं आनन्दजलबिन्दुः यस्याः सा तया ॥ १० ॥

मातृष्वसेयान् धर्मज्ञानभिवन्द्य यथावयः ।
गाङ्गेयेनाभ्यनुज्ञातो धृतराष्ट्रेण चानघ ॥ ११ ॥

सत्यधर्मीया — मातृष्वसुः पुत्रास्तान् गतम् । गाङ्गेयेन भीष्मेण गतम् ॥ ११ ॥

सुमनोरञ्जिनी — मातृष्वसेयान् पाण्डवान् ॥ ११ ॥

विदुरेणाङ्गराजेन द्रोणेन च कृपेण च ।
प्राज्ञेनाचार्यपुत्रेण तथा दुर्योधनेन च ॥ १२ ॥

सत्यधर्मीया — अङ्गराजः कर्ण आचार्यपुत्रोऽश्वत्थामा ॥ १२ ॥

सुमनोरञ्जिनी — आचार्यपुत्रेण अश्वत्थाम्ना ॥ १२ ॥

कृतवर्माऽभ्यनुज्ञातो निर्गत्य गजसाह्वयात् ।
द्वारकां वृष्णिनिलयामाजगाम दिनात्यये ॥ १३ ॥

सत्यधर्मीया — दिनात्यये सायंसमये ॥ १३ ॥

सुमनोरञ्जिनी — गजसाह्वयात् हस्तिनपुरात् । दिनात्यये सायङ्काले ॥ १३ ॥

स प्रविश्य सभां दिव्यामनेकनृपसेविताम् ।
दृष्ट्वा गोविन्दमासीनं काञ्चने परमासने ॥ १४ ॥

सत्यधर्मीया — सभां सुधर्माम् ॥ १४ ॥

सुमनोरञ्जिनी — काञ्चने काञ्चनमये ॥ १४ ॥

वीजच्चामरसङ्घातसहितं वनमालिनम् ।
आचचष्टेऽखिलं तस्य यथादृष्टं यथाश्रुतम् ।
वृत्तान्तं कौरवेयाणां नगरे गजसाह्वये ॥ १५ ॥

सत्यधर्मीया — वीजच्चामराणां सङ्घातः सङ्घस्तेन सहितम् । गजसाह्वये गतम् ॥ १५ ॥

सुमनोरञ्जिनी — वीजतां चामराणां सङ्घातः समूहः ॥ १५ ॥

तदाकर्ण्य हरिः सर्वं वृत्तान्तं जगदीश्वरः ।
पौरुषं पाण्डुपुत्राणां बभूवानन्दनिर्भरः ॥ १६ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे षट्पञ्चाशोऽध्यायः ॥

सत्यधर्मीया — आनन्दनिर्भरो बभूव बभूवेवालोकनतस्तथा दर्शयामासेति यावत् ॥ १६ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे षट्पञ्चाशोऽध्यायः ॥ १०-५६ ॥

सुमनोरञ्जिनी — आनन्दनिर्भरः आनन्दपूर्णः बभूव व्यक्तानन्दः आसीत् ॥१६॥

॥ इति श्रीमद्भागवतदशमस्कन्धोत्तरार्धव्याख्यायां सुमनोरञ्जिन्यां षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

।। अथ सप्तपञ्चाशोऽध्यायः ।।

श्रीशुक उवाच—

आनर्ताधिपतिः श्रीमान् रेवतो रेवतीं सुताम् ।
ब्रह्मणा चोदितः प्रादाद् बलायेति पुरोदितम् ।। १ ।।

सत्यधर्मीया — आनर्तादिशाः पुरा नवमे मयोदितमिति विशेषविवक्षावान्बीजावापं चकार कारुणिको बादरायणिरिति सूचयति ।। १ ।।

सुमनोरञ्जिनी — भगवद्भक्तानामाशासितादधिकमपि भगवत्प्रसादाल्लभ्यते । तद्द्वेषिणामाशा त्वैहिकविषयाऽपि सारमेयस्य कूपजलरसास्वादनाशातुल्येति दर्शयति त्रिभिरध्यायैः । तत्र तावद्रैवतमहाराजस्य स्वजामातृतया मानुषेष्वधिकगुणं वृणीतुमिच्छो- र्ब्रह्मसदनं गतस्य सकलदेवतासार्वभौमो भगवदंशाविष्टो बलराम एव जामाता लब्ध इति दर्शयति । तत्र परीक्षिन्महाराजा शुकं पृच्छतीत्याह ।। **राजेति** । यदि एतच्छ्लोकोत्तरं राजोवाचेति लेखस्तदा इदं पद्यं राज्ञः प्रष्टव्यार्थस्मरणबीजसंस्कारोद्बोधकं शुकाचार्याणां वचनस्यानुवादरूपं ज्ञेयम् । आनर्ताधिपतिः तन्नामकदेशाधिपः । रैवतो नामतः ।। १,२ ।।

राजोवाच —

रेवतो नाम राजाऽसौ ब्रह्मणा चोदितः कथम् ।
तदहं श्रोतुमिच्छामि विस्तरेण महामुने ।। २ ।।

सत्यधर्मीया — ब्रह्मण एतस्य क्व दर्शनं कथं चाज्ञा राज्ञस्तस्य दानं कथमिति राजा पृच्छतीत्याह ।। **राजेति** ।। अर्थादुक्तप्रायं शब्दतो वदेति विस्तरेणेत्यनेन द्योतयति ।। २ ।।

श्रीशुक उवाच —

रेवतो नाम राजाऽऽसीत् पुरा धर्मार्थतत्त्ववित् ।
रेवती नाम तस्यैका जज्ञे कन्या यशस्विनी ।। ३ ।।

सत्यधर्मीया — यशस्विनी तथा भाविनी । धर्मश्चार्थश्च धर्मार्थौ ताभ्यां सह काममोक्षौ तौ वेत्तीति धर्मार्थतत्त्ववित् । चतुर्विधपुरुषार्थज्ञानीत्यर्थः ॥ ३ ॥

सुमनोरञ्जिनी — धर्मार्थयोः तत्वं रहस्यं वेत्तीति तथोक्तः ॥ ३ ॥

स ब्रह्माणं ययौ प्रष्टुं कस्मै दास्यामि तामिति ।
अदत्वा याच्यमानोऽपि नानाजनपदेश्वरैः ॥ ४ ॥

सत्यधर्मीया — नानाजनपदेश्वरैर्याच्यमानोऽप्यदत्वा तां कस्मै दास्यामीति प्रष्टुं ब्रह्माणं ययावित्यन्वयः ॥ ४ ॥

सुमनोरञ्जिनी — या मम कन्या, तस्याः गुणाधिकवरज्ञाता सर्वज्ञत्वाद्ब्रह्मैवेति मन्यमानः नानाजनपदेश्वरैर्याच्यमानोऽपि तेभ्यस्तामदत्वा ब्रह्माणं प्रष्टुं ययावित्यन्वयः ॥ ४ ॥

सभायां ब्रह्मणस्तत्र गन्धर्वौ द्वौ हहाहुहू ।
तस्मिन्नगायतां काले ग्राममूर्च्छाविचक्षणौ ॥ ५ ॥

सत्यधर्मीया — हाहाहूहू द्वौ गन्धर्वौ तत्र सभायां तस्मिन्काले स्वराणां मण्डलं ग्रामो मूर्छना मूर्छा आरोहावरोहरूपा 'सप्तस्वरास्त्रयो ग्रामा एकविंशतिमूर्छना' इति भरतः ॥ ५ ॥

सुमनोरञ्जिनी — ग्राममूर्च्छाविचक्षणौ । सप्तस्वरास्त्रयो ग्रामा एकविंशतिमूर्च्छना इति भरतशास्त्रोक्तप्रकारेण तत्र विचक्षणौ कुशलौ ॥ ५ ॥

राजाऽतिष्ठद् बर्हिः किञ्चित् तद्विरामप्रतीक्षया ।
गीतावासने पप्रच्छ प्रणिपत्य पितामहम् ॥ ६ ॥

सत्यधर्मीया– किञ्चिदल्पकालं तस्य गीतस्य विरामोऽवसानं तत्प्रतीक्षया बहिरतिष्ठत् ॥

सुमनोरञ्जिनी — राजा तस्य गानस्य विरामप्रतीक्षया अवसानप्रतीक्षया । किञ्चित् कालम् अल्पकालम् । बर्हिः अतिष्ठत् ॥ ६ ॥

एषा मे भगवन् कन्या कस्मै दास्य इमामिति ।
तं प्राह पद्मभूः कस्ते राजपुत्रो विरोचते ॥ ७ ॥

तं चान्यांश्च महीपालानाचक्ष्वेति कुरूद्वह ।
ततस्तान् रेवतः प्राह भूपालान् विषयेश्वरान् ॥ ८ ॥

सत्यधर्मीया — ते तुभ्यं मां प्रत्येव कुतः प्रश्न इत्यत आह ॥ **दास्य इति** । तव दास्ये स्थितोऽहं दास्ये दासीत्वे कस्मै दास्यामीति वा । यो विरोचते तमेकं तथा दृष्टान् श्रुतांश्चावनीशान्वदेति तं पद्मभूः प्राह । तान्विषयेश्वरान्देशाधीशान् ॥ ८ ॥

सुमनोरञ्जिनी – ते, को राजपुत्रो विरोचते तं, तथा अन्यांश्च महीपालानाचक्ष्वेति ॥

स तानाकर्ण्य नृपतीन् प्रहस्योवाच रेवतम् ।
युगानि सुबहून्यत्र गतानि तव भूपते ॥ ९ ॥

सत्यधर्मीया — स धाता तान् रैवतोक्तानाकर्ण्य प्रहस्य । हासस्तु तेषां कुलस्य कालव्याकुलतया । भूपतेरिति भूपत इति च युक्तौ पाठौ । सुबहूनि युगानि गतानि ॥ ९ ॥

सुमनोरञ्जिनी — सः ब्रह्मा ॥ ९ ॥

क्षणमात्रमिवाश्राव्यं शृण्वतो गीतमेतयोः ।
क्वेदानीं तव ते भूपाः सुतायाः सदृशा वराः ॥ १० ॥

सत्यधर्मीया — अश्राव्यं मानुषैरेतयोर्गीतं शृण्वतः क्षणमात्रमिव गतानि । सुतायाः सदृशा वरास्ते भूपा इदानीं क्व न सन्ति त इत्यर्थः ॥ १० ॥

सुमनोरञ्जिनी — त्वादृशैः मनुजैरिति शेषः अश्राव्यम् । एतयोर्गीतं क्षणमात्रं शृण्वतस्तव मनुष्यस्य । सुतायाः सदृशा वराः, ते त्वयोच्यमानाः क्व क्व सन्ति ॥ १० ॥

इदानीं राजशार्दूल यदुवंशविवर्द्धनौ ।
वसुदेवगृहे जातौ रामकृष्णाह्वयौ प्रभू ॥ ११ ॥

सत्यधर्मीया — तर्हि गुणार्हितायाः कन्यायाः का गतिः कमलोद्भवेत्यत आह ॥ **इदानीमिति** । यदुवंशाभिवृद्धिकरौ । गृहं महिषी ॥ ११ ॥

सुमनोरञ्जिनी — तर्हि कथं कर्तव्यमिति दुरन्तां चिन्तां मा गा इत्याह ॥ **इदानीमिति** । रामकृष्णाह्वयौ आसाते ॥ ११ ॥

तत्र सङ्कर्षणायेमां कन्यां यच्छस्व भूपते ।
इत्युक्तस्तेन भूपालस्तं प्रणम्य पुरं गतः ।
रामाय प्रददौ कन्यां रूपिणीं बाहुशालिने ॥ १२ ॥

सत्यधर्मीया — तत्र तयोर्मध्ये सङ्कर्षणायेमां कन्यां यच्छस्व । तेन धात्रा । तं प्रणम्य । यत्र तत्स्थानम् । बहुशालिन इत्युत्तरकार्योपयोगिशक्ततां व्यक्तीकर्तुम् ॥ १२ ॥

सुमनोरञ्जिनी — तत्र तयोर्मध्ये । यच्छस्व देहि ॥ १२ ॥

तामादियुगसम्भूतां दीर्घदेहां महाभुजः ।
आकृष्य लाङ्गलेनांसे समां चक्रे हलायुधः ॥ १३ ॥

सत्यधर्मीया — आदियुगसम्भूतामिति देहोन्नाहहेतुकथनम् । कृतयुगजां समां स्वाकारस्य यावत्तावत्तावत्तरुण्याकारेण भाव्यं तथा चक्र इत्यर्थः । लाङ्गलेन हलेन । नियतपति-पत्नीव्यतिरिक्तस्थल एव कन्या कनीयस्त्वसमयप्रचार इति ज्ञेयम् ॥ १३ ॥

सुमनोरञ्जिनी — आदियुगे कृतयुगे । अत एव दीर्घदेहां तद्युगानुसारिदेहवतीम् ॥१३॥

भगवानपि गोविन्द उपयेमे कुरूद्वह ।
वैदर्भीं भीष्मकसुतामिन्दिरांशां स्वयंवरे ॥ १४ ॥

सत्यधर्मीया — अपिना न परवित्तता भगवत इत्यवगमयति । पत्नी नियता रेवतीति हरिवंशशंसितान्नीलाविवादपि न सेति ज्ञेयम् । इत्युक्त इत्यनेन ब्रह्मानुकूल्ये तु काऽन्या घटना भवतीत्याभाणकं तदारभ्य प्रवर्तितेति ध्वन्यते । इन्दिरांशां रमाम् ॥ १४ ॥

सुमनोरञ्जिनी — इदानीं श्रीरुग्मिणीस्वयंवरकथां प्रपञ्चयितुं तत्र विवित्साजननाय सामान्यत आह शुकाचार्यः ॥ **भगवानपीति** । भगवानपि श्रीकृष्णोऽपि वैदर्भीं विदर्भदेशोद्भवाम् ॥ १४ ॥

प्रमथ्य तरसा राज्ञः साल्वादींश्चैद्यपक्षगान् ।
पश्यतां सर्वभूतानां तार्क्ष्यपुत्रः सुधामिव ॥ १५ ॥

सत्यधर्मीया — सर्वभूतानां पश्यतामनादृत्य तानीत्यर्थः ॥ १५ ॥

सुमनोरञ्जिनी — साल्वादीन् राज्ञः प्रमथ्य बलान्निरस्य । तार्क्ष्यः कश्यपः तस्य पुत्रो गरुडः । देवान् प्रमथ्य यथा सुधां अगृह्णात् तथा स्वयंवरे गृहीत्वा उपयेम इत्यन्वयः ॥१५॥

राजोवाच—

भगवान् भीष्मकसुतां रुग्मिणीं रुचिराननाम् ।
राक्षसेन विवाहेन उपयेम इति श्रुतम् ॥ १६ ॥

भगवन् श्रोतुमिच्छामि कृष्णस्यामिततेजसः ।
यथा मागधसाल्वादीन् जित्वा तत्पारमागमत् ॥ १७ ॥

सत्यधर्मीया — भगवान्ज्ञानादिमान् राक्षसेन विवाहेन । ननु तृतीये गान्धर्ववृत्त्या मिषतां स्वभागमित्युक्ते राक्षसेनेत्यत्रोक्तिः कथमति चेन्न ।

आदिपर्वणि शाकुन्तलीये –

''अष्टावेव समासेन विवाहा धर्मतः स्मृताः ।
ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः ।
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमः स्मृतः ।
तेषां धर्मान्यथापूर्वं मनुःस्वायम्भुवोऽब्रवीत् ।
प्रशस्तांश्चतुरः पूर्वान्ब्राह्मणस्योपधारय ।
षडानुपूर्व्याः क्षत्रस्य विद्धि धर्म्याननिन्दिते ।
राज्ञां तु राक्षसो युक्तो विट्शूद्रेष्वासुरः स्मृतः ।
पञ्चानां तु त्रयो धर्म्यादृद्वावधर्म्यौ स्मृताविह ।
पैशाचश्चासुरश्चैव न कर्तव्यौ कदाचन ।
अनेन विधिना कार्यो धर्मस्यैषा गतिः स्मृता ।

गन्धर्वराक्षसौ क्षत्रधर्मौ तौ मा विशङ्किथाः ।
पृथग्वा यदि वा मिश्रौ कर्तव्यौ नात्र संशयः ।
सा त्वं मम सकामस्य सकामा वरवर्णिनी ।
गान्धर्वेण विवाहेन भार्या भवितुमर्हसि ।
कण्वः । क्षत्रियस्य हि गान्धर्वो विवाहः श्रेष्ठ उच्यते ।
सकामायाः सकामेन निर्मन्त्रा रहसि स्मृत'' इत्युक्तेः ।

समसम्मतिर्गान्धर्वे राक्षसे च राक्षसो युद्धहरणादित्युक्तेः । पृथग्वा यदि वा मिश्रावित्युक्तेः क्वचिद् राक्षसेत्युक्तिः क्वचिच्च गान्धर्वेत्युक्तिश्च सम्भवत इति मन्तव्यम् । विवाह्यतेऽनेनेति विवाहो विधिस्तेनोपयेमे परिणीतवान् विवाहेनोपयेमे स्वीचकारेत्येर्थः । इति श्रुतं त्वन्मुखतः । तत्पारं तत्कृतान्ततुलसेनाप्रान्तमागमदाप । तत्पा ते मागधाद्याः पालका यस्याः सा रमाऽगमद्धहिरित्यप्यान्तरङ्गिको भावो ज्ञेयो राज्ञः ॥ १७ ॥

सुमनोरञ्जिनी — युद्धे बलादाहृत्य यो विवाहः स राक्षसविवाहः राक्षसो युद्धहरणादिति स्मृतेः । कृष्णस्य विवाहकथामिति शेषः । यथा मागधादीन् जित्वा तत्पारं तस्य कार्यस्य पारमन्तम् । सिद्धिमिति यावत् । आगमत् तथा श्रोतुमिच्छामीत्यन्वयः । ते साल्वादयः पाः पालकाः यस्याः सा तथा । रमा रुग्मिणीरूपा । मागधादीन् जित्वा । स्थितं तं यथा आगमत् तत् श्रोतुमिच्छामीत्यन्वय इत्यप्युपदिशन्ति ॥ १६,१७ ॥

ब्रह्मन् विष्णुकथाः पुण्या माध्वीर्लोकमलापहाः ।
को नु तृप्येत शृण्वानः श्रुतज्ञो नित्यनूतनाः ॥ १८ ॥

सत्यधर्मीया — श्रुतमिति त्वयैवोक्तमलमित्यतो वक्ति ॥ **ब्रह्मन्निति** । माध्वीर्मधुरा लोकमलापहाः पुण्यास्तत्प्रापिका विष्णुकथाः श्रुतज्ञः शृण्वानः । ताच्छील्ये चानश् । कः तृप्येत तृप्तो भूयात् । नित्यनूतना नित्यं नवीना विशेषफलप्रदत्वात् । नव एव । नवस्य नूआदेशः तनपूप्रत्ययः वक्तव्य इति वार्तिकेन तनप् । नवीनो नूतनो नव इत्यमरः ॥१८॥

सुमनोरञ्जिनी — पुण्याः माध्वीः श्रोत्रस्य मनसश्चानन्दकराः । लोकानां वक्तृश्रोतृणां मलापहाः । नित्यं नूतनाः प्रतिक्षणं आश्चर्यतया प्रतीयमानाः । विष्णुकथाः । शृण्वन् ।

श्रुतज्ञः श्रवणरसाभिज्ञश्चेत् को नु तृप्येत अलंबुद्धिमान् भवेत् न कोऽपि । अतो मह्यं ब्रूहीति भावः ॥ १८ ॥

श्रीशुक उवाच—

राजाऽऽसीद् भीष्मको नाम विदर्भाधिपतिर्महान् ।
तस्य पञ्चाभवन् पुत्राः कन्यैका च वरानना ॥ १९ ॥

सत्यधर्मीया — नाम प्रसिद्धः ॥ १९ ॥

सुमनोरञ्जिनी — वरानना वरं मनोहरमाननं यस्याः सा तथोक्ता ॥ १९ ॥

रुग्म्यग्रजो रुग्मरथो रुग्मबाहुरनन्तरः ।
रुग्मकेशो रुग्ममाली रुग्मिण्येषां स्वसा सती ॥ २० ॥

सत्यधर्मीया — रुग्मी अग्रजः प्राथमिको येषां पञ्चानां स्वसा भगिनी ॥ २० ॥

सुमनोरञ्जिनी — तत्र अग्रजो रुग्मी । एषां पञ्चानां स्वसा । सती निर्दुष्टा ॥२०॥

सोपश्रुत्य मुकुन्दस्य रूपवीर्यगुणश्रियः ।
गृहागतैर्गीयमानास्तं मेने सदृशं पतिम् ॥ २१ ॥

सत्यधर्मीया — गृहागतैर्नारदादिभिर्गीयमाना रूपवीर्यगुणश्रियो रूपवीर्ययोरितरेषां गुणानां च श्रियः सम्पदः । उपसृत्य तं सदृशपतिं मेने ॥ २१ ॥

सुमनोरञ्जिनी — सा रुग्मिणी । गृहागतैः जनैः गीयमानं मुकुन्दमेव ॥ २१ ॥

तां बुद्धिलक्षणौदार्यरूपशीलगुणाश्रयाम् ।
कृष्णश्च सदृशीं भार्यां समुद्वोढुं मनो दधे ॥ २२ ॥

सत्यधर्मीया — गृहागतैर्वर्णितां लोकदृष्ट्या । बुद्धिश्च लक्षणानि चौदार्यं च रूपं च शीलं सदाचारश्चान्ये गुणाश्च तेषामाश्रयो यस्यां तां तादृशीं भार्यां प्रकाशघनामुद्वोढुं परिणेतुं कृष्णश्च मनो दधे । सकामायाः सकामेनेत्युक्तलक्षणसम्पत्ती राक्षसस्य गान्धर्वस्य विवाहस्य स्फोरिता भवत्यनेनेति ज्ञेयम् ॥ २२ ॥

सुमनोरञ्जिनी — तामपि कृष्णः सदृशीं भार्यां मेने । ततश्च समुद्वोढुं मनो दध इत्यन्वयः ॥ २२ ॥

बन्धूनामिच्छतां दातुं कृष्णाय भगिनीं नृप ।
रुग्मी निवार्य कृष्णद्विट् चैद्याय समकल्पयत् ॥ २३ ॥

तदवेत्यादितापाङ्गी वैदर्भी दुर्मना भृशम् ।
विचिन्त्याप्तं द्विजं कञ्चित् कृष्णाय प्राहिणोद् द्रुतम् ॥ २४ ॥

सत्यधर्मीया — बन्धूनां पित्रादीनां रुग्मी निवार्य । अनेन तत्सर्वापेक्षया बलिष्टता रुग्मिणो द्योत्यते । निवारणे कारणमीरयति । कृष्णं द्वेष्टीति कृष्णद्विडिति । तां भगिनीं बन्धूनामिति द्वितीयान्तं सत् भगिनीपदेनाप्यावृत्तमन्वेति । बन्धुभिः पित्रादिभिः । ऊनां तत्कार्याननुमतिमत्तत्कामिति बन्धुभिरूनेति तां चैद्याय शिशुपालाय समकल्पयत् तां दातुं मनश्चकारेति यावत् । अनेन स किं चकारेत्येतदप्युत्तरयति । चैद्यायसं चैद्यस्यायसमायासं गुढोत्मा मरुतो मारुतत्वत इत्यादिवत् यकारोत्तरदीर्घलोपः । अकल्पयत्कल्पयामासेति । तथोक्तं प्राक् । यद्वा । चैद्यस्यायसं अयःसम्बन्धि शकलं चणकादिकम् । अत एवाभाणकं लोहचणका नोपादतुं नापहातुं योग्या इति । तदजीर्यत्कल्पयामास । तद्भ्रातृनिर्धारणमवेत्य ज्ञात्वाऽसितापाङ्गी असितः कालोपाङ्गश्च कटाक्षश्च स यस्याः सा । अन्तरङ्गिको भावश्चासिते कृष्णेऽपाङ्गो यस्याः सेति । ततोऽप्यसितात्कृष्णादेवापाङ्गोऽनङ्गो यस्याः सेति ज्ञेयः । अङ्गगात्रकण्ठेभ्यो वक्तव्यमिति वृत्तिकृन्मतेन ङीष् । अथवा नासिकोदरेति चशब्दादनुक्तसमुच्चायकासंयोगोपधादपि क्वचिद्भवतीत्युक्तेः ङीष् । आप्तमिति स्वालोचितप्रमेयाबहिः प्रकाशतां विप्रस्य प्रकटयितुम् । प्रायेण तदारभ्य वैदिकैरेव कन्याघटना कार्यत इति मन्तव्यम् ॥ २४ ॥

सुमनोरञ्जिनी — कृष्णाय दातुं बन्धूनां इच्छतां सताम् । रुग्मी निवार्य । चैद्याय शिशुपालाय । समकल्पयत् दातुं सङ्कल्पितवान् । तत्र निमित्तमाह ॥ **कृष्णद्विडिति** ॥ तत् रुग्मिणो अभिप्रेतम् । अवेत्य (आलोच्य) आप्तं विश्वसनीयम् । प्राहिणोत् प्रेषयामास ॥ २३,२४ ॥

द्वारकां स समभ्येत्य प्रतीहारैः प्रवेशितः ।
अपश्यदाद्यं पुरुषमासीनं काञ्चनासने ॥ २५ ॥

सत्यधर्मीया — प्रतीहारैर्दौवारिकैः । गतम् ॥ २५ ॥

सुमनोरञ्जिनी — प्रतिहारैः द्वारपालैः । अन्तः प्रवेशितः ॥ २५ ॥

दृष्ट्वा ब्रह्मण्यदेवस्तमवरुह्य निजासने ।
उपवेश्यार्हयाञ्चक्रे यथाऽऽत्मानं दिवौकसः ॥ २६ ॥

सत्यधर्मीया — दिवौकसो देवा आत्मानं स्वं यथा तथाऽर्हयाञ्चक्रेऽपूजयत् ॥२६॥

सुमनोरञ्जिनी — अर्हयाञ्चक्रे पूजयामास ॥ २६ ॥

तं भुक्तवन्तं विश्रान्तमुपगम्य सतां गतिः ।
पाणिनाऽभिमृशन् पाणावव्यग्रस्तमपृच्छत ॥ २७ ॥

सत्यधर्मीया — यद्यपि कन्यानिश्चयनायायातैर्वरगृहे न भोक्तव्यमिति किंवदन्ती । तथाऽपि नित्यावियोगिनो रुग्मिणीकृष्णयोरयं विहार इति ध्वनयितुं भुक्तवन्तमित्युक्तिरिति ज्ञेयम् । विश्रान्तं विध्वस्ताध्वश्रमं पादौ पाणिनाऽभिमृशन् अव्यग्रोऽव्याकुलचेतास्तं विप्रमपृच्छतापृच्छत् ॥ २७ ॥

सुमनोरञ्जिनी — विश्रान्तं शय्यायां शयानम् । अभिमृशन् शनैः संमर्दयन् । अव्यग्रः स्थिरमनाः ॥ २७ ॥

कच्चिद् द्विजकुलश्रेष्ठ धर्मस्ते वृद्धसम्मतः ।
वर्तते नातिकृच्छ्रेण सन्तुष्टमनसः सदा ॥ २८ ॥

सत्यधर्मीया – हे द्विजवरश्रेष्ठ । वृद्धसम्मतस्ते धर्मो नातिकृच्छ्रेणानायासेन वर्तते क्वचित् ॥ २८ ॥

सुमनोरञ्जिनी — नातिकृच्छ्रेण अनायासेन । वर्तते प्रवर्तते ॥ २८ ॥

सन्तुष्टो यदि वर्तेत ब्राह्मणो येन केनचित् ।
अहीयमानः स्वाद् धर्मात् स ह्यस्याखिलकामधुक् ॥ २९ ॥

सत्यधर्मीया — स हि तादृशो द्विजः स्वाद्धर्मादहीयमानो यद्देशे वर्तते राज्ञः सर्वान्कामान्दोग्धीति स तथा ॥ २९ ॥

सुमनोरञ्जिनी — यर्हि ब्राह्मणः । येन केनचित् । यदृच्छालब्धेनेति यावत् । सन्तुष्टः अलंबुद्धिमान् वर्तेत तर्हि स्वात् धर्मात् अहीयमानो भवति । स्वधर्मत्यागी न भवतीति यावत् । स हि स्वधर्म एव । अस्य अखिलकामधुक् भवति ॥ २९ ॥

असन्तुष्टः सुखं विप्र नाप्नोत्यपि सुरेश्वरः ।
अकिञ्चनोऽपि सन्तुष्टः शेते सर्वाङ्गविज्वरः ॥ ३० ॥

सत्यधर्मीया — सुरेश्वरोऽप्यसन्तुष्टश्चेत्सुखं नाप्नोति । अकिञ्चनो दरिद्रः कियन्तावदेव (?) लब्धेन सन्तुष्टः सर्वाङ्गविज्वरः सर्वाङ्गीणोपतापरहितः शेते ॥ ३० ॥

सुमनोरञ्जिनी — सुरेश्वरोऽपि असन्तुष्टश्चेत्सुखं नाप्नोति । अकिञ्चनोऽपि सन्तुष्टश्चेत्सर्वांगेषु । विज्वरः विगतसन्तापः सुखं शेते सुखमास्ते ॥ ३० ॥

विप्रान् स्वलाभसन्तुष्टान् साधून् भूतसुहृत्तमान् ।
निरहङ्कारिणः शान्तान् नमस्ये शिरसाऽसकृत् ॥ ३१ ॥

सत्यधर्मीया — उक्तं यदर्थमियत्तत्पर्यवसाययति ॥ **विप्रानिति** । भूतसुत्तमांच्छ्रेष्ठान् भूतं विष्णुः सुहृत्तमो येषामिति वा । यथोक्तमेकादशतात्पर्ये ।

''सृष्टिस्थित्यादिहेतुत्वाद्भूतानि हरिरुच्यते ।
न तु वस्तुस्वरूपत्वात्स हि सर्वेश्वरेश्वर'' इति ॥

वस्तुतत्वत इति । शान्तानक्रोधान् असकृद्भूयो भूयः शिरसा नमस्ये ॥ ३१ ॥

सुमनोरञ्जिनी — स्वतः स्वतन्त्रात् परमात्मनः सकाशात् । यदृच्छयेति यावत् । यो लाभः तेन सन्तुष्टान् अन्यत्रालम्बुद्धिमतः ॥ ३१ ॥

कच्चिद् वः कुशलं ब्रह्मन् राजतो यस्य हि प्रजाः ।
सुखं वसन्ति विषये पाल्यमानाः स मे प्रियः ॥ ३२ ॥

सत्यधर्मीया — हे ब्रह्मन् । वो राजतः कुशलं कच्चिदिति प्रश्नमात्रं यत्र यत्र कुशलाद्यन्यतमं पदं वर्तते तत्र तत्रेति मन्तव्यम् । तथा नास्ति तत्पदम् । तत्र कुशलप्रश्न इति । यस्य विषये देशे स राजा मे प्रिय इष्टः ॥ ३२ ॥

सुमनोरञ्जिनी — यस्य राज्ञो विषये । पाल्यमानाः प्रजाः सुखं तिष्ठन्ति । स राजा मे प्रिय इति सम्बन्धः ॥ ३२ ॥

यतस्त्वमागतो दुर्गं निस्तीर्येह यदृच्छया ।
सर्वं नो ब्रूह्यगुह्यं चेत् किं कार्यं करवाम ते ॥ ३३ ॥

सत्यधर्मीया — कुत आगतिस्तदवगमयतामिति पृच्छति ॥ **यत इति** । यतश्चोदेति सूर्य इत्यादेर्यत इति कुत इत्यर्थे । दुर्गं निस्तीर्योल्लङ्घ्य यदृच्छया हरीच्छया यतः कुत आगतः तत्सर्वमगुह्यं गोप्यं न चेत्तत्ते किं करवाम ब्रूहि । करवाणीत्याद्यनुक्त्वोक्त्वा चैवं करे स्वहस्ते न्यस्ता वामा स्त्री यस्य तत्सम्बुद्धिः । वधूसन्धानार्थमायात इति स्वज्ञानं ध्वनयामासेति ज्ञेयम् । पयोधरे हरे कामे विद्याद्वामामपि स्त्रियमिति विश्वः ॥ ३३ ॥

सुमनोरञ्जिनी — यतः यन्निमित्तं इहागतस्तत्सर्वम्, अगुह्यम् अगोप्यं चेत् ब्रूहि ॥३३॥

एवं सम्पृष्टसम्प्रश्नो ब्राह्मणः परमेष्ठिना ।
विधाय लिखितं पत्रं पादयोः प्रणनाम तम् ॥ ३४ ॥

सत्यधर्मीया — लिखितं पत्रं पादयोर्निधाय प्रणनाम स्वयमेव परिनिधाय रुग्मिणी-स्थाने पादयोः प्रणतस्यापि नमनमिति सन्तोष्टव्यम् । लिखितमिति लेखितमित्यर्थकम् । तस्या राजप्रजात्वाच्छिक्षाऽक्षरेष्वपि सम्भावितेति लिखितमित्युक्तमिति वा ॥ ३४ ॥

सुमनोरञ्जिनी — श्रीकृष्णेन सम्पृष्टः सम्पश्नः प्रष्टव्यार्थः यं प्रति । स तथाविधो ब्राह्मणः । परमेष्ठिना पूर्णानन्देन ॥ ३४ ॥

तदादाय जगन्नाथः स्मितसुन्दरलोचनः ।
वाचयामास धर्मात्मा सादरं स्पृहयन्निव ॥ ३५ ॥

सत्यधर्मीया — धर्मात्मा धारकत्वाद्धरिर्धर्मस्तदात्मा तत्स्वरूपभूतः सादरमादर-प्रदर्शकशब्दसहितमिति विशेषणम् । स्वयमपि स्पृहयन्निव वाचयामास वाचकहस्तेन राजधर्मत्वात् । सादरं यथा भवति सनिर्भयं यथा तथेति वा ॥ ३५ ॥

सुमनोरञ्जिनी — वाचयामास वाचयांबभूव । अन्येन निकटस्थेन वाचयामासेति वा ॥

रुग्मिण्युवाच —

श्रुत्वा गुणान् भुवनसुन्दर सङ्गतांस्ते निर्विश्य कर्णविवरं हरतोऽङ्ग तापम् ।
रूपं परं भुवनमङ्गल मङ्गलं ते त्वय्यच्युताविशति चित्तमपत्रपं मे ॥ ३६ ॥

सत्यधर्मीया — अङ्ग हे भुवनसुन्दर । शृण्वतां त इति सङ्गतांस्त इति च सङ्गतौ पाठौ । शृण्वतां जनानां सङ्गतांस्त्वयि सदा विद्यमानान्कर्णविवरं प्रविश्य तापं हरतस्ते गुणान् श्रुत्वा भुवनमङ्गल ते मङ्गलं रूपं च श्रुत्वा स्थितायां मे चित्तमपत्रपं निर्लज्जं त्वयि विशति । न प्रत्यावर्तयितुं शक्यमित्याह ॥ **परं यथा तथा विशतीति** । भुवनमङ्गलानां मङ्गलं तन्मङ्गलत्वप्रदमिति पदमेकं वा । परं तापमितराशक्यपरिहारं तापमिति वा । अङ्गतापमिति पदं वा शरीरतापमित्यर्थः ॥

भुवनमं गल मङ्गलमिति छेदः । भुवनस्य मं यज्ज्ञानं वा यस्मात्तद्गलस्य मे मङ्गलसूत्रं वा येन तदित्यान्तरङ्गिको भावो रुग्मिण्याः । अवरोपो हरतो रुद्रादङ्गतापं य आविशत्या-विशत् । क्रियासम्बन्धे लट् । तेन मन्मथेनापत्रपं विशतीति वा ॥ ३६ ॥

सुमनोरञ्जिनी — हे भुवनसुन्दर ! ते त्वया । सङ्गतान् सम्बद्धान् । त्वयि विद्यमानानिति यावत् । यद्वा ते त्वयैव सङ्गतान् साकल्येन ज्ञातान् । अन्यैः साकल्येन ज्ञातुमशक्यानिति यावत् । सङ्गतिः सङ्गमे ज्ञान इति विश्वः । कर्णविवरं प्रविश्य । अङ्गे विद्यमानं तापं हरतः श्रोतॄणां श्रवणमात्रेण सन्तापं परिहरत इति यावत् । एतादृशान् ते गुणान् । तथा भुवनमङ्गलमङ्गलम् । परमुत्कृष्टं ते रूपं च श्रुत्वा । मे चित्तं त्वयि । अपत्रपम्, अपगता त्रपा लज्जा यस्मात्तत् । तथाविधं सत् आविशति आसज्जते ॥ ३६ ॥

का त्वा मुकुन्द महती गुणशीलरूपविद्यावयोद्रविणधामभिरात्मतुल्यम् ।
व्रीडावती कुलवती न वृणीत कन्या काले नृसिंह नरलोकमनोभिरामम् ॥३७॥

सत्यधर्मीया — अहो रहोगतानां कन्यानामेवमपत्रपा प्रवृत्तिः कथमिति न कथय मधुनाथ तव गुणा एवैवं त्रपापनोदं कुर्वन्ति कामगामिति विज्ञापयति ॥ केति । हे नृसिंह मुकुन्द । नृसिंहेत्यनेन मिलितानां जरासुतादीनां गोमायुतामभिप्रेत्य न तेभ्यस्तव भयमिति ध्वनयति । कुलवती सत्कुलप्रसूता व्रीडावती साऽपि महती गुणतः कन्या का । गुणाश्च शीलं च रूपं च विद्या च वयश्च द्रविणं द्रव्यं च धाम तेजश्च तैरात्मतुल्यं स्वसमानं नान्य एतद्वानस्तीति भावः । नरलोकमनोभिरामं नरा अविनाशित्वान्मुक्ता लोका अमुक्ताश्च तेषां मनोऽभिरामयतीति तं त्वा त्वां न वृणीत न काङ्क्षेत् । किन्त्वेतन्मात्रमपेक्षितमित्याह ॥ **काल इति** । अनूढायाः प्रौढायाः काले विवाहकाले । आत्मतुल्यत्वं तव प्रामाणिकमित्यप्याह । महतीगुणशीलो नारदो महत्या वीणाया गुणो ध्वनिर्येन स नारदः । महती नारदस्येत्यादेः । शीलं सदाचारस्तद्वन्तः सनकाद्या रूपवान् मारो विद्या सरस्वती आवया ब्रह्मा । एष ब्रह्माऽतिवृद्ध इत्यादेः । द्रविणधामा कुबेरो द्रविणवान्कुबेरो धामभिः प्रकाशात्मकैः चन्द्रसूर्याग्न्यादिभिरात्मतुली आत्मनैव तुलाऽस्यास्तीति स तथा शिखादिः । इति यः कथित इति शेषः । तं भगवन्तं त्वमिति वा । इन्दिरायाः पतिमित्यनेन स्वस्यास्तदात्मकतां ध्वनयन्ती गुणादिधामान्तैरात्मनः स्वस्यातस्तुल्यमित्यर्थमपि सूचयामासेत्यवसेयम् ॥ ३७ ॥

सुमनोरञ्जिनी — इदं न चित्रमित्याह ॥ **का त्वेति** । धाम तेजः । गुणरूपादिभिः आत्मतुल्यं स्वयोग्यम् । यद्वा गुणादिभिः आत्मनैव तुल्यम् । निरुपममित्यर्थः । नरलोकमनोभिरामं पतिं, महती कुलवती शुद्धवंशोत्पन्ना कन्या का । व्रीडावती सती । काले यौवनकाले । न वृणीत । किन्तु व्रीडां परित्यज्य वृणीतैवेति ॥ ३७ ॥

स त्वं मयाऽप्यभिवृतः पतिरिन्दिराया भक्तप्रियः कृपणलोकशरण्य ईशः ।
मत्वैतदङ्ग तव पादसरोजदास्याः कामं कुरु प्रियतम प्रणताऽस्मि तेऽङ्घ्रिम् ॥ ३८ ॥

सत्यधर्मीया — स तादृशस्त्वं मयाऽप्यभिवृतः । वरणे कारणमीरयति । इन्दिरायाः

पतिर्भक्तप्रियः कृपणलोकशरण्य ईश इत्येतन्मत्वेति । अङ्ग कृष्ण प्रियतम । तव पादसरोजदास्या मम कामं कुरु । किञ्चिद्धिनैतत्प्रत्यर्पणेन तव तर्पणं कर्तुं क्षमाऽहमित्याह ॥ **तेऽङ्घ्रिं प्रणताऽस्मीति** । अस्मीत्युत्तमपुरुषप्रयोगादहमिति लभ्यते । यद्वाऽस्मीत्येकदा तिङन्तमेकदावर्तितमहमित्यर्थेऽव्ययम् । तथा हि भारवौ । आसंसृतेरस्मि जगत्सुजातस्त्वया गते यद्बहुमानपात्रमिति । न च तत्रापि जातोऽस्मीत्यन्वयसम्भवेन निर्धारणमिति तु ।

दासे कृतागसि भवत्युचितप्रभूणां पादप्रहार इति सुन्दरि नास्मि दूये ।
उद्यत्कठोरपुलकाङ्कुरकंटकाग्रैर्यत्खिद्यते तव पदं ननु सा व्यथा मे ॥

इति गणव्याख्याने दूय इत्यस्य सत्त्वादस्मीत्यस्य निराबाधमहमित्यर्थकता स्वीकार्याऽन्यथा वैय्यर्थ्यादित्यभिधानादपास्तम् ॥ ३८ ॥

सुमनोरञ्जिनी — सः गुणादिभिः आत्मतुल्यः । इन्दिरायाः पतिः त्वं मया । अभिवृतः पतित्वे प्रार्थितः । यस्मात् । त्वं भक्तप्रियः कृपणलोकशरण्यः ईशश्च। तस्मात् एतत् मम मनोगतं मत्वा । तव पादसरोजदास्याः कामं अभिलषितं कुरु ॥ ३८ ॥

तन्मे भवान् खलु वृतः पतिरङ्ग जायामात्माऽर्पितश्च भवतोऽत्र विभो विधेहि ।
मा वीरभागमभिमर्शतु चैद्य आराद् गोमायुवन्मृगपतेर्बलिमम्बुजाक्ष ॥ ३९ ॥

सत्यधर्मीया – खल्वितरान् प्रतिषिद्ध्य भवान् पतिर्वृतस्तत्त्वेन वृतोऽङ्ग विभो जायां धेहि । कुर्वित्यनुक्त्वा विधेहीत्युदीरयन्ती हे विधे त्वमपि साहित्रीं विधेहीति कटाक्षितो धातेति सूचयति । न मे धातेति वक्ष्यमाणानुकूल्यात् । अयमात्मा देहो भवतोऽर्पितश्च । लग्नदिना समीपलग्नानीति न विलम्बमवलम्ब स्वान्तराया अन्तरा यास्यन्तीत्याह ॥ **मेति** । चैद्य आरात्समीपे वीरभागं माऽभिमर्शतु माऽयम् । तत्र निदर्शनमाह ॥ **मृगपतेर्बलिं गोमायुरिवेति** । वीरो गरुडप्रेरकस्तत्तुरगो हरिस्तस्य भागः । मा चासौ वीरभागश्च तमिति वा रमारूपं त्वद्भागं न मृशत्वित्यन्वयः ॥ ३९ ॥

सुमनोरञ्जिनी — हे अङ्ग ! मे मया । आत्मा देहः । भवतोऽर्पितश्च अर्पित एव । तत् तस्मात् । मां जायाम् । विधेहि । कुतः । वीरस्य तव । भागं योग्यां मां, अत एव मृगपतेर्बलिमिव स्थिताम् । गोमायुवत् गोमायुतुल्यः चैद्यः माभिमर्शतु मा स्पृशतु । आरात् कालतः शीघ्रमिति यावत् ॥ ३९ ॥

पूर्तेष्टदत्तनियमव्रतदेवविप्रगुर्वर्चनादिभिरलं भगवान् परेशः ।
आराधितो यदि गदाग्रज एत्य पाणिं गृह्णातु मे न दमघोषसुतादयोऽन्ये ॥ ४० ॥

सत्यधर्मीया — परोक्षप्रिया इव हि देवा इत्यादेः पारोक्ष्येण विज्ञापयति ॥ **पूर्तेति** । पूर्तं कूपारामादि इष्टं यजनं दत्तं दानं नियमो वाङ्नियमनं व्रतं कृच्छ्रचान्द्रायणादि देवार्चनं विप्रार्चनं गुर्वर्चनमादिर्येषां तैः । भगवान्परेशो यर्ह्यलमाराधितो मया तर्हि गदाग्रज एत्य पाणिं गृह्णातु । दमघोषसुतादयोऽन्ये न गृह्णन्तु ॥ ४० ॥

सुमनोरञ्जिनी — पूर्तं अन्नदानादि । इष्टं यजनं, दत्तं हिरण्यादि । नियमः तीर्थाटनादि । व्रतं चान्द्रायणादि । गदाग्रजः श्रीकृष्णः ॥ ४० ॥

श्वोभाविनि त्वमजितोद्वहने विदर्भान् गुप्तान् समेत्य पृतनापतिभिः समेतैः ।
निर्मथ्य चैद्यमगधेन्द्रबलं प्रसह्य मां राक्षसेन विधिनोद्वह वीर्यशुल्काम् ॥ ४१ ॥

सत्यधर्मीया — लोकरीत्या परोक्षत उक्त्वा नित्यापरोक्षीकृततत्केत्यपरोक्षतोऽपि वदति । श्व इत्यव्ययम् । ततः सप्तम्या लोपः । उषसि भाविन्यजितत्वं विदर्भान् देशान् पृतानापतिभिः समेतैर्गुप्तान् समेत्य चैद्यमगधेन्द्रबलं निर्मथ्य प्रसह्य बलात्कृत्य राक्षसेन विधिना वीर्यमेव शुल्कं यस्याः सा तामुद्वह । ब्राह्मे विवाहे बन्धुशीलश्रुतारोग्यानि बुद्ध्वा प्रजा सहँकर्मभ्यः प्रतिपादयेत् । शक्तिविषयेणालङ्कृत्वा । आर्षे दुहितृमते मिथुनौ गावौ देयौ। दैवे यज्ञतन्त्रऋत्विजे प्रतिपादयेत् । सहधर्मं चरत इति । प्राजापत्यो मिथः कामान्संवर्तते स गान्धर्वः। शक्तिविषयेण द्रव्याणि दत्वा वहेरन्नासुरः । दुहितृमतः पोथयित्वा वहेत्स राक्षसः । सुप्तानां प्रमत्तानां वाऽपहरेत्स पैशाचः । तेषां त्रय आद्याः प्रशस्ताः । पूर्वः पूर्वः श्रेयानित्यापस्तम्बसूत्रेषूक्ते राक्षसं समं सम्मतिरिति च गान्धर्वपरिणयनमिदमिति ज्ञेयम् । सूत्रे त्रय आद्यः प्रशस्ता इत्युक्तिश्चतुर्थोपलक्षणपरेति ज्ञेयम् । प्रशस्तांश्चतुरः पूर्वानिति मनूक्तेः । मां रमारूपिणीं शुल्कं चाबलामौल्यम् ॥ ४१ ॥

सुमनोरञ्जिनी — अधुनापि समयो नातीतः । अतः शीघ्रमागन्तव्यमित्यभिप्रायेणाह ॥ **श्व इति** । हे अजित ! उद्वहने विवाहे । श्वो भाविनि भविष्यति सति । तत्पूर्वं त्वं विदर्भान् देशान् समेत्य चैद्यमगधेन्द्रबलं निर्मथ्य । समेतैः पृतनाधिपतिभिः सेनापतिभिः गुप्तां

रक्षिताम् । वीर्यं पराक्रम एव शुल्कं मौल्यं यस्याः सा ताम् । मां प्रसह्य बलात् राक्षसेन विधिना । उद्वहेत्यन्वयः ॥ ४१ ॥

अन्तःपुरान्तरचरान्नविहत्य बन्धूंस्त्वामुद्वहे कथमिति प्रवदाम्युपायम्।
पूर्वेद्युरस्ति महती कुलदेवियात्रा यस्यां बहिर्नववधूर्गिरिजामुपेयात् ॥ ४२ ॥

सत्यधर्मीया – ननु सेना साऽपि सेना महती त्वं त्वन्तश्चरी कथं घटनेति न वद अवद वद न तव दुश्शकं किञ्चित्तथाऽप्ययमुपायो न प्रायश्चिन्तितः कान्त तमवधारयेति वक्ति ॥ **अन्तरिति** । अन्तःपुरे तत्राप्यन्तरे चरतीति साऽन्तःपुरान्तरचरी । बन्धूंस्तवाविहत्य अहत्वा । एतेन वादोऽनु पादनुकूलो मामुद्वहेत्यत्र बन्धुवधमविधायेति प्रपूर्य प्राग्व्याख्येय इति सूचितं भवति । त्वां कथं केन प्रकारेणोद्वह इति शङ्कसे चेदिति शेषः । उपायमनायासेन मन्नयनसाधनं प्रवदामि । यद्दिने लग्नं तत्पूर्वेद्युः पूर्वदिने परम्परागतैका कुलदेवियात्रा कुलदेवतालयगमनमस्ति । चेत् किमित्यंत आह । यस्यां यात्रायां नववधूः नूतनकन्या । गिरिजां द्रष्टुं बहिरुपेयादागच्छेदिति । नादः कार्यं हातुं शक्यमित्याह ॥ **महतीति** ॥ ४२॥

सुमनोरञ्जिनी — ननु अन्तःपुरे स्थितायाः बन्धुभिः परिरक्षितायाः प्रसह्य हरणं बन्धुहननमन्तरा कथं स्यादित्यत आह ॥ **अन्तरिति** । अन्तःपुरान्तरचरान् बन्धून् । अविहत्य । असंहृत्य त्वां कथमुद्वहे इति चेत् । उपायं प्रवदामि । पूर्वेद्युः विवाहात् पूर्वेद्युः । यस्यां यात्रायाम् । नववधूः । गिरिजां अम्बिकां दर्शनार्थमुपेयात् ॥ ४२ ॥

तत्रैत्य मां रथपदातिगजाश्वयुक्तः सम्मथ्य साल्वमगधान् सहचेदिभूपान् ।
आदाय मां सहचरीभिरथो रमेशो गृह्णातु पाणिमुपनीय पुरीं स्वकीयाम् ॥ ४३ ॥

सत्यधर्मीया — तत्र तत्समये पदातिगजाश्वयुक्तैः सह चेदिभूपान्साल्वमागधान्सम्मथ्य रमेशः सहचरीभिः परिवृतां मामादाय सहभावमात्रं सहचरीणां नानयने स्वसुतैः सार्धं भारं वहति गर्दभीत्यादिवदिति ज्ञेयम् । स्वपुरीमुपनीय च मम पाणिं गृह्णातु । आदाय समुदायो यौतकादिधनं तद्रूपिणी चासावहं च तां मामिति पदमेकं वा । तद्रूपिणी चासौ मा रमा चेति वा । यौतकादि तु यद्देयं सुदायो हरणं च तत् । दायो दाने यौतकादिधने सोल्लुण्ठ-भाषितेति विभक्ते वश्यादिद्रव्ये दायमाहुर्मनीषिण इत्यमरविश्वौ । वश्यं स्वोपभोगयोग्य-

मित्यर्थः । अत आदायोपनीययोर्मध्ये नान्यतरवैय्यर्थ्यशङ्केति ध्येयम् । स्वकीयामिति मामित्यस्य पुरीमित्यस्य च प्राचीनपक्षे विशेषणमिति मन्तव्यम् ॥ ४३ ॥

सुमनोरञ्जिनी — सहचरीभिः सखीभिः सह स्थिताम् ॥ ४३ ॥

यस्याङ्घ्रिपङ्कजरजःस्तवनं महान्तो वाञ्छन्त्युमापतिरिवात्मतमोपहत्यै ।
यद्यम्बुजाक्ष न लभेय भवत्प्रसादं जह्यामसून् व्रतकृशा शतजन्मभिः स्याम् ॥४४॥

सत्यधर्मीया — स्वादरकारणमनागमने करणीयं च स्वेन विज्ञापयति ॥ **यस्येति** । यस्य तवाङ्घ्रिपङ्कजयोर्ज्ञानानन्दयोः स्तवनं स्तुतिमुमापती रुद्र इव यथाऽऽत्मतमोपहत्यै स्वाज्ञानहानाय स्तवनं करोति । निदर्शनं धातारमविधाय विधाय हरं न मम त्र्यम्बकाम्बिकायात्रा शर्वादिसर्वनियन्तुस्तव भार्याया आवश्यकीति बहिरुपयानं किन्तु कान्त तव सङ्गत्या इति ध्वनयामासेति ज्ञेयम् । महान्तो वाञ्छन्ति तस्य तव भवत्प्रसादं भवन्मद्विषय इदानीं सत्तां लभमानश्चासौ प्रसादोऽनुग्रहश्च तम् । मन्नयनरूपमहं न लभेय नाप्नुयां तर्ह्यम्बुजाक्षासून् जह्याम् । अनेन वधूवधदोषस्तवायास्यतीति द्योतयति । यमुद्देश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकमित्यादेः । मम दोषो वाऽदोषो वा रमणि मरणे तव को लाभ इत्यत आह ॥ **व्रतकृशा शतजन्मभिर्वा स्याम्** । तव भार्येति शेषः । भार्येत्याद्यनुक्त्वा कण्ठतो वैकुण्ठ तवोरःस्थिता स्यामिति स्वोत्कण्ठां ध्वनयतीति ध्येयम् । व्रतकृशाऽ-सूञ्जह्याम् । व्रतकृशा शतजन्मभिरित्यन्वयः । यस्य भवत इत्येकदेशान्वय इत्यन्ये ॥ ४४ ॥

सुमनोरञ्जिनी — हे अम्बुजाक्ष ! आत्मतमोनिहत्यै स्वीयाज्ञानपरिहाराय । यस्य तव । अङ्घ्रिपङ्कजरजस्तवनम् । उमापतिरिव महान्तो वाञ्छन्ति । तस्य भवतः । प्रसादम् यद्यहं न लभेय न प्राप्नुयाम् । तर्हि व्रतैः अनशनादिभिः । कृशान् असून् प्राणान् जह्यां त्यक्ष्यामि । ततः किमित्यत आह । **शतजन्मभिर**पि त्वद्भार्यैव **स्यामिति** ॥ ४४ ॥

श्रीशुक उवाच –

इति पत्रगतं विश्वं विमृश्य मधुसूदनः ।
सन्देशं राजकन्यायास्तं ब्राह्मणमवैक्षत ॥ ४५ ॥

सत्यधर्मीया — विश्वं समस्तं सन्देशं विमृश्य तमागतम् ॥ ४५ ॥

सुमनोरञ्जिनी-इति पत्रगतं विश्वं समस्तं राजकन्यायाः रुग्मिण्याः सन्देशं विज्ञापनम् ॥

ब्राह्मण उवाच —

इत्येते गुह्यसन्देशा यदुदेव मयाऽऽहृताः ।
विमृश्य युक्तं यच्चात्र क्रियतां तदनन्तरम् ॥ ४६ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे सप्तपञ्चाशोऽध्यायः ॥

सत्यधर्मीया — गुह्या अन्यस्यानाख्येयाः । अत्रैतत्समय एतन्मध्ये वा । यदुक्तमनन्तरं क्रियताम् ॥ ४५ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे सप्तपञ्चाशोऽध्यायः ॥ १०-५७ ॥

सुमनोरञ्जिनी — अत्र यत् युक्तं योग्यं तद्विमृश्य क्रियताम् । तदपि अनन्तरमेव अव्यवधानेनैव क्रियताम् ॥ ४५ ॥

॥ इति श्रीमद्भागवतदशमस्कन्धोत्तरार्धव्याख्यायां सुमनोरञ्जिन्यां सप्तपञ्चाशोऽध्यायः ॥

॥ अथ अष्टपञ्चाशोऽध्यायः ॥

श्रीशुक उवाच—

वेदर्भ्याः स तु सन्देशं निशम्य यदुनन्दनः ।
प्रगृह्य पाणिना पाणिं प्रहसन् द्विजमब्रवीत् ॥ १ ॥

सत्यधर्मीया — स तु कृष्णोऽपि । तं त्विति पठन्ति । पाणिना स्वस्य पाणिं द्विजस्य । तं तत्त्वेन विभाव्य पाणिं गृहीत्वैवं तत्पाणिं गृह्णामीत्यसूचयच्चतुरतर इति ज्ञेयम् ॥ १ ॥

तथाऽहमपि तच्चित्तो निद्रां नाध्यगमं निशि ।
वेदाहं रुग्मिणा द्वेषान्ममोद्वाहो निवारितः ॥ २ ॥

सत्यधर्मीया — अहमपि तच्चित्तस्तन्मनस्को निशि निद्रां नाध्यगमम् । रुग्मिणा द्वेषान्ममोद्वाहो निवारित इत्यहं वेद ॥ २ ॥

सुमनोरञ्जिनी — यथा सा मच्चित्ता सती निद्रां न लभते तथाऽहमपि तच्चितः तस्यामेव चित्तं यस्य सः । अन्यच्च निद्राया अलाभे निमित्तमाह ॥ वेदेति । मयि द्वेषात् । मम विवाहो निवारित इति यत् तदहं वेदेति ॥ २ ॥

तामानयिष्य उन्मथ्य राजन्यापसदान् मृधे ।
मत्परामनवद्याङ्गीमेधसोऽग्नेः शिखामिव ॥ ३ ॥

सत्यधर्मीया — राजन्यापसदांस्तन्नीचान् । उन्मथ्येत्युत्त्यनुरूपं निदर्शनमाह । एधसः काष्ठान्मथितादग्नेः शिखां यथा याज्ञिका निष्कासयन्ति तथाऽनयिष्ये ॥ ३ ॥

सुमनोरञ्जिनी — आनयिष्ये आनेष्यामि । राजन्यापसदान् राजन्येषु राजसु अपसदान् नीचान् । एधसः काष्टात् अरण्यादिरूपात् । अग्निज्वालाम् ॥ ३ ॥

उद्वाहर्क्षं च विज्ञाय रुग्मिण्या मधुसूदनः ।
रथः संयुज्यतामाशु दारुकेत्याह सारथिम् ॥ ४ ॥

सत्यधर्मीया — उद्वाहर्क्ष्यं विवाहनक्षत्रम् ॥ ४ ॥

सुमनोरञ्जिनी — रुग्मिण्याः पत्रद्वारा उद्वाहर्क्षम् । ... रात्रौ विवाहनक्षत्रमिति विज्ञाय । रुग्मिण्याः उद्वाहर्क्षमिति वा ॥ ४ ॥

स चाश्वैः शैब्यसुग्रीवमेघपुष्पबलाहकैः ।
युक्तं रथमुपानीय तस्थौ प्राञ्जलिरग्रतः ॥ ५ ॥

आरुह्य स्यन्दनं शौरिर्द्विजमारोप्य तूर्णगैः ।
आनर्तादेकरात्रेण विदर्भानगमद्धयैः ॥ ६ ॥

सत्यधर्मीया — प्राञ्जलिः स दारुकोऽग्रतस्तस्थौ । आरोप्य च द्विजवरमनन्तरं स्वय-मारुह्य हयैर्युक्तं स्यन्दनम् ॥ ५,६ ॥

सुमनोरञ्जिनी — शैब्य इत्यादिचत्वार्यश्वनामानि । तन्नामकैः अश्वैः युक्तम् ॥ हयैः युक्तम् । स्यन्दनमित्यन्वयः ॥ ५,६ ॥

राजा स कुण्डिनपतिः पुत्रस्नेहवशंगतः ।
शिशुपालाय स्वां कन्यां दास्यन् कार्याण्यकारयत् ॥ ७ ॥

सत्यधर्मीया — स्वां कन्यामिति पाठे न स्वलाघवम् । शिशुपालाय स्वामिति पठञ्छिशुपाललाघवं यल्लघुपठनीयतयाऽसूचयदिति मन्तव्यम् । कार्याणि स्वस्तिवाचन-हरिद्रालेपनादीनि ॥ ७ ॥

सुमनोरञ्जिनी — राजा भीष्मकः । पुत्रस्नेहवशं गतः । अनेन राज्ञः शिशुपालाय कन्यादानविषयेऽरुचिः सूचिता । कार्याणि विवाहकालोचितानि ॥ ७ ॥

पुरं सम्मृष्टसंसिक्तमार्गरथ्याचतुष्पथम् ।
चित्रध्वजपताकाभिस्तोरणैः समलङ्कृतम् ॥ ८ ॥

सत्यधर्मीया — तान्येव विशदयति – **पुरमिति** ॥ सम्मृष्टा अवकरादिना मार्जिता अनन्तरं संसिक्ता मलयजजलसिक्ता रथ्या महावीथ्याश्चतुष्पथा मार्गचतुष्टयसङ्गमस्थानानि । चतुष्पथश्चतुर्मार्गसङ्गम इति विश्वः । यस्मिंस्तच्चित्रध्वजपताकाभिरेकजिव्हाद्विजिव्हाभिः ॥८॥

सुमनोरञ्जिनी — तान्येवाह । संमृष्टाः समूहिताः । संसिक्ताः सुगन्ध्युदकादिभिः उक्षिताः मार्गादयो यस्मिन् तत् । चित्रैः ध्वजैः पताकादिभिश्च समलङ्कृतम् । अकारयदित्यनुवर्तते ॥ ८ ॥

स्रग्गन्धमाल्याभरणैर्विरजाम्बरभूषणैः ।
जुष्टं स्त्रीपुरुषैः श्रीमद् गृहैरगरुधूपितैः ॥ ९ ॥

सत्यधर्मीया — माल्यानीह पुष्पाण्येव स्रगिति पृथगुक्तेः । अथवा स्रजो मुक्तामण्यादिमालाः । विरजेति गतम् । अगरुधूपितैः श्रीमद्गृहैर्जुष्टमित्यन्वयः ॥ ९ ॥

सुमनोरञ्जिनी — स्रग्गन्धमाल्याभरणैः मत्वर्थीयोऽच् । तद्विशिष्टैरित्यर्थः । तथा विरजाम्बरैः निर्मलवस्त्रैः भूषितैश्च स्त्रीपुरुषैः जुष्टम् । अगरुधूपितैः श्रीमद्भिः गृहैश्च जुष्टम् ॥ ९ ॥

पितृन् देवान् समभ्यर्च्य विप्रांश्च विधिवन्नृपः ।
भोजयित्वा यथान्यायं वाचयामास मङ्गलम् ॥ १० ॥

सत्यधर्मीया — विप्रान्समभ्यर्च्य भोजयित्वा चेत्यन्वयः । मङ्गलं स्वस्तिवाचनम् ॥

सुमनोरञ्जिनी — कन्यां प्रति मङ्गलम् । ब्राह्मणैः वाचयामास ॥ १० ॥

सुस्नाता सुदती कन्या कृतकौतुकमङ्गला ।
अहतांशुकयुग्मेन भूषिता भूषणोत्तमैः ॥ ११ ॥

सत्यधर्मीया — कृतं कौतुकबन्धनोपयुक्तं मङ्गलं यस्याः सा । कौतुकं विवाहसूत्रं कङ्कणदोरमिति याज्ञिकाः । अथवाऽऽबध्नन्ति करे सूत्रं माङ्गल्यार्थं नवं स्त्रियः । कौतुकं विषयाभोगे हस्तसूत्रे कुतूहले । कामे ख्याते मङ्गले चेति विश्वयादवौ । अहतांशुकेति नूतनताऽभिधायिनौ शब्दौ ॥ ११ ॥

सुमनोरञ्जिनी — कृतकौतुकमङ्गला । कृतं कौतुकेन हर्षेण मङ्गलं यस्याः सा । कृतं कौतुके उत्सवे मङ्गलं यस्या इति वा । कृते कौतुकमङ्गले यस्याः । कौतुकं गीतनर्तनादि-

भोगः । यद्वा कृतं कौतुकं विवाहसूत्रलक्षणं मङ्गलं यस्याः सा तथा । कौतुकं चाभिलाषे स्यादुत्सवे नर्महर्षयोः । विवाहसूत्रगीतादिभोगे कालेषु च स्मृतमिति विश्वः । अहतं नूतनं अंशुकयुग्मं सूक्ष्मवस्त्रयुगलं तेन । अंशुकं सूक्ष्मवस्त्रे स्याद्वस्त्रमात्रोत्तरीययोरिति च । भूषणोत्तमैश्च भूषिता । अभूदिति शेषः ॥ ११ ॥

चक्रुः सामर्ग्यजुर्मन्त्रैर्वध्वा रक्षां द्विजोत्तमाः ।
पुरोहितोऽथर्वमन्त्रैर्जुहाव ग्रहशान्तये ॥ १२ ॥

सत्यधर्मीया — सामर्ग्यजुमन्त्रैर्द्विजोत्तमा वध्वा रक्षाश्चक्रुः । ग्रहशान्तये पुरोहितोऽथर्ववित् ग्रहमारकमन्त्राणां तत्रैव सत्त्वात् ॥ १२ ॥

सुमनोरञ्जिनी — अथर्ववित् आथर्वणमन्त्रवित् । ग्रहाणां सूर्यादिनवग्रहाणां शान्तये सन्तोषाय ॥ १२,१३ ॥

हिरण्यरूप्यवासांसि तिलांश्च गुडमिश्रितान् ।
प्रादाद् धेनूश्च विप्रेभ्यो राजा विधिविदां वरः ॥ १३ ॥

सत्यधर्मीया — गुडमिश्रितांस्तिलान् विधिविदां वरः स्वयम् ॥ १३ ॥

एवं चेदिपती राजा दमघोषः सुताय वै ।
कारयामास मन्त्रज्ञैः सर्वमभ्युदयोचितम् ॥ १४ ॥

सत्यधर्मीया — चेदिपातिर्दमघोषो राजा । अभ्युदयोचितं बहिरन्तरर्थस्तु । अभ्यवज्ञात उदयोऽभ्युदयस्तदुचितमिति । मन्तृष्वज्ञा मन्त्रज्ञास्तैरिति च ॥ १४ ॥

सुमनोरञ्जिनी — चेदिपतिः तद्देशाधिपतिः नामतो दमघोषः । सुताय शिशुपालाय अभ्युदये उचितम् ......बन्धनादिकम् ॥ १४ ॥

मदच्युद्भिर्गजानीकैः स्यन्दनैर्हेममालिभिः ।
पत्त्यश्वसङ्कुलैः सैन्यैः परीतः कुण्डिनं ययौ ॥ १५ ॥

सत्यधर्मीया — स्वग्रामे कारयित्वा कुण्डिनं ययौ ॥ १५ ॥

सुमनोरञ्जिनी — मदं च्यवन्त इति मदच्युतः । तैः गजानीकैः । स्यन्दनैः रथैः । हेममालिभिः हेममय्यो मालाः विद्यन्ते येषु तैः । परीतः परिवृतः । कुण्डिनं पुरम् ॥ १५ ॥

तं वै विदर्भाधिपतिः समेत्याभिप्रपूज्य च ।
निवेशयामास मुदा कल्पितान्यनिवेशने ॥ १६ ॥

सत्यधर्मीया — समेत्य सम्मुखं गत्वा प्रपूज्य च कल्पितं तदर्थमन्यन्निवेशनं तस्मिन् ॥ १६ ॥

सुमनोरञ्जिनी — समेत्य अभिमुखं गत्वा । तदर्थं कल्पिते निर्मिते अन्यस्मिन् निवेशने गृहे ॥ १६ ॥

तत्र साल्वो जरासन्धो दन्तवक्रो विदूरथः ।
आजग्मुश्चैद्यपक्षीयाः पौण्ड्रकाद्याः सहस्रशः ॥ १७ ॥

सत्यधर्मीया — तत्र मण्डिते कुण्डिने ॥ १७ ॥

कृष्णरामद्विषो यत्ताः कन्यां चैद्याय साधितुम् ।
यद्यागत्य हरेत् कृष्णो रामाद्यैर्यदुभिर्वृतः ॥ १८ ॥

सत्यधर्मीया — यदि रामाद्यैर्यदुभिर्वृत आगत्य कृष्णो हरेदुद्योगं कुर्यात् तर्हि चैद्याय तां साधितुं साधयितुं स्वभावतः कृष्णरामद्विषो यत्ताः ॥ १८ ॥

सुमनोरञ्जिनी — यत्ताः सन्नद्धाः ॥ १८,१९ ॥

योत्स्यामः सहिताः सर्वे इति निश्चितमानसाः ।
आजग्मुर्भूभुजः सर्वे समग्रबलवाहनाः ॥ १९ ॥

सत्यधर्मीया — सर्वे सहिता मिलिता योत्स्याम इति निश्चितं मानसं येषां ते समग्रेति बलवाहनद्वयविशेषणम् ॥ १९ ॥

श्रुत्वैतद् भगवान् रामो विपक्षीयनृपोद्यमम् ।
कृष्णं चैकं गतं हर्तुं कन्यां कलहशङ्कितः ॥ २० ॥

सत्यधर्मीया — एतेन सन्निहितेनैव भगवानैश्वर्यादिमान् । यथेदानीं तथा नित्यं तस्मादेष भविष्यति । अत एतदिति प्रोक्त इति सर्वसन्निहितत्वादेतदिति बृहच्छान्दोग्य-भाष्योक्तेः । विपक्षीयनृपोद्यमं श्रुत्वा विपक्षीयाश्च ते नृपाश्च तेषामुद्यमो यस्मिंस्तदेतद्वृत्तमिति वा कलहो भवेदिति शङ्कावान् ॥ २० ॥

सुमनोरञ्जिनी — एतच्छ्रुत्वा । किं तत् । विपक्षीयनृपाणां साल्वादीनाम् । उद्यमं कन्यां हर्तुं गतम् । कृष्णमेकं चेत्येतत् ॥ २० ॥

बलेन महता सार्धं भ्रातृस्नेहपरिप्लुतः ।
त्वरितः कुण्डिनं प्रायाद् गजाश्वरथपत्तिभिः ॥ २१ ॥

सत्यधर्मीया — स्वयं महता बलेन युतो गजाश्वरथपत्तिभिश्च सार्धमित्यन्वयः ॥२१॥

सुमनोरञ्जिनी — परिप्लुतः क्लिन्नः ॥ २१ ॥

भीष्मकन्या वरारोहा काङ्क्षन्त्यागमनं हरेः ।
प्रत्यापत्तिमपश्यन्ती द्विजस्याचिन्तयत् तदा ॥ २२ ॥

सत्यधर्मीया — प्रत्यापत्तिं प्रत्यागमनम् ॥ २२ ॥

सुमनोरञ्जिनी — द्विजस्य प्रत्यापत्तिं प्रत्यागमनम् ॥ २२ ॥

अहो त्रियामान्तरित उद्वाहो मेऽल्पराधसः ।
नागच्छत्यरविन्दाक्षो नाहं वेद्म्यत्र कारणम् ॥ २३ ॥

सत्यधर्मीया — अल्पराधसोऽल्पसिद्धिमत्याः पुण्यहीनाया इति तात्पर्यम् । उद्वाह-स्त्रियामा रात्रिस्तन्मात्रव्यवहितः । त्रियामान्तरिता यस्य सः । त्रियामा क्षणदा क्षपेत्यमरः । अरविन्दाक्षो नागच्छति । अत्र तदनागमनकारणं न वेद्मि ॥ २३ ॥

सुमनोरञ्जिनी — मे उद्वाहः । त्रियामा रात्रिः । तावन्मात्रेण व्यवहितः । अल्प-राधसः मन्दभाग्यायाः । अरविन्दाक्षः श्रीकृष्णः । अत्र अनागमने ॥ २३ ॥

सोऽपि नावर्ततेऽद्यापि मत्सन्देशहरो द्विजः ।
अपि मय्यनवद्यात्मा दृष्ट्वा किञ्चिज्जुगुप्सितम् ॥ २४ ॥

मत्पाणिग्रहणे नूनं नायाति हि कृतोद्यमः ।

सत्यधर्मीया — सन्देशं गृहीत्वा तं देशं गतो विप्रोऽप्यद्यापि नावर्ततेऽत्र किं कारणं न वेद्मीत्यन्वयः । आदरातिशयादालस्याच्चाहो वध्वां धाष्ट्र्यं देशान्तरपुरुषान्तरमपरिचितचरं प्रति पत्रप्रेषणं कृतवतीति जुगुप्सितं दृष्ट्वा नागात्किमगधर इत्युत्प्रेक्ष्य वक्ति ॥ अपीति । मय्यनवद्यात्मा स्वयमिति किञ्चिज्जुगुप्सितं दृष्ट्वा मत्पाणिग्रहणे कृतोद्यमः सन्नायाति ह शोके ॥ २४ ॥

सुमनोरञ्जिनी — जुगुप्सितं निन्दितम् । धाष्ट्र्यादि, दृष्ट्वा पत्रलेखनतोऽनुमीय । कृतोद्यमोऽपि नायाति । अपीति संभावनायाम् ॥ २४ ॥

दुर्भगाया न मे धाता नानुकूलो महेश्वरः ॥ २५ ॥

देवी वा विमुखा गौरी रुद्राणी गिरिजा सती ।
एवं चिन्तयती बाला गोविन्दहृतमानसा ।
न्यमीलयत कालज्ञा नेत्रे अश्रुकलाकुले ॥ २६ ॥

सत्यधर्मीया — दुर्भागाया दुर्दैवाया धाता नानुकूलस्तथा महेश्वरोऽपि नानुकूलो देवी देवता रुद्राणी रुद्रभार्या । इन्द्रेत्याद्यानुक् । गिरिजा पार्वती दत्तोत्पत्तिमती यस्या-स्मादित्यनुबन्धद्वयबोधनार्थं विशेषणद्वयम् । विमुखा एवं चिन्तयती गौरी रुक्मवर्णेति चम्पकदामगौरीतिवच्चम्पकवर्णा गौरी स्यादप्रसूता स्त्री गौरी शुद्धोभयान्वयेत्यनेकार्थध्वनि-पदमञ्जर्यामुक्तोऽर्थो ज्ञेयः । बाला गोविन्दहृतमानसा सती अश्रुकलाकुले नेत्रे कालज्ञा उत्सवलवे कस्मात् किन्नयनयोर्नीरानयनमिति लोकाः शङ्केरन्निति कालज्ञा न्यमीलयत । गिरिजा स्वयं रुद्राणी सती मा स्ववत्पत्या योजयतीत्याक्रोशमपि विमुखेत्यनेनोङ्क्यामासेति वा ॥ २५,२६ ॥

सुमनोरञ्जिनी — यद्वा श्रीकृष्णो मद्विषये कृतोद्यमः स्यात् । तथापि मद्दैव-

प्रातिकूल्येन प्रतिबद्धः स्यादिति चिन्तयति ।। **दुर्भगाया इति** । गौरी स्यादप्रसूता स्त्रीति वचनाद्दशवार्षिकी काचनेति शङ्कां वारयितुं रुद्राणीत्युक्तम् । अन्या काचन तत्पत्नी स्यादिति संशयपरिहाराय गिरिजेति । सती निर्दुष्टा । पूर्वजन्मनि सतीशब्दवाच्या वा ।। कालज्ञा कालवशात्सर्वं भाव्यं भविष्यतीति मन्वाना । अधुनापि गोविन्दागमनकालो नातीत इति कालज्ञा वा । नायं चिन्ताप्रदर्शनकाल इति कालज्ञा वा । ध्यानकालज्ञेति पदरत्नावली । अश्रुकलाभिः अश्रुबिन्दुभिः आकुले पूर्णे नेत्रे । न्यमीलयत निमीलितवती ।। २६ ।।

एवं वध्वाः प्रतीक्षन्त्या गोविन्दागमनं नृप ।
वाम ऊरुर्भुजो नेत्रमस्फुरन् प्रियभाषिणः ।। २७ ।।

सत्यधर्मीया — वाम इति सद्विपरिणतं नेत्रपदेनान्वेति । वामं नेत्रं वाम ऊरुर्वामो भुजश्चास्फुरन् अचलन् प्रियभाषिण इव तत्सूचका इत्यर्थः । प्रतीक्षन्त्याः प्रतीक्षमाणायाः ।।

सुमनोरञ्जिनी — वामनेत्रं वाम ऊरुः । वामो भुजः । इत्येते । अस्फुरन् । प्रियभाषिणः अभीष्टसूचकाः ।। २७ ।।

अथ कृष्णविनिर्दिष्टः स एव द्विजसत्तमः ।
अन्तःपुरचरां देवीं राजपुत्रीं ददर्श ह ।। २८ ।।

सत्यधर्मीया — अथैवं शकुनानन्तरं स एव स्वप्रेषित एव कृष्णविनिर्दिष्टश्च द्विजसत्तमोऽन्तःपुरचरीं देवीं ददर्श । राजपुत्री शार्ङ्गरवादिना ङीनन्तो राज्ञो दुहिता राजपुत्री पुत्रवन्तो वा ।। २८ ।।

सुमनोरञ्जिनी – पुरसमीपं प्राप्तेन । श्रीकृष्णेन विनिर्दिष्टः प्राप्तं मां कथयेत्यादिष्टः ।।

सा तं प्रहृष्टवदनमव्यग्रात्मगतिं सती ।
आलक्ष्य लक्षणाभिज्ञा तमपृच्छच्छुचिस्मिता ।। २९ ।।

सत्यधर्मीया — विप्रमुखमुखनिरीक्षण एव स्वसुखमाप्तमिति मन्वाना तन्वाङ्गी तमप्राक्षीद्विप्रमिति प्राह ।। **सेति** । प्रहृष्टवदनमव्यग्रं यथा तथाऽऽत्मगतिरात्मानं प्रति गतिर्यस्य तमालक्ष्य लक्षणानि जानातीति शुचिस्मिता तमपृच्छत् ।। २९ ।।

सुमनोरञ्जिनी — अव्यग्रा आत्मानं प्रति गतिः गमनं यस्य तम् । आलक्ष्य स्वयं तु लक्षणाभिज्ञा । कृतकार्यस्य दूतस्य लक्षणान्यभिजानातीति तथा । कृतकार्यं जानमाना शुचिस्मिता । भूत्वेति भावः ॥ २९ ॥

आवेदयामास तस्यै सम्प्राप्तं यदुनन्दनम् ।
उक्तं च सत्यवचनमात्मोपनयनं प्रति ॥ ३० ॥

सत्यधर्मीया — का वार्तेति पृष्टः स तस्यै सम्प्राप्तं यदुनन्दनमावेदयामास । न ह्यागमनमात्रेण प्रयोजनं जातमित्यत आह । आत्मोपनयनं प्रत्यात्मनस्तवोपनयनं प्रति सत्यवचनं शपथः सत्यं तत्पूर्वकं वचनम् । उक्तं चावेदयामास । सत्यं च शपथे तथ्य इति विश्वः ॥ ३० ॥

सुमनोरञ्जिनी — तस्यै । प्राप्तं यदुनन्दनम् । आवेदयामास शशंस । आत्मनः स्वस्याः उपनयनं द्वारकां प्रतिनयनं (प्रति) । श्रीकृष्णेन यत् सत्यवचनमुक्तं तामानयिष्य उन्मथ्य राजन्यापसदान्मृध इत्यादि तच्च आवेदयामास ॥ ३० ॥

तमागतं समाज्ञाय वैदर्भी हृष्टमानसा ।
न पश्यन्ती ब्राह्मणाय प्रियमन्यन्ननाम सा ॥ ३१ ॥

सत्यधर्मीया — तं कृष्णं समाज्ञाय ज्ञात्वा प्रियं ब्राह्मणायान्यद्दातुमेतदुपकृतिप्रत्युपकृतिरूपमपश्यन्ती सा ननाम ॥ ३१ ॥

सुमनोरञ्जिनी — तं श्रीकृष्णं ब्राह्मणाय दातुं प्रियं वस्तु । पर्याप्तं न पश्यन्ती तत्प्रत्युपकाराय । सर्वस्वमप्यपर्याप्तं जानमानेत्यर्थः । मां प्रणतानां सर्वसम्पदः सुलभाः भवन्ति । किं पुनः मयि प्रणतायामिति भावेन केवलं ननामेति भावः ॥ ३१ ॥

प्राप्तौ श्रुत्वा स्वदुहितुरुद्वाहप्रेक्षणोत्सुकौ ।
अभ्ययात् तूर्यघोषेण रामकृष्णौ समर्हणैः ॥ ३२ ॥

सत्यधर्मीया — स्वदुहितुर्लोकदृष्ट्या । वस्तुतस्तु सु अदुहितुरिति तदर्थः । उद्वाहप्रेक्षणौत्सुकौ तत्रैकः कन्योद्वहनोत्सुको रथोपर्यारोप्य नेतुं समयसमालोकनोत्सुक एकस्तद्दर्शनोत्सुक इति विवेकः । समर्हणैरर्ह्यते एभिरिति तत्साधनैस्तूर्यघोषेण सहाभ्ययात् ॥३२॥

सुमनोरञ्जिनी — स्वदुहितुः रुग्मिण्याः । उद्वाहस्य प्रेक्षणे उत्सुकौ रामकृष्णौ प्राप्तौ । श्रुत्वा ॥ ३२ ॥

मधुपर्कमुपानीय वासांसि रुचिराणि सः ।
उपायनान्यभीष्टानि विधिवत् समपूजयत् ॥ ३३ ॥

सत्यधर्मीया — मधुपर्कमुपानीय गतम् । रुचिराणि वासांसि चोपनीयेत्यन्वयः । अभीष्टान्युपनयनानि विधिवत्समपूजयत् । विधिर्वत्सो यस्य तं विरिञ्चतातमित्यप्यान्तरङ्गिको भावः ॥ ३३ ॥

सुमनोरञ्जिनी — सः भीष्मकः ॥ ३३ ॥

तयोर्निवेशनं श्रीमदुपकल्प्य महामतिः ।
बाह्योद्याने कुण्डिनस्य यथायोगं सुविस्तृतम् ॥ ३४ ॥

सत्यधर्मीया — श्रीमन्निवेशनं गृहं कुण्डिनस्य बाह्योद्यान उपकल्प्य यथायोगं सुविस्तृतं विशालम् ॥ ३४ ॥

सुमनोरञ्जिनी — तयोः रामकृष्णयोः । निवेशनम् । उपकल्प्य । यथा यथायोग्यं आतिथ्यं विदध इत्यन्वयः ॥ ३४ ॥

आवेद्य पूर्णं नगरं जरासन्धादिभिर्नृपैः ।
ससैन्ययोः सानुगयोरातिथ्यं विदधे यथा ॥ ३५ ॥

सत्यधर्मीया — किमन्तर्निवेशोऽनन्तस्येत्यत आह ॥ **आवेद्येति** । जरासन्धादिभिर्नृपैर्नगरं पूर्णमावेद्य निरूपयित्वा यथा सम्यक् गतम् ॥ ३५ ॥

सुमनोरञ्जिनी — पुरं विहाय । बाह्योद्याने निवेशनकरणे निमित्तमाह ॥**आवेद्येति** ॥ ३५ ॥

एवं राज्ञां समेतानां यथावीर्यं यथावयः ।
यथाबलं यथावित्तं सर्वैः कामैः समर्हयत् ॥ ३६ ॥

सत्यधर्मीया — समर्हयत्समार्हयत् ॥ ३६ ॥

सुमनोरञ्जिनी — यथाबलं बलं सैन्यम् । समेतानां राज्ञां मध्ये । तेषां वीर्याद्यनतिक्रमेण समर्हयत् पूजयामासेत्यर्थः ॥ ३६,३७ ॥

कृष्णमागतमाकर्ण्य विदर्भपुरवासिनः ।
आगत्य नेत्राञ्जलिभिः पपुस्तन्मुखपङ्कजम् ॥ ३७ ॥

सत्यधर्मीया — विदर्भपुरवासिन्यश्च वासिनश्च ते ॥ ३७ ॥

अस्यैव भार्या भवितुं रुग्मिण्यर्हति नापरा ।
असावप्यनवद्यात्मा भैष्म्याः समुचितः पतिः ॥ ३८ ॥

सत्यधर्मीया — भैष्म्याः पतित्वं न परीक्षणीयं कृष्णस्य राज्ञो लवयापनेनेति स्वयं कर्णेष्वजपन्नित्याह ॥ **अस्यैवेति** । अस्यैव कृष्णस्यैव रुग्मिणी भार्या भवितुमर्हति । अपरैतदितरा रमेतरेति यावत् । असावप्यनवद्य आत्मा देहो यस्य सः । भैष्म्याः समुचितः पतिस्तत्प्रभृति जनवाक्ये जनार्दन इत्याभाणकं प्रससार लोक इति ज्ञेयम् ॥ ३८ ॥

सुमनोरञ्जिनी — रुग्मिणी अस्य श्रीकृष्णस्य भार्या भवितुमर्हति । भैष्म्यास्तु समुचितः पतिः असावेवेत्यन्वयः । अपिः पूर्वोक्तावधारणस्याकर्षणार्थः ॥ ३८ ॥

किञ्चित् सुचरितं यन्नस्तेन तुष्टस्त्रिलोककृत् ।
अनुगृह्णातु गृह्णातु वैदर्भ्याः पाणिमच्युतः ॥ ३९ ॥

सत्यधर्मीया — यत्किञ्चित्सुचरितं ज्ञानपूर्वकमाचरितं सत्कर्म नः किमप्यस्ति चेत्तेन त्रिलोककृत्पाणिमच्युत एतत्पाणिग्रहणार्थं सिद्धपाणिः पाणिमान् शिशुपालश्च्युतो येन स इति त्रिलोककृदित्यनेनान्वयः । तुष्टोऽनुगृह्णात्वनुग्रहं करोतु । किं तदनुग्रहणमिति प्रश्न उत्तरं वैदर्भ्याः पाणिं हस्तमच्युतो गृह्णातु । अपारसुकृतलभ्यं दर्शनमिति किञ्चिदिति न सरसमस्मदुत्तमापेक्षया किञ्चिदिति वचनं वा ॥ ३९ ॥

सुमनोरञ्जिनी — नः अस्माकं यत्सुचरितम् । इह जन्मनि जन्मान्तरे वाऽर्जितमस्ति तेन तुष्टः । त्रिलोककृत् सर्वस्रष्टा श्रीहरिः । अस्माननुगृह्णातु । कोऽयमनुग्रह इत्यतः अयमेवेति निर्दिशन्ति । **गृह्णात्विति** ॥ ३९ ॥

एवं प्रेमकलाबद्धा वदन्ति स्म पुरौकसः ।
कन्या चान्तःपुरात् प्रागाद् भटैर्गुप्ताऽम्बिकालयम् ॥ ४० ॥

सत्यधर्मीया — वदन्ति स्म स्मातीते । इत्यवदन् गुप्ता रक्षिता ॥ ४० ॥

सुमनोरञ्जिनी — प्रेम्णः कलाभिः अंशैः आबद्धाः । एवं वदन्ति स्म । अस्मिन्नेव काले । कन्या च कन्यापि । भटैः गुप्ता रक्षिता ॥ ४० ॥

पद्भ्यां विनिर्ययौ द्रष्टुं भवान्याः पादपङ्कजम् ।
परिवारैः कतिपयैर्युक्तो यादवनन्दनः ।
सा चानुध्यायती सम्यङ् मुकुन्दचरणाम्बुजम् ॥ ४१ ॥

सत्यधर्मीया — भवानीं हरतरुणीं द्रष्टुमित्युक्त्या बहिरेवं नटनमिति सूचयति । मुकुन्द-चरणाम्बुजं ध्यायती ॥ ४१ ॥

सुमनोरञ्जिनी — यादवनन्दनोऽपि विनिर्ययावित्यन्वयः ॥ ४१ ॥

यतवाङ् मातृभिः सार्धं सखिभिः परिवारिता ।
गुप्ता राजभटैः शूरैः सन्नद्धैरुद्यतायुधैः ॥ ४२ ॥

सत्यधर्मीया — यतवाक् वाङ्नियमवती मातृभिः सार्धं मातृभिरिति बहुवचनेन प्रसवित्र्यपि पामरदृष्ट्या न सवित्रीति ध्वन्यत इति मन्तव्यम् । सखीभिश्च परिवारिता परिपूर्णवाः कलशादौ यासां तास्ताभिरिता युक्तेति वा । यद्वक्ष्यति धौतपाणिकराम्बुजेति । तदुपयुक्तमिति युक्तमेवं व्याकरणम् ॥ ४२ ॥

वेत्रझर्झरहस्तैश्च वृद्धैः कञ्चुकिभिस्तथा ।
मृदङ्गशङ्खपणवांस्तूर्यभेरीश्च जघ्निरे ॥ ४३ ॥

सत्यधर्मीया — वेत्राणि वेतसविशेषाः झर्झराश्च वाद्यभाण्डानि च पाणिषु येषां ते तैः । स झर्झरो वाद्यभाण्डे नदान्तर इति विश्वः । कञ्चुकिभिः सोविदल्लैर्मृदङ्गशङ्खपणवा येषां ते तांस्तांश्च जघ्निरेऽताडयन् । मृदङ्गाद्या भेर्यश्च जघ्निरेऽवाद्यन्तेति केचित् ॥ ४३ ॥

सुमनोरञ्जिनी — वेत्राणि सुवर्णादिना वेष्टितानि, झर्झराः राजाज्ञासूचकयष्टयश्च हस्तेषु येषां ते तैः कञ्चुकिभिः आनखाग्रं कञ्चुकवद्भिः । दौवारिकैः छिन्नलिङ्गैरिति पदरत्नावल्याम् । मृदङ्गादयो जघ्निरे वादिता इत्यर्थः ॥ ४३ ॥

नानोपहारबलिभिर्वारमुख्याः सहस्रशः ।
स्रग्गन्धवस्त्राभरणैर्द्विजपत्न्यः स्वलङ्कृताः ॥ ४४ ॥

सत्यधर्मीया — वारमुख्या वेश्याश्रेष्ठाः ॥ ४४ ॥

सुमनोरञ्जिनी — वारमुख्याः गणिकोत्तमाः । उपहारबलिभिः उपहर्तुं योग्यैः बलिभिः । उपहाराः उपायनानि । बलयः दैव्यै निवेदनीयभक्ष्यवस्तूनीति वा ॥ ४४ ॥

गायन्तश्च स्तुवन्तश्च गायका वाद्यवादकाः ।
परिवार्य वधूं जग्मुः सूतमागधवन्दिभिः ॥ ४५ ॥

सत्यधर्मीया — गायका गतम् । गायन्तः स्तुवन्तश्च वाद्यवादकाश्च ॥ ४५ ॥

सुमनोरञ्जिनी — द्विजपत्न्यश्च वधूं परिवार्य जग्मुरित्यन्वयः ॥ ४५ ॥

आसाद्य देवसदनं धौतपादकराम्बुजा ।
उपस्पृश्य शुचिः शान्ता प्रविवेशाम्बिकान्तिकम् ॥ ४६ ॥

सत्यधर्मीया — देवसदनं देवालयमासाद्य प्राप्य धौतपादकराम्बुजा प्रक्षालितचरणकरसरसिजोपस्पृश्याचम्य । उपस्पर्शः स्पर्शमात्रे स्नानाचमनयोरपीति विश्वः । अम्बिकान्तिकं सतीसमीपम् ॥ ४६ ॥

सुमनोरञ्जिनी — धौतौ प्रक्षालितौ पादकराम्बुजौ यस्याः सा । उपस्पृश्य आचम्य । उपस्पर्शस्त्वाचमनमित्यमरः ॥ ४६ ॥

तां वै प्रवयसो बालां विधिज्ञा विप्रयोषितः ।
भवानीं वन्दयाञ्चक्रुर्भवपत्नीं भवान्विताम् ॥ ४७ ॥

सत्यधर्मीया — प्रवयसो वृद्धा विधिज्ञाः स्त्रीमर्यादाज्ञास्तां बालां भवानीं गतम् । वन्दयाञ्चक्रुः कृतनतिश्चक्रुर्नमस्कारयामासुः । नमस्कारकारणमीरयति ॥ भवेति । भवान्वितां मङ्गलान्वितामेतां पत्नीं शिशुपालस्य वा पशुपालस्य वेति विविच्यावचनाद्येन केन वाऽनुष्ठितेनेष्टफलभोक्त्रीं भव भावयेति । एतेन भवानीमित्युक्त्यैव भवभामिनीत्वबोधाद्भव-पत्नीत्यतिरिक्तं तथा विरुद्धमतिकृतत्वादप्रयोज्यत्वादालङ्कारिकमर्यादाविपर्यासश्चेति परास्तं वेदितव्यम् ॥ ४७ ॥

सुमनोरञ्जिनी — प्रवयसः वृद्धाः । विधिज्ञाः स्त्रीकर्तृकपूजाविधिज्ञाः । भवान्वितां भवेन अन्विताम् । वन्दयाञ्चक्रुः वन्दनं कारयामासुः ॥ ४७ ॥

नमस्ये त्वाऽम्बिकेऽभीक्ष्णं स्वसन्तानयुतां शिवाम् ।
भूयात्पतिर्मे भगवान् कृष्णस्तदनुमोदताम् ॥ ४८ ॥

सत्यधर्मीया — आन्तरङ्गिकं रुग्मिणीभावं ग्रन्थकृद् ग्रथयति ॥ **नमस्य इति** । शिवां मङ्गलरूपिणीं स्वसन्तानयुतां गणेशगुहादियुताम् ॥ ४८ ॥

सुमनोरञ्जिनी — स्वसन्तानयुतां गणेशादिभिर्युताम् । भगवान् कृष्णः । मे पतिः भूयात् । तत् भवती अनुमोदतां इति मन्त्रेण । प्रार्थयित्वेति शेषः ॥ ४८ ॥

अद्भिर्गन्धाक्षतैर्धूपैर्वस्त्रमाल्यविभूषणैः ।
नानोपहारबलिभिः प्रदीपावलिभिः पृथक् ॥ ४९ ॥

सत्यधर्मीया — गन्धाश्चाक्षताश्च तैर्माल्यानि मालाः पुष्पाणि च तैः । पृथक् पङ्क्तिशः ॥ ४९ ॥

सुमनोरञ्जिनी — अबादिभिः अम्बिकां समपूजयत् । तथा पतिमतीः विप्रस्त्रियः ब्राह्मणपत्नीश्च । तैः गन्धादिभिः लवणापूपादिभिश्च समपूजयदित्यन्वयः ॥ ४९ ॥

विप्रस्त्रियः पतिमतीस्तथा तैः समपूजयत् ।
लवणापूपताम्बूलकण्ठसूत्रफलेक्षुभिः ॥ ५० ॥

सत्यधर्मीया — पतिमतीः सुवासिनीस्तैरक्षतगन्धादिभिः समपूजयत् ॥ ५० ॥

तस्यै स्त्रियस्ताः प्रददुः शेषा युयुजुराशिषः ।
ताभ्यो देव्यै नमश्चक्रे शेषाश्च जगृहे वधूः ॥ ५१ ॥

सत्यधर्मीया — शेषा अवशिष्टा योषित आशिषो युयुजुस्ताभ्यो देव्यै च नमश्चक्रे । शेषा नमनायोग्या जगृहे आलिलिङ्ग इति यावत् । वधूः शेषामिति पाठे निर्माल्यमालां जगृह इत्यर्थः । अशिष इत्यत्राक्षता इति पाठश्चालिङ्गनानुकूलः । अक्षता अरजोदर्शना इत्यर्थः ॥ ५१ ॥

सुमनोरञ्जिनी — ताः पूजिताः विप्रस्त्रियः । शेषाः स्वदत्तावशिष्टाः अक्षताः प्रददुः । पुनस्तदुत्तराञ्चले पूरयामासुरिति यावत् । आशिषश्च युयुजुः । ताभ्यः विप्रस्त्रीभ्यः । ननाम । शेषाः स्वस्य नमस्कारायोग्या सवयस्का इत्यर्थः । ताः स्त्रियः जगृहे हस्तादिग्रहणेन संभावयाञ्चक्रे । शेषानिति पाठे निर्माल्यगन्धादीन् स्वयं जगृह इत्यर्थः ॥ ५१ ॥

मुनिव्रतमथ त्यक्त्वा निश्चक्रामाम्बिकागृहात् ।
उपकण्ठे सुरेशस्य पौलोम्याश्च निकेतनम् ॥ ५२ ॥

सत्यधर्मीया — मुनिव्रतं मौनमुपकण्ठे समीपे । उपकण्ठान्तिकाभ्यर्णाभ्यग्रा इत्यमरः । उपगतः कण्ठमत्यादय इत्यतिसमासः । सुरेशस्येन्द्रस्य तथा पौलोम्याः शच्याश्च निकेतनमालयः ॥ ५२ ॥

सुमनोरञ्जिनी — मुनिव्रतं मौनम् । उपकण्ठे तत्समीपे । पौलोम्याः शचीदेव्याः । अस्तीति शेषः ॥ ५२ ॥

तौ विदर्भप्रसूतानां नृपाणां कुलदेवते ।
तदन्तिकमुपागम्य शर्ची सुरपतिप्रियाम् ॥ ५३ ॥

सत्यधर्मीया — तौ सा च स च ते विदर्भप्रसूतानां नृपाणां कुलदेवते तयोरन्तिकं समीपम् ॥ ५३ ॥

सुमनोरञ्जिनी — ते शच्यंबिके । तन्निकेतनान्तिकम् ॥ ५३ ॥

चिराराधितापादाब्जां सा प्रणम्य विनिर्ययौ ।
प्रगृह्य पाणिना धात्रीं रत्नमुद्रोपशोभिना ।
धृतानेकातपत्राढ्या वीजच्चामरसङ्कुला ॥ ५४ ॥

सत्यधर्मीया — चिरमाराधिते पादाब्जे यस्याः सा ताम् । प्रणम्य निर्ययौ । रत्नमुद्रोपशोभिनेति विशेष्ये वैय्यर्थ्यं भजत्पाणिनाऽन्वेति । रत्नमुद्रोपशोभितपाणिना धात्रीं प्रगृह्य गृहीत्वेत्यर्थः । दीप्तानलर्काद्युतिमप्रमेयमिति प्रमेयदीपिकाद्युदाहरणपूर्वकं प्रकाशितमस्माभिरनुसन्धेयम् । विभक्तिविपरिणामेनान्वयो वा । शोभितामिति द्वितीयान्तपाठे धात्र्या विशेषणम् । अनेन तस्या एतत्स्पृश्यत्वयोग्यसौभाग्यं ध्वन्यते । धृतान्यनेकानि च तान्यातपत्राणि च तैराढ्या धृतानेकान्यातपत्राणि यस्याः साऽऽढ्या श्रीमतीति वा वीजद्भिश्चामरैः सङ्कुला व्याप्ता । सङ्कुलं वाच्यवद्व्याप्त इति विश्वः ॥ ५४ ॥

सुमनोरञ्जिनी — चिरं बहुकालम् । धात्रीं सखीम् ॥ ५४ ॥

तां देवमायामिव वीरमोहिनीं सुमध्यमां कुण्डलमण्डिताननाम् ।
श्यामां नितम्बार्पितरत्नमेखलां व्यञ्जत्स्तनां कुन्तलशङ्कितेक्षणाम् ॥ ५५ ॥

सत्यधर्मीया — देवमायां भगवज्जगद्बन्धकशक्तिमिव वीरमोहिनीं सुमध्यमां शोभनकटिप्रदेशां रुग्मिणीमिति च गतम् । कुण्डलाभ्यां मण्डितमाननं यस्याः सा श्यामां षोडशवार्षिकीं व्यञ्जन्तौ स्तनौ यस्याः साः तां कुन्तलैः शङ्किते ईक्षणे यस्याः सा तां । चूर्णकुन्तलानां प्रसरणे नेत्रयोः शङ्कितता कुन्तान् लान्तीति कुन्तला भटास्तैः शङ्कितमीक्षणं कृष्णस्य दर्शनं यस्याः सा ॥ ५५ ॥

सुमनोरञ्जिनी — तां विलोक्य यशस्विनः वीराः । तत्कृतः यो हृच्छयः मन्मथः तेन अर्दिताः पीडिताः सन्तो मुमुहुरित्युत्तरेणान्वयः । कीदृशीं ताम् । धृतैः अनेकैः आतपत्रैः

श्वेतच्छत्रैः । देवमायां लक्ष्मीमिव स्थिताम् । श्यामां षोडशवार्षिकीम् । कुन्तलैः शङ्किते इव चञ्चले ईक्षणे यस्याः सा ताम् ॥ ५५ ॥

शुचिस्मितां बिम्बफलाधरद्युतिशोणायमानद्विजकुन्दकुड्मलाम् ।
पदा चलन्तीं कलहंसगामिनीं सिञ्जत्कणन्नूपुरपादशोभिताम् ॥ ५६ ॥

सत्यधर्मीया — द्विजा दन्ता एव कुन्दलकुड्मलानि बिम्बफलवद्विद्यमानो योऽधर-स्तस्य द्युतिस्तया शोणायमानानि तानि यस्याः सा ताम् । पादान्तवर्णत्वात्तेः गुरुत्वं भवतीति न लाघवलाघवमुक्तेरिति ज्ञेयम् ॥ पदा चलन्तीम् । यद्यपि कुलदेवयात्रा निवृत्तेति यानमारुह्य गन्तुं शक्यं तथापि मानसिकरसिकयात्रामुद्दिश्य नेतुः कमितुः सौलभ्यार्थं पदा गमनमिति ज्ञेयम् । कलहंसगामिनीं सिञ्जत्क्वणन्नूपुरपादशोभितां सिञ्जन्तौ ध्वनन्तौ कनन्तौ काशमानौ नूपुरौ गतम् । तद्युक्ताभ्यां पदाभ्यां शोभिताम् । पादयोः शोभिता, नूपुराभ्यां पादशोभितेति केचित् ॥ ५६ ॥

सुमनोरञ्जिनी — द्विजाः दन्ताः । कुन्दकुड्लानीव द्विजकुन्दकुड्लानि यस्याः सा ताम् । द्युतिमिति पाठे पृथग्विशेषणम् । कला शोभा तया युक्ते च ते नूपुरे च । सिञ्जती (च ते) कालनूपुरे ययोः तथाविधाभ्यां पादाभ्यां शोभिताम् ॥ ५६ ॥

विलोक्य वीरा मुमुहुः समागता यशस्विनस्तत्कृतहृच्छयार्दिताः ।
यां वीक्ष्य ते नृपतयस्तदुदारहासव्रीळावलोकहृतचेतस उज्झितास्त्राः ॥ ५७ ॥

सत्यधर्मीया — वीरा अपि समागता यशस्विनो जितेन्द्रिया इति तत्कृते तन्निमित्तमुत्थितो यो हृच्छयो मदनस्तेनार्दिताः सन्तो मुमुहुः । प्राक्च ये विमूढाः कथञ्चन मौढ्यरहिताः । सोऽपि सुप्रसिद्धश्चासावुदारहासश्च व्रीडावलोकश्च ताभ्यां हृतं चेतो येषां ते । उज्झितानि त्यक्तान्यस्त्राणि येषां ते तथा ॥ ५७ ॥

सुमनोरञ्जिनी — अत्र यामित्यस्य सेत्युत्तरश्लोकस्थेनान्वयः । यात्रायाः छलेन व्याजेन । हरये श्रीकृष्णाय । स्वशोभां लावण्यादिकमर्पयन्ती । यां रुग्मिणीम् । वीक्ष्य तस्याः उदारहासव्रीडावलोकाभ्यां हृतचेतसः विमूढाः सन्तः पेतुः ॥ ५७ ॥

पेतुः क्षितौ गजरथाश्वगता विमूढा यात्राच्छलेन हरयेऽर्पयतीं स्वशोभाम् ।
सैवं शनैश्चलयती पदपद्मकोशौ प्राप्तिं तदा भगवतः प्रसमीक्षमाणा ॥ ५८ ॥

सत्यधर्मीया — गजरथाश्वगतास्तदारूढाः क्षितौ पेतुः । यात्राछलेन यात्रापदेशेन हरये कृष्णाय स्वशोभामपर्यन्ती । सैवं पदपद्मकोशौ शनैश्चलयती चलनयुक्तौ करोति । अतो न कम्पने चलिरिति मित्वह्रस्व इति छान्दसो ह्रस्वः । चालयती । कुत इत्यत आह ॥ **प्राप्तिमिति** । भगवतः प्राप्तिं प्रसमीक्षमाणा ॥ ५८ ॥

सुमनोरञ्जिनी — सा भगवतः श्रीकृष्णस्य । प्राप्तिं स्वसमीपागमनम् । प्रसमीक्षमाणा सती । शनैः । पदपद्मकोशौ पद्मकोशसदृशौ चरणौ । चलयती चालयन्ती ॥ ५८ ॥

उत्सार्य वामकरजैरलकानपाङ्गैः प्राप्तह्रियैक्षत नृपान् ददृशेऽच्युतं सा ।
तां राजकन्यां रथमारुरुक्षतीं जहार कृष्णो द्विषतां समीक्षताम् ॥ ५९ ॥

सत्यधर्मीया — वामकरजैः । करजस्तु करञ्जे स्यान्नख इति विश्वः । वामनखै-र्दक्षिणकरस्य सखीकरस्थापनाद्वामेत्युक्तिः । सुन्दरनखैरिति वा । अपाङ्गैः कटाक्षैर्ह्रिया नृपान् ददृशे ऐक्षत साऽच्युतमैक्षत ददृशे । समीक्षतां द्विषतांताननादृत्य रथमारुरुक्षतीं राजकन्यां कृष्णो जहार ॥ ५९ ॥

सुमनोरञ्जिनी — तदा वामकरजैः वामहस्ताङ्गुलिभिः । अलकान् । उत्सार्य अपसार्य । प्राप्तान् ऐक्षत तदा ह्रिया अच्युतं च ददृश इत्यन्वयः । रथं आरुरुक्षतीं आरोहणसम्भावनाविषयां न तु आरोढुं इच्छावतीम् । स्वीयरथारोहणेच्छायाः तस्या अभावात् । कूलं पिपतिषतीतिवत् ॥ ५९ ॥

रथं समारोप्य सुपर्णलक्षणं राजन्यचक्रं परिभूय माधवः ।
ततो ययौ रामपुरोगमैः शनैः सृगालमध्यादिव नागहृद्धरिः ॥ ६० ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे अष्टपञ्चाशोऽध्यायः ॥

सत्यधर्मीया – सुपर्णो लक्षणं ध्वजरूपं चिन्हं यस्य स तम् । राजन्यचकं तत्सङ्घं परिभूय तिरस्कृत्य ततो हरणानन्तरं रामपुरोगमैः सह शनैः शृगालमध्यान्नागहृद्धस्तिहर्ता

हरिः सिंह इव ययौ । त्वरातो गमने पलायित इत्यपयशः स्यात् । किं चरणरणरणिकातश्च मन्दं नन्दनन्दनोऽगादिति भावः ॥ ५९ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धेऽष्टपञ्चाशोऽध्यायः ॥ १०-५८ ॥

सुमनोरञ्जिनी — सुपर्णलक्षणं गरुडचिह्नितम् । राजन्यचक्रं राजसमूहं । परिभूय तिर-स्कृत्य रामपुरोगमैः सहितः । नागो गजः । तं हरतीति नागहृत् । हरिः सिंहश्च ॥५९॥

॥ इति श्रीमद्भागवतदशमस्कन्धोत्तरार्धव्याख्यायां सुमनोरञ्जिन्यां अष्टपञ्चाशोऽध्यायः ॥

॥ अथ एकोनषष्ठिरध्यायः ॥

तं मानिनः स्वाभिभवं यशःक्षयं परे जरासन्धवशा न सेहिरे ।
अहो धिगस्मद्यश आत्तधन्विनां गोपैर्हृतं केसरिणां मृगैरिव ॥ १ ॥

सत्यधर्मीया — मानिनो निन्दिताहन्तावतो जरासन्धवशाः परे वैरिणो न स्वाभिभवं तथा यशःक्षयं च न सेहिरे । अहोऽस्मान्धिक् निन्द्यतामस्माकमित्यर्थः । केसरिणां सिंहानां मृगैरिवात्तधन्विनां नो यशो गौपैर्हृतमतो धिगिति ॥ १ ॥

सुमनोरञ्जिनी — मानिनः अहङ्कारिणः । परैः अरिभिः । कृतं यशसः क्षयकरम् । स्वा-भिभवं स्वपराभवम् । स्वाभिभवं यशक्षयं यशसो नाशं चेति वा । अहो धिगित्यादि वदन्तः ॥ १ ॥

इति सर्वे सुसंरब्धा वाहानारुह्य दंशिताः ।
स्वैः स्वैर्बलैः परिक्रान्ता अन्वीयुर्धृतकार्मुकाः ॥ २ ॥

सत्यधर्मीया — दंशिताः कवचोपेताः परिक्रान्ताः परिवृताः ॥ २ ॥

सुमनोरञ्जिनी — सुसंरब्धाः अत्यन्तक्रोधविशिष्टाः । दंशिताः सन्नद्धाः । बलैः सैन्यैः । परिक्रान्ताः परिवृताः । अन्वीयुः पृष्टतोऽधावन् ॥ २ ॥

तानापतत आलोक्य यादवानीकयूथपाः ।
तस्थुर्वै सम्मुखा राजन् विस्फूर्य स्वधनूंषि ते ॥ ३ ॥

सत्यधर्मीया — यादवानीकयूथनाथाः स्वधनूंषि विस्फूर्य सटङ्काराणि कृत्वा ॥ ३ ॥

सुमनोरञ्जिनी — यादवानीकानां यूथानि समूहाः । तान् पान्ति रक्षन्तीति तथा । सेनानायका इत्यर्थः । स्वधनूंषि । विस्फूर्य टङ्कारयित्वा ॥ ३ ॥

अश्वपृष्ठे गजस्कन्धे रथोपस्थे च कोविदाः ।
मुमुचुः शरवर्षाणि मेघा अद्रिष्वपो यथा ॥ ४ ॥

सत्यधर्मीया — कोविदास्तदुपदेशकुशलाः ॥ ४ ॥

सुमनोरञ्जिनी — अश्वपृष्ठादिषु स्थित्वा । यादवान् प्रति । शरवर्षाणि । मुमुचुः । तथापि यादवानाम् । न विकार इत्यत्र दृष्टान्तः ॥ मेघ इति ॥ ४ ॥

पत्युर्बलं शरासारैश्छन्नं वीक्ष्य सुमध्यमा ।
सव्रीलमैक्षत् तद्वक्त्रं भयविह्वललोचना ॥ ५ ॥

सत्यधर्मीया — सव्रीडं सलज्जं तद्वक्त्रमैक्षदैक्षत । शरासारैः शरधारासम्पातैर्भयविह्वले लोचने यस्याः सा ॥ ५ ॥

सुमनोरञ्जिनी — सुमध्यमा रुग्मिणी । शरासारैः शरवर्षैः । तस्य पत्युः वक्त्रम् । भयेन विह्वललोचना ८७चलनेत्रा सती । ऐक्षत् ऐक्षत ॥ ५ ॥

प्रहस्य भगवानाह मा भैस्त्वं वामलोचने ।
विनङ्क्ष्यत्यधुनैवैतत् तावकैः शात्रवं बलम् ॥ ६ ॥

सत्यधर्मीया — मा भैर्भीता न भव । तावकैः शात्रवं बलमधुनैव विनङ्क्ष्यति ॥६॥

सुमनोरञ्जिनी — मा भैः मा भयं कुरु । तावकैः त्वदीयैः यादवैः ॥ ६ ॥

तेषां तद्विक्रमं वीरा गदसङ्कर्षणादयः ।
अमृष्यमाणा नाराचैर्जघ्नुर्हयगजान् रथान् ॥ ७ ॥

सत्यधर्मीया — स चासौ विक्रमश्च तममृष्यमाणा असहिष्णवः ॥ ७ ॥

सुमनोरञ्जिनी — गदः श्रीकृष्णानुजः ॥ ७ ॥

पेतुः शिरांसि रथिनामश्विनां गजिनां भुवि ।
सकुण्डलकिरीटानि सोष्णीषाणि च कोटिशः ॥ ८ ॥

सत्यधर्मीया — किरीटानि रत्नखचितानि स्वर्णात्मकानि कानि चित् सोष्णीषाणि वासः शिरोवेष्टनानि । उष्णीषं तु शिरोवेष्ट इति विश्वः ॥ ८ ॥

सुमनोरञ्जिनी — सोष्णीषाणि शिरोभूषणवस्त्रैः सहितानि ॥ ८ ॥

हस्त्राः सासिगदेष्वासाः करभा ऊरवोऽङ्घ्रयः ।
अश्वाश्वतरनागोष्ट्रखरमर्त्यशिरांसि च ॥ ९ ॥

सत्यधर्मीया — करभाः कनिष्ठिकामूलभागोऽश्वा अश्वतरा गर्दभेन बडवायां जाताः ॥ ९ ॥

सुमनोरञ्जिनी — सासिगदेष्वासाः । असिभिः खड्गैः । गदाभिः । इष्वासैः धनुर्भिश्च सहिताः हस्ताः । करभाः कनिष्ठिकामूलप्रदेशाः ॥ ९ ॥

हन्यमानबलानीका वृष्णिभिर्जयकाङ्क्षिभिः ।
राजानो विमुखा जग्मुर्जरासन्धपुरःसराः ॥ १० ॥

सत्यधर्मीया — हन्यमानबलानीका बलवन्त्यनीकानि सेना हन्यमानानि बलानीकानि येषां ते जयकाङ्क्षिभिस्तदिच्छुभिः ॥ १० ॥

सुमनोरञ्जिनी — बलानीकाः सेनासमुदायाः । यद्वा हन्यमानं क्षीयमाणं बलं सामर्थ्यं येषां तानि, तथाविधान्यनीकानि येषां ते तथाविधाः ॥ १० ॥

शिशुपालं समेत्याथ हृतदारमिवातुरम् ।
नष्टत्विषं हतोत्साहं शुष्यद्वदनमब्रुवन् ॥ ११ ॥

सत्यधर्मीया — हृता दारा यस्य स तमिवातुरं नष्टत्विषं गतोत्साहं शुष्यद्वदनं शिशुपालं समेत्याब्रुवन् ॥ ११ ॥

सुमनोरञ्जिनी — वस्तुतोऽप्राप्तदारं हृतदारं अपहृतदारं पुरुषमिवातुरम् ॥ ११ ॥

राजान ऊचुः—

भोभो पुरुषशार्दूल दौर्मनस्यमिदं त्यज ।
न प्रियाप्रिययो राजन् निष्ठा देहिषु दृश्यते ॥ १२ ॥

सत्यधर्मीया — भो भो पुरुषशार्दूल । इदं दौर्मनस्यं पूर्वोक्तैर्हेतुभिरीहितं त्यज तां तुभ्यं दापयाम इति समाधिनाऽऽधिं शमयन्ति किमित्यतो न किन्तु तत्त्वमुपदिश्येत्याह ॥ नेति । हे राजन् प्रियाप्रिययोर्देहिषु निष्ठा व्यवस्था नियतिर्न दृश्यते ॥ १२ ॥

सुमनोरञ्जिनी — प्रियाप्रिययोः सुखदुःखयोः । निष्ठा व्यवस्था स्थैर्यं वा । निष्ठोत्कर्षे व्यवस्थायामिति यादवः ॥ १२ ॥

यथा दारुमयी योषिन्नृत्यते कुहकेच्छया ।
एवमीश्वरतन्त्रोऽयमीहते सुखदुःखयोः ॥ १३ ॥

सत्यधर्मीया — यथा दारुमयी योषा कुहकेच्छया नेटयितुः कपटिन इच्छया नृत्यते एवमीश्वरतन्त्र ईश्वराधीनः पुमान्सुखदुःखयोस्तत्साधनयोर्विषय ईहते चेष्टते । यद्यपि यथा पुमान्दारुमय इति शक्यं वक्तुम् तथाऽपि न स्त्री स्वातन्त्र्यमर्हतीत्यादेः सर्वावस्था-स्वप्यन्याधीनता वनिताया नियतेति बोधनार्थं योषिदित्युक्तिरिति ज्ञेयम् ॥ १३ ॥

सुमनोरञ्जिनी — दारुमयी योषित् योषिदाकारपुत्तलिका । कुहकस्य नर्तकस्य इच्छया । एवमीश्वरतन्त्रः सन् । सुखदुःखयोरर्थे । ईहते चेष्टते । पुरुषस्य पराधीनतया कदाचिद्दुखसाधनमप्यस्य चेष्टा भवतीति भावः ॥ १३ ॥

शौरेः सप्तदशाहं वै संयुगानि पराजितः ।
त्रयोविंशतिभिः सैन्यैर्जिग्य एकमहं परम् ॥ १४ ॥

सत्यधर्मीया — अहं सप्तदशसंयुगानि शौरेः सकाशात्पराजितस्त्रयोविंशतिभिस्त-त्सङ्ख्याकाक्षौहिणीभिरेकमेकवारमेकलं वा परं ृत उत्तरे जिग्ये ॥ १४ ॥

सुमनोरञ्जिनी — तत्र स्वमेव दृष्टान्तयति ॥ **शौरेरिति** । योऽहम् । त्रयोविंशतिभिः सैन्यैः अक्षौहिणीभिः । सप्तदशसंयुगानि सप्तदशेषु संयुगे पराजितः सोऽहं परं केवलम् । पश्चादिति वा । अष्टादशममित्यर्थः । एकं संयुगम् । जिग्ये जितवान् ॥ १४ ॥

तथाऽप्यहं न शोचामि न हृष्यामि च कर्हिचित् ।
कालेन दैवयोगेन जानन् विद्रावितं जगत् ॥ १५ ॥

सत्यधर्मीया — विचित्रा दैवीगतिरिति न शोकेन कृत्यं सहस्व मां निदर्शनीकृत्येति शंसति ॥ **तथाऽपीति ।** दैवयुक्तेन कालेन हरिणा जगद्द्रावितं जानन्न शोचामि कर्हिचिदपि न प्रहृष्यामि यो दैवयुक् सुदैवस्तं तेन कालेन कालयवनेन जगज्जगत्यां भूमौ विद्रावितं जानन्नपि न प्रहृष्यामीत्यप्यर्थ आन्तरङ्गिको ज्ञेयः ॥ १५ ॥

सुमनोरञ्जिनी — दैवेन अदृष्टनियामकेश्वरेण । युक्तेन प्रेरितेन । कालेन विद्रावितं चेष्टितम् ॥ १५ ॥

अधुनाऽपि वयं सर्वे वीरयूथपयूथपाः ।
पराजिताः फल्गुतन्त्रैर्यदुभिः कृष्णपालितैः ॥ १६ ॥

सत्यधर्मीया — फल्गुतन्त्रैः फल्गु तन्त्रं परिच्छदः सेनादिः । तन्त्रं परिच्छद इति विश्वः । येषां ते तैर्यदुभिः पराजिताः ॥ १६ ॥

सुमनोरञ्जिनी — फल्गुतन्त्रैः अल्पसैन्यादिसन्नाहैः ॥ १६ ॥

रिपवो जिग्युरधुना काल आत्मानुसारिणि ।
तदा वयं तु जेष्यामो यदा कालः प्रदक्षिणः ॥ १७ ॥

सत्यधर्मीया — अधुनाऽऽत्मानुसारिणि काले सति रिपवो यदवोऽस्मान् जिग्युः । यदा तु कालः प्रदक्षिणोऽस्मदनुकूलस्तदा वयं जेष्यामः ॥ १७ ॥

सुमनोरञ्जिनी — अधुना । आत्मानुसारिणि आत्मनः स्वस्य अनुसारिणि अनुकूले । काले रिपवः जिग्युरेव । अस्माकमपि कालो यदा प्रदक्षिणः अनुकूलः । तदा वयं तु वयमपि जेष्यामः ॥ १७ ॥

श्रीशुक उवाच—

एवं प्रबोधितो मित्रैश्चैद्योऽगात् सानुगः पुरम् ।
हतशेषा पुनस्तेऽपि ययुः स्वं स्वं पुरं नृपाः ॥ १८ ॥

सत्यधर्मीया — मित्रैराप्तैः ॥ १८ ॥

सुमनोरञ्जिनी — सम्बोधितः सम्यक् बोधितः ॥१८॥

रुग्मी तु राक्षसोद्वाहं कृष्णद्विडसहन् स्वसुः ।
पृष्ठतोऽन्वगमत् कृष्णमक्षौहिण्या वृतो बली ॥ १९ ॥

सत्यधर्मीया — स्वसुर्भगिन्या राक्षसोद्वाहमसहन् गतम् । अक्षौहिण्या सेनया वृतः ॥ १९ ॥

सुमनोरञ्जिनी — असहन् असहमानः । तत्र हेतुमाह ॥ **कृष्णद्विडिति** ॥ १९ ॥

रुग्म्यमर्षी सुसंरब्धः शृण्वतां सर्वभूभुजाम् ।
प्रतिजज्ञे महाबाहुर्दंशितः सशरासनः ॥ २० ॥

सत्यधर्मीया — सर्वभूभुजां गतोर्वरितानां श्रुण्वतां सताम् । सशराशन इति शापथपूर्वकतामावेदयति ॥ २० ॥

सुमनोरञ्जिनी — दंशितः सन्नद्धः ॥ २० ॥

अहत्वा समरे कृष्णमप्रत्यूह्य च रुग्मिणीम् ।
कुण्डिनं न प्रवेक्ष्यामि सत्यमेतद् ब्रवीमि वः ॥ २१ ॥

सत्यधर्मीया — राज्ञां पुरतः कृतप्रतिज्ञैवंरूपेति निरूपयति ॥ **अहत्वेति** । रुग्मिणीमप्रत्यूह्याप्रत्यावर्त्याविवाह्येति वा कुण्डिनं न प्रवेक्ष्यामि वः प्रति सत्यं ब्रवीमि । इति प्रतिजज्ञ इत्यन्वयः ॥ २१ ॥

सुमनोरञ्जिनी — अप्रत्यूह्य अप्रत्यावर्तयित्वा ॥ २१ ॥

इत्युक्त्वा रथमारुह्य सारथिं प्राह सत्वरः ।
चोदयाश्वान् यतः कृष्णस्तस्य मे संयुगं भवेत् ॥ २२ ॥

सत्यधर्मीया — सत्वरो रुग्मी सत्वरस्त्वं यतो यत्र कृष्णस्तत्राश्वांश्चोदयेति प्राह तस्य मे च संयुगं भवेत् ॥ २२ ॥

सुमनोरञ्जिनी — यतः यत्र ॥ २२ ॥

अद्याहं निशितैर्बाणैर्गोपालस्य सुदुर्मतेः ।
नेष्ये वीर्यमदं येन स्वसा मे प्रसभं हृता ॥ २३ ॥

सत्यधर्मीया — गोपालस्य पशुपालस्य वेदपालकस्येत्यन्तरर्थः । येन वीर्यमदेन तं मदं मे स्वसा प्रसभं बलाद्धृता येन कृष्णेन प्रसभं हृता तस्य मदमिति वा ॥ २३ ॥

सुमनोरञ्जिनी — वीर्यमदं नेष्ये अपनेष्ये । प्रसभं बलात्कारेण ॥ २३ ॥

विकत्थमानः कुमतिरीश्वरस्याप्रमाणवित् ।
रथेनैकेन गोविन्दमन्वधावत रंहसा ॥ २४ ॥

सत्यधर्मीया — अप्रमाणविदनियत्ताज्ञः ॥ २४ ॥

सुमनोरञ्जिनी — अप्रमाणवित् । प्रमाणं वीर्ये इयत्तां, न वेत्तीति तथा ॥ २४ ॥

स गत्वा नर्मदां देवीं तरन्तं मधुसूदनम् ।
आसाद्य युद्धसन्नद्धस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ २५ ॥

सत्यधर्मीया — स रुग्मी तरन्तं मधुसूदनमासाद्य प्राप्य तिष्ठ तिष्ठेति चाब्रवीत् ॥ २५ ॥

धनुर्विकृष्य सुदृढं जघ्ने कृष्णं त्रिभिः शरैः ।
आह चारे क्षणं तिष्ठ यदूनां कुलपांसन ॥ २६ ॥

सत्यधर्मीया — अरे नीच यदूनां कुलपांसन कुलधुलीकर । अस्मन्नगरीं यदूनां यया रुग्मिण्या नोज्झिता तां विकृष्याकृष्य कुलं चास्मत्कुलं तत्पांसनेत्यप्यन्वयः । क्षणं तिष्ठ ॥ २६ ॥

सुमनोरञ्जिनी — अरे इति नीचसम्बोधनम् । अरिशब्दस्य सम्बुद्धिर्वा । कुलपांसन कुलदूषक ॥ २६ ॥

कुत्र यासि स्वसारं मे मुषित्वा ध्वाङ्क्षवद्धविः ।
हरिष्येऽस्य मदं मन्द मायिनः कूटयोधिनः ।। २७ ।।

सत्यधर्मीया — मे स्वसारं भगिनीं ध्वाङ्क्षः काको हविरिव मुषित्वा चोरयित्वा कुत्र यासि। तद्धविर्मुषित्वा स्वसारमत्यसारमनुपयुक्तं कृत्वा याति तथा स्वसारं मुषित्वा सबलचौरं कृत्वा । एतेनाशक्तदुर्जनता जनार्दनस्य ध्वनयतीति वा । मायिन इव कूटयोधिनः कपटयुद्धस्य ।। २७ ।।

सुमनोरञ्जिनी — मुषित्वा अपहृत्य । कूटयोधिनः कपटयोधिनः ।।२७।।

यावन्न मे हतो बाणैः शयीथा मुञ्च दारिकाम् ।
धनुर्विकृष्य सुदृढं जघ्ने कृष्णं त्रिभिः शरैः ।। २८ ।।

सत्यधर्मीया — यावद्यन्मध्ये मे बाणैर्हतो न शयीथा न शेषे तावद्दारिकां कन्यां मुञ्चेत्युक्त्वा धनुर्विकृष्य ।। २८ ।।

सुमनोरञ्जिनी — मे बाणैः हतो न शयीथाः । ततःपूर्वमेव । दारिकां कन्यकां मुञ्चेत्य-ब्रवीदिति पूर्वेणान्वयः ।। २८-३० ।।

स्मयन् कृष्णो धनुश्छित्वा षड्भिर्विव्याध रुग्मिणम् ।
अष्टाभिश्चतुरो वाहान् द्वाभ्यां सूतं ध्वजं त्रिभिः ।। २९ ।।

सत्यधर्मीया — अष्टाभिः । अष्टन इत्यात्वम् । चतुरः कुशल इत्यप्यर्थः ।।२९।।

स चान्यद् धनुरादाय कृष्णं विव्याध पञ्चभिः ।
तैस्ताडितः शरौघैस्तु चिच्छेद धनुरच्युतः ।। ३० ।।

सत्यधर्मीया — पञ्चभिः शरैस्तैः शरोघैरिव विद्यमानैः । अन्यथा पञ्चभिरिति कृतमिदं मुद्रणं बाधितं स्यादिति भावः । पञ्चभिस्तैरेवास्त्रशक्तितः शरौघत्वेन जातैः । यथोक्तं हरिवंशे –

'अथान्यद्धनुराधाय रुग्मी कृष्णजिघांसया ।
प्रादुश्चकार शतशो दिव्यान्यस्त्राणि वीर्यवानि'त्यादि ॥ ३० ॥

पुनरन्यदुपादत्त तदप्यच्छिनदच्युतः ।
परिघं पट्टिशं शूलं चर्मासी शक्तितोमरैः ॥ ३१ ॥

सत्यधर्मीया — शक्तितोमरैः शक्तिश्च तोमराश्च गतम् । शक्तितोमरैः सह यद्यदादत्तेत्यन्वयः । शक्तितोऽमरैः सह यः समसमरमुपादत्त स इति वा तदर्थः ॥ ३१ ॥

सुमनोरञ्जिनी — चर्म च असिश्च चर्मासी । शक्तितोमरौ चेति यद्यदायुधमादत्त तत्सर्वमिति सम्बन्धः । शक्तितोमरैरिति पाठे तोमरैः सह चिच्छेदेत्यन्वयः । पट्टिशं लोहदण्डः । तोमरः द्विमुख आयुधविशेषो योगेन स्वसामर्थ्येन ॥ ३१ ॥

यद्यदायुधमादत्त तत्सर्वं सोऽच्छिनद् विभुः ।
ततो रथादवप्लुत्य गृहीत्वा खड्गचर्मणी ॥ ३२ ॥

सत्यधर्मीया — खड्गचर्मणी गृहीत्वा ॥ ३२ ॥

कृष्णमभ्यद्रवत् क्रुद्धः पतङ्ग इव पावकम् ।
तस्य चापततः खड्गं तिलशश्चर्म चेषुभिः ॥ ३३ ॥

सत्यधर्मीया — पतङ्गः शलभः पावकमग्निमिव । अनेन कदाचित्किञ्चिद्दग्धपक्षोऽ-जीवन्पतङ्गो दार्ष्टान्तिकानुरोधेन दृष्टान्त इति ज्ञेयम् । पतङ्गः शलभे शालिप्रभेद इति विश्वः । खड्गं चर्म च शरैस्तिलशः ॥ ३३ ॥

छित्त्वाऽसिमाददे तिग्मं रुग्मिणं हन्तुमुद्यतः ।
दृष्ट्वा भ्रातृवधोद्योगं रुग्मिणी भयविह्वला ।
पतित्वा पादयोः पत्युरुवाच करुणं सती ॥ ३४ ॥

सत्यधर्मीया — छित्वाऽसिं नन्दकं रुग्मिणं हन्तुमुद्यतः पत्युः पादयोः पतित्वा करुणं यथा स्यात् तथोवाच ॥ ३४ ॥

रुग्मिण्युवाच—

योगेश्वराप्रमेयात्मन् देवदेव जगत्पते ।
हन्तुं नार्हसि कल्याण भ्रातरं मे महाभुज ॥ ३५ ॥

सत्यधर्मीया — कल्याण मङ्गलमूर्ते ॥ ३५ ॥

सुमनोरञ्जिनी — योगेश्वर, योगानां ईश्वर योगस्य अचिन्त्याद्भुतशक्तेः ईश्वर इति वा। अप्रमेयः आत्मा स्वरूपं यस्य इति पदरत्नावली ॥ ३५ ॥

श्रीशुक उवाच—

इत्युक्त्वा जगृहे पादौ कृपणा दीनभाषिणी ।
भ्रातरं त्रातुकामा सा कृष्णस्य जगतीपतेः ॥ ३६ ॥

सत्यधर्मीया — इत्युक्त्वा कृपणा कृपाणपाणेः पादौ जगृहे । अनेन पूर्वं पतित्वा वचनकाले त्यक्त्वा पुनरपि जगृह इति द्योत्यते । भ्रातरं त्रातुकामा । तुंकामेति मलोपः ॥ ३६ ॥

तया परित्रासविकम्पिताङ्गया शुचाऽवशुष्यन्मुखरुद्धकण्ठया ।
कातर्यविस्रंसितहेममालया गृहीतपादः करुणो न्यवर्तत ॥ ३७ ॥

सत्यधर्मीया — परित्रासविकम्पिताङ्गया परित्रासया विकम्पितान्यङ्गानि यस्यास्तया शुचा शुष्यन्मुखं यस्याः सा च सा रुद्धो कण्ठो यस्याः सा तया कातर्येण विस्रंसिता हेममाला यस्याः सा तया । गृहीतपादः करुणाऽस्यास्तीति करुणयतीति करुण इति वा । न्यवर्तत हननतो निवृत्तोऽभूत् । अनेन हन्तुं गत इव दर्शयामास न मनःपूर्वकं गत इति द्योत्यते । अन्यथा वन्ध्यसङ्कल्पतापत्प्राप्तिः स्यात् ॥ ३७ ॥

सुमनोरञ्जिनी — परित्रासेन भयेन विकम्पितानि अङ्गानि यस्याः तया । शुचा शोकेन । शुष्यत् मुखं यस्याः रुद्धः कण्ठो यस्याः सा च सा तया । कातर्येण वैक्लव्येन । विस्रंसिता हेममयी माला यस्याः तया । गृहीतौ पादौ यस्य सः । न्यवर्तत । हननोद्योगादिति शेषः ॥ ३७ ॥

चैलेन बध्द्वा तमसाधुकारिणं सश्मश्रुकेशान् प्रवपन् व्यरूपयत् ।
तावत् समीयुर्जितशत्रुसैन्या यदुप्रवीरा नलिनीं यथा गजाः ॥ ३८ ॥

सत्यधर्मीया — चैलेनांशुकेनासाधुकारिणं तं बद्ध्वा सश्मश्रुकेशं यथा तथा प्रवपन्पश्चशिखं कृत्वेति यावत् । कृत्वा पश्चशिखं तथेति हरिवंशे शंसनात् । मुण्डनं कुर्वन् व्यरूपयद्विरूपमकरोत् । एतदारभ्य प्रससाराभाणकं कार्यमसाधु कृतं चेच्छिरः श्मश्रूणि मुण्डयेति यावत् । नलिनीं गजा यथा तथा जितशत्रुसैन्या यदुप्रवीराः समीयुः ॥ ३८ ॥

सुमनोरञ्जिनी — चैलेन वस्त्रेण । श्मनि मुखे श्रयन्त इति श्मश्रूणि । केशाः शिरोजाः तत्सहितं यथा भवति तथा । प्रवपन् मुण्डयन् । व्यरूपयत् विकृतरूपमकरोत् । तावत् तस्मिन्नेव समये । नलिनीं सरसीम् ॥ ३८ ॥

कृष्णान्तिकमुपव्रज्य ददृशुस्तत्र रुग्मिणम् ।
तथाभूतं हतप्रायं दृष्ट्वा सङ्कर्षणो विभुः ॥ ३९ ॥

सत्यधर्मीया — कृष्णान्तिकमुपाव्रज्य तत्र तत्समीपे रुग्मिणं ददृशुः । विभुः सङ्कर्षणस्तथाभूतमिति हतप्रायं दृष्ट्वा ॥ ३९ ॥

सुमनोरञ्जिनी — तथाभूतं विरूपीकृतम् ॥ ३९,४० ॥

विमुच्य बद्धं करुणो भगवान् कृष्णमब्रीवत् ॥ ४० ॥

सत्यधर्मीया — विमुच्य स्वयं विमोच्य नान्यैः तन्मोचनरोचनमत इत्याह ॥ करुण इति । कृष्णमब्रवीत् ॥ ४० ॥

बलभद्र उवाच—

असाध्विदं त्वया कृष्ण कृतमस्मिन् जुगुप्सितम् ।
वपनं श्मश्रुकेशानां वैरूप्यं सुहृदो वधम् ॥ ४१ ॥

सत्यधर्मीया — हे कृष्ण । त्वयेदं कृतमसाधु । तत्किमित्यत आह । श्मश्रुकेशानां वपनमितीदमस्मज्जुगुप्सितमस्माकं निन्दितमिदं वैरूप्यम् । सुहृद इत्यावृत्तषष्ठ्यन्तं प्रथमा-

बहुवचनं च । सुहृदः स्वकीयस्य वधं सुहृदो वदन्तीति शेषः । कृष्णस्तु लोके लोकाः इदं मया नानुष्ठितं चेन्नेमानि श्मश्रूणि किन्तु त्वत्प्रदर्शनीयस्थानान्तरसन्निवेशकेशास्तथा मदुक्तं न सम्पन्नं चेच्छिरो मुण्डयेति वदन्तीत्ययमपि सम्प्रति प्रतिश्रवेणायातो नोपयातस्तत्पारमिति तल्लोमतुलतां दर्शयंस्तेषां स्वयं मुण्डयन्नर्म कर्म च प्राहुणिके विहितं विश्वकर्तुर्नेदं दूषणमिति ततानानया धाट्येति नाचतुर इति । बलोऽप्यग्रज इत्येवमन्वशासदिति च ज्ञेयम् । सुहृदो वध इति पाठः स्वरसः ॥ ४१ ॥

सुमनोरञ्जिनी — सुहृद्वैरूप्यं वधं वधतुल्यम् ॥४१॥

मैवास्मान् साध्व्यसूयेथा भ्रातुर्वैरुप्यचिन्तया ।
सुखदुःखदो न चान्योऽस्ति यतः स्वकृतभुक् पुमान् ॥ ४२ ॥

सत्यधर्मीया — हे साध्वि । भ्रातुर्वैरूप्यचिन्तयाऽस्मानेवं कृतवतो इति नासूयेथाः । यतः पुमान्स्वकृतं भुङ्क्त इति स तथा । ततः सुखदुःखदोऽन्यो न चास्ति । सु अकृतं नित्यमानन्दादिकं स्वकृतं स्वनिर्मितमेव भुङ्क्त इति स तथा । पुमान्पूर्णपुरुषः यस्मात्सुख-दुःखदोऽन्यो न चास्ति स्वतन्त्रस्तस्य न कश्चित्प्रतिभट इति भावः ॥ ४२ ॥

सुमनोरञ्जिनी — रुग्मिणीं सान्त्वयति ॥ **मैवेति** । हे साध्वि ! अस्मान् प्रति माऽसूयेथाः असूयां मा कृथाः । कुतः । यतः पुमान् । स्वेन कृतं कर्मैव भुनक्तीति स्वकृतभुक् । अतः स्वस्मादन्यः सुदुःखदो नास्तीति । सुशब्दः सुखपर्यायः ॥ ४२ ॥

बन्धुर्वधार्हदोषोऽपि न बन्धुर्वधमर्हति ।
त्याज्यस्तेनैव दोषेण हतः किं हन्यते पुनः ॥ ४३ ॥

सत्यधर्मीया — अय्यनार्य न कार्यः किल बन्धुवध इत्यतः सामान्यन्यायोऽयं नायं क्षत्रियाणामिति विशिष्य वक्ति कैश्चिच्छ्लोकैः । वधार्हो वधयोग्यो दोषो यस्य स तादृशोऽपि बन्धुर्वधं नार्हति । तर्हि किं कार्यं तद्विषय इत्यत आह । **त्याज्यः** । कुतो घातो न कर्तव्य इत्यत आह ॥ **स्वेनैवेति** । स्वदोषेणैव स हतश्चेदपि । किमित्यत **हत** इत्याह । हतः किं पुनर्हन्यते मृतमारणप्रसक्तेरिति भाव इति । न बन्धुर्बन्धुरेव न भवति । हे स्वे । नैव वधमर्हति । दोषेण हत इत्यन्वयसूचनार्थं पुनर्बन्धुरित्युक्तिः । अत एव बन्धुर्मम भ्राता कृष्णो

हतः किं पुनर्हन्यत इति त्याज्यत्वमेव निरीक्ष्य तव भ्रातरमातुरं त्यक्तवानिति सूचानार्थं वा । बन्धुर्बन्धूकपुष्पे स्याद्बन्धुभ्रातरि बान्धव इति विश्वः ॥ ४३ ॥

सुमनोरञ्जिनी — बन्धुर्वधार्हदोषोऽपि यतो बन्धुः ततो वधं नार्हति किन्तु त्याज्यः । यद्वा अपि यद्यपि बन्धुः वधार्हदोषो भवति कदाचित् तथापि स्वयं बन्धुः वधं कर्तुं नार्हतीत्यर्थः ॥ ४३ ॥

क्षत्रियाणामयं धर्मः प्रजापतिविनिर्मितः ।
भ्राताऽपि भ्रातरं हन्याद् येन घोरतरस्ततः ॥ ४४ ॥

सत्यधर्मीया — प्रजापतिना ब्रह्मणा विनिर्मितः क्षत्रियाणां धर्मो व्यंसक इत्यत आह ॥ **भ्राताऽपीति** । भ्रातरं स्वं हन्याद्येनैतादृशकर्मणा घोरतरः क्षत्रियस्तत इति येन धर्मेण स धर्मस्ततो घोरतर इति वा । ततो ये घोरतरतमास्ते न सन्तीत्यन्वयो वा । घोरं यत्तरो बलं तेन ततः स इत्यैकपद्यं वा । तरो बले च वेगे चेति विश्वः ॥ ४४ ॥

सुमनोरञ्जिनी — तथापि अयं धर्मः क्षत्रियातिरिक्तानामेव । न क्षत्रियाणामित्याह ॥ **क्षत्रियाणामिति** ॥ येन धर्मेण भ्राताऽपि भ्रातरं अपकारिणं हन्यात् ततः घोरतरः अतीवदारुणः ॥ ४४ ॥

राज्यस्य भूमेर्वित्तस्य श्रियो मानस्य तेजसः ।
मानिनोऽन्यस्य वा हेतोः श्रीमदान्धाः क्षिपन्ति हि ॥ ४५ ॥

सत्यधर्मीया — इयत्सु कार्येष्वापतितेष्वेवं कुर्वन्तीति नातिप्रसक्तिरिति वक्ति ॥ **राज्यस्येति** । समुदितमेतदिति न निर्बन्धः । एकैकेनापि कारणेन मारणमभिप्रैति । हेतोरिति सर्वान्वयि । राज्यस्यापरो राज्ययोग्यो भ्राता भूमेरभूयस्या वित्तस्य काचाद्यात्मकस्य श्रियो महासम्पदो मानस्य सम्माननहानिप्रसक्तौ तस्य तेजसः सामर्थ्यप्रदर्शनस्यान्यस्य वा सुन्दोपसुन्दवत्सुन्दरीजनस्य वा हेतोर्मानिनः श्रीमदान्धा दुरभिमानवन्तो मानिनस्तान्क्षिपन्ति नाशयन्ति हि सर्वानुभवसिद्धमिदमित्यर्थः ॥ ४५ ॥

सुमनोरञ्जिनी — राज्यादेर्हेतोः मानिनः देहाभिमानवन्तः । क्षिपन्ति घ्नन्ति । धिक्कुर्वन्ति अतो भ्रात्रादयोऽपि क्षत्रियस्य वध्या एवेति भावः ॥ ४५ ॥

आत्ममोहो नृणामेष कल्प्यते देवमायया ।
सुहृच्छत्रुरुदासीन इति देहात्ममानिनाम् ॥ ४६ ॥

सत्यधर्मीया — सर्वं सर्वेश्वरतन्त्रं स चैतत्कर्म निमित्तीकृत्य कारयतीति मतिमतां न मोहमहिमाहतिरन्येषां तदवस्कन्दनमिति ज्ञातरहस्यामपि स्वयं लोकरीतिमनुसरन्तीमाह ॥ आत्ममोह इति । देहात्ममानिनां देहाभिमानवतां नृणामधिकारिणामित्यर्थः । एषः अयं सुहृदयं च शत्रुरयमुदासीनोऽनुभयरूप इत्यात्ममोहो मानसभ्रमो देवमायया देवस्यैवं क्रीडतो माययेच्छया कल्पते । एतत्कर्मानुसारेणाभिमतिं दत्वा सुहृदादित्वं भासयति देव इति भावः ॥

सुमनोरञ्जिनी — रुग्मिणः सुहृत्वात्तद्वधादिकमभद्रमित्यतः सुहृत्त्वादिकं स्वबुद्धि-कल्प्यतम् । न वास्तवमत्रास्तीत्याह ॥ **आत्ममोह** इति । देहात्ममानिनां देहात्मनोः स्फुटतरविवेकशून्यानां जनानाम् । अयं मम सुहृत् अनपेक्ष्योपकारकृत् । अयं मम शत्रुः वधादिकर्ता । अयं उदासीनः कर्तव्ये उपकारे अपकारे च य उदास्ते स इत्येषः आत्मनि जीवविषये मोहः भ्रमः । देवस्य हरेः मायया इच्छया बन्धकशक्त्या वा । कल्प्यते प्राप्नोति । देहोपकारकेषु आत्मोपकारकत्वावगाहनात् स्वातन्त्र्येण उपकारकत्वादेः जीवेऽभावादिति भावः ॥ ४६ ॥

एक एव परो ह्यात्मा सर्वेषामपि देहिनाम् ।
नानेव गृह्यते मूढैर्यथा ज्योतिर्यथा नभः ॥ ४७ ॥

सत्यधर्मीया — नानेके देवि देवाः किन्तु वासुदेव एक एवेत्याह ॥ **एक एवेति** । सर्वेषामपि देहिनां पर आत्माऽन्तर्नियामक एव । न स्थानतोऽपीत्यादेः । तर्हि बहु स्यां प्रजायेय सच्च त्यच्चाभवदित्यादिबहुभाववादः कथमित्यतः पातनिकः श्रुत्यभिप्रायः । व्याप्तः स किन्तु भिन्नजगद्बहुविधतैकता चान्तर्गतस्य तस्येति सनिदर्शनमाह । यथा ज्योतिः सूर्यादिः प्रतिदृशमिव नैकधाऽर्कमेकं समधिगतोऽस्मि विधूतभेदमोह इत्यादेः । ऊह्यात्तर्क्यात्परः परो ह्यः स चासावात्मा चेति वा । अतर्क्य इत्यर्थः । एक एव सविता यथा द्रष्टृभेदभिन्न इव तथा । यथा नभश्च घटाद्युपाधिनिबन्धनभेदवदिति तथा नानेनात्मा गृह्यते । ते च न बुधा इत्याह ॥ **मूढैरिति** । यथा ज्योतिश्चन्द्रादिः क्वचिद्यथा सम्यक् क्वचिन्नभः । न विद्यते भा

यस्य तत् । एकस्यैव क्वचित्प्रकाशता विप्रकाशता च क्वचिदिति भेदः प्रतीयते तथा नानेव गृह्यत इति वा ॥ ४७ ॥

सुमनोरञ्जिनी — तर्हि स्वतन्त्रः सन्नुपकारासि क इत्यत आह । **एक एवेति** । परः उत्कृष्टः देहिनां सकाशात्परो विलक्षणो वा । सर्वेषामपि देहिनाम् आत्मा अन्तर्यामितया नियामकः । तत्र तत्र स्थित्वा स्वातन्त्र्येण उपकारादिकर्ता । एक एव हरिरिति भावः । ननु शरीरान्तर्नियामकस्य कथमेकत्वम् । दक्षिणाक्षिकण्ठहृदयादिस्थानेषु नियामकानां विश्वादीनां भेददर्शनादित्यतो अधिष्ठानभेदेऽपि नान्तर्यामिणः भेदः शङ्कनीय इति भावेन दृष्टान्तमाह ॥ **यथेति** । ज्योतिः सूर्यादिः । नभः अव्याकृताकाशं यथा सर्वत्रावस्थितमेकमेव । तथा मूढैः अज्ञानिभिस्तु नानेव गृह्यते । ज्ञायते । तथान्तर्यामिणः मूढैः नानेव गृह्यते । तथा चान्तर्यामिणि न भेददर्शनमिति इति भावः । तदेतदुक्तं न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हीति ॥ ४७ ॥

देह आद्यन्तवानेष द्रव्यप्राणगुणात्मकः ।
आत्मन्यविद्यया क्षिप्तः संसारयति देहिनम् ॥ ४८ ॥

सत्यधर्मीया — नात्मतदात्मा देह इत्यत्र युक्तिं वक्ति ॥ **देह इति** । द्रव्यप्राणगुणान्वितो द्रव्याणि मूलद्रव्यं प्रकृतिरवान्तराणि च भूतानि प्राणाः प्राणादयः पञ्च गुणाश्च सत्त्वाद्यास्तदन्वितो देह आद्यन्तवानुत्पत्तिमृतिसहित आत्मनि जीवेऽविद्यया भागवत्स्येच्छयाऽज्ञानेन वाऽऽक्षिप्तः संयोजितो देहिनमभिमानितया तद्वन्तं संसारयति संसारयुक्तं करोति । विमतो देहो न देही तदात्मा भौतिकत्वाद्घटादिवत् । न देही वा देहात्माऽभौतिकत्वात् । न देहो ह्यात्माऽद्यन्तवत्त्वात् । न वा देही तदात्मा नित्यत्वात् । जीवो नित्यो धातुरस्य त्वनित्य इत्यादेः । यन्नैवं तन्नैवमित्यादियुक्तयो ज्ञेयाः ॥ ४८ ॥

सुमनोरञ्जिनी — मूढैर्नानेव गृह्यत इत्युक्तम् । मोह एव किं निमित्तं इत्यत आह ॥ **देह इति** । द्रव्याणि पञ्चभूतानि । प्राणाः पञ्च प्राणाः इन्द्रियाणि च । गुणाः सत्वादयस्त्रयः । एतदात्मको देहः । आत्मनि जीवे । यद्वा आत्मनि परमात्मनि विषये या अविद्या अज्ञानम् । तया क्षिप्तः प्रापितः । देहिनं देहाभिमानिनम् । संसारयति । पुनः पुनः जननमरणनिमित्तदुःखपात्रं करोति । कुतः इत्यत उक्तम् । **आद्यन्तवानिति** । स्वस्य देहादेः आद्यन्तवत्वादित्यर्थः । तथा चाऽविद्यैव मोहमूलमित्युक्तं भवति ॥४८॥

यथा शयान आत्मानं विषयान् फलमेव च ।
अनुभुङ्क्तेऽप्यसत्यर्थे तथाऽऽत्माऽपि ध्रुवोऽध्रुवान् ।। ४९ ।।

सत्यधर्मीया — जाग्रद्दशापन्नो जीवः कर्तोपलभ्यते भोक्ता चेति कथं कथय स्वातन्त्र्यं न जीवस्येति । यदि तस्य स्वातन्त्र्यं कथमेक एव परो ह्यात्मेत्युक्तिरित्यतोऽनुगुणनिदर्शनं दर्शयित्वा तद्विषयास्थिरतां व्युत्पाद्यैक एवेत्युक्तं निर्धारयितुमाह ।। **यथेति** । शयानः सुप्त आत्मानमनुभुङ्क्ते जानाति विषयाञ्छब्दादीननुभुङ्क्ते फलं सुखदुःखादिकं चानुभुङ्क्ते वासनात्मकं सर्वमनुभुङ्क्ते । तदा जाग्रत्कालिकेऽर्थेऽसत्यविद्यमानेऽपि । न तत्र रथा इत्यादेः । तथा जाग्रदात्माऽप्यध्रुवानर्थात्स्वयं ध्रुवः सन्ननुभुङ्क्ते । तत्र यथा तथाऽत्रापि भोगयितैको विषयाश्च यथा प्रागग्रे नोपलभ्यन्ते तथैतेऽप्यस्थिरा इति भावः । तदविद्याक्षेपस्त्रैवर्णिकानां कथञ्चिद्वैदिकमार्गप्रवर्तनाद्भगवदनुग्रहेण भवेच्छूद्रादीनां कथं तत्क्षेप उपायाभावादित्यतोऽप्याह ।। **यथेति** । यो ध्रुवो नित्यो वेदादिस्तद्रूपेऽर्थे सत्यपि तत्राधिकाराभावेऽपीति यावत् । आत्मा । भगवत्यात्मा मनो यस्य सोऽधिकारी त्रैवर्णिको यथाऽऽत्मानं स्वामिनं ध्रुवान्विषयान्फलं मोक्षरूपमनुभुङ्क्ते तथा शयानः शूद्रोऽप्यात्मा भगवन्मानसः । उपलक्षणमेतत् । त्रिवर्णपरिचर्यावान्ध्रुवान्विषयादीननुभुङ्क्त इति । त्रैवर्णिकाः सञ्चरन्तो वेदमार्गप्रवर्तनात् । शयानः शूद्र उद्दिष्टो वेदकर्माप्रवर्तनादित्येकादशतात्पर्योक्तेः । ध्रुवो विष्णुर्ध्रुवाननुभुङ्क्ते भोजयतीति योजयन्ति ।। ४९ ।।

सुमनोरञ्जिनी — सुखदुःखयोरप्यध्रुवत्वान्न विषादः कर्तव्य इति स्वप्नदृष्टान्तेनाह ।। यथेति । शयानः स्वप्नं पश्यन् । आत्मानं राजादिदेहम् । विषयान् फलं सुखं दुःखं वा । वासनामूलकमध्रुवमेव अनुभुंक्ते । तथा आत्मा जीवोऽपि स्वयं ध्रुवोऽपि नित्योऽपि । असत्यर्थे दुष्टे अर्थे । अनित्यफलार्थं वा । अध्रुवान् विषयान् अनुभुङ्क्त इत्यन्वयः । अत्र पूर्वश्लोके देहस्य आद्यन्तत्वमभिहितम् । तन्न सम्भवति । कुतः ? देहः स्वस्वेतरवृत्तित्वानाक्रान्तनित्यनिष्ठाधिकरणम् । मेयत्वात् । घटवदित्यनुमानेन नित्यत्वसाधनादिति तत्राह ।। यथेतीत्यवतारितं पदरत्नावल्याम् । अत्रानुमाने साध्यगतस्वशब्दद्वयं देहपरमेव । तथा च दृष्टान्ते देहान्यत्वमादाय पक्षे च देहत्वमादायैव साध्यपर्यवसानं बोध्यम् । एवं षष्टस्कन्धगतानुमानेऽपि बोध्यम् । तेन दृष्टान्ते साध्यपर्यवसानं दुर्घटमित्यन्येषां कण्ठकोलाहलः परास्तः । ननु स्वशब्दस्य सर्वत्र स्वोपादानेत्याद्यनुमानेषु समभिव्याहृतपरताया दर्शनेन अत्र

समभिव्याहृतपरता त्यक्ता स्यादिति चेत् । सत्यम् । यत्र स्वशब्दस्य पक्षमात्रपरता न सम्भवति तत्र पक्षदृष्टान्तयोः साध्याननुगमदोषः परिहरणीयो भवति । स्वत्वस्याननुगमात् । शब्दस्य समभिव्याहृतपरत्वेऽपि साध्यानुगमस्याभावात् । अत एव स्वोपादानेत्यादि-प्राचीनानुमानेषु साध्यानुगमः कथञ्चिन्नवीनैः क्रियते । अत्र तु पक्षदृष्टान्तयोः साध्यस्य एकस्वत्वघटितत्वेन नाननुगम इति समभिव्याहृतपरतात्यागो गुण एव । अत एव सुधायां युक्तिपादे । न तु दृष्टन्तभावादिति सूत्रव्याख्याप्रसङ्गे प्रयुक्ते इयं क्रिया स्वान्यावय-विकालीनत्वानधिकरणकिञ्चित् कालीनक्रियान्या । क्रियात्वात् क्रियान्तरवदिति प्रलय-साधकानुमाने साध्यगतस्वशब्दस्य पक्षमात्रपरत्वं गुरुराजैर्वर्णितम् । तथा हि । अत्र वर्तमान-क्रियायाः पक्षत्वम् । साध्ये च स्वपदं वर्तमानक्रियामात्रपरमिति । बलभद्रः रुग्मिणी-सांत्वनमुपसंहरति ।। **तस्मादिति** । विमोहनम् अभिभावकम् ।। ४९,५० ।।

तस्मादज्ञानजं शोकमात्मबोधविमोहनम् ।
तत्त्वज्ञानेन निर्हृत्य स्वस्था भव शुचिस्मिते ।। ५० ।।

सत्यधर्मीया — उपसंहरति ।। **तस्मादिति** । जीवस्य स्वातन्त्र्याभावादभावाच्च विषयस्थै-र्यस्याज्ञानाज्जायत इत्यज्ञानजं शोकम् । तत्कार्यमप्याह ।। **आत्मेति** । आत्मनो बोधो ज्ञानं तद्विमोहयति तस्य विमोहनं यस्मादिति वा । स्वार्थमविषयीकुर्वन्तमिति यावत् । तत्त्वज्ञानेन मदुपदेशोपज्जृम्भितेन निर्हृत्य परिहृत्य शुचिस्मिते स्वस्था भ्रातृवैरूप्यचिन्तादि-रहिता भव ।। ५० ।।

एवं भगवता तन्वी रामेण प्रतिबोधिता ।
वैमनस्यं परित्यज्य मनो बुद्ध्या समाददे ।। ५१ ।।

सत्यधर्मीया — भगवता रामेणैवं प्रतिबोधिता तन्वी बुद्ध्या वैमनस्यं दुर्मनस्कतां परित्यज्य मनः स्वोचितकार्योचितं स्यात्तथा समाददे गृहीतवती स्वाधीनं चक्र इति यावत् । समादध इति पाठे समाहितमतनोदित्यर्थः ।। ५१ ।।

सुमनोरञ्जिनी — बुध्या कदाप्यतिरोहितज्ञानेन । इदं वैमनस्यप्रदर्शनं देव्याः विडम्बनमेव । साक्षात् श्रियः वैमनस्यादेः कदापि सम्भावयितुमशक्यत्वात् बलभद्रस्य सान्त्वनमपि लोकशिक्षार्थमेवेति मन्तव्यम् ।। ५१ ।।

प्राणावशेष उत्सृष्टो द्विड्भिर्हतबलप्रभः ।
स्मरन् विरूपकरणं वितथात्ममनोरथः ।
चक्रे भोजकटं नाम निवासाय महत्पुरम् ॥ ५२ ॥

सत्यधर्मीया — रुग्मिण्या सह रुग्मवर्णे गते रुग्मी किमकरोदित्यत आह ॥ **प्राणावशेष इति** । अवशिष्यन्त इत्यवशेषाः प्राणा एवावशेषा यस्य स सन् द्विड्भिर्ये भैष्म्याः परिरम्भणं चकमिरे तेषां भुजांश्चिच्छेदुर्ये वा तन्मुखचन्द्रचुम्बनरुचिं तेषां शिरांसि द्विषां । ये तल्पे शयनं तया सह खला लोकाम्बया सङ्गरे प्रेतैः सार्धमशीशयन्हरिभटा इति कर्मकृद्भिर्जीवित्युत्सृष्टस्त्यक्तः । हते गते बलप्रभे यस्य स विरूपकरणं स्मरन्वितथो व्यर्थीभूत आत्मा मनोरथो यस्य स तथा भोजकटं नाम महत्पुरं । द्वे पदे । निवासाय चक्रे ॥ ५२ ॥

सुमनोरञ्जिनी — द्विड्भिः श्रीकृष्णादिभिः । वितथः व्यर्थः आत्मा मनोरथो यस्य ॥ ५२ ॥

अहत्वा दुर्मतिं कृष्णमप्रत्यूह्य यवीयसीम् ।
कुण्डिनं न प्रवेक्ष्यामीत्युक्त्वा तत्रावसद् रुषा ॥ ५३ ॥

सत्यधर्मीया — कुत इत्यत इत इत्याह ॥ **अहत्वेति** । तत्र रुषाऽवसत् ॥ ५३ ॥

सुमनोरञ्जिनी — यवीयसीं स्वसारम् ॥ ५३ ॥

भगवान् भीष्मकसुतामेवं निर्जित्य भूमिपान् ।
पुरमानीय विधिवदुपयेमे कुरूद्वह ॥ ५४ ॥

सत्यधर्मीया — एवं भूमिपतीन्निर्जित्य रुग्मिणीं पुरीं द्वारकामानीय विधिवदुपयेमे ॥ ५४ ॥

सुमनोरञ्जिनी — भीष्मकसुतां पुरमानीय उपयेम इत्यन्वयः ॥ ५४ ॥

तदा महोत्सवो नृणां यदुपुर्यां गृहे गृहे ।
अभूदनन्यभावानां कृष्णे यदुपतौ नृप ॥ ५५ ॥

सत्यधर्मीया — गृहे गृहे प्रतिग्रहं यादृशी मयि भक्तिः स्यात्तादृश्यन्यत्र नैव चेत् । अनन्यभक्तिर्विज्ञेयेत्युक्तेर्यदुपतावन्यसदृशो भावो भक्तिः स नास्ति येषां तेऽनन्यभावास्तेषां महानुत्सवो यदुपुर्यामभूत् ॥ ५५ ॥

सुमनोरञ्जिनी — यदुपतौ कृष्णे । अनन्यभावानाम् । न विद्यते अन्यः विषयः यस्य सः अनन्यः तदेकनिष्ठः भावो भक्तिर्येषां तेषाम् ॥ ५५ ॥

नरा नार्यश्च मुदिताः प्रमृष्टमणिकुण्डलाः ।
पारिबर्हमुपाजह्रुर्वरयोश्चित्रवाससोः ॥ ५६ ॥

सत्यधर्मीया — वरा च वरश्चैवमेव सुवाससी च सुवासाश्च तयोः पारिबर्हं विवाहानेहसि प्राहुणिकैर्देयं तत्रैव प्राक्तनप्राहुणिका रुग्मिणीसम्बन्धिन इति तद्दत्तस्य पारिबर्हता । सामान्यतो राज्ञो देयवस्तुनोऽपि नाम । पारिबर्हं तु राजार्हवस्तुन्यपि परिच्छद इति विश्वः ॥ ५६ ॥

सुमनोरञ्जिनी — प्रमृष्टाः शाणोल्लीढाः । मणयः तन्मयानि कुण्डलानि येषां यासां ते च ताश्च । वरयोः वधूवरयोः । पारिबर्हं विवाहकाले देयं वस्त्रादि ॥ ५६ ॥

सा वृष्णिपुर्युत्तभितेन्द्रकेतुभिर्विचित्रमाल्याम्बररत्नतोरणैः ।
बभौ प्रतिद्वार्युपक्लृप्तमङ्गलैरापूर्णकुम्भैरगरुधूपदीपकैः ॥ ५७ ॥

सत्यधर्मीया — उत्तभिता उपरि स्थापिताश्च ते ध्वजाः केतवश्च तैः । उत्तभितेति गतम् । अम्बरतोरणै रत्नतोरणैश्च प्रतिद्वारि सर्वद्वारेषूपयुक्तानि मङ्गलान्यङ्कुरलाजादीनि तैरापूर्णकुम्भैरगुरुधूपैर्दीपैश्च सा पुरी बभौ शुशुभे ॥ ५७ ॥

सुमनोरञ्जिनी — सा वृष्णिपुरी द्वारका । उत्तम्भितैः उच्छ्रितैः । इन्द्रकेतुभिः ध्वजविशेषैः । विचित्रमाल्यादिरचितैः तोरणैः । प्रतिद्वारि । उपयुक्तानि । तत्कालोचितैः । मङ्गलैः लाजाङ्कुरादिमङ्गलद्रव्यैः । आपूर्णकुम्भादिभिश्च बभावित्यन्वयः ॥ ५७ ॥

सिक्तमार्गा मदच्युद्भिराहूतप्रेष्ठभूभुजाम् ।
गजैर्वास्तुपरामृष्टा रम्भापूगोपशोभिता ॥ ५८ ॥

सत्यधर्मीया — आहूतप्रेष्ठभूभुजां मदच्युद्भिर्दानोदकस्राविभिर्गजैः सिक्तो मार्गो यस्याः सा दानोदसिक्तमार्गेति यावत् । मदच्युत्पदस्वारस्यात् । वास्तूनि परामृष्टानि पराभिः कर्मकर्त्रीभिरामृष्टान्यलं शोभितानि यस्यां सा रम्भापूगस्तत्सङ्घास्तैरुपशोभिता रम्भापूगाः क्रमुकास्तैरुपशोभितेति वा ॥ ५८ ॥

सुमनोरञ्जिनी — आहूताः ये प्रेष्ठभूभुजः । तेषाम् । गजैः । कीदृशैः । मदं मदोदकं च्यवन्तीति मदच्युतः तैः । संसिक्तमार्गा । अर्थात् मदोदकबिन्दुभिरिति लभ्यते । यद्वा गजैः उपशोभितेति बुध्याऽकृष्य योजनीयम् । बभावित्यन्वयो वा ॥ वास्तुषु गृहेषु । परामृष्टाः संस्पृष्टाः । सम्यक् बद्धा इति यावत् । रम्भाश्च पूगाश्च । तैः उपशोभिता । रम्भापूगैः रम्भासमूहैरिति वा ॥ ५८ ॥

कुरुसृञ्जयकैकेयविदर्भयदुकुन्तयः ।
मिथो मुमुदिरे तस्मिन् सम्भ्रमात् परिधावतः ॥ ५९ ॥

सत्यधर्मीया — परिधावतोऽन्तर्गृवं भ्रमतः सम्भ्रमादादरात् । अन्तर्णीतण्यर्थो वा धावच्छब्दः । धावयतः सम्भ्रमात्परस्परं मुमुदिरे । तस्मिन्समये वा पुर इति वा ॥ ५९ ॥

सुमनोरञ्जिनी — सम्भ्रमात्परिधावतः । स्वस्वबन्धून् दृष्ट्वेति शेषः । परिधावन्त इति वा ॥

रुग्मिण्याहरणं श्रुत्वा गीयमानं ततस्ततः ।
राजानो राजकन्याश्च बभूवुर्भृशविस्मिताः ॥ ६० ॥

सत्यधर्मीया — राजानः सामर्थ्यमसमं कृष्णस्येति तत्कन्याश्च वयं धन्याः स पतिश्चेदिति विस्मिताः ॥ ६० ॥

सुमनोरञ्जिनी — गीयमानं प्रोच्यमानम् ॥ ६० ॥

द्वारकायामभूद् राजन् महान् मोदः पुरौकसाम् ।
रुग्मिणीं रमणोपेतां दृष्ट्वा कृष्णं श्रियः पतिम् ॥ ६१ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे एकोनषष्ठिरध्यायः ॥

सत्यधर्मीया —— श्रियः पतिमित्युक्त्या रुग्मिण्याः श्रीत्वं निरणायि ॥६१॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे एकोनषष्ठिरध्यायः ॥ १०-५९ ॥

सुमनोरञ्जिनी —— महान् मोदः सन्तोषः ॥ ६१ ॥

॥ इति श्रीमद्भागवतदशमस्कन्धोत्तरार्धव्याख्यायां सुमनोरञ्जिन्याम् एकोनषष्टितमोऽध्यायः ॥

॥ अथ षष्टितमोऽध्यायः ॥

श्रीशुक उवाच—

सत्राजित्तनयां तन्वीं कृष्णाय कृतकिल्बिषः ।
स्यमन्तकेन मणिना स्वयमुद्यम्य दत्तवान् ॥ १ ॥

सत्यधर्मीया — लोके लोकानामपयशश्श्रुतिं श्रवणादितः कुर्वदच्युतापयशश्शामकं चरितं विवक्षुः परीक्षित्प्रश्नबीजमेकेन श्लोकेन समस्य समग्रं वदन्ननुवदति ॥ **सत्राजिदिति** । कृतं किल्बिषं येन सः कृतापराध इति यावत् । स्यमन्तकेन मणिना द्युरत्नसम्पादित-तन्नामकरत्नेन । सत्रेति विश्लिष्टं शब्दानुशासनपदसमस्तशब्दशब्दवदनुवर्तते । सत्रा सह गतम् । उद्यम्योद्धृत्य दत्तवान् ॥ १ ॥

सुमनोरञ्जिनी — भक्तानुकम्पी भगवान् स्वभक्तस्य द्वेषफलमनिरूप्य भक्तिफलमेव ददातीतीममर्थं सूचयन् प्राणिनां एतज्जन्मानुष्ठितकर्मनिमित्तदुर्यशःशमनहेतुं श्रीकृष्णस्य विक्रमं निरूपयत्यध्यायद्वयेन । तत्र राज्ञो विशेषविवित्साजननाय सामान्यतस्तदाह ॥ सत्रा जिदिति । कृतकिल्बिषः कृतापराधः । सत्राजित् । श्रीकृष्णाय । स्यमन्तकेन तदाख्येन मणिना सह । स्वतनयां, स्वयमेवोद्यम्य परप्रेरणामन्तरेण स्वयमुद्योगं कृत्वा दत्तवान् ॥ १ ॥

राजोवाच—

सत्राजितः किमकरोद् ब्रह्मन् कृष्णस्य किल्बिषम् ।
स्यमन्तकः कुतस्तस्य कस्माद् दत्ता सुता हरेः ॥ २ ॥

सत्यधर्मीया — अकारान्तस्तकारान्तश्चेति पर्यायशब्दौ तद्वाचकौ । किं किल्बिष-मकरोत् स्यमन्तको मणिश्च कुतः कस्मादायातः कस्मात्किं कारणं हरेः सुता दत्तेति । मम किल्बिषं सन्देहहेतुभूतं मनोबलं ब्रह्मंस्त्वं हरेरपहरेः पूर्णत्वाद्योग्यतामनुसृत्येति वाऽन्वयः ॥ २ ॥

सुमनोरञ्जिनी — एवं विदितसंक्षेपो राजा विशेषविवित्सया पृच्छति ॥ **सत्राजित इति** । सत्राजिदिति तान्तः । सत्राजित इत्यकारान्तश्चेति द्वावपि शब्दौ तस्य वाचकौ बोध्यौ । किल्बिषमपराधम् । तस्य स्यमन्तकः (?) कुतः कस्य सकाशात्, लब्धः । हरेः हरये ॥ २ ॥

श्रीशुक उवाच—

आसीत् सत्राजितः सूर्यभक्तस्य परमः सखा ।
प्रीतस्तस्मै मणिं प्रादात् सूर्यस्तुष्टः स्यमन्तकम् ।। ३ ।।

सत्यधर्मीया — सूर्यभक्तस्य सूर्यो ह्योषधिविशेषः स एव भक्तमन्नं यस्य स तस्य । सूर्यः स्यादोषधावपीति विश्वः । भक्तं गतम् । एतेन स्वभक्तस्येति वक्तव्यं सूर्यभक्तस्येत्युक्तं कथमिति किञ्चिच्छङ्कनं परिहृतं तदशनं चोक्तमिति मन्तव्यम् । सत्राजितः परमः सखा सूर्यः प्रीतः स्यमन्तकमणिं तस्मै प्रादात् । तुष्टः स सत्राजिदित्युत्तरेणान्वयः । अतो न प्रीतातिरेकः ।। ३ ।।

सुमनोरञ्जिनी — सूर्यभक्तस्य सत्राजितः । सूर्यः सखा आसीत् । प्रीतः स्निग्धः । तुष्टः सूर्यः तस्मै मणिं स्यमन्तकाख्यम् । प्रादात् ।। ३ ।।

स तं बिभ्रन् मणिं कण्ठे भ्राजमानो यथा रविः ।
प्रविष्टो द्वारकां राजंस्तेजसा नोपलक्षितः ।। ४ ।।

सत्यधर्मीया — तेजसा सत्राजिदिति नोपलक्षितोऽपरिचितैरप्यज्ञात इत्यर्थः ।। ४ ।।

सुमनोरञ्जिनी — तेजसा मणितेजसा निमित्तेन जनैः नोपलक्षितः अयं सत्राजिदिति न ज्ञातः ।। ४ ।।

तं विलोक्य जना दूरात् तेजसा मुष्टदृष्टयः ।
दीव्यतेऽक्षैर्भगवते शशंसुः सूर्यमागतम् ।। ५ ।।

सत्यधर्मीया — मुष्टाऽपहृता दृष्टिर्येषां ते तथा जनाः सूर्य आयातः किमिति संशयग्रस्ता अक्षैर्दुरोदरैर्दीव्यते क्रीडते ।। ५ ।।

सुमनोरञ्जिनी — तेजसा । मुष्टा प्रतिहता दृष्टिर्येषां ते । अक्षैः द्यूतसाधनैः । दीव्यते क्रीडते भगवते । प्रायेण सूर्य एवायमिति शङ्किताः सम्भावनायुक्ताः ।। ५ ।।

नारायण नमस्तेऽस्तु शङ्खचक्रगदाधर ।
दामोदरारविन्दाक्ष गोविन्द यदुनन्दन ।। ६ ।।

सत्यधर्मीया — अरविन्दाक्ष कमलनयन । अरविन्दौ विधुरवी अक्षिणी यस्य स इत्यागमानुबन्धसूचनं वा ॥ ६ ॥

सुमनोरञ्जिनी — किमिति शशंसुरित्यत आह ॥ **नारायणेति** ॥ ६ ॥

एष आयाति सविता त्वां दिदृक्षुर्जगत्पते ।
मुष्णन् गभस्तिचक्रेण नृणां चक्षूंषि तिग्मरुक् ॥ ७ ॥

सत्यधर्मीया — गभस्तिचक्रेण करनिकुरुम्बेन तिग्मरुक् तीक्ष्णप्रकाशः ॥ ७ ॥

सुमनोरञ्जिनी — गभस्तिचक्रेण रश्मिमण्डलेन । तिग्मा तीक्ष्णा रुक् यस्य सः ॥७॥

नन्वन्विच्छन्ति ते मार्गं त्रिलोक्यां विबुधर्षभाः ।
ज्ञात्वाऽद्य गूढं यदुषु द्रष्टुं त्वां यात्यजः प्रभुः ॥ ८ ॥

सत्यधर्मीया — स कुत आगच्छेदित्यतस्तव माहात्म्यमीदृगित्याहुः ॥ **नन्विति** । विबुधर्षभा अपि ते मार्गं त्रिलोक्यामिच्छन्ति ननु निश्चयो यदुषु गूढं त्वामज्ञात्वा दिदृक्षुरजः सूर्योऽजाय लोकत्रयभावनायेति वचनात् । योऽजस्तं त्वां द्रष्टुमिति वाऽन्वयः ॥ ८ ॥

सुमनोरञ्जिनी — विबुधर्षभाः देवश्रेष्ठाः ते मार्गं अन्विच्छन्ति मृगयन्ते । तेषु अजः सूर्यः यदुषु गूढं ज्ञात्वा । त्वा त्वां द्रष्टुं आयाति ननु ॥ ८ ॥

निशम्य बालवचनं प्रहस्याम्बुजलोचनः ।
प्राह नासौ रविर्देवः सत्राजिन्मणिना ज्वलन् ॥ ९ ॥

सत्यधर्मीया — असूर्यं सूर्यत्वेन वदन्तीति बाला मूर्खास्तेषाम् । न चेद्रविरय-मरविन्दाक्षेयती द्युतिः कथमन्यस्येत्यतः कथयति ॥ **मणिना ज्वलन्निति** ॥ ९ ॥

सुमनोरञ्जिनी — बालानां अज्ञानाम् । ज्वलन् द्योतमानः ॥ ९ ॥

सत्राजित् स्वगृहं श्रीमत् कृतकौतुकमङ्गलम् ।
प्रविश्य देवसदने मणिं विप्रैर्न्यवेशयत् ॥ १० ॥

सत्यधर्मीया — कृतं कौतुकं मङ्गलं येन तद्गृहं विप्रैः ॥ १० ॥

सुमनोरञ्जिनी — कृतानि कौतुकेन मङ्गलानि यस्मिन् तत् । गृहं प्रविश्य । देवसदने । विप्रैः मणिं न्यवेशयत् प्रतिष्ठापयामास ॥ १० ॥

दिने दिने स्वर्णभारानष्टौ स सृजति प्रभो ।
दुर्भिक्षमार्यरिष्टानि सर्वेऽपि व्याधयोऽशुभाः ॥ ११ ॥

सत्यधर्मीया — दिने दिने प्रतिदिनं पञ्चविंशतितुलात्मक एको भारस्तदष्टकमष्टौ भारान् सृजति । यद्वा विंशतितुलात्मक एको भारश्चतुर्भिर्व्रीहिभिर्गुञ्जा गुञ्जान्पञ्च पणं पणान् । अष्टौ धरणमष्टौ च कर्षतश्च चतुरं पलम् । तुलापञ्चशते प्राहुर्भारः स्याद्विंशतिस्तुला इत्युक्तेः । भारस्तु विविधे स्वर्णपलानामयुतद्वय इति विश्वः । दुःसाध्या भिक्षा येषां ते दुर्भिक्षा विशेषणाभावाद्विशिष्टाभावः । मारीकिण्याद्यरिष्टानि भाव्यशुभसूचकानि सर्वेऽपि व्याधयो रोगाः ॥ ११ ॥

सुमनोरञ्जिनी — भारः स्याद्विंशतिस्तुलेति वचनात् विंशतितुलात्मकः एको भारः । दिने दिने । अष्टौ स्वर्णभारान् । सृजति ददाति । मारी अकालमृत्युः । अरिष्टं दुश्चिह्नम् । अशुभाः दुःखहेतवः ॥ ११ ॥

न सन्ति मायिनस्तत्र यद्राष्ट्रेऽभ्यर्चितो मणिः ।
स याचितो मणिं क्वापि यदुराजाय शौरिणा ॥ १२ ॥

सत्यधर्मीया — मायिनः कपटिनो यद्राष्ट्रे यस्मिन्देशे मणिरभ्यर्चितस्तस्मिन्देशे एते न सन्ति न प्रादुष्येयुः क्वापि कदाचित् शौरिणा कृष्णेन यदुराजायोग्रसेनार्थं याचितः ॥१२॥

सुमनोरञ्जिनी — मायिनः कपटवृत्तयः । सः मणिः । शौरिणा प्रार्थितः ॥ १२ ॥

नैवार्थकामुकः प्रादाद् याञ्चाभङ्गमतर्कयन् ।
तमेकदा मणिं कण्ठे प्रतिमुच्य महाप्रभम् ॥ १३ ॥

सत्यधर्मीया — अर्थकामुको निरन्तरं तदतिसृज्य सुवर्णकामुकः प्राग्या कर्तव्यत्वेनातर्कयदिदमेव कर्तव्यमित्यूहितवाननन्तरं नैव प्रदात्प्रतिमुच्याबाध्य ॥ १३ ॥

सुमनोरञ्जिनी — अथापि अर्थकामुकः सत्राजित् । यदुराजाय । न प्रादात् । परं तु याञ्चाभङ्गम् । अतर्कयत् याञ्चाभङ्गो मया कृतः । तेन प्रायशो ममानिष्टं भवेदिति ऊहयामास । प्रतिमुच्य बध्वा ॥ १३ ॥

प्रसेनो हयमारुह्य मृगयां व्यचरद् वने ।
प्रसेनं सहयं हत्वा मणिमाच्छिद्य केसरी ॥ १४ ॥

सत्यधर्मीया — प्रसेनो नाम्ना तद्भ्राता व्यचरच्चचार मृगयां गतमाच्छिद्यापहृत्य केसरी सिंहः ॥ १४ ॥

सुमनोरञ्जिनी — प्रसेनः तन्नामा । सत्राजिदनुजः । आच्छिद्य बलाद्गृहीत्वा ॥१४॥

बिलं विशन् जाम्बवता निहतो मणिमिच्छता ।
सोऽपि चक्रे कुमारस्य मणिं क्रीडनकं बिले ॥ १५ ॥

सत्यधर्मीया — बिलं स्वावासं सोऽपि जाम्बवानपि क्रीडनं क्रीडासाधनम् ॥१५॥

सुमनोरञ्जिनी — क्रीडनकं क्रीडासाधनम् ॥ १५ ॥

अपश्यन् भ्रातरं भ्राता सत्राजित् पर्यतप्यत ।
प्रायः कृष्णेन निहतो मणिग्रीवो वनं गतः ॥ १६ ॥

सत्यधर्मीया — पर्यतप्यत सन्तप्तोऽभूत् । ततश्चैवमूहितवानित्याह ॥ **प्राय इति** ॥१६॥

भ्राता ममेति तच्छ्रुत्वा कर्णे कर्णेऽजपन् जनाः ।
भगवान् तदुपश्रुत्य दुर्यशो लिप्तमात्मनि ॥ १७ ॥

मार्ष्टुं प्रसेनपदवीमन्वपद्यत नागरैः ।
हतं प्रसेनमश्वं च वीक्ष्य केसरिणा वने ॥ १८ ॥

सत्यधर्मीया — कृष्णेन मणितृष्णेन वनं गतो मम भ्राता हत इत्युक्तवानिति शेषः । तच्छ्रुत्वा जनाः कर्णे कर्णे प्रतिकर्णमजपन् । ननु दुर्भिक्षमारीत्यादिमहामहिमवति रत्ने सति

कण्ठे कथं सिंहो हिंसितवांस्तमिति चेत् । सत्यम् । हरिद्रोहाभावे तथैव । याश्चाभङ्गो भगवतोऽनेनाचरित इति विशेषशक्त्यशक्त्युपपत्तेः । शुचिष्मता सदा धार्यं रत्नमेतन्महोत्तमम् । सत्राजित्तत्क्षणेनैतदशुचिं हन्ति मानवम् । अश्वारूढोऽशुचिश्चासौ हतः सिंहेन तत्क्षणादिति व्रतार्कोक्तेरशुचित्वादुपपन्नं तद्धननं सति तस्मिन्नपीति वा ज्ञेयम् । आत्मनि लिप्तं दुर्यशो माष्टुं नागरैः सहानीय रत्नं स्थापितवानित्यपवादान्तरप्रच्यावनार्थं नागरैः सह गमनमिति मन्तव्यम् ॥ १७,१८ ॥

सुमनोरञ्जिनी — अजपन् उपांशु अकथयन् । उपांशूच्चारणं जप इत्यभिधानात् ॥१७॥

तं चाद्रिपृष्ठे निहतमृक्षेण ददृशुर्जनाः ।
ऋक्षराजबिलं भीममन्धेन तमसा वृतम् ।
एको विवेश भगवानवस्थाप्य बहिः प्रजाः ॥ १९ ॥

सत्यधर्मीया — तं सिंहम् । अन्धयति स्वप्रविष्टमित्यन्धस्तमसाऽन्धकारेणावृतं । प्रजा बहिरवस्थाप्यैक एव विवेश ॥ १९ ॥

सुमनोरञ्जिनी — तं च केसरिणं च । ऋक्षेण जाम्बवता ॥ १९,२० ॥

तत्र दृष्ट्वा मणिश्रेष्ठं बालक्रीडनकं कृतम् ।
हर्तुं कृतमतिस्तस्मिन्नवतस्थेऽर्भकान्तिके ॥ २० ॥

सत्यधर्मीया — अर्भकान्तिके जाम्बवतोऽन्तिकेऽवतस्थे गतम् ॥ २० ॥

तमपूर्वं नरं दृष्ट्वा धात्री चुक्रोश भीतवत् ।
तच्छ्रुत्वाऽभ्यद्रवत् क्रुद्धो जाम्बवान् बलिनां वरः ॥ २१ ॥

सत्यधर्मीया — धात्री उपमाता भीतवद्भीता गतम् । मदनज्वरदाहार्ता दृष्ट्वा तं कमलेक्षणम् । उवाच ललिता बाला गम्यतां गम्यतामिति । रत्नं गृहीत्वा वेगेन यावच्छेते तु जाम्बवान् । इत्याकर्ण्य हसञ्छौरिः शङ्खं दध्मौ प्रतापवान् । आकर्ण्य सहसोत्थायेति व्रतार्कोक्तिः कृष्णकृष्णतोपायपरोपायान्तरपरमिदमिति न विरोधः । धात्र्या कुमार-मित्यादिर्हरिवंशोऽपि समीकृतोऽनेनेति ज्ञेयम् ॥ २१ ॥

सुमनोरञ्जिनी — धात्री दासी ॥ २१,२२ ॥

स वै भगवता तेन युयुधे स्वामिनाऽऽत्मनः ।
पुरुषं प्राकृतं मत्वा कुपितो नानुभाववित् ॥ २२ ॥

सत्यधर्मीया — कुपित इति नानुभाववित् प्राकृतं कश्चन पुरुषं मत्वा तेन कृष्णेन सह युयुधे ॥ २२ ॥

द्वन्द्वयुद्धं सुतुमुलमुभयोर्विजिगीषतोः ।
आयुधाश्मद्रुमैर्दोर्भिः क्रव्यार्थे श्येनयोरिव ॥ २३ ॥

सत्यधर्मीया — अयुधाश्मद्रुमैः शिलाभिर्द्रुमैः । आयुधस्थानेऽश्मद्रुमैरिति वा । क्रव्यार्थे मांसार्थे ॥ २३ ॥

सुमनोरञ्जिनी — क्रव्यार्थे आमिषार्थे ॥ २३ ॥

आसीत् तदष्टविंशाहमितरेतरमुष्टिभिः ।
वज्रनिष्पेषपरुषैरविश्रममहर्निशम् ॥ २४ ॥

सत्यधर्मीया — अविश्रमं विश्रामरहितं यथा निरन्तरमिति यावत् ॥ २४ ॥

सुमनोरञ्जिनी — अष्ट च विंशतिश्च अहानि यस्मिन्कर्मणि तदष्टविंशाहम् । इतरेतर-मुष्टिभिः परस्परमुष्टिभिः । कीदृशैः । वज्रस्य निष्पेषः आघातः तद्वत् परुषैः निष्ठुरैः । अविश्रमं विश्रमेण विश्रान्त्या रहितं यथा भवति तथा ॥ २४ ॥

कृष्णमुष्टिविनिष्पातनिष्पिष्टाङ्गोरुबन्धनः ।
क्षीणसत्वः स्विन्नगात्रस्तमाहातीवविस्मितः ॥ २५ ॥

सत्यधर्मीया — ननु व्रतार्के एकविंशद्दिनं यावद्बाहुप्रहरणो विभुरित्येकविंश-द्दिनोक्तिरत्र त्वष्टाविंशाहमित्युक्तिः कथमिति चेन्न । नागरगमनं सप्तमे दिने तेनैकविंशा-होक्तिस्तत्रात्र तु सह ततसप्तकेनाष्टाविंशाहोक्तिरिति सङ्ख्यासाम्यसम्भवात् । द्वारकावासिनः

सर्वे गतास्ते सप्तमे दिन इति तत्रैवोक्तेः । बाहुभ्यामेव गोविन्दो दिवसानेकविंशतिमित्यादि-र्हरिवंशोऽपि व्याख्यातोऽनेनेति ज्ञेयम् । निष्पिष्टान्यङ्गस्योरूणि बन्धनानि शिरस्थानानि यस्य सः क्षीणं सत्त्वं बलं यस्य सः स्विन्नं गात्रं वपुर्यस्य सोऽतिविस्मितो मामेवं क्लिष्टं कुर्वन्न विष्ण्वन्यः स्यादिति ॥ २५ ॥

सुमनोरञ्जिनी — कृष्णस्य मुष्टीनां विनिष्पातः आघातः । तेन निष्पिष्टानि अङ्गानामवयवानां उरूणि बन्धनानि सन्धिस्थानानि यस्य सः । क्षीणसत्वः क्षीणबलः । तं श्रीकृष्णम् ॥ २५ ॥

जाने त्वां सर्वभूतानां प्राणओजः सहोबलम् ।
विष्णुं पुराणपुरुषं प्रभविष्णुमधीश्वरम् ॥ २६ ॥

सत्यधर्मीया — ज्ञातं प्रमेयं विज्ञापयति ॥ **जाने त्वामिति** । सर्वभूतानां प्राण ओजोऽवष्टम्भः सहः सहनं बलं तत्प्रापकं पुराणपुरुषं प्रभविष्णुं जगदुत्पादशीलमधीश्वरं विष्णुं जाने ॥ २६ ॥

सुमनोरञ्जिनी — सर्वभूतानां प्राणः प्राणनं चेष्टाशक्तिः । ओजः अवष्टंभशक्तिः । इन्द्रियाणां शक्तिर्वा । सहः सहनशक्तिः । बलं शरीरसामर्थ्यम् । प्राणनादिप्रद इत्यर्थः । प्रभविष्णुं प्रकृष्टतया भवनशीलम् । सर्वोत्तमतया स्थितमिति यावत् ॥ २६ ॥

त्वं हि विश्वसृजां स्रष्टा सृष्टानामधिपो वसन् ।
कालः कलयतामीश पर आत्मा तथाऽऽत्मनाम् ॥ २७ ॥

सत्यधर्मीया — विश्वसृजां ब्रह्मादीनां सृष्टानामेषामधिपः पालयिता कलयतां संहर्तृ-त्वेन त्वया स्थापितानां कालः संहारक आत्मनां जीवानामात्मा पर उत्तमात्मा ॥ २७ ॥

सुमनोरञ्जिनी — विश्वसृजां ब्रह्मादीनामपि स्रष्टा । सृष्टानामपि वस्तूनामधिपः सन्, वसन् नियामकतया तेषु स्थित इत्यर्थः । कलयतां संहर्तॄणां रुद्रादीनामपि । कालः संहर्ता । आत्मनां चेतनानां मध्ये परः आत्मा परमचेतनः । अत एवेशः सर्वस्वामी ॥२७॥

यस्येषदुत्कलितरोषकटाक्षमोक्षैर्वर्त्मादिशत् क्षुभितनक्रतिमिङ्गिलोऽब्धिः ।
सेतुः कृतः स्वयश उज्ज्वलिता च लङ्का रक्षःशिरांसि भुवि पेतुरिषुक्षतानि ।।२८।।

सत्यधर्मीया — स्वोपास्यदशास्यन्दननन्दनात्मतया नन्दनन्दनमभिनन्दयन्नाह ।। यस्येति । यस्य रामस्येषदुत्कलितोऽल्पमङ्कुरितो रोषः प्रदर्शनमात्रमभिप्रेतं तेनाविर्भूता ये कटाक्षमोक्षास्तैः क्षुभिताश्चलिता नक्रास्तिमिङ्गिलाश्च यस्मिन्सोऽब्धिरकूपारो वर्त्म मार्गमदिशद्ददौ । स्वयशास्तद्रूपः सेतुः कृतः । सकारान्तानामकारान्ततेति पक्षे स्वयशसे तदर्थमिति वा । लङ्का चोत्कलिता हनुमद्द्वारा रात्रिसङ्ग्रामे कपिभिश्च रक्षश्शिरांसीषुक्षतानि भुवि पेतुः ।। २८ ।।

सुमनोरञ्जिनी — यस्मादेवंभूतः तस्मान्मम स्वामी रामचन्द्रो भवानित्याह ।। **यस्येति** । ईषदुत्कलितः किञ्चिदुद्दीपितो यो रोषः तेन जाताः ये कटाक्षमोक्षाः नेत्रान्तपाताः । तैः क्षुभिताः नक्राः ग्रहाः तिमिङ्गिलाः महामत्स्याश्च यस्मिन् सोऽब्धिः यस्य । मार्गम् । आदिशत् ददौ । तथापि स्वयशः स्वयशोरूपः सेतुश्च कृतः बद्धः । लङ्का च उज्ज्वलिता दग्धा । यस्य इषुभिः क्षतानि छिन्नानि रक्षःशिरांसि रक्षसो दशाननस्य शिरांसि भुवि पेतुः स राम एव त्वमिति जान इति पूर्वेणान्वयः ।। २८ ।।

इति विज्ञातविज्ञानमृक्षराजानमच्युतः ।
व्याजहार महाराज भगवान् देवकीसुतः ।। २९ ।।

सत्यधर्मीया — इति विज्ञातं विज्ञानं विज्ञानात्मकं ब्रह्म येन स तमृक्षराजानम् । समासान्तविधेरनित्यत्वान्न टच् । तं प्रति अच्युतो व्याजहार ।। २९ ।।

सुमनोरञ्जिनी — इति विज्ञातविज्ञानं ज्ञाततत्वम् । ऋक्षराजानं ऋक्षराजम् । समासान्तविधेरनित्यत्वात् ।। २९ ।।

अभिमृष्यारविन्दाक्षः पाणिना शङ्करेण तम् ।
कृपया परया भक्तं मेघगम्भीरया गिरा ।। ३० ।।

सत्यधर्मीया — शङ्करेण करेण तमभिमृश्य मेघगम्भीरया गिरा व्याजहार ।। ३० ।।

सुमनोरञ्जिनी — शङ्करेण सुखकरेण । पाणिना । अभिमृश्य । मेघगम्भीरया गिरा व्याजहारेति सम्बन्धः ॥ ३० ॥

मणिहेतोरिह प्राप्ता वयमृक्षपते बिलम् ।
मिथ्याभिशापं प्रमृजन्नात्मनो मणिनाऽमुना ॥ ३१ ॥

सत्यधर्मीया — वयं हे ऋक्षपते ऋक्षपत इति वा आत्मनो मिथ्याभिशापं प्रमृजन् । किं प्रयुक्तस्त्वमभिशापयुक्त इत्यत आह ॥ **अमुना मणिनेति** । वयमिति बहुवचनं रामादि-रूपाणां सङ्ग्रहार्थम् । मृजन्नित्येकवचनं च तेषामैक्यसूचनार्थमिति बोध्यम् । यद्वा नागरैः सहागमनाद्वयमित्युक्तिस्तथाऽन्ते चैक एव विवेशापयशश्चैकमात्रस्येत्येकवचनेन च सम्भवति ॥ ३१ ॥

सुमनोरञ्जिनी — मणिहेतोर्मिथ्याभिशापं प्राप्ताः वयम् । इह अरण्ये प्राप्ताः । तत्राहं अमुना मणिना नीतेन । मिथ्याभिशापं मिथ्यापवादम् । प्रमृजन् प्रमार्ष्टुमिच्छन् बिलं अन्तर्बिलं प्राप्त इति योजना ॥ ३१ ॥

इत्युक्तः स्वां दुहितरं कन्यां जाम्बवतीं मुदा ।
अर्हणार्थं सहमणिं कृष्णायोपजहार सः ॥ ३२ ॥

सत्यधर्मीया — स्वां दुहितरं जाम्बवतीं नाम्ना कन्यां दीप्तिमतीं कन्यामविवाहितां सहमणिमिति कन्याविशेषणं स जाम्बवान्कृष्णायोपजहार ॥ ३२ ॥

सुमनोरञ्जिनी — सहमणिं मणिनासहिताम् । स्वां कन्यां नामतो जाम्बवतीम् । उपजहार समर्पयामास ॥ ३२ ॥

अदृष्ट्वा निर्गमं शौरेः प्रविष्टस्य बिलं जनाः ।
प्रतीक्ष्य द्वादशाहानि दुःखितास्ते पुरं ययुः ॥ ३३ ॥

सत्यधर्मीया — जना द्वारकाप्रजाः शौरेर्निर्गमनमदृष्ट्वा द्वादशाहानि प्रतीक्ष्य साप्तदिन्या एव द्वादशाहतया भानं शोकतो मासशब्देनाहान्युच्यन्ते । तथा हि भारत इत्यादि प्रथमस्कन्धोक्तरीत्या ज्ञेयम् । अत एवाचार्यैर्बहून्यहानीत्युदीरणं कृतम् । दुःखितास्ते

जनाः पुरं द्वारकां विभुदुःखिताः सन्तो द्वादशाहानि तेपुः कृष्णदृष्टिमुद्दिश्य तपश्चक्रुरिति वा अं भगवन्तं शरणं ययुरिति वा ॥ ३३ ॥

सुमनोरञ्जिनी — बिलद्वारे स्थापितानां यदूनां वृत्तान्तमाह ॥ **अदृष्ट्वेत्यादिना** ॥ ३३,३४ ॥

निशम्य देवकी देवी रुग्मिण्यानकदुन्दुभिः ।
सुहृदो ज्ञातयोऽशोचन् बिलात् कृष्णमनिर्गतम् ॥ ३४ ॥

सत्यधर्मीया — निशम्यागतनागरजनैः श्रुत्वा बिलादनिर्गतं कृष्णमुद्दिश्याशोचन् शुशुचुः ॥ ३४ ॥

सत्राजितं शपन्तस्ते दुःखिता द्वारकौकसः ।
उपतस्थुर्महामायां दुर्गां कृष्णोपलब्धये ॥ ३५ ॥

सत्यधर्मीया — उपतस्थुः सकर्मकत्वेऽपि देवदेवविषये देव्या न देवीत्वमिति उपाद्देवपूजेति न तङ् । वा लिप्सायामित्युक्तेः परस्मैपदं वा । अर्चयाश्चक्रुः ॥ ३५ ॥

सुमनोरञ्जिनी — उपतस्थुः स्तोत्रपाठादिना अभजन् ॥ ३५ ॥

तेषां तु देव्युपस्थानात् प्रत्यादिष्टाशिषोऽभवन् ।
प्रादुर्बभूव सिद्धार्थः सदारो हर्षयन् हरिः ॥ ३६ ॥

सत्यधर्मीया — तेषां द्वारकागाराणां देव्या उपस्थानं सेवा तस्मात्प्रत्यादिष्टा देवीदत्ताश्च ता आशिषोऽभवन् । तत्फलं लपति ॥ **प्रादुर्बभूवेति** । सिद्धार्थोऽपयशश्यामकस्यमन्तकाप्तिरूपसम्पन्नप्रयोजनः सदारो दारैः सहितश्च हर्षयन्द्वारकौकसः प्रादुर्बभूव ॥३६॥

सुमनोरञ्जिनी — देव्या उपस्थानात् । प्रत्यादिष्टाशिषाम् । देव्या प्रत्यादिष्टा या आशीः 'अचिरात्कृष्णः आयास्यतीति वचनरूपा' येषां तेषाम् । पुरतः । भवान् पूज्यः । सिद्धार्थो भवन् सिद्धार्थः सन्निति वा । सदारः दारैर्जाम्बवत्या सहितः ॥ ३६ ॥

उपलभ्य हृषीकेशं मृतं पुनरिवागतम् ।
सह पत्न्या मणिग्रीवं सर्वे जातमहोत्सवाः ॥ ३७ ॥

सत्यधर्मीया — मृतं तमिव पत्न्या सह मणिग्रीवं मणिर्ग्रीवायां यस्य तं चक्रपाणिं मणिना युक्ता ग्रीवा यस्य तं वा ॥ ३७ ॥

सुमनोरञ्जिनी — मृतं पुनरागतं बन्धुमिव । हृषीकेशम् । उपलभ्य । जातमहोत्सवाः आसन् ॥ ३७ ॥

सत्राजितं समाहूय सभायां राजसन्निधौ ।
प्राप्तिं चाख्याय भगवान् मणिं तस्मै न्यवेदयत् ॥ ३८ ॥

सत्यधर्मीया — राजा उग्रसेनः आख्यायोक्त्वा तस्मै सत्राजिते ॥ ३८ ॥

सचातिव्रीडितो रत्नं गृहीत्वाऽवाङ्मुखस्ततः ।
अनुतप्यन् स्वभवनमगमत् स्वेन पाप्मना ॥ ३९ ॥

सत्यधर्मीया — स्वेन पाप्मना हर्युपर्यपवादस्थापनजेनानुतप्यन् पश्चात्तापं भजन्स्वभवनमगमत् ॥ ३९ ॥

सुमनोरञ्जिनी — स्वेन पाप्मना स्वापराधेन । अनुतप्यन् पश्चात्तप्यमानः ॥ ३९ ॥

सोऽनुध्यायंस्तदेवाघं बलवद्विग्रहाकुलः ।
कथं मृजाम्यात्मरजः प्रसीदेद् वाऽच्युतः कथम् ॥ ४० ॥

सत्यधर्मीया — तदेव देवविषयेऽनुष्ठितं स्वाघमनुध्यायन् बलवता कृष्णेन सह विग्रहेणाकुल आत्मरजः स्वदोषं कथं मृजामि । अच्युतः कथं वा प्रसीदेत् ॥ ४० ॥

सुमनोरञ्जिनी — तदेवाघं स्वकृतं तमेव दोषम् । अनुध्यायन् सन्ततं स्मरन् । बलवता श्रीकृष्णेन विग्रहो विरोधः तेन आकुलो भीतः । आत्मनो रजः अपराधलक्षणमलम् ॥ ४० ॥

किं कृत्वा साधु मह्यं स्यान्न शपेद् वा जनो यथा ।
अदीर्घदर्शनं धिङ्मां मूढं द्रविणलोलुपम् ॥ ४१ ॥

सत्यधर्मीया — मह्यं मम साधु मङ्गलम् । जनो मां न शपेत् । अदीर्घदर्शनं जाल्मं द्रविण-लोलुपं रत्नदेयस्वापतेयलोलुपम् ॥ ४१ ॥

सुमनोरञ्जिनी — किं कृत्वा स्थितस्य । मह्यं मम । साधु मङ्गलम् । अदीर्घदर्शनं भविष्यदूहनहीनं च मां धिगिति च । अनुध्यायन्निति संबन्धः ॥ ४१ ॥

दास्ये दुहितरं तस्मै स्त्रीरत्नं रत्नमेव च ।
उपायोऽयं समीचीनस्तस्य शान्तेर्न चान्यथा ॥ ४२ ॥

सत्यधर्मीया — दुहितरं तस्मै दास्ये । इयमपि तद्योग्येत्याह ॥ **स्त्रीरत्नमिति** । यदर्थमियाननर्थस्तदपि दास्य इत्याह ॥ **रत्नमेव चेति** । अयमुपायः समीचीनोऽन्यथैत द्विना ॥ ४२ ॥

सुमनोरञ्जिनी — तत्रोपायं स्वयमेव कल्पयति ॥ **दास्य इति** । रत्नं स्यमन्तकं च ॥

एवं व्यवसितो बुद्ध्या सत्राजित् स्वसुतां शुभाम् ।
मणिं च स्वयमुद्यम्य कृष्णायोपजहार ताम् ॥ ४३ ॥

सत्यधर्मीया — एवं बुद्ध्या व्यवसितो व्यवसायं निश्चयं प्राप्तः सत्राजित्स्वसुतां स्वपुत्रीम् । आन्तरङ्गिको भावस्तु सु असुताऽयोनिजेति । तां मणिं च स्वयमनितरबोधितः स्वयमतिशुभंदैवं निमित्तीकृत्येति वा । कृष्णाय तामुपाजहारार्पयत् ॥ ४३ ॥

सुमनोरञ्जिनी — बुध्या व्यवसितः निश्चयवान् । उपजहार दत्तवान् ॥ ४३ ॥

स सत्यभामां भगवानुपयेमे यथाविधि ।
बहुभिर्याचितां शीलरुपौदार्यगुणान्विताम् ॥ ४४ ॥

सत्यधर्मीया — शीलरूपौदार्यगुणान्वितामिति बहुबाहुजयाचनाहेतूक्तिः ॥ ४४ ॥

सुमनोरञ्जिनी — बहुभिः कृतवर्मप्रमुखैः ॥४४॥

भगवानाह न मणिं प्रतीच्छामो वयं नृप ।
तवास्तु देवभक्तस्य वयं हि फलभागिनः ॥ ४५ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे षष्टितमोऽध्यायः ॥

सत्यधर्मीया – मणिं न साक्षान्न प्रतीच्छामो वयं हि वयं तु फलभागिनो भाराष्टकाष्टा-पदमात्रयोग्याः ॥ ४५ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे षष्टितमोऽध्यायः ॥ १०-६० ॥

सुमनोरञ्जिनी — न प्रतीच्छामः न स्वीकुर्मः । देवः सूर्यः । फलभागिनः मणिना लभ्यं यत्फलमष्टभारसुवर्णादि तद्भागिन एव । वयं जामातृत्वादिति भावः ॥ ४५ ॥

॥ इति श्रीमद्भागवतदशमस्कन्धोत्तरार्धव्याख्यायां सुमनोरञ्जिन्यां षष्टिरध्यायः ॥

॥ अथ एकषष्टिरध्यायः ॥

श्रीशुक उवाच –

विज्ञातार्थोऽपि गोविन्दो दग्धानाकर्ण्य पाण्डवान् ।
कुन्तीं च कुल्यकरणे सहरामो ययौ कुरून् ॥ १ ॥

सत्यधर्मीया — अधिकारभेदेन तमोमुक्तिहेतुभूतं किञ्चिल्लोकमनुकुर्वतो लोके यस्य चरितं विविक्षुमन्दसन्देहसंदलनाय तस्यावसरमवितरन्नादावेव वक्ष्यमाणतात्पर्यं सूचयन् वक्तीति वक्ति ॥ **श्रीशुक इति** । विज्ञातार्थो विज्ञातोऽर्थो येन स तथा सर्वज्ञः पाण्डवान्दग्धानाकर्ण्य श्रुत्वा कुन्तीं च दग्धामिति विपरिणतमन्वेति । कुल्यकरणे शवदाहानन्तरमुर्वारितहितार्थं तद्गेहं गत्वा दुःखहापनवचनं कुल्यः । कुलोद्भवे कुलस्यातिहितेऽपि चेति विश्वः । सहरामः कुरून् ययौ । अग्रजत्वेन वा तव विनेय एतादृश इति दर्शयितुं वा हलिना सह नयनमिति ज्ञेयम् ॥ १ ॥

सुमनोरञ्जिनी — पाण्डवाः न दग्धाः अपि तु विदुरकारितबिलद्वारेण जतुगृहान्निर्गताः । कुन्ती च निर्गतेत्येवं विज्ञातार्थोऽपि । कुल्यकरणे कुलोचितसंव्यवहारकरणार्थम् ॥ १,२ ॥

भीष्मं नृपं सविदुरं गान्धारीं द्रोणमेव च ।
तुल्यदुःखौ समागम्य हा कष्टमिति होचतुः ॥ २ ॥

सत्यधर्मीया — सविदुरं भीष्मं नृपं धार्तराष्ट्रं वा समदुःखो समं दुःखं ययोस्तौ । इदं नटनमिति सम्यगदुःखावित्यप्यन्तरार्थः । हा हा कष्टमित्यूचतुः ॥ २ ॥

लब्ध्वैतदन्तरं राजन् शतधन्वानमूचतुः ।
अक्रूरकृतवर्माणौ मणिः कस्मान्न गृह्यते ॥ ३ ॥

सत्यधर्मीया — एतदन्तरमेतदवकाशं लब्ध्वा रामकृष्णौ ग्रामान्तरगताविति लब्धावकाशौ अक्रूरकृतवर्माणौ सासुरावेशौ शतधन्वानं तन्नामानं कञ्चिद्यादवं मणिः श्यमंतकः कस्मान्न गृह्यते गृहाण ॥ ३ ॥

सुमनोरञ्जिनी — एतदन्तरम् एतावदवकाशम् ॥ ३ ॥

योऽस्मभ्यं सम्प्रतिश्रुत्य कन्यारत्नं विगर्ह्य नः ।
कृष्णायादात् स सत्राजित् तस्माद् भ्रातरमन्वियात् ॥ ४ ॥

सत्यधर्मीया — कोऽपराधस्तदनुष्ठित इत्युपरोधोऽनुष्ठेय इत्यत आहतुः ॥ **य इति** । अस्मभ्यं प्रातिस्विकतया त्रिभ्यः कन्यारत्नं दास्य इति प्रतिज्ञाय नः, त्रीन्, विगर्ह्य निन्दयित्वाऽनादृत्येति यावत् । यस्मात्कृष्णायादाद्ददौ तस्माद् भ्रातरं प्रसेनमन्वियान्मृतः स्यात् । घातनं कर्तव्यमित्यूचतुरित्यन्वयः ॥ ४ ॥

सुमनोरञ्जिनी — नः विगर्ह्य अवज्ञाय । यस्मात्कृष्णायादात् तस्मात् भ्रातरं प्रसेनम् । अन्वियात् अनुगच्छतु । मृतोऽस्तु तं संहरति भावः ॥ ४,५ ॥

एवं भिन्नमतिस्ताभ्यां सत्राजितमसत्तमः ।
शयानमवधील्लोभात् स पापः क्षीणजीवितः ॥ ५ ॥

सत्यधर्मीया — ताभ्यामक्रूरकृतवर्माभ्यां भिन्ना मतिर्बुद्धिर्यस्य स स्वभावत एतादृशत्वात् कार्यमेतद्रुच इत्याह ॥ **असत्तम इति** । कुतोऽसत्तमः स इत्यत आह ॥ **स पाप इति** । शयानं सत्राजितं सति मणौ रात्रौ सत्राजिन्मारणं कथमिति चेत्सत्यम् । प्रतिज्ञाहानेः शक्तिसम्भवात्स्वस्वत्वाभावाद्वा । योऽस्मभ्यं सम्प्रतिश्रुत्य कृष्णायोपजहार सः । वयं तु फलभागिन इत्युक्तेः । पूर्वं लोभाद्रत्नगाध्र्यादित्युत्कटैन्यायेन च सन्निहितं फलमिति लपति ॥ **क्षीणजीवित इति** । क्षीणप्राण एषन्नजात् ॥ ५ ॥

स्त्रीणां विक्रोशमानानां क्रन्दतीनामनाथवत् ।
हत्वा पशुं सौनिकवन्मणिमादाय जग्मिवान् ॥ ६ ॥

सत्यधर्मीया — विक्रोशमानानां शयानान्पुरुषानाकारयन्तीनां तथाऽऽक्रन्दतीनां रुदतीनामनाथवदिति कृष्णव्यधिकरणतया पशून् हत्वा सौनिकवत्सूनाकार इव पशूनां मांसादिकं गृह्णाति तथा मणिमादाय जग्मिवान् गतः ॥ ६ ॥

सुमनोरञ्जिनी — पशून् सौनिकवत् हिंसकवत् ॥ ६ ॥

सत्यभामा च पितरं हतं वीक्ष्य शुचार्पिता ।
व्यलपत् तात तातेति हा हताऽस्मीति मुह्यती ॥ ७ ॥

सत्यधर्मीया — शुचा शोकेन । शुचेति टाबन्ततापक्ष ऐकपद्यं वा । मुह्यतीव ॥७॥

सुमनोरञ्जिनी — शुचा शोकेन ॥ ७ ॥

तैलद्रोण्यां मृतं प्रास्य जगाम गजसाह्वयम् ।
कृष्णाय विदितार्थाय तप्ताऽऽचख्यौ पितुर्वधम् ॥ ८ ॥

सत्यधर्मीया — तैलयुक्तद्रौण्यां पात्रे काष्ठमये गतम् । गजसाह्वयं गतम् । तप्ता सती विदितार्थाय । एवं सुधन्वना श्वशुरासुहरणं कृतमिति विज्ञातवतेऽपि पितुर्वधमाचख्यौ ॥ ८ ॥

सुमनोरञ्जिनी — तैलद्रोण्यां तिलपूरितद्रोण्याम् । प्रास्य निक्षिप्य । तप्ता सती आचख्यौ ॥ ८ ॥

तदाकर्ण्येश्वरौ राजन्ननुसृत्य नृलोकताम् ।
अहो नः परमं कष्टमित्यास्राक्षौ विलेपतुः ॥ ९ ॥

सत्यधर्मीया — नृलोकतां नृलोकम् । स्वार्थे तल् । नृलोकतानुकरणता स्थेम्ने । अस्राक्षता नटनज्ञाने चेश्वराविति हेतूक्तिः । आ ईषदस्रैर्युक्तान्यक्षीणि ययोस्तौ सन्तौ विलेपतुः । इत्यस्राक्षाविति च पठन्ति ॥ ९ ॥

सुमनोरञ्जिनी — ईश्वरौ रामकृष्णौ आस्राक्षौ अश्रुसहिताक्षौ ॥ ९ ॥

आगम्य भगवांस्तस्माद् सभार्यः साग्रजः पुरम् ।
शतधन्वानमारेभे हन्तुं हर्तुं च तं मणिम् ॥ १० ॥

सत्यधर्मीया — भार्यया सह साग्रजः सबलः शतधन्वानं हन्तुं मणिं हर्तुं चारेभे ॥

सुमनोरञ्जिनी — आरेभे उद्योगं कृतवान् ॥ १० ॥

ततः पाञ्चालनगराद् याज्ञसेन्याः स्वयंवरम् ।
घुष्यता यज्ञसेनेन प्रेषितो दूत आगतः ॥ ११ ॥

सत्यधर्मीया — यज्ञसेनेति द्रुपदनामान्तरम् । तत्पुत्र्या द्रौपद्याः स्वयंवरं घुष्यता यज्ञसेनेन प्रेषितो दूत आगतः ॥ ११ ॥

सुमनोरञ्जिनी — याज्ञसेन्याः द्रौपद्याः । घुष्यता घोषणं कारयित्रा । यज्ञसेनेन द्रुपदेन ॥ ११ ॥

आहूतस्तेन गोविन्दो गत्वा पाञ्चालके पुरे ।
ददर्श साग्रजस्तत्र किशोरान् पाण्डुनन्दनान् ॥ १२ ॥

सत्यधर्मीया — किशोरांस्तद्वयसः ॥ १२ ॥

अदृष्टपूर्वान् सुव्यक्तं ब्रह्मरूपधरान् नृपान् ।
तैर्विद्धलक्ष्यैः पौरुष्यप्रतिलब्धमनोरथैः ॥ १३ ॥

सत्यधर्मीया — ब्रह्मरूपधरान् अदृष्टरूपधरान् । यद्यपीत्यूचिवान् सह मरुत्तनयार्जुनाभ्यां प्रायात्पुरीं च सहदेवयुतः स्वकीयामित्यादिना त्रयाणां दृष्टत्वं कृष्णतो ज्ञानावाप्तिश्चाचार्यैरुक्ता । तथाऽप्युर्वरिताभ्यां द्वाभ्यामदृष्टाभ्यां सह, नृभाव इत्यादिशक्तिरिति वा ब्रह्मरूपधरत्वे न दृष्टपूर्वत्वं वेत्यदृष्टरूपानित्युक्तिः सम्भवतीति मन्तव्यम् । यद्वाऽदृष्टौ पूर्वौ येषु पञ्चसुतान् । पूर्वत्वं च व्यूहद्विकस्य धर्मनकुलयोरिति ज्ञेयम् । यद्वा निमान इति भाष्योत्तराममितत्वेनेति व्याख्यानवन्नञः पूर्वेत्यनेनान्वयः । ततश्च दृष्टश्चापूर्वौ चादृष्टपूर्वाः । अपूर्वावदृष्टाविति यावत् । नन्वेवं तर्हि मणिमञ्जर्यामित्युक्त्वा भीमपार्थाभ्याम् । पूजयन्तौ हरिं पार्थाविति द्वयोरेव ग्रहणं कथमिति चेत् । सत्यम् । तथा भगवदुपदेशविधत्वात् द्वयोर्ग्रहणम् । सहदेवस्यातथात्वात्तदनुक्तिः । सुव्यक्तम् । नृपाद्विद्धं लक्ष्यं यैस्तैः । पौरुष्येण प्रतिलब्धो मनोरथो यैस्तैः ॥ १३ ॥

सुमनोरञ्जिनी — ब्रह्मरूपधरान् ब्राह्मणवेषधरान् । विद्धं लक्ष्यं यैस्तैः । अत एव प्रतिलब्धः मनोरथः पाञ्चालीप्राप्तिलक्षणो यैस्तैः पाण्डवैः ॥ १३ ॥

कुम्भकारस्य शालायां समागम्याभिवन्द्य च ।
पितृष्वसामनुज्ञाप्य राजानं च युधिष्ठिरम् ॥ १४ ॥

सत्यधर्मीया — कुम्भं करोतीति कुम्भकारस्तस्य शाला तस्यां समागम्य मिलित्वाऽभिवन्द्य च पितृष्वसाम् । आर्षष्टाबन्तशब्दः । राजानं युधिष्ठिरं चानुज्ञाप्य ॥१४॥

सुमनोरञ्जिनी — समागम्य । पितृष्वसां कुन्तीम् । अभिवन्द्य ॥ १४ ॥

निहन्तुं शतधन्वानं तूर्णं द्वारावतीमियात् ।
सोऽपि कृष्णोद्यमं ज्ञात्वा भीतः प्राणपरीप्सया ॥ १५ ॥

सत्यधर्मीया — प्राणपरीप्सया जीवनेच्छया ॥ १५ ॥

साहाय्ये कृतवर्माणमयाचत स चाब्रवीत् ।
नाहमीश्वरयोः कुर्यां हेलनं रामकृष्णयोः ॥ १६ ॥

सत्यधर्मीया — साहाय्ये तदर्थमीश्वरयो रामकृष्णयोः । हेलनमनादरम् ॥ १६ ॥

सुमनोरञ्जिनी — हेलनं प्रतिकूलम् ॥ १६ ॥

को नु क्षेमाय कल्पेत तयोर्वृजिनमाचरन् ।
कंसः सहानुगो वीरो यद्द्वेषात्त्याजितः श्रिया ॥ १७ ॥

सत्यधर्मीया — तयोर्वृजिनं तोदनम् । आचरन् कुर्वन् को नु पुमान् क्षेमाय कल्पेत । न कोऽपीति । कोपिनि तस्मिन्न क्षेमो स्यादिति भावः । मृतपराजितनिदर्शन-प्रदर्शनेन साहाय्यानाचरणमुपोद्बलयति ॥ **कंस इति ।** द्वेषाद्यस्मिन्द्वेषात् यस्य द्वेषाद्वा श्रिया त्याजितः श्रीरत्र यथासम्भवं प्राणसम्पच्च ॥ १७ ॥

सुमनोरञ्जिनी – वृजिनम् अपराधम् । तत्प्रतिकूलानाचरणे निमित्तमाह ॥ **कंस इति** ॥ १७ ॥

जरासन्धः सप्तदशसंयुगाद् विरथो गतः ।
प्रत्याख्यातः स चाक्रूरं पार्ष्णिग्राहमयाचत ॥ १८ ॥

सत्यधर्मीया — सप्तदशसङ्ख्यसङ्ख्यतः । तद्विधाय विरथः सन् गतः । एवं कृतवर्मणा प्रत्याख्यातो नाहं तव साहाय्यं कुर्यामिति निराकृतः । अक्रूरं पार्ष्णिग्राहं सहकारिणमयाचत ॥ १८ ॥

सुमनोरञ्जिनी — पार्ष्णिग्राहं पश्चाद्बलम् ॥ १८ ॥

सोऽप्याह को विरुध्येत विद्वानीश्वरयोर्बलम् ।
यं कैलासाश्रयः शम्भुर्ननाम शिरसा हरिम् ॥ १९ ॥

सत्यधर्मीया — ईश्वरयोर्बलं विद्वान् कः पुमांस्ताभ्यां सह विरुद्ध्येत विरोधं कुर्यात् । ईश्वरयोरिति वचनेन प्रतीतं साम्यं पराकर्तुं विविच्याच्युतस्य स्वोपास्य-शेषात्मकबलस्य च माहात्म्यमाह ॥ **यमिति** । ननु सति सत्यलोकाधिके एतदधिके विधौ हरपरिग्रहः किमर्थमिति चेत्सत्यम् । दुरुद्धरा तव शङ्का चेदपि गुरुकरुणायाः किमसुसाधम् । कैलासं प्रति सतीसहितो गत्वा तपश्च कृत्वा हरवरतः प्रद्युम्नमापेति वृत्तं लोकनटनं घटिते न वास्तविकमिति बोधयितुं यद्विषये प्रथा तन्नमस्यताऽस्योक्ता चेत्सा शाम्यतीति त्रिनेत्रग्रहः । कैलासाश्रयः शम्भुर्हरो यं हरिं शिरसा ननाम । यं बलं कैलासाश्रयः शम्भुरिति नाम्ना सहितं शिरश्च तेन तन्मात्रेण तद्विनेति यावत् । अहरिं हरिभिन्नं वदन्तीति शेषः । स अहेत्यनुवृत्तिर्वा । स तद्योजन इत्यतो रुद्र एव भाविशेषो रुद्रतादशायां तन्नाम शिरश्च तावन्नेति शेषः ॥ १९ ॥

यो हंसडिभिकौ युद्धे जितवान् वरदुर्मदौ ।
आशीविषो महानागो येन निर्वासितो ह्रदात् ॥ २० ॥

सत्यधर्मीया — वरदुर्मदौ हरवरदुर्मदौ । य आगः कृतवान् यश्च महानाशीविषः कालियो यश्चामहान् इति । बलपक्षे ह्रदान्निर्वासितः । अन्यथाऽन्यतरवैय्यर्थ्यं स्फुटप्रतिभासं । यथाकथञ्चित् समाधिस्त्वगतिकागतिः ॥ २० ॥

य इदं लीलया विश्वं सृजत्यवति हन्ति च ।
चेष्टां विश्वसृजो यस्य न विदुर्मोहिता यया: ॥ २१ ॥

सत्यधर्मीया — यः कृष्णो लीलया विश्वं सृजत्यवति हन्ति च यस्य चेष्टया मोहिता विश्वसृजः प्रजापतयोऽपि तां चेष्टां न विदुरिति । य इदं विश्वं समग्रं जगल्लीलया धरतीति शेषः ॥ २१ ॥

सुमनोरञ्जिनी — यया प्रकृत्या । मोहिताः ॥ २१ ॥

यः सप्तहायनः शैलमुत्पाट्यैकेन पाणिना ।
दधार लीलया बाल उच्छिलीन्द्रमिवार्भकः ॥ २२ ॥

सत्यधर्मीया — यः सप्तहायनः शैलं गोवर्धनमुत्पाट्यार्भक उच्छिलीन्ध्रं गतम् । एकेन पाणिना दधार एकेन शीर्ष्णाऽर्भक उच्छिलीन्ध्रमिव दधारेत्यपरत्र । सहस्रमूर्ध्नोऽस्य बतैकमूर्धनीत्याचार्योक्तेः ॥ २२ ॥

सुमनोरञ्जिनी — उच्छिलीन्ध्रं छत्राकम् ॥ २२ ॥

नमस्तस्मै भगवते कृष्णायाद्भुतकर्मणे ।
अनन्तायादिभूताय कूटस्थायात्मने नमः ॥ २३ ॥

सत्यधर्मीया — तस्मा अद्भुतकर्मणे कृष्णाय नमः । अनन्तायानिर्मुक्तायादिभूताय कारणभूताय कूटस्थाय निर्विकारायात्मने सर्वान्तर्यामिणे नमो नमः । अनन्ताय शेषाय च नमः । अत एव विशकलय्य नमोद्विर्वचनं सम्भवदिति मन्तव्यम् ॥ २३ ॥

सुमनोरञ्जिनी — आत्मने सर्वस्यादानादिकर्त्रे ॥ २३ ॥

प्रत्याख्यातः स तेनापि शतधन्वा महामणिम् ।
तस्मिन् न्यस्याश्वमारुह्य शतयोजनगं ययौ ॥ २४ ॥

सत्यधर्मीया — शतधन्वा तेनाप्यक्रूरेणापि । महामणिं तस्मिन्नक्रूरे न्यस्य शत-योजन-मेकस्मिन्नह्नि । अश्वमारुह्य ययौ । व्रतार्के आरुह्य वडवां वेगान्ममार वडवा तदेति ।

तथा महाभारततात्पर्यनिर्णये आरुह्य चाश्वामित्युक्तेश्च । अत्राश्वमित्युक्तिः पुंवच्छक्तियुक्त्येति मन्तव्यम् । पुल्लिङ्गेनोच्यते स्त्री च पुंवच्छक्तिमती यत इत्यादेः ॥ २४ ॥

सुमनोरञ्जिनी — तस्मिन् अक्रूरे । न्यस्य स्थाप्य ॥ २४ ॥

गरुडध्वजमारुह्य रथं रामजनार्दनौ ।
अन्वयातां महावेगैरश्वै राजन् गुरुद्रुहम् ॥ २५ ॥

सत्यधर्मीया — गरुडो ध्वजे यस्य तम् । गुरुः श्वशुरः पञ्चमो गुरुरित्युक्तेः । श्वशुर-द्रोहवन्तम् ॥ २५ ॥

सुमनोरञ्जिनी — गुरुः श्वश्रुरः । तद्द्रुहं तद्धन्तारम् ॥ २५ ॥

मिथिलाया उपवने विसृज्य पतितं हयम् ।
पद्भ्यामधावत् सन्त्रस्तः कृष्णोऽन्वभ्यद्रवद् रुषा ॥ २६ ॥

सत्यधर्मीया — पतितं मत्वा । व्रतार्कमहाभारतनिर्णययोः शतयोजनमात्रेण ममार वडवा तदा शतयोजनानां दिनेन गत्वा मृतायां वडवायां तदैवेत्यादि । सन्त्रस्तो भीतः पदातिधर्मज्ञत्वात् ॥ २६ ॥

सुमनोरञ्जिनी — मिथिलायाः मिथिलानगर्याः ॥ २६ ॥

पदातेर्धावतस्तस्य पदातिस्तिग्मनेमिना ।
चक्रेण शिर उत्कृत्य वाससोर्व्यचिनोन्मणिम् ॥ २७ ॥

सत्यधर्मीया — तिग्मनेमिना तीक्ष्णधारेण वाससोः परीधानोत्तरीययोर्मणिं स्यमन्तकं व्यचिनोन्मार्गयामास ॥ ज्ञाताक्रूरस्थापिततत्कोऽपि बलप्रयुक्तापयशोऽपि स्वस्य मार्जयितु-मार्जयामासेमां रीतिमिति ज्ञेयम् ॥ २७ ॥

सुमनोरञ्जिनी — स्वयमपि पदातिः पद्भ्यामेव गच्छन् । तिग्मनेमिना तीक्ष्णधारेण । व्यचिनोत् मृगयामास ॥ २७ ॥

अलब्धमणिरागत्य कृष्ण आहाग्रजान्तिकम् ।
वृथा हतः शतधनुर्मणिस्तत्र न विद्यते ॥ २८ ॥

सत्यधर्मीया — अग्रजस्यान्तिमं समीपं वृथा हतोऽस्मिन् हते न हतः सत्राजिद्भवत्युज्जीवित इति रत्नालाभाच्च वृथेत्युक्तिः । शतधनुशतधन्वाशब्दौ पर्यायावित्येवमुक्तम् ॥ २८ ॥

तत आह बलो नूनं स मणिः शतधन्वना ।
कस्मिंश्चित् पुरुषे न्यस्तस्तमन्वेषं पुरं व्रज ॥ २९ ॥

सत्यधर्मीया — ततो नात्र रत्नमिति कृष्णवचनानन्तरम् । बल आह । अन्तर्वचनं कृतं कृष्णेनेत्यङ्कुरितरोषो बहिः किञ्चिद्विधाय सारथिं बोधयन् पथ्यन्तरं वक्ति ॥ **नूनमिति** । स मणिः शतधन्वना कस्मिंश्चित्पुरुषे न्यस्तो नूनं निश्चयः । तं पुरुषमन्वेषं कुर्वन्पुरं व्रज । तदाकर्ण्य महारोषादुवाच वचनं बलः । कपटी त्वं सदा कृष्ण लोभी पापी सुनिश्चितम् । अर्थाय स्वजनं हंसि कस्त्वां बन्धुः समाश्रयेत् । अनेकशपथैः कृष्णो बलदेवं प्रसादयन् । सोऽपि धिक्कष्टमित्युक्त्वा ययौ वैदर्भमण्डलमित्यादि व्रतार्के । स्यमन्तकार्थे रामोऽपि कृष्णस्य विमनाऽभवदिति च्छिन्नभक्तगणनाप्रस्तावे श्रीमतामुक्तेश्च ॥ २९ ॥

सुमनोरञ्जिनी — यस्मिन्पुरुषे न्यस्तः तं पुरुषम् । अन्वेषन् अन्वेषितुम् ॥ २९ ॥

अहं वैदेहमिच्छमि द्रष्टुं प्रियतरं मम ।
इत्युक्त्वा स ययौ राजन् मिथिलां यदुनन्दनः ॥ ३० ॥

सत्यधर्मीया — इच्छानिमित्तमाह ॥ **मम प्रियतरमिति** ॥ ३० ॥

सुमनोरञ्जिनी — वैदेहं विदेहराजम् ॥ ३० ॥

तं दृष्ट्वा सहसोत्थाय मैथिलः प्रीतमानसः ।
अर्हयामास विधिवदर्हणीयं (दर्हण्यं वै) समर्हणैः ॥ ३१ ॥

सत्यधर्मीया — सहसा दृष्ट्वा । एकाकिनस्तत्रापि पदा गमनात्पुरावाप्तेरवार्तावितिरभूद्भूपतेरिति सहसेत्यनेन ध्वन्यते । अर्हणीयं समर्हणैः पूजासाधनैः ॥ ३१ ॥

सुमनोरञ्जिनी — अर्हण्यं पूज्यम् ॥ ३१ ॥

उवास तस्यां कतिचिन्मिथिलायां समा विभुः ।
ततोऽशिक्षद् गदां काले धार्तराष्ट्रः सुयोधनः ।
मानितः प्रीतियुक्तेन जनकेन महात्मना ॥ ३२ ॥

सत्यधर्मीया — तस्यां मिथिलायां समाः संवत्सरान्पञ्च । अविश्वासात्स तु सक्रोध एव ययौ विदेहानवसत्पञ्च चाब्दानिति श्रीमदुक्तेः । काले हरिविरसताविरहसमये ततो बलाद्गदां तद्विद्यां धार्तराष्ट्रः सुयोधनोऽशिक्षदशिक्षतोपादत्त ॥ ३२ ॥

सुमनोरञ्जिनी — कतिचित्समाः पञ्चवर्षाणि । ययौ विदेहानवसत्पञ्च चाब्दानिति निर्णयोक्तेः । ततः रामात् ॥ ३२,३३ ॥

केशवो द्वारकामेत्य निधनं शतधन्वनः
अप्राप्तिं च मणेः प्राह प्रियायाः प्रियकृद् विभुः ॥ ३३ ॥

सत्यधर्मीया — प्रियायाः प्रियकृत् ॥ ३३ ॥

ततः स कारयामास क्रिया बन्धोर्हतस्य वै ।
साकं सुहृद्भिर्भगवान् यायाः स्युः साम्परायिकाः ॥ ३४ ॥

सत्यधर्मीया — शतधन्वमारणेन मृतस्य बन्धोर्बन्धुभिः साकं सार्धं साकं सदुःखं यथा तथा । याया इति पदमेकम् । साम्परायिकाः साम्परायिक्यो मोक्षहेतवः क्रियास्तास्ताः कारयामास ॥ ३४ ॥

सुमनोरञ्जिनी — बन्धोः सत्राजितः । साम्परायिकाः प्रेतविषयाः ॥ ३४ ॥

अक्रूरकृतवर्माणौ श्रुत्वा शतधनोर्वधम् ।
व्यूषतुर्वधवित्रस्तौ द्वारकायाः प्रयोजकौ ॥ ३५ ॥

सत्यधर्मीया — शतधन्वनो माधवतो वधं श्रुत्वा प्रयोजकौ मणिः कस्मान्न गृह्यत

इति मणिहरणाविति प्रयोजकौ । भयाच्छतधन्वभूतात्स्वयं वित्रस्तौ द्वारकाया व्यूषतुः प्रवासं चक्रतुः ॥ ३५ ॥

सुमनोरञ्जिनी — भयेन वित्रस्तौ कम्पितौ । द्वारकायाः सकाशात् । व्यूषतुः प्रवासं चक्रतुः । कुतो भयमनयोरित्यत उक्तम् ॥ **प्रयोजकाविति** । सत्राजिद्धनने मणिहरणे च । शतधन्वनः प्रवर्तकौ । द्वारकायाः प्रयोजकौ रक्षकावित्यापि वदन्ति ॥ ३५ ॥

अक्रूरे प्रेषितेऽरिष्टान्यासन् वै द्वारकौकसाम् ।
शारीरा मानसास्तापा मुहुर्दैविकभौतिकाः ॥ ३६ ॥

सत्यधर्मीया — अक्रूरे प्रेषिते सति द्वारकौकसाम् । शारीराः शरीरसम्बन्धिन्यस्तापा ज्वराद्युपद्रवाः मनस्तापाः दैविका अशन्युल्कापाता भौतिका भूभ्रान्त्यादय इत्यरिष्टान्यासन् वै प्रसिद्धौ । न यादृच्छिकानि तानीत्याह ॥ **मुहुरिति** ॥ ३६ ॥

सुमनोरञ्जिनी — प्रोषिते देशान्तरं गते । शारीराः मानसाश्च तापाः मुहुः पुनः पुन आसन् ॥ ३६ ॥

ततोऽपृच्छद्धरिर्वृद्धानुग्रसेनपुरोगमान् ।
कस्मादिहारिष्टान्यासन् महतां सुचिरेण वः ॥ ३७ ॥

सत्यधर्मीया — तत एवमनिष्टदर्शनानन्तरमुग्रसेनपुरोगमान् वृद्धान् । कृष्णः कस्माद्धेतो-रिह द्वारकायां सुचिरेण कालेन महतां व आसन्नित्यपृच्छत् ॥ ३७ ॥

सुमनोरञ्जिनी — श्रीकृष्णे जाग्रति सति अक्रूरगमनमात्रेण कथं द्वारकौकसां अरिष्टान्यासन् इति न शङ्क्यम् । भगवतैव स्वभक्तमहिमाप्रकटनाय तथा कृतत्वात् । परमुखेनाक्रूरमहिमानं वाचयितुम् श्रीकृष्णः स्वयमजानान इव । अरिष्टदर्शने निमित्तं वृद्धानपृच्छत्तदाह ॥ **तत इति** ॥ ३७ ॥

इत्यङ्गोपदिशन्त्येके विस्मिता वै गदाभृतः ।
निवासनिकटे किं वा घटेतारिष्टदर्शनम् ॥ ३८ ॥

सत्यधर्मीया — कृष्णपृष्टानां मध्ये केचन विपश्चितः । पुराणवचनमेवमुपदिशन्तीत्याहुः ॥ **इतीति** । अङ्ग हे कृष्ण । एके विस्मिताः कथमिति तत्राह । गदाभृतस्तव निवासनिकटे निवाससमीपे किंवाऽरिष्टं घटेत न किमपीत्युपदिशन्ति । एके अङ्ग हे परीक्षित्। गदाभृतो निवासनिकटेऽरिष्टदर्शनं घटेत वा किं न घटेतेति विस्मिता उपदिशन्तीति योजना वा ॥ ३८ ॥

सुमनोरञ्जिनी — एवं श्रीकृष्णेन पृष्टाः वृद्धा ऊचुः । हे अङ्ग ! गदाभृतः तव । निवासनिकटे । अरिष्टदर्शनम् । घटेत किं त्वदिच्छां विना न घटेतैव । अथापि । इति वक्ष्यमाणप्रकारेण । एके वृद्धाः । उपदिशन्ति तद्वक्ष्याम इति ॥ ३८ ॥

देवेऽवर्षति काशीशः श्वफल्कायागताय गाम् ।
स्वसुतां गान्दिनीं प्रादात् ततोऽवर्षत् स काशिषु ॥ ३९ ॥

सत्यधर्मीया — तथाऽपि श्रुतं किञ्चित्पुरावृत्तं वक्ष्याम इति वदन्ति ॥ **देव इति** । इन्द्रेऽवर्षति सति काशीशः काशीराजो गां यदृच्छया स्वभूमिमागताय श्वफल्कायाक्रूरपित्रे स्वसुतां गान्दिनीनाम्नीं प्रादात् । ततः कन्याप्रदानानन्तरं काशीषु देशेष्ववर्षत् स्म स्मृतिसिद्धमिदम् ॥ ३९ ॥

सुमनोरञ्जिनी — किं तदित्यत आह ॥ **देव इति** । पूर्वं स्वराष्ट्रे । देवे पर्जन्ये अवर्षति सति । काशीं प्रत्यागताय श्वफल्काय । गां भूमिं स्वसुतां गान्दिनीं च प्रादात् । गां स्वदेशभूमिं प्रत्यागतायेति वा । भूमिदानं तु तत्रैव तन्निवासार्थं ज्ञेयम् । ततः तदनन्तरम् । काशिषु तद्देशेषु । अवर्षत् वर्षयामास ॥ ३९ ॥

तत्सुतस्तत्प्रभावोऽसावक्रूरो यत्र तत्र सः ।
देवोऽभिवर्षते तत्र नोपतापा न मारिकाः ॥ ४० ॥

सत्यधर्मीया — ननु महिष्याः सर्पिर्विपुलं चेन्महिषस्य किमायातमिति न हि पितुः पाण्डित्येनेति नीत्या तत्तनयस्य किमायातमित्यत आहुः ॥ **तत्सुत इति** । तस्य श्वफल्कस्य सुतोऽक्रूरस्तत्प्रभावस्तस्य प्रभाव इव प्रभावो यस्य सः । यत्राक्रूरस्तत्र स देवोऽभिवर्षते । तत्र नोपतापो न मारिका डाकिन्याद्या न भवन्ति ॥ ४० ॥

सुमनोरञ्जिनी — तस्य श्वफल्कस्य प्रभाव इव प्रभावो महिमा यस्य सः । कः प्रभाव इत्यत आह ।। **यत्रेति** । सः अक्रूरः यत्र देशे वसति तत्र देवोऽभिवर्षते । उपतापादयो न भवन्ति ।। ४० ।।

इति वृद्धवचः श्रुत्वा नैतावदिह कारणम् ।
इति दूतैः समानीय रामाक्रूरौ जनार्दनः ।। ४१ ।।

सत्यधर्मीया — इति वृद्धानां वचः श्रुत्वा नैतावदेवारिष्टावाप्तौ कारणं किन्तु मणिगमनं तथा मय्यवञ्चके वञ्चकतामतिरग्रजस्येत्यादिकं चेति । दूतै रामाक्रूरौ समानीय आकारयित्वा पूर्वमक्रूराकारणं चेत्पुनः कृष्णो रहस्येवं बोधयामासेति बलः सन्दिह्येतेति रामाक्रूरावित्युक्त्या प्राग्राम आजगाम ग्राममनन्तरमक्रूर इति चागतितरतमता ध्वन्यते ।।४१।।

सुमनोरञ्जिनी — इति वृद्धवचः श्रुत्वा । एतावत् अक्रूरप्रवास एव । इह अरिष्टदर्शनादौ । न कारणम् । किं तु मणेः रामस्य गमनं च कारणमिति मत्वा ।। ४१ ।।

अक्रूरं मानयन् कृष्णः कथयित्वा प्रियाः कथाः ।
विदिताखिलतत्वज्ञो स्मयमान उवाच ह ।। ४२ ।।

सत्यधर्मीया — कृष्णोऽक्रूरं मानयन् प्रियाः कथाः कथयित्वा विज्ञाताखिल-तत्त्वज्ञोऽखिलं तत्त्वं सुधन्वरहस्यं जानातीति सोऽखिलतत्त्वज्ञोऽक्रूरो विज्ञातो येन सः । अखिलास्त्रयश्च ते तत्त्वज्ञाः कृतवर्माक्रूरशतधन्वानस्ते विज्ञाता येन स इति वा । अत एव स्मयमान उवाच ।। ४२ ।।

सुमनोरञ्जिनी — विज्ञातः प्रसिद्धश्चासावखिलतत्वज्ञश्च । यद्वा विज्ञातं अखिलं यैस्ते विज्ञाताखिलाः सर्वज्ञाः ब्रह्मादयः तेषां तेषु वा तत्वज्ञः सर्वज्ञतम इत्यर्थः । स्यमन्तकवृत्तान्तं सर्वं जानन्निति भावः ।। ४२ ।।

ननु दानपते न्यस्तस्त्वय्यसौ शतधन्वना ।
स्यमन्तकमणिः श्रीमान् विदितः पूर्वमेव नः ।। ४३ ।।

सत्यधर्मीया — हे दानपते । त्वयि शतधन्वनाऽसौ स्यमन्तको मणिः श्रीमान्न्यस्त इति पूर्वमेव नो विदितो ननु निश्चयः ॥ ४३ ॥

सुमनोरञ्जिनी — हे दानपते अक्रूर ! शतधन्वना स्यमन्तको मणिः त्वयि न्यस्तः । अयं वृत्तान्तः पूर्वमेव विदितो ननु ॥ ४३ ॥

सत्राजितोऽनपत्यत्वाद् गृह्णीयुर्दुहितुः सुताः ।
दायं निनीयापः पिण्डान् विमुच्यर्णमशेषतः ।
तथापि दुर्धरो ह्यन्यैस्त्वय्यास्तां प्रापितो मणिः ॥ ४४ ॥

सत्यधर्मीया — रामाशां त्याजयन् योजयंश्च रामाशां तामपि पर्यायतो विपर्यासयन्नाह ॥ सत्राजित इति ॥ अनपत्यत्वादिति । न विद्यतेऽत्रापत्यं पुमपत्येव ग्राह्यम् । स्त्र्यपत्यभूत-सत्यभामाया अध्यक्षसिद्धत्वात्; यस्य तस्य भावः तत् तस्मात् । दुहितुः पुत्र्याः सुता गृह्णीयुः । ग्रहणेतिकर्तव्यतामाह ॥ निनीयेति । अपः तिलजलपिण्डांश्च निनीय दत्वा तदृणं विमुच्याशेषतो यावन्तो वर्तन्ते तावन्त इत्यशेषा अशेषतोऽशेषं देयं तद्वित्तम् । तथा ह्युक्तम् ।

'पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।
तत्सुता गोत्रजा बन्धुः शिष्याः सब्रह्मचारिण' इति ।

सत्यभामायास्तत्पुत्राणां चैत इत्यत्र त इति मन्तव्यम् । तथाऽपि धर्मशास्त्राचारे च सत्यपि । अन्यैस्त्वदितरैर्दुर्धर इति प्रापितः । इदानीं सभां प्रत्यानीतोऽसौ मणिः । मया त्वामेव प्रापितः प्रत्यर्पितस्त्वय्येवास्ताम् । ननु हरिवंशे –

सत्राजितो दश त्वासन् भार्यास्तासां शतं सुताः ।
ख्यातिमन्तस्त्रयस्तेषां भङ्गकारास्तु पूर्वजाः ।
वीरो वामपतिश्चैव उवास्वावाश्च सप्रियः ।
कुमार्यश्चापि तिस्रो वै दिक्षु ख्याता नरर्षभ ।
सत्यभामा तमस्त्रीणां व्रतीनां च दृढवृता ।

तथा पद्मवती चैव भार्या कृष्णस्य ता ददौ ।
सभाक्षो भङ्गकारात्तु नादेयश्चे'त्यादिना ।

सुतशतस्य तथा । तथा तत्पौत्रादीन्कन्याद्वयस्य सत्यभामेतरस्य कृष्णपत्नीत्वस्य चोक्तेः कथं सत्राजिदनपत्यता कथन्तरां षोडशसहस्राष्टोत्तरशततोदीरणादत्रान्यत्र माना-सम्भव इति चेत् । अत्र केचित्कल्पभेदेन सापत्यत्वानपत्यत्वादिकं ग्रन्थद्वन्द्वानुरूप्येणेति न्यरूरुपन् । अपरे तु ते च पुत्रा जघन्यजा इति नैतद्दायमादाय जीवनार्हा न पिण्डावाप-योग्या इति भागवतेऽनपत्यत्वाद्युक्तिरिति जगदुः । अन्ये मन्यन्ते भागवते भगवता युक्तिरप्युपन्यस्तेति प्रक्षिप्ताः श्लोकाः भारत इति । वस्तुतस्तु सन्तु सुताः सुते च द्वे । तथाऽपि यदा माधवोपर्यारोपितवान्स्वभ्रातृहतां तत्क्षण एव पुंसामिव उद्वाहानन्तरं स्त्रीद्वयस्याकार्यकारितया मरणस्य स्वस्य च (?) सत्यभामावितरणपुण्यवत्ततया मरणस्य च सम्भवादनपत्यता (?) सम्भाविनीत्यशेषाविरोध इति दिक् ॥ ४४ ॥

सुमनोरञ्जिनी — दुहितुः सत्यभामायाः सुताः, आपः पिण्डांश्च निनीय । अशेषतो ऋणं च विमुच्य । सत्राजितो दायं गृण्हीयुः । तथा शास्त्रात् । तथाप्ययं मणिः त्वय्येवास्ताम् ॥ ४४ ॥

किन्तु मामग्रजः सम्यङ् न प्रत्येति मणिं प्रति ।
दर्शयस्व महाभाग बन्धूनां शान्तिमावह ॥ ४५ ॥

सत्यधर्मीया — आनयनं पुनर्नयनं च कुत इत्यतो वक्ति ॥ **किन्त्विति** । मामग्रजो मणिं प्रति तमुद्दिश्य सम्यङ् न प्रत्येति न विश्वसिति । प्रत्ययस्तु ख्यातिरन्ध्रविश्वासाधीन-हेतुष्विति यादवः । हे महाभाग तं दर्शयस्व । तेन च बन्धूनां बलाबलपक्षपातीनां शान्तिं प्रशमं मङ्गलं वां वह प्रापय ॥ ४५ ॥

सुमनोरञ्जिनी — तर्हि किमर्थं ममाह्वानमित्यत आह ॥ **किं त्विति** । अग्रजो रामः । मणिं प्रति मण्युद्देशेन । न प्रत्येति न विश्वसिति । शान्तिं सुखम् ॥ ४५ ॥

अव्युच्छिन्ना मखास्तेऽद्य वर्तन्ते रुग्मवेदयः ।
एवं सामभिरारब्धः श्वफल्कतनयो मणिम् ॥ ४६ ॥

आदाय वाससा च्छन्नं ददौ सूर्यसमप्रभम् ।
स्यमन्तकं दर्शयित्वा ज्ञातिभ्यो रज आत्मनः ॥ ४७ ॥

सत्यधर्मीया —— मयि सर्वज्ञातरि यज्ञपतावाज्ञापयति नेति न वक्तुं क्षमः स्याः । किञ्च त्वं तु सदाध्वरः अध्वरतस्ततो नानृतं त्वया वक्तव्यम् । प्रथमपञ्चकषष्ठखण्डे ऋतं वाव दीक्षा सत्यं दीक्षा तस्माद्दीक्षितेन सत्यमेव वदितव्यमित्यारभ्य सत्योत्तरा हैवास्य वागुदिता भवतीत्यन्तेन दीक्षितेन सत्यमेव वदितव्यमित्युक्तेस्त्वया यथार्थमेव वक्तव्यमनृतवचने प्रत्यवेया इति शपथं स्थापयन्निव वक्ति ॥ **अव्युच्छिन्ना इति** । रुक्मवेदयः सुवर्णवेदिकोपेतास्ते मखा अद्यापि अव्युच्छिन्ना वर्तन्ते । एवं सामभिः समाधानवचनैरारब्ध उद्यमितः । आरम्भस्तु त्वरायां स्यादुद्यमे वधदर्पयोरिति विश्वः । सूर्यसमा प्रभा यस्य स तं ज्ञातिभ्यो दर्शयित्वा । आत्मनो रजोऽपवादात्मकं मलम् ॥ ४६,४७ ॥

सुमनोरञ्जिनी —— अव्युच्छिन्नाः सन्तताः । रुग्मवेदयः सुवर्णवेदयः मखाः वर्तन्ते । यतोऽतो मणिः त्वय्येवास्तामित्यन्वयः । आरब्धः उक्तः ॥ आत्मनो रजः रामेणारोपितं वञ्चकत्वलक्षणम् ॥ ४६,४७ ॥

मार्जयामास लोकेश अभिभाष्य हलायुधम् ।
दृष्ट्वा मणिं हलधरस्तदर्थं प्रोष्य आगतः ॥ ४८ ॥

सत्यधर्मीया —— मार्जयामासाशोधयत् । तदर्थं मणिनिमित्तं प्रोष्य प्रवासं कृत्वाऽऽगत इति । विवक्षाभावात्सन्ध्यभावः ॥ ४८ ॥

सुमनोरञ्जिनी —— तदर्थं मण्यर्थम् । आगतः ॥ ४८ ॥

योग्योऽहमिति मन्वानश्चकमे कुरुपुङ्गव ।
सत्यभामा पितृधनं मन्वाना स्वात्मनोचितम् ॥ ४९ ॥

सत्यधर्मीया —— अहं योग्य इति मन्वानस्तं चकमे कामयामास । स्वात्मना स्वमनसा पितृधनमुचितमिति मन्वाना ॥ ४९ ॥

सुमनोरञ्जिनी — सत्यभामापि । यतः पितृधनम् । अतः स्वात्मना स्वमनसा उचितं, स्वस्याः उचितं मन्वाना । यद्वा स्वात्मना स्वेन उचितमभ्यस्तम् । पितृगृहे वारं वारं गृहीतम् । अभ्यस्तमुचितं विदुरिति शाश्वतः ॥ ४९ ॥

गृहीतुमैच्छद् विस्रब्धं हरेश्चित्तमजानती ।
जाम्बवत्यपि शुल्कार्थं पित्रा दत्तो ममेति ह ॥ ५० ॥

सत्यधर्मीया — हरेश्चित्तमजानती अजानतीव तं गृहीतुमैच्छत् । जाम्बवत्यपि तस्मिन्मणौ स्पृहाश्चक्र इत्यन्वयः । ननु न सत्या कृष्णावाञ्छितं किञ्चिदिच्छेत् तथाऽपि तस्यायोग्य इत्याह कृष्ण इति श्रीमदाचार्योक्तिस्तर्हि विरुद्धाऽऽसीदिति चेन्न । वस्तुस्थिति-कथनपरा सा इयं तु विडम्बनालम्बिनीति किञ्चित्समाधिसम्भवात् । यद्वा सत्यभामेत्यारभ्य स्पृहाश्चक्रे मणाविति पर्यन्तं जाम्बवतीचर्योक्तिः । तथाहि तदन्वयार्थौ । सत्याभामायाः पिता तस्य धनं परमार्थतः स्वात्मना स्वमनसा सा सत्यभामा गृहीतुमैच्छच्चेदुचितमिति विस्रब्ध-मन्तर्मन्वाना जाम्बवती हरेश्चित्तमजानती मम पिता शुल्कार्थं दत्तमिति तद्धनरूपे मणौ स्पृहाश्चक्र इति विवक्षित्वाऽऽचार्यास्तथोचुरिति मनस्यानेयम् ॥ ५० ॥

सुमनोरञ्जिनी — हरेः चित्तम् । स्वस्यां विस्रब्धं च मन्वाना । वस्तुतोऽजानती । यद्वा हरेः चित्तं मनोभिप्रायं विस्रब्धं स्पष्टमजानतीत्यर्थः । विस्रब्धशब्दमिच्छन्ति विस्पष्टा-नुद्भटार्थकमिति शाश्वतः । इयमुक्तिरयोग्यव्यामोहनायेति ज्ञेयम् । सत्यभामायाः रमावतार-त्वात् कृष्णावाञ्छिते इच्छाया असम्भवात् । तदुक्तम् भारततात्पर्ये । न सत्या कृष्णा-वाञ्छितं किञ्चिदिच्छेत्तथापि तस्यायोग्य इत्याह कृष्ण इति । केचित्तु हरेश्चित्तं न जानतीति प्रकल्प्य हरेश्चित्तं जानती गृहीतुं नैच्छदिति योजयन्ति । शुल्कार्थं वरदक्षिणार्थम् ॥ ५० ॥

स्पृहां चक्रे मणौ तस्मिन् सर्वं विज्ञाय माधवः ।
अक्रूरस्य करे भूयो मणिं प्रत्यर्पयद् विभुः ॥ ५१ ॥

सत्यधर्मीया — सर्वं रामादिहृदि स्थितं विज्ञाय कुलकलहाकुलो भूपः पुनरक्रूरस्य करे प्रत्यर्पयत्प्रत्यार्पयत् ॥ ५१ ॥

यस्त्वेतद् भगवत ईश्वरस्य विष्णोर्वीर्याख्यं व्रजिनहरं सुमङ्गलं च ।
आख्यानं पठति शृणोत्यनुस्मरेद् वा दुष्कीर्तिं चरितमपोह्य याति शान्तिम् ॥ ५२ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे एकषष्टिरध्यायः ॥

सत्यधर्मीया — श्रवणादितः स्यात्फलमिति लपति । योऽधिकारीश्वरस्येशेभ्योऽपि वरस्य भगवतो विष्णोर्वृजिनहरं सुमङ्गलं वीर्याख्यं पराक्रमख्यापकमाख्यानं शृणोति पठत्यनुस्मरेद्वा स दुष्कीर्तिं दुरितं चापोह्य शान्तिं शान्तिर्मोक्षोऽथ निर्वाणमित्याभिधानात् मोक्षं याति । अत्र भक्तितरतमभावेन शान्तौ तरतमभाव इति तत्त्रये समानाऽपि श्रवणपाठानुस्मरसम्मता चेति ध्येयम् ॥ ५२ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध-
उत्तरार्धे एकषष्टिरध्यायः ॥ १०-६१ ॥

सुमनोरञ्जिनी — वीर्यमाख्यायतेऽनेनेति वीर्याख्यमेतदाख्यानम् । दुष्कीर्तिं तत्कारणञ्च अपोह्य । शान्तिम् ऐहिकं मौक्तं च सुखम् ॥ ५२ ॥

॥ इति श्रीमद्भागवतदशमस्कन्धोत्तरार्धव्याख्यायां सुमनोरञ्जिन्याम् एकषष्टितमोऽध्यायः ॥

।। अथ द्विषष्ठितमोऽध्यायः ।।

श्रीशुक उवाच —

एकदा पाण्डवान् द्रष्टुं प्रतीतान् पुरुषोत्तमः ।
इन्द्रप्रस्थं गतः श्रीमान् युयुधानादिभिर्वृतः ।।१।।

सत्यधर्मीया — सर्वदा भक्तपरवान् हरिरिति प्रतिपाद्यतेऽत्र । तत्रादौ पाण्डवानां नष्टोज्जीवदृष्टितुष्टिमानिव द्रष्टुमगमदिन्द्रप्रस्थमिति वक्ति ।। **एकदेति** । प्रतीतान् प्राग्लाक्षा-गृहदाहतो हता इति मतान् इदानीं च प्रख्यातिमतः सन्तीति प्रमितानिति यावत् । प्रतीतः शारदे ज्ञाते प्रतीतः ख्यातदृष्टयोः । वाच्यवत्स्यात्प्रतीतं तु प्रोषितेऽपि मृतेऽपि चेति विश्वः । प्रतीतो भूषिते ज्ञाने ख्याते प्रत्यर्थिते बुध इति यादवः । प्रतीतः प्रथितः ख्याते वित्त-विज्ञानकोविदा इत्यमरः । युयुधानः सात्यकिरादिर्येषां तैर्युतः ।। १ ।।

सुमनोरञ्जिनी — अधुना कालिंद्यादिपञ्चकन्यापाणिग्रहणप्रकारं प्रदर्शयत्यस्मिन्नध्याये । प्रतीतान् शौर्यादिगुणैः प्रख्यातान् । प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुता इत्यमरः ।। १ ।।

दृष्ट्वा तमागतं पार्था मुकुन्दमखिलेश्वरम् ।
उत्तस्थुर्युगपद् प्राणाः प्राणं मुख्यमिवागतम् ।। २ ।।

सत्यधर्मीया — पार्थाः पृथासम्बन्धिनस्तत्पुत्रा इति यावत् । तमागतं मुकुन्द-मखिलेश्वरं दृष्ट्वा । तमागतमित्यखण्डं पदम् । तमाया गतं गतिर्येन स चन्द्रस्तद्वद्विद्यमानं युग पदेकदैव । प्राणा इन्द्रियाणि मुख्यप्राणमागतं शरीरान्तर्निविष्टं दृष्ट्वा यथोत्तिष्ठन्ति तथोत्तस्थुः । वीरा इति काचित्के पाठे चेन्द्रियाणीति शेषः । यद्वा वीरा इति पाठेऽपि स एवार्थः । विविधा ईरा वीराः पञ्चप्राणा इति ।। २ ।।

सुमनोरञ्जिनी — आगतं मुख्यं प्राणं दृष्ट्वा यथा अन्ये इन्द्रियदेवाः उत्तिष्ठन्ति ।।२।।

परिष्वज्याच्युतं वीरा अङ्गसङ्गहतैनसः ।
सानुरागस्मितं वक्त्रं वीक्ष्य तस्य मुदं ययुः ।। ३ ।।

सत्यधर्मीया — अङ्गसङ्गेन हतमेनः पापं येषां ते तथा । वीराः पश्चाप्यविशेषेणाच्युतं कृष्णं परिष्वज्यालिङ्ग्याच्युतं दृढं यथा तथेति वा । सानुरागस्मितमनुरागः स्नेहस्तद्धेतुकं यत्स्मितं तेन सहितं तत् वक्त्रं च वीक्ष्य मुदं ययुः ॥ ३ ॥

सुमनोरञ्जिनी — अच्युतस्याङ्गसङ्गेन हतैनसः हतपापाः ॥ ३ ॥

युधिष्ठिरस्य भीमस्य कृत्वा पादाभिवन्दनम् ।
फाल्गुनं परिरभ्याथ यमाभ्यामभिवन्दितः ॥ ४ ॥

सत्यधर्मीया — बहुतिथं दर्शने सति परवशत आश्लेषमुक्त्वा क्रामिकमभिवन्दनमाह ॥ **युधिष्ठिरस्येति** । युधिष्ठिरस्य धर्मस्य भीमस्य तथा प्रदर्शनमात्रं नाभिमर्शनम् । शुद्धे भागवते धर्मे निरतो यद्वृकोदर इत्यादेः । लोके लोकैरेवमनुष्ठेयमिति शिक्षणार्थमेवमपि कृतिः । फल्गुनमर्जुनं परिरभ्य । अथार्जुनाज्ज्यैष्ठ्यात्स्नेहविशेषात्परिरभ्यास्थितो कृष्णोऽथानन्तरमभिवन्दितस्तेनार्जुनेनेति शेषः । यथोक्तं भारते वनपर्वणि । अर्जुनात्केशवो ज्येष्ठः षड्भिर्मासैर्महाभुज इति । यमाभ्यामभिवन्दितो नमस्कृतः ॥ ४ ॥

परमासन आसीनं कृष्णा कृष्णमनिन्दिता ।
नवोढा व्रीडिता किञ्चिच्छनैरेत्याभ्यवन्दत ॥ ५ ॥

सत्यधर्मीया — परमासने आसीनं कृष्णम् । अनिन्दिता प्रपञ्चातीतपञ्चभर्तृमत्यप्यपरनारीवदनिन्दनार्हा । न केवलं किन्त्वहल्या द्रौपदीत्यादिना स्वस्मरणपातकनिपातहेतुरिति चानुसन्धातव्यम् । व्रीडिता तत्र हेतुर्नवोढेति । किञ्चिच्छनैरतिमन्दमेत्य प्राप्य अभ्यवन्दत ॥ ५ ॥

सुमनोरञ्जिनी — कृष्णा द्रौपदी । नवोढा नूतनं विवाहिता ॥ ५ ॥

तथैव सात्यकिः पार्थैः पूजितश्चाभिवन्दितः ।
निषसादासनेऽन्ये च पूजिताः पर्युपासते ॥ ६ ॥

सत्यधर्मीया — अभिवन्दितः कनिष्ठैरन्ये च सहागताः ॥ ६ ॥

पृथां समागम्य कृताभिवन्दनस्तयाऽतिहार्दार्द्रदृशाऽभिरम्भितः ।
आपृष्टवांस्तत्कुशलं सहस्नुषां पितृष्वसारं परिपृष्टबान्धवः ॥ ७ ॥

सत्यधर्मीया — कृतमभिवन्दनं येन सः । तया कुन्त्याऽतिहार्दृशाऽतिहार्देन बहु-स्नेहेन । प्रेमाना प्रियसौहार्दप्रेमस्नेह इत्यमरः । हृदयस्य कर्म । युवाद्यण् । हृदयस्य हृल्लेखेति हृदादेशः । आर्द्रा क्लिन्ना च सा हृच्च तया करणेन । बहुव्रीहिणा सामानाधिकरण्यं वा । अभिरम्भितः । अत्र परिरम्भणमनुक्षणं ज्ञेयम् । द्वितीयपक्षे तयालिङ्गित इत्यर्थः । परिपृष्ट-बान्धवो माधवस्तया स्वयं सहस्नुषां स्नुषया सहितां पितृष्वसारं वसुदेवभगिनीम् । तत्स्वज्ञात-मेव कुशलं परिपृष्टवान् । पितृष्वसारं पितृषु धृतराष्ट्रभीष्मादिषु । असारम् अन्याय्यं च परिपृष्टवानित्यप्यर्थः ॥ ७ ॥

सुमनोरञ्जिनी — हार्देन स्नेहेन आर्द्रे सजले दृशौ यस्याः सा । अभिरंभितः आलिङ्गितः । यद्वा तया कुन्त्या कर्त्र्या । हार्दार्द्रदृशा करणेन । आलिङ्गितः अवलोकित इति यावत् । तया परिपृष्टाः बान्धवा यस्य सः । तस्याः कुशलं क्षेमम् । आपृष्टवान् ॥७॥

तमाह प्रेमवैक्लव्यरुद्धकण्ठाश्रुलोचना ।
स्मरन्ती तान् बहून् क्लेशान् क्लेशापायात्मदर्शनम् ॥ ८ ॥

सत्यधर्मीया — प्रेम्णा दर्शनजेन निमित्तेन यद्वैक्लव्यं विव्हलता तेन रुद्धः सम्भाषणाद्यननुकूलः कण्ठो यस्याः सा च साश्रूणि लोचनयोर्यस्याः सा च तान् । जतुगेहदाहादिप्रसक्तिप्रसक्तान् क्लेशान् स्मरन्ती कुन्ती । क्लेशानामपायो नाशो येन तद्दर्शनं यस्य स तं कृष्णं प्रति प्राह ॥ ८ ॥

सुमनोरञ्जिनी — प्रेम्णा वैक्लव्यं तेन रुद्धः कण्ठो यस्याः । तान् पूर्वानुभूतान् । क्लेशानामपायो येन तथाविधमात्मदर्शनं यस्य । भजतां क्लेशापाये तत्समये तदर्थं वा आत्मानं दर्शयतीति वा । तं कृष्णम् ॥ ८ ॥

तदैव कुशलं नोऽभूत् यत् सनाथाः कृता वयम् ।
ज्ञातुं नः स्मरतां कृष्ण भ्राता मे प्रेषितस्त्वया ॥ ९ ॥

सत्यधर्मीया — यदा त्वां स्मरतां नः कुशलं ज्ञातुं त्वया मे भ्राताऽक्रूरः प्रेषितस्तदैव कुशलमभूत् । यद्यतो विचारणात् सनाथा वयं कृताः । यद्यदा च वयं सनाथाः कृतास्तदैव कुशलमभूदित्यन्वयो वा ॥ ९ ॥

सुमनोरञ्जिनी — हे कृष्ण ! यत् यदा स्मरतां नः । वृत्तं ज्ञातुं मे भ्राता अक्रूरस्त्वया प्रेषितस्तदैव नोऽस्माकं कुशलम् । अभूत् । कुतः यस्मात् वयं सनाथाः कृताः । पाण्डवाः कृष्णनाथा इति ख्यापिता इत्यर्थः । त्वन्नाथानामस्माकं कथमकुशलं भूयादिति भावः ॥ ९ ॥

पाञ्चालेषु स्थितानस्मान् स्वयंवरकृते यदा ।
अनुस्मृत्यागतो यस्त्वं तेन स्मासं सुखोषिता ॥ १० ॥

इत्युक्तायां तदा कुन्त्यां प्राह योगेश्वरः स्वयम् ।
पाञ्चालेषु स्थितानेत्य सुतांस्ते छद्मरूपिणः ॥ ११ ॥

कुम्भकारस्य शालायामुषितान् सह भार्यया ।
दृष्ट्वाऽगतोऽहं दिवसे तस्मिन्नेवाविलम्बितः ॥ १२ ॥

सत्यधर्मीया — किञ्च यदा स्वयंवरकृते तदर्थं पाञ्चालेषु तद्देशेषु स्थितानस्मान्यस्त्वमनुसृत्यागतस्तेनाहं तत्पश्चात् सुखोषिता आसं स्म । त्वदागमनं स्मृत्वेति वा । इत्येवं प्रकारेणोक्तम् । भावे क्तः । उक्तिर्यस्याः सा तस्यां कुन्त्यां सत्याम् । धातोरर्थांतरे वृत्तेर्धात्वर्थेनोपसङ्ग्रहात् । प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रियेत्युक्तेः कर्मणो वाक्यरूपस्य प्रसिद्धेरविवक्षणाद्वाऽकर्मकत्वाद्गत्यर्थेति कर्तरि क्तो वा । उक्तायामुक्तवत्यां योगेश्वरः स्वयं प्राह । इयान्विलम्बः कुतोऽवलम्बितो दीनबन्धुना इति अम्ब न वद । किञ्चिदत्यावश्यकं प्रयोजनमवर्तिष्ठ तन्निवृत्य तत्क्षण एव त्वन्निरीक्षणायायात इति किञ्चित्स्मारयन्ननुभूतानुवादेन समाधत्ते ॥ **पाञ्चालेष्विति** । ते सुतान् छद्मना । रूपं विप्राणामेषामस्तीति ते तथा तान् भार्यया द्रौपद्या सह कुम्भकारस्य शालायामुषितान्दृष्ट्वा तस्मिन्नेव दिवसेऽविलम्बितस्त्वरावानहं गतः ॥ १०-१२ ॥

सुमनोरञ्जिनी — किं च स्वयंवरकृते । पाञ्चालेषु स्थितान् अस्माननुस्मृत्य यदा त्वमागतः तेन कारणेन सुखोषिता आसं स्मेत्यन्वयः ॥ तदारभ्य एतावत्पर्यन्तं त्वद्दर्शन-मस्माकं नास्तीति कुन्त्या हार्दं ज्ञात्वा तत्र निमित्तमाह ॥ **इत्युक्तायामिति** ॥ १०-१२ ॥

निहन्तुं शतधन्वानं सत्यभामापितुर्द्रुहम् ।
शतधन्वनि दुर्बुद्धौ हते सीरधरोऽग्रजः ॥ १३ ॥

सत्यधर्मीया — इयत्त्वराकारणं किमित्यत आह । सत्यभामापितुस्तस्मै द्रुह्यतीति ध्रुक् तं शतधन्वानं निहन्तुं शतधन्वनि दुर्बुद्धौ हते सति । धरतीति धरः सीरस्य धरः सीरधरः । सीरस्तिग्मकरे हल इति विश्वः । हलधरोऽग्रजः ॥ १३ ॥

सुमनोरञ्जिनी — शीरधरः हलधरः ॥ १३ ॥

कुपितो मामनादृत्य विदेहान् विमना ययौ ।
एतावन्तमहं कालं तदागमनकाङ्क्षया ॥ १४ ॥

सत्यधर्मीया — कुपितो मामनादृत्य विमनाः सन् विदेहान् देशान् ययौ । कुतो विमनस्कतेत्यतोऽप्याह । दुर्बुद्धौ मयि मणिस्तेयविषयिण्यां विपरीतमतौ प्रादुर्भूतायामिति । एतावन्तं महाकालं पञ्चसंवत्सरात्मकं तदागमनकाङ्क्षया । तस्य बलस्य ॥ १४ ॥

पुर एवावसं क्वापि नागच्छं कार्ययन्त्रितः ।
इत्येवं वादिनं कुन्ती प्राह स्नेहपरिप्लुता ॥ १५ ॥

सत्यधर्मीया — पुर एव द्वारकायामेव । पुरः एव सर्वेषां पुरोऽग्र एवापवादतोदनार्थ-मवसमिति वा । कार्ययंत्रितः कार्याधीनः क्वापि नागच्छम् । एवं वादिनं स्नेहपरिप्लुता तद्रसार्द्रा कुन्तीति प्राह । इति वादिनमेवं प्राहेति वा ॥ १५ ॥

सुमनोरञ्जिनी — कार्ययन्त्रितः कार्याधीनः ॥ १५ ॥

न तेऽस्ति स्वः पर इति विश्वस्य सुहृदात्मनः ।
तथापि स्मरतां सर्वान् क्लेशान् हंसि हृदि स्थितः ॥ १६ ॥

सत्यधर्मीया — शतधन्वनः परत्वं सत्यभामादीनां स्वकीयत्वं च तत्कर्मानुरोधेन न तु तव विषमसमत्वादितः । किञ्च जनानां स्मृतित उद्धर्तुमियं लीलेत्यालपति ॥ **न त इति** । विश्वस्य जगतः सुहृदात्मनोऽनिमित्तोपकारिस्वामिनस्ते स्वः पर इति योग्यतां विना नास्ति । विश्वस्य विश्वासं कृत्वा नते नमस्कर्तरि सुहृच्छोभनमनस्कः स्वात्मनः स्वामिनस्ते स्वः स्वकीयस्तदाऽस्ति । अस्ति स्वं शाश्वतं धनं यस्य सोऽस्तिस्वः । यस्यासुहृदात्मनः सुहृद्भिन्नजीवस्य विश्वसि जगदात्मकवदाचरसि स पर इति वा योजना । तथाऽपि तव वैषम्याद्यभावेऽपि स्मरतां स्मरन्त्यश्च स्मरन्तश्च तेषां स्मरताम् । मधुमथन कंसहिंस-केत्यादिनामानि । हृदि स्थितः सर्वान्क्लेशान्हंसि ॥ १६ ॥

सुमनोरञ्जिनी — परमार्थबुध्या स्तौति ॥ **न त इति** । स्वः स्वकीयः । परः शत्रुः इति विभागः ते नास्ति । कुतः । सर्वेषामनिमित्तसुहृत्त्वादित्याह ॥ **विश्वस्येति** । यदि विश्वसुहृत् तर्ह्ययोग्यानां क्लेशो न स्यादित्यतः कल्पवृक्ष इव सेवानुरूपफल इत्याह ॥ **तथापीति** । स्मरताम् अनन्यभावेन स्मरताम् ॥ १६ ॥

इति वै वार्षिकान् मासान् राज्ञा सोऽभ्यर्चितः सुखम् ।
जनयन् नयनानन्दमिन्द्रप्रस्थौकसां विभुः ॥ १७ ॥

सत्यधर्मीया — वार्षिकान्मासांश्चतुरो राज्ञा धर्मेणाभ्यर्चितः सुसुखं यथा तथा इन्द्रप्रस्थौकसां नयनानन्दं जनयन् इति सङ्कथयन्कथा उवासेति शेषः ॥१७॥

सुमनोरञ्जिनी — इति स्तुतः । वार्षिकान् वर्षाकालसम्बन्धिनः । परमानन्दं जनयन् । उवासेति शेषः ॥१७॥

एकदा रथमारुह्य विजयो वानरध्वजम् ।
गाण्डीवं धनुरादाय तूणी चाक्षयसायकौ ॥ १८ ॥

सत्यधर्मीया — विजयोऽर्जुनो वानरध्वजं हनुमत्केतुं रथमारुह्य गाण्डीवं धनुरादाय तथाऽक्षयसायकौ अक्षयाः सायका बाणा ययोस्ताविषुधी चादाय ॥ १८ ॥

सुमनोरञ्जिनी — विजयः अर्जुनः ॥ १८ ॥

साकं कृष्णेन सन्नद्धो विहर्तुं विपिनं वनम् ।
बहुव्यालमृगाकीर्णं प्राविशत् परवीरहा ॥ १९ ॥

सत्यधर्मीया — कृष्णेन साकं सह सन्नद्धो विहर्तुं बहुव्यालाः सर्पा मृगाश्च तैराकीर्णं व्याप्तमिति । विपिनं कम्पनं कम्पकम् । टु वेपृ कम्पने इति वेः प्ररूपत्वपक्षे वेपितुह्योर्ह्रस्वश्चेति इनन् । विशेषेण पियन्त्यत्रेति भानुः । वनमिति वनं सम्भजनीयं शूरैः । विपिनं काननमिति वा । परवीरहा प्राविशत् ॥ १९ ॥

सुमनोरञ्जिनी — गहनं गम्भीरम् । विपिनमिति पाठेऽप्ययमेवार्थः ॥ १९ ॥

तत्राविध्यच्छरैर्व्याघ्रान् सूकरान् महिषान् रुरून् ।
शरभान् गवयान् खड्गान् हरिणान् शशशल्यकान् ॥ २० ॥

सत्यधर्मीया — आविध्यद्विव्याध व्याघ्रादयोऽष्टमे स्पष्टाः । रुरून्सारङ्गान् सारङ्गः कुञ्जरः ख्यात इत्यनेकार्थध्वनिपदमञ्जरी । सारङ्गा वनगजा हरिणाः कृष्णसारा अतो न पुनरुक्तिः ॥ २० ॥

तान् निन्युः किङ्करा राज्ञे मेध्यान् पर्वण्युपागते ।
तृट्परीतः परिश्रान्तो बीभत्सुर्यमुनामगात् ॥ २१ ॥

सत्यधर्मीया — मेध्यान्पवित्रान् पर्वणि श्राद्धादिकर्मोचिते कालविशेष उपागते सति । तृषा परीत इति श्रान्तो बीभत्सुरर्जुनो यमुनामगात् ॥ २१ ॥

सुमनोरञ्जिनी — राज्ञे युधिष्ठिराय । पर्वणि कर्मकाले । मेध्यान् कर्मार्हान् बीभत्सुः अर्जुनः ॥ २१ ॥

तत्रोपस्पृश्य विशदं पीत्वा वारि महारथौ ।
कृष्णौ ददर्शतुः कन्यां चरन्तीं चारुदर्शनाम् ॥ २२ ॥

सत्यधर्मीया — उपस्पृश्यादावाचम्य मृष्टस्य मणेरिन्द्रनीलस्य प्रभेव प्रभा यस्य तज्जलमिति शेषः । विशदं यथेच्छं बहुलं पीत्वा विशदं क्षीरमधुरसमरसमिति तद्वद्विद्यमानं

वा । विशदं क्षीरमाधुर्यमिति सुधाभिधानात् । यथेच्छादिपदम् विहायैतत्स्थापनं न स्वतन्त्रेच्छस्येति न्यायतः किन्त्वमुमप्यर्थं सूचयितुमिति मन्तव्यम् । कृष्णौ वासुदेवार्जुनौ चारुदर्शनां तत्तीरे चरन्तीं कन्यां ददृशतुः ॥ २२ ॥

सुमनोरञ्जिनी — तत्र नद्याम् । उपस्पृश्य आचम्य । कृष्णौ गोविन्दार्जुनौ ॥२२॥

तामासाद्य वरारोहां सुदतीं रुचिराननाम् ।
पप्रच्छ प्रेषितः सख्या फल्गुनः प्रमदोत्तमाम् ॥ २३ ॥

सत्यधर्मीया — वरारोहामुत्तङ्गोत्सङ्गां सुदतीं शोभनरदनाम् । सख्या कृष्णेन फल्गुनोऽर्जुनः । फल्गु यथा तथा विचार्य नः कथयेति सख्या प्रेषित इत्यप्यन्वयः ॥२३॥

सुमनोरञ्जिनी — सख्या कृष्णेन ॥ २३ ॥

का त्वं कस्यासि सुश्रोणि कुतो वा किं चिकीर्षसि ।
मन्ये त्वां पतिमिच्छन्तीं कन्यां कथय शोभने ॥ २४ ॥

सत्यधर्मीया — कस्यासि सुता कुतः कारणादसि किं कर्तुमिच्छसि त्वां पतिमिच्छन्तीं कन्यां मन्ये । अनवाप्तपतिः कन्या जातवीर्या वरार्थिनीत्युत्पलमाला ॥ २४ ॥

सुमनोरञ्जिनी — कन्यां कन दीप्तावित्यतो दीप्यमानाम् । जातरजस्काम् । अत एव पतिं कामयमानाम् । अनवाप्तपतिः कन्या जातवीर्या वरार्थिनीत्युत्पलमालेति पदरत्नवल्याम् ॥ २४ ॥

कालिन्द्युवाच —

अहं देवस्य सवितुर्दुहिता पतिमिच्छती ।
विष्णुं वरेण्यं वरदं तपः परममास्थिता ॥ २५ ॥

सत्यधर्मीया — आदावन्ववायो बोधनीय इति द्वितीयस्योत्तरमीरयति ॥ **अहमिति** । सवितुर्देवस्य । सूर्यादिपदमनिबन्धानो निबन्धानश्च सवितृपदं तस्याः पालकपितृत्वनिवारणमुखेन साक्षात्पितृत्वं बोधयामासेति ज्ञेयम् । अहं दुहिता पुत्री । कुल-

समीचीनतां भाविकार्योपयुक्तामुक्त्वा मन्ये त्वामित्यर्जुन त्वन्मननं मम मनोनुकूलमित्यनुमत्या वक्ति ॥ **पतिमिच्छन्तीति** । वरेण्यं वरणीयं विष्णुं पतिमिच्छन्ती परमं तप आस्थिता ॥ २५ ॥

सुमनोरञ्जिनी — वरेण्यं भजनीयम् । विष्णुं पतिमिच्छन्तीम् ॥ २५ ॥

नान्यं पतिं वृणे वीर तमृते श्रीनिकेतनम् ।
तुष्यतां मे स भगवान् मुकुन्दोऽनाथवत्सलः ॥ २६ ॥

सत्यधर्मीया — तं श्रीनिकेतनमृते हे वीर अन्यं पतिं न वृणे न कामये । अनाथवत्सलो भगवान् स मुकुन्दस्तुष्यताम् ॥ २६ ॥

कालिन्दीति समाख्याता वसामि यमुनाजले ।
निर्मिते भवने पित्रा यावदच्युतदर्शनम् ॥ २७ ॥

सत्यधर्मीया — का त्वमित्यस्य किन्नाम्नीत्यर्थ इति मत्वा तत्स्वनामाह ॥ **कालिन्दीतीति** । पित्रा निर्मिते भवने यावद्यदाऽच्युतदर्शनं भवेदिति वसामि ॥ २७ ॥

सुमनोरञ्जिनी — कालिन्दीति नाम्ना समाख्याता । इयं सूर्यपुत्रीत्वात् कालिन्दीशब्दवाच्यत्वाच्च यमुनेति न भ्रमितव्यम् । किं तु यमुनास्वसा इयमन्या कालिन्दी । तदुक्तं भारततात्पर्ये 'सोऽन्यां कालिन्दीं ददृशे तत्स्वसारं सा सूर्यपुत्री यमुनानुजाता' इति । पित्रा सूर्येण ॥ २७ ॥

तथाऽवदद् गुडाकेशो वासुदेवाय सोऽपि ताम् ।
रथमारोप्य तद्विद्वान् धर्मराजमुपागमत् ॥ २८ ॥

सत्यधर्मीया — यथा साऽवदत्तथैव गुडाकेशो विद्रावितनिद्रो गुडवत्सम्यक् स्निग्धकेश इति वाऽर्जुनो वासुदेवायावदत् । सोऽपि तां कालिन्दीं तद्विद्वान्स्वाप्तिहेतुतपश्चरणं जानन् रथमरोप्य धर्मराजमुपागमत् । पुरं कुन्तीमित्याद्यवदन् धर्मराजमिति वदन् शुकः कालिन्द्या यमात्मकधर्मराजस्य चानुबन्धं स्मारयामासेति तात्पर्यमवसेयम् ॥ तद्भगिनी ह्येषेति ॥ २८ ॥

सुमनोरञ्जिनी — कालिन्दी यथाऽवदत् तथा गुडाकेशोऽर्जुनः वासुदेवायावदत् । सोऽपि वासुदेवोऽपि । पूर्वमेव तद्विद्वान् तस्याः अभिप्रायं विद्वान् ॥ २८ ॥

वसंस्तत्र हृषीकेशः शक्रप्रस्थे यथासुखम् ।
विश्वकर्माणमाहूय शिल्पविद्याविशारदम् ॥ २९ ॥

सत्यधर्मीया — तत्र शक्रप्रस्थे ॥ २९ ॥

अद्भुतं कारयामास नगरं धर्मसूनवे ।
सप्रासादपुरद्वारगोपुराट्टालतोरणम् ॥ ३० ॥

सत्यधर्मीया — धर्मसूनवे तदर्थम् ॥ ३० ॥

पुरन्दरपुरप्रख्यं स्वानां प्रियचिकीर्षया ।
अथ पार्थैरनुज्ञातः सुहृद्भिः स्वजनान्वितः ॥ ३१ ॥

आययौ द्वारकां भूयः सात्यकिप्रमुखैर्वृतः ।
अथोपयेमे कालिन्दीं पुण्ये नक्षत्र ऊर्जिते ॥ ३२ ॥

सत्यधर्मीया — पुरन्दरपुरस्यामरावत्याः प्रख्या शोभा यस्य तत् । स्वानां द्वारकागाराणाम् ॥ सुहृद्भिः पार्थैरित्येकाधिकरण्यम् । स्वजनाश्च कालिन्द्याद्याः सात्यकिप्रमुखैरिति तत्पृथग्वचनात् । पुण्ये ऊर्जिते उच्चस्थाने स्थितगुर्वादिग्रहे ऊर्जिते शुभनक्षत्रे उपयेमे परिणिनाय ॥ ३१,३२ ॥

रूपयौवनसम्पन्नां मनोनयननन्दिनीम् ।
वितन्वन् परमानन्दं स्वानां परममङ्गलम् ॥ ३३ ॥

सत्यधर्मीया — मनोनयननन्दिनीमित्यनेन स्वपितृस्थानत्वान्नयननन्दनं युक्ततरमिति ध्वन्यते । ध्वन्यते च स्वभर्तृमूलपुरुषस्थानत्वान्मनोनन्दनमिति । उभयकुलनन्दनीति परमार्थः । शशिसूर्यनेत्रम् । चन्द्रमा मनसो जात इत्यादेर्मनः सोम उदाहृत इत्यादेश्च । स्वानां परममङ्गलं तथा परमानन्दं च वितन्वन् विस्तारयन्नुपयेम इत्यन्वयः ॥ ३३ ॥

विन्दानुविन्दावावन्त्यौ दुर्योधनवशानुगौ ।
स्वयंवरे स्वभगिनीं कृष्णकामां न्यषेधताम् ॥ ३४ ॥

सत्यधर्मीया — आवन्त्याववन्तिभवौ न्यषेधतां निषिषिधतुः ॥ ३४ ॥

सुमनोरञ्जिनी — अथ मित्रविन्दाविवाहकथामाह ॥ **विन्देति** । आवन्त्यौ अवन्तीपुर्या राजानौ ॥ ३४ ॥

राजाधिदेव्यास्तनयां मित्रविन्दां पितृष्वसुः ।
प्रसह्य हृतवान् कृष्णो राजन् राज्ञां प्रपश्यताम् ॥ ३५ ॥

सत्यधर्मीया — राजाधिदेव्या वसुदेवभगिन्यास्तन्नाम्न्याः राज्ञां प्रपश्यतांताननादृत्य प्रसह्य हृतवान् । पञ्चमी मित्रविन्दा चेयम् ॥ ३५ ॥

सुमनोरञ्जिनी — कृष्णः पितृष्वसुः राजाधिदेव्याः तन्नाम्न्याः तनयां नामतो मित्रविन्दाम् ॥ ३५ ॥

नग्नजिन्नाम कौसल्य आसीद् राजाऽतिधार्मिकः ।
तस्य सत्याऽभवत् कन्या राजन् नीलेति चाह्वया ॥ ३६ ॥

सत्यधर्मीया — नाम प्रसिद्धः । सत्या तस्या नीलेत्याह्वया नीलेत्याह्वयो यस्याः सा । विवक्षाभावान्न सन्धिः । नीलेति विश्रुतेति पाठो ललितः ॥ ३६ ॥

सुमनोरञ्जिनी — षष्टं नीलाविवाहमाह ॥ **नग्नजिदिति ।** कौसल्यः कोसलदेशाधिपस्तस्य सत्या नाम कन्या अभवत् नीलेति । आहूयत इति आह्वया । सन्ध्यभावश्छान्दसः ॥ ३६ ॥

तां न शेकुर्नृपा वोढुमजित्वा सप्तगोवृषान् ।
तीक्ष्णशृङ्गान् सुदुर्द्धर्षान् वीरगन्धान् महाघनान् ॥ ३७ ॥

सत्यधर्मीया — वीरगन्धान् वीरान् गन्धयन्ति हिंसयन्ति ते तथा तान् । गन्धो

लेशे च हिंसायां घ्राणग्राहे प्रकीर्तित इति यादवः । महाघनानतिदृढान् । नैल्येन मेघसमान् वा ॥ ३७ ॥

सुमनोरञ्जिनी — वोढुं परिणेतुम् । वीरगन्धान् वीरा इति गन्धो गर्वो येषाम् । वीरान् गन्धयन्ति हिंसयन्तीति वा । गन्धो गन्धक आमोदे सम्बन्धे लेशगन्धयोरिति विश्वः । गन्धो लेशे च हिंसायां घ्राणग्राहे प्रकीर्तित इति यादवः । महाघनान् अतीव स्थूलान् । दृढान् दीर्घानिति वा । घनः सान्द्रे दृढे दीर्घ इति विश्वः ॥ ३७ ॥

तां श्रुत्वा वृषजिल्लभ्यां भगवान् सात्वतां पतिः ।
जगाम कौसल्यपुरं सैन्येन महता वृतः ॥ ३८ ॥

सत्यधर्मीया — वृषाञ्जयतीति वृषजित्तेन लभ्याम् ॥ ३८ ॥

सुमनोरञ्जिनी — वृषजिल्लभ्याम् । यः सप्त वृषान् जयति तेन लभ्यां श्रुत्वा ॥३८॥

स कौसलपतिः प्रीतः प्रत्युत्थानासनादिभिः ।
अर्हणेनापि गुरुणा पूजयन् प्रत्यनन्दत ॥ ३९ ॥

सत्यधर्मीया — गुरुणा महताऽर्हणेन पूजासाधनेन गुरुणा पुरोधसा सहेति वा ॥ ३९ ॥

सुमनोरञ्जिनी — गुरुणा महता । अर्हणेन पूजासाधनेन ॥ ३९ ॥

वरं विलोक्याभिमतं समागतं नरेन्द्रकन्या चकमे रमापतिम् ।
भूयादयं मे पतिराशिषां पतिः करोतु सत्यो यदि मे धृतव्रतः ॥ ४० ॥

सत्यधर्मीया — त्रिलोक्याभिमतं समागतं रमापतिं नरेंद्रकन्या चकमे । यदि मे मया धृतव्रतः सत्यस्तर्हि स व्रत एव तथा करोतु । यथाऽऽशिषां पतिर्मे पतिर्भूयात् ॥ ४० ॥

सुमनोरञ्जिनी — अभिमतं स्वाभिमतम् । वरं वरणीयं विलोक्य । आशिषाम् अभीष्टानां पतिः पातुं समर्थः मे मया । धृतो व्रतः सत्यः यथार्थः तर्हि सः मे अभिमतं करोत्विति सम्बन्धः ॥ ४० ॥

अर्चितं पुनरित्याह नारायण जगत्पते ।
आत्मना देव पूर्णस्य करवाणि किमल्पकः ।। ४१ ।।

सत्यधर्मीया — हे देव । आत्मना पूर्णस्याल्पकोऽहं किं करवाणि । अल्पकोऽतिनीचस्त्वयि मयीतिदयां कलयति सति अहमल्पकः किम् । न । पूर्णस्याप्यात्मना देहेन करवाणि नमनं वेति शेषः । अर्चितमिति वाऽन्वेति । आत्मानन्देन पूर्णस्येति पाठ आनन्ददः ।। ४१ ।।

सुमनोरञ्जिनी — अर्चितं कृष्णं प्रति नग्नजित् । इति वक्ष्यमाणप्रकारेणाह । आत्मना स्वलाभेनैव पूर्णस्य ।। ४१ ।।

यत्पादपङ्कजरजः शिरसा बिभर्ति श्रीरब्जजश्च गिरिशः सहलोकपालैः ।
लीलातनुः स्वकृतसेतुपरीप्सया यः काले दधत् स भगवान् स्वकृतेन तुष्येत् ।।४२।।

सत्यधर्मीया — इति वैभववतो भवतोऽत्रागमनमनुग्रहत एव न तु वनिताकामनयेति नग्नजिदानन्दमग्नः प्राह ।। **यदिति** । यस्य पादपङ्कजे तयो रजः परागं श्रीः शिरसा बिभर्ति । अब्जजो ब्रह्मा च गिरिशो लोकपालैः सह बिभर्ति । स्वकृतः सेतुर्मयादा तस्योच्छेदे दैतेयैः कृते तत्परीप्सया तद्रिरक्षया लीलातनुरिदमाद्याः काले तत्तत्समयेऽदधाद्धृतवान् स भगवान् भवान्स्वकृतेन । नर्ते त्वत्क्रियते किश्चनार इत्यादेः स्वस्यैव कृतेन कर्मणा स्वेनैव कारितेन वा तुष्येत्तुष्टः स्यात् ।। ४२ ।।

सुमनोरञ्जिनी — स्वकृतौ यः सेतुर्मर्यादा तस्य परीप्सया पालनेच्छया । लीलातनुः काले तत्तत्काले दधत् भगवान्मयि स्थित्वा । स्वेनैव कृतेनैव स्वपूजनेन तुष्येत् । तथा हि श्रुतिः 'महामर्कं मघवन् चित्रमर्चेति' । अहं तु अल्पकः कर्तृत्वशून्यः किं करवाणीति सम्बन्धः ।। ४२ ।।

श्रीशुक उवाच —

तमाह भगवान् कृष्णः कृतासनपरिग्रहः ।
मेघगम्भीरया वाचा सस्मितं कुरुनन्दन ।। ४३ ।।

सत्यधर्मीया — कृत आसनपरिग्रहो येन सः ॥ ४३ ॥

श्री भगवानुवाच —

अन्यत्र काले विदुषः स्वयंवराद्ध्ययाचितारं वरमाहुरुत्तमम् ।
स हि प्रभूणां पुरुषार्थभागिनां वेलां विनाऽह्वाययति क्षितीश्वर ॥ ४४ ॥

सत्यधर्मीया — रमयैवमाराधितस्य न मया कारणं कारितं किमागमनकारणमिति क्षितिप न वद मर्यादियमार्यदर्शितेत्याहेत्याह ॥ **श्री भगवानिति** । हे क्षितीश्वर विदुषो ज्ञानिनो राज्ञः सम्बन्धिनः स्वयंवरादन्यत्र तद्भिन्ने विवाहे वरमयाचितारमुत्तममाहुर्विद्वांस इति शेषः । जसः शसादेशो वा । विदुषो विद्वांसः । बहुवचनेन तथा विद्वद्वचनेन चैकस्य प्रतिभातं तु कृतकान्न विशिष्यत इत्युक्तकृतकता व्यावर्तिता । एकोऽपि विद्वांश्चेन्न कृतकता यदा तदा किं वक्तव्यं ते च बहवो यत्र तत्र न सेति भावः । स हि तादृशो विसदृशो वरो हि । पुरुषरूपो योऽयमर्थस्तद्भागिनां वराभिलाषवतां प्रभूणां तत्सकाशात् । आह्वानमर्हतीति शेषः । अहं राजा राजान्तरं प्रति कथं तव सुताय मम सुतां दास्याम्यागच्छेति मया मर्यादा त्याज्येत्यत आह ॥ **वेलां मर्यादां विनेति** । वेलेति पाठे स्वयंवरे तु विनाऽऽव्हानमायामेव (आगमनमेव) वेला मर्यादित्यर्थः ॥ ४४ ॥

सुमनोरञ्जिनी — श्रीकृष्णः कन्यां याचन् क्षत्रियाणां याचना गर्हिता । आह्वानमन्तरा आगमनमपि निन्दितमिति नग्नजितो मानसीं शङ्कां परिहरन्नाह ॥ **अन्यत्रेति** । विदुषो विद्वांसः । स्वयंवरादन्यत्र काले अयाचितारमेव वरं पुरुषार्थभागिनां प्रभूणां राज्ञां मध्ये उत्तममाहुः । सोऽपि वरोऽपि वेलां स्वयंवरवेलां विना अन्यदैव । आह्वानमर्हतीति शेषः । हि शास्त्रप्रसिद्धमेतत् । इदानीं स्वयंवरकालत्वादुभयमपि न गर्हितमिति भावः ॥४४॥

नरेन्द्र याञ्चा कविभिर्विगर्हिता राजन्यबन्धोर्निजधर्मवर्तिनः ।
तथापि याचे तव सौहृदेच्छया कन्यां त्वदीयां न हि शुल्कदा वयम् ॥ ४५ ॥

सत्यधर्मीया — त्वयाऽऽरब्धस्तु स्वयंवर इति स्वयं वरेणागन्तव्यमित्यहमायातः इतःपरं तव स्नेहलाभलाभेन स्वयंवरे ज्ञानिवरैः प्रतिषिद्धमर्यादं पार्थिव त्वामर्थय इत्याह ॥ **नरेन्द्रेति** । हे नरेन्द्र । राजन्यबन्धो । नायं बन्धुशब्दो ब्रह्मबन्धुः क्षत्रबन्धुरित्यत्रेवात्र

राजन्याभास इति स्वयं व्याकरोति ॥ **निजधर्मवर्तिन इति** । याश्चा कविभिर्ज्ञानिभि-र्विगर्हिता निन्दिता । तथाऽपि तव सौहृदेच्छया त्वदीयां कन्यां याचे । तर्हि किं दिशति मूल्यमिति न वद इति वदति ॥ **न हि वयं शुल्कदा इति** । यद्यप्यहं न शुल्कद इति वक्तव्यं तथाऽपि न भेतव्यं सहागता मदीयाः शुल्कदानविषय इति द्योतयितुमियमुक्तिरिति मन्तव्यम् ॥ ४५ ॥

सुमनोरञ्जिनी — अभ्युपेत्याप्याह । राजन्यबन्धोः क्षत्रियस्य । यद्यप्येवं तथापि । शुल्कदाः द्रव्यादिप्रदाः ॥ ४५ ॥

राजोवाच —

कोऽन्यस्तेऽभ्यधिको नाथ कन्यावर इहेप्सितः ।
गुणैकधाम्नो यस्याङ्गे श्रीर्वसत्यनपयिनी ॥ ४६ ॥

सत्यधर्मीया — नन्दनन्दनो वर इत्यानन्दोदधौ मग्नो नग्नजित्प्रतिश्रवो मे प्रससार सारसाक्षीवितरणे प्रकारान्तरेण तन्निवर्त्य कन्या ग्राह्येत्थमनुग्राह्य इति वदति ॥ **क इति** । हे नाथ । ते सकाशादभ्यधिकः कन्यावरोऽन्यः कः न कोऽपीप्सितः । सम्प्रतिपन्नोऽधिक-स्तन्मात्रेण ऊना इत्यधिकोना कन्येति अधिको वर ईप्सित इति वा । तद्धेतुमाह । यस्य तव गुणैकधाम्नोऽङ्गेऽनपायिनी श्रीर्वसतीति ॥ ४६ ॥

सुमनोरञ्जिनी — गुणाः आनन्दादयः एकं धाम स्वरूपं यस्य । गुणानां एकं मुख्यं धाम स्थानं यस्य तवाङ्गे ॥ ४६ ॥

किन्त्वस्माभिः कृतः पूर्वं समयः सात्वतर्षभ ।
पुंसां वीर्यपरीक्षार्थं कन्यावरपरीप्सया ॥ ४७ ॥

सत्यधर्मीया — किन्तु तथाऽप्यस्माभिः पूर्वं त्वदागमनतः समयः कृतः पुंसां राज्ञां वीर्यपरीक्षार्थं कः कस्माद्बलिष्ठ इति तत्तरतमभावज्ञानार्थम् । योऽधिको भवेत् स एव कन्यावर इति तदीप्सया ॥ ४७ ॥

सुमनोरञ्जिनी — समयः निर्बन्धः प्रतिज्ञा । कन्यायाः योग्यवरस्य परीप्सया इच्छया ॥

सप्तैते गोवृषा वीर दुर्दान्ता दुरवग्रहाः ।
एतैर्भग्नाः सुबहुशो भिन्नगात्रा नृपात्मजाः ॥ ४८ ॥

सत्यधर्मीया — तं समयप्रकारमाह ॥ **सप्तेति** । हे वीर दुर्दान्ता अदम्या दुरवग्रहा गृहीतुमशक्या एतैर्वृषैर्भग्नाः स्विन्नगात्रा नृपात्मजा गता इति शेषः ॥ ४८ ॥

सुमनोरञ्जिनी — दुर्दान्ताः अशक्यशिक्षाः । दुरवग्रहाः गृहीतुमशक्याः । भग्नाः भङ्गं पराजयं प्राप्ताः । भिन्नगात्रा विदारितदेहाः ॥ ४८ ॥

यदीमे निगृहीताः स्युस्त्वयैव यदुनन्दन ।
वरो भवानभिमतो दुहितुर्मे श्रियः पते ॥ ४९ ॥

सत्यधर्मीया — हे यदुनन्दन त्वयेमे यदि निगृहीताः स्युस्तर्हि श्रियःपते दुहितुर्भवानभिमतो वरः ॥ ४९ ॥

सुमनोरञ्जिनी — यदि इमे गोवृषाः ॥ ४९ ॥

श्रीशुक उवाच —

एवं समयमाकर्ण्य बद्ध्वा परिकरं प्रभुः ।
आत्मानं सप्तधा कृत्वा न्यगृह्णाल्लीलयैव तान् ॥ ५० ॥

सत्यधर्मीया — परिकरं बद्ध्वा दुकूलादिकमेतदनुकूलं यथा स्यात्तथा बद्ध्वा आत्मानं सप्तधा सप्ताकारं कृत्वा तान् लीलयैव न्यगृह्णात् । नन्वेक एव सप्तवृषान् बध्नीयादिति प्रतिज्ञां कृतवता राज्ञा सप्तधाऽऽत्मानं विधाय बद्धुं धावतो माधवस्य कथं न निषेधः कृत इति चेत् । न शक्तिमात्रव्यक्त्यर्थे प्रतिश्रवो मम योगमहिमाऽपि महान् प्रदर्शितोऽयमेको महालाभ इति तूष्णीकोऽतितुष्टश्चात्मजामार्पयदित्युपपत्तेः । तत्क्षण एकस्यैवानेकीभवने तदेकतानयाच्च । अत्र लोकानां सप्तधाऽदर्शयदिति सप्तधेत्युक्तिर्हरिवंशे परमतत्वापेक्षया तदनुक्तिरेक एवेत्युक्तिरिति न विरोधः । तथा हि हरिवंशे । ततः कृष्णो रुषा मुष्टिं सन्निवर्त्य जघान च । क्रमेण मुष्ट्या तान्सर्वान्हत्वैको दैत्यगोपतीनिति । ते च कालनेमिसुताः । तदुक्तं तत्रैव बलं प्रति कृष्णवाक्ये । कालनेमिसुता आर्य मां हन्तुमिह

सङ्गता इति । भागवते न कथाक्रमनियम इति नीलादिविवाहादेः कंसहिंसादि-प्राक्तनता-वेदकेन हरिवंशेन च न विरोध इति मन्तव्यम् । इयं नीला सुदक्षिणात्मजा चैकीभूते इति नाष्टकातिरेकः । उक्तं चाचार्यैः –

'ततो नीलां तस्य सुतां च लेभे पूर्वं नीला गोपकन्याऽपि याऽऽसीत् ।
सा देहेऽस्याः प्राविशत्पूर्वमेषा यस्मादेका द्विविधा सम्प्रजाते'ति ॥ ५० ॥

सुमनोरञ्जिनी — परिकरं कक्ष्याम् । आत्मानं सप्तधा कृत्वा स्वयं सप्तरूपो भूत्वेत्यर्थः ॥ ५० ॥

बद्ध्वा तान् दामभिः शौरिर्भग्नवीर्यान् हतौजसः ।
व्यकर्षल्लीलया बद्धान् बालो दारुमयान् यथा ॥ ५१ ॥

सत्यधर्मीया — कैरप्यबद्धान्बद्ध्वा बालो दारुमयान् काष्ठमयान्यथा तथा लीलया व्यचकर्षच्चकर्ष ॥ ५१ ॥

ततः प्रीतः सुतां राजन् ददौ कृष्णाय विस्मितः ।
तां प्रत्यगृह्णात् भगवान् विधिवत् सदृशीं प्रभुः ॥ ५२ ॥

सत्यधर्मीया — सदृशीं स्वपत्नीत्वयोग्याम् ॥ ५२ ॥

सुमनोरञ्जिनी — सदृशीं योग्यवयस्काम् ॥ ५२ ॥

राजपत्न्यः स्वदुहितुः कृष्णं लब्ध्वा प्रियं पतिम् ।
लेभिरे परमानन्दं जातश्च परमोत्सवः ॥ ५३ ॥

सत्यधर्मीया — प्रियमिष्टं परमानन्दं लेभिरे । उलूखले परमोत्सवो गोधूमकणिका-मुहूर्तोत्सवो जातः । लेभिरं स्यादुलूखलमित्यभिधानम् । तत्कुट्टनस्य स्त्रीमात्रकार्यत्वा-द्राजपत्न्य इति तन्मात्रग्रहो युक्तः ॥ ५३ ॥

सुमनोरञ्जिनी — स्वदुहितुः पतिं कृष्णं लब्ध्वा उपलभ्य अवलोक्येति यावत् ॥ ५३ ॥

शङ्खभेर्यानका नेदुर्गीतवाद्यद्विजाशिषः ।
नरा नार्यः प्रमुदिताः सुवासः स्रगलङ्कृताः ॥ ५४ ॥

सत्यधर्मीया — शङ्खभेर्यानका नेदुः । आशिषो नराः नार्यश्च सुवाससः स्रगलङ्कृता बभूवुरिति शेषः ॥ ५४ ॥

दशधेनुसहस्राणि पारिबर्हमदाद् विभुः ।
युवतीनां त्रिसाहस्रं निष्कग्रीवसुवाससाम् ॥ ५५ ॥

सत्यधर्मीया — धेनुसहस्राणि दश । निष्कग्रीवाश्च ताः सुवाससश्च तासां युवतीनां त्रिसाहस्रम् ॥ ५५ ॥

सुमनोरञ्जिनी — निष्कग्रीवा हारयुक्तग्रीवाश्च ताः सुवाससश्च तासां युवतीनां त्रि-साहस्रम् । उरोविभूषणे निष्कमिति शाश्वतः ॥ ५५ ॥

नवनागसहस्राणि नागाच्छतगुणान् रथान् ।
रथाच्छतगुणानश्वानश्वाच्छतगुणान् नरान् ॥ ५६ ॥

सत्यधर्मीया — नागानां गजानां सहस्राणि नव । नागान्नागसमूहात् । तस्य समूह इत्यण् । शताधिकगुणोपेतान् नवलक्षसङ्ख्यानिति यावत् । रथात् सङ्घाच्छतगुणान्नव-कोटिसंख्यान् । अश्वाच्छतगुणान् नवपद्मसङ्ख्यान् नरान् पत्तिमिति यावत् । विभुरिति तद्वितरणसमर्थतां बोधयति । पारिबर्हमदाद्दत्तवान् ॥ ५६ ॥

दम्पती रथमारोप्य महत्या सेनया वृतौ ।
स्नेहप्रक्लिन्नहृदयो यापयामास कौसलः ॥ ५७ ॥

सत्यधर्मीया — महत्या स्वसेनामेलनात् ॥ ५७ ॥

सुमनोरञ्जिनी — यापयामास प्रेषयामास । अयं नीलाविवाहः मित्रविन्दाविवाहात्पूर्वं जातो ज्ञेयः । निर्णये तथैवोक्तत्वात् ॥ ५७ ॥

पारिबर्हं च सङ्गृह्य द्वारकामेत्य सत्यया ।
रेमे यदूनामृषभो भगवान् देवकीसुतः ॥ ५८ ॥

सत्यधर्मीया — सत्यया नग्नजित्या नीलया ॥ ५८ ॥

श्रुतकीर्तेः सुतां भद्रामुपयेमे पितृष्वसुः ।
कैकेयीं भ्रातृभिर्दत्तां कृष्णः सन्तर्दनादिभिः ॥ ५९ ॥

सत्यधर्मीया – सप्तमं विवाहमाह ॥ **श्रुतिकीर्तेरिति** । पितृष्वसुः श्रुतिकीर्तेरित्येकाधिकरण्यम् । सुतां नाम्ना भद्रां कैकेयीं देशनाम तज्जां सन्तर्दनादिभ्रातृभिर्दत्तामुपयेमे परिणिनाय । भ्रातृभिर्दत्तामित्यनेन सन्नपि पिताऽजागलस्तनायित इति वा प्रकारान्तरं वा ध्वनयति ॥ ५९ ॥

सुमनोरञ्जिनी — भद्रां नामतः । तस्याः शैब्येत्यपरं नाम ॥ ५९ ॥

सुतां च मद्राधिपतेर्लक्ष्मणां लक्षणैर्युताम् ।
स्वयंवरे जहारैकः ससुपर्णः सुधामिव ॥ ६० ॥

सत्यधर्मीया — अष्टमं विवाहमाह ॥ **सुतां चेति** । मद्राधिपतेः । अन्वर्थं च नामेत्याह ॥ **लक्षणैर्युतामिति** । ततश्चाशार्द्यजन्तत्वानन्तरं टाप्प्रत्यय इति सूचितं भवति । सुधामिवैक एव स्वयंवरे जहार । ससुपर्ण इत्यविश्लेषभाषणेन सुपर्णमात्रेण सहितः ससुपर्णो वाहनमात्रसहित इति ध्वनयति । एक इत्युक्तिस्तु सेनाद्यभावपरेति ज्ञेयम् ॥ ६० ॥

सुमनोरञ्जिनी — एक एव असहाय एव । सः श्रीकृष्णः ॥ ६० ॥

अन्याश्चैवंविधा भार्याः कृष्णस्यासन् सहस्रशः ।
भौमं हत्वा तन्निरोधादाहृताश्चारुदर्शनाः ॥ ६१ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे द्विषष्ठितमोऽध्यायः ॥

सत्यधर्मीया — सहस्रशो वक्ष्यमाणषोडशसङ्ख्याः । निरोधशब्दोऽवरोधपर्याय

इति । राजाऽन्तःपुरादिति केचित् । तन्निरोधात् । निरुध्यन्ते जना अत्रेति निरोधः काराधाम तस्मान्निरोधात् । तन्निरोधं परिहृत्याहृता भार्या आसन् ॥ ६१ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे द्विषष्ठितमोऽध्यायः ॥ १०-६२ ॥

सुमनोरञ्जिनी — भौमं नरकासुरं तन्निरोधात् तन्निरोधं परिहृत्येति ल्यब्लोपनिमित्ता पञ्चमी । निरोधात्कारागृहादिति वा आहृताः भार्या आसन्नित्यन्वयः ॥ ६१ ॥

॥ इति श्रीमद्भागवतदशमस्कन्धोत्तरार्धव्याख्यायां सुमनोरञ्जिन्यां द्विषष्ठिरध्यायः ॥

।। अथ त्रिषष्टिरध्यायः ।।

राजोवाच —

यथा हतो भगवता भौमो नीता यथा स्त्रियः ।
निरुद्धा यास्तदाचक्ष्व विक्रमं शार्ङ्गधन्वनः ।। १ ।।

सत्यधर्मीया — भौमं हत्वेत्यारोप्यबीजं मुनौ स मुनिव्रते तदङ्कुरणप्ररोहणादिकं कामयानः शुकं परीक्षित्पृच्छतीत्याह ।। **राजेति** । यथा भौमं नरको यथा निरुद्धास्ता स्त्रियस्तेन भौमेन कथं नीतास्तत् । अव्ययम् । शार्ङ्गधन्वनो विक्रममाचक्ष्व ।। १ ।।

सुमनोरञ्जिनी — नरकासुरवधपारिजातहरणादिमहिमा निरूप्यतेऽस्मिन्नध्याये । याः स्त्रियो निरुद्धास्ताः यथा येन प्रकारेण नीताः ।। १ ।।

श्रीशुक उवाच —

द्वारवत्यां महाभागे निवसत्यच्युते नृप ।
दीनेनोद्विग्नचित्तेन समागम्य त्रिविष्टपात् ।। २ ।।

सत्यधर्मीया — त्रिविष्टपात्स्वर्गात्समागम्यागत्योद्विग्नं चित्तं यस्य स तेन दीनेन ।।२।।

सुमनोरञ्जिनी — हृतं छत्रं यस्य तेन । अत एव दीनेनोद्विग्नचित्तेन वरुणेन सहेति शेषः । समागम्य सङ्गत्य त्रिविष्टपात् । आगतेन । हृतकुण्डलो बन्धुर्माता यस्य । तथाविधेन शक्रेण । भौमचेष्टितं ज्ञापितो गोविन्दः इन्द्रमाश्वास्य । सभार्यः भार्यया सत्यभामया सहितः गरुडारूढः सन् प्राग्जोतिषं नाम नरकासुरस्य पुरं ययाविति योजना ।। २-४ ।।

हृतच्छत्रेण शक्रेण हृतकुण्डलबन्धुना ।
हृतामराद्रिस्थानेन ज्ञापितो भौमचेष्टितम् ।। ३ ।।

सत्यधर्मीया — हृतं छत्रं यस्य स तेन । यद्यपि न छत्रं सहस्रनेत्रस्य । यद्वक्ष्यति वरुणाय तथा छत्रं प्राहिणोद्दैत्यकिङ्करैरिति । तथाऽपि पौलोमीरमणस्याखिललोकपाल-मुख्यत्वात् तदप्रदापने मानभङ्गः स्वस्यैवेति तदुक्तिरिति ज्ञेयम् । हृते कुण्डले यस्याः सा

हृतकुण्डला सा बन्धुर्माता यस्य स तेन । हृतम् । अमराद्रौ स्थानं मणिपर्वतात्मकं यस्य तेन । शुक्रेण भौमचेष्टितं कुजकुचेष्टां ज्ञापितो विज्ञापितः ॥ ३ ॥

इन्द्रमाश्वास्य गोविन्दः सुसम्पूज्य विसृज्य च ।
सभार्यो गरुडारूढः प्राग्ज्योतिषपुरं ययौ ॥ ४ ॥

सत्यधर्मीया —— इन्द्रं समाश्वास्य प्रसान्त्वय्य तमिन्द्रं सुसम्पूज्य विसृज्य गमयित्वा सभार्यः ससत्यभामः । सत्यभामाधाम्नि स्थितं प्रत्यागतमिन्द्रमिदं सर्वं तच्छ्रुतिसृतिं गतमिति कौतुकमवलोकयितुकामिनी इति नीतवांस्तामिति सभार्यः । यद्वा भौमस्य दौरात्म्यं दृष्टवती चेदनपत्यं वरं मन्ये कदपत्याच्छुचास्पदादिति मतिमती शान्ता भवेदिति भूम्यात्मिकायाः सत्यभामायाः सह नयनमिति सभार्यः । यथोक्तमाचार्यैः । मुमोद सत्यभामया । रमैव साऽपि भूरितीति । अथवा पुष्पे पारिजातस्य सर्वकामितदे नारदेन दत्ते च रुग्मिण्यै कृष्णेन कुपितां तां समाधातुं पारिजातं तरुमेव तरुणि दास्यामीति प्रतिश्रुतत्वात्तां सह निनाय नायको नाकमिति सभार्यः । यथोक्तं हरिवंशमहाभारततात्पर्यनिर्णययोः । सोऽर्चितो वासुदेवेन मुनिरर्च्यतमः सताम् । परिजाततरोः पुष्पं ददौ कृष्णाय भारत । तद्दृष्ट्वा राजकुसुमं रुग्मिण्याः प्रददौ हरिरित्यारभ्य अलं कमलपत्राक्षि रुदितेन मनस्विनीत्यादिना विधाय तत्समाधिं प्रसीदैकापराधं मे मर्षयस्व शुचिस्मिते । पारिजातस्य पुष्पाणि यावत्कालं त्वमिच्छसीति । दाताऽस्म्यहं पारिजातं तरुं त इति । अहं रुद्राय धनुरातनोमीत्याद्युक्त-लक्षणं यत्तत्प्रदर्श्य रमात्वख्यात्यै नयनं नलिनाया इति सभार्यः । ननु न च कुतो ज्येष्ठया रुग्मिण्या विनिगमनविरहादिति तु दत्तोत्तरम् । कुसुमसुमनसत्वात्तस्याः । एतस्या द्युतिसुरतरु-वितरणपरिहरणीयरुद्वाद्विनिगमकादिति सम्भवद्भगवन्नयनेऽयमेवेति सभार्यः ससत्यभाम इति वा । द्युमणिपराजयेन तत्प्रतमणिकृताहन्ताशान्त्यर्थं (द्युमणिसम्पादित-मण्यर्थं प्राप्तापितृविरहशान्त्यर्थं इत्यर्थः इति भाति) वैतन्नयनं ज्ञेयम् । नरकनगरं प्राग्ज्योतिषपुरम् ॥ ४ ॥

हिमाद्रौ तुङ्गशिखरे जलाग्न्यनिलदुर्गमम् ।
गिरिदुर्गं शस्त्रदुर्गैर्मुरपाशायुतैर्वृतम् ॥ ५ ॥

सत्यधर्मीया — हिमाद्रौ तत्रापि तुङ्गशिखरे गिरिदुर्गैः शस्त्रदुर्गैर्मुरपाशयुतैर्वृतमासीद्ब्राह्ये गिरिं दुर्गं तदन्तः पानीयदुर्गं मौरवं पाशदुर्गं तस्याप्यन्तः क्षुरधारोपमं तत्पाशाश्च ते षट्सहस्राः सुघोराः । अभेद्यत्वमरिभिरतार्यता च दत्तं दुर्गाणां ब्रह्मणाऽराधितेनेत्याचार्योक्तेरर्थोऽवसेयः । सुघोरा अन्ये चतुस्सहस्रपाशा इत्यर्थे महाभारततात्पर्यनिर्णयोक्तिविरोधो न । यद्वा मुरुपाशाश्च तेऽयुताः परस्परमलग्नाश्च तैः षट्सहस्रैरित्यर्थः । यथोक्तं स्थानान्तरे हरिवंशे । क्षुरान्तान् मौरवान्पाशान् षट् सहस्रान् ददर्श स इति । अत एव दुर्गस्थानरथारथनाद्गरुडारूढ इत्युक्तिरिति ज्ञेयम् । अयुतेनेति वक्तव्येऽयुतैरिति यदवोचद्ग्रन्थकृत्तेन असंलग्नता तेषां संलग्नेत्यभिप्रैति ॥ ५ ॥

सुमनोरञ्जिनी — कुत्र तन्नगरमत्राह ॥ **हिमाद्राविति** । जलेन अग्निना अनिलेन वायुना च आवरणभूतेन परितो विद्यमानेन । दुर्गमं गन्तुमशक्यम् । गिरिदुर्गैः प्राकाराकारसंस्थितैः गिरिदुर्गैः गिर्यात्मकैः दुर्गैः मुरपाशानामयुतैः वृतम् ॥ ५,६ ॥

स सम्प्राप्य भटैर्गुप्तं दानवेन्द्रपुरं महत् ।
गदया निर्बिभेदाद्रिं प्राकाराकारसंस्थितम् ॥ ६ ॥

सत्यधर्मीया — प्राकारस्याकारेण संस्थितं गिरिमद्रिं गदया निर्बिभेद । पर्वतच्छिदिकार्यनिष्पादकतया तदमित्रगोत्राणामन्तरान्तरीयाचरणं न्याय्यं तत्पक्षपातिना गदयैतत्पातोऽपि न्याय्य इत्युक्तिर्युक्ता ॥ ६ ॥

तन्निर्भिद्य प्रविश्यान्तः शस्त्रदुर्गाणि सायकैः ।
चकर्त मौरवं पाशं चक्रेणामन्दमच्छिनत् ॥ ७ ॥

सत्यधर्मीया — चकर्ताच्छिनत् । अमन्दं मौरवं पाशं चक्रेणाच्छिनत् । मुर इति मुरुरिति च नामनी ॥ ७ ॥

सुमनोरञ्जिनी — चकर्त चिच्छेद । अमन्दं बहुधा ॥ ७ ॥

क्षुरमालां तथा घोरां निचकर्तासिना हरिः ।
वायव्यास्त्रेण सलिलं वारुणास्त्रेण पावकम् ॥ ८ ॥

सत्यधर्मीया — क्षुरमालां तदावलिम् ॥ ८ ॥

सुमनोरञ्जिनी — क्षुराणां अतितीक्ष्णखड्गानां मालाम् ॥ ८ ॥

हरिर्निमिषमात्रेण नाशयामास भारत ।
शङ्खनादेन तीव्रेण मनांसि च मनस्विनाम् ॥ ९ ॥

सत्यधर्मीया — तीव्रेण कर्णनिष्ठुरेण ॥ ९ ॥

सुमनोरञ्जिनी — मनांसि नाशयामास कम्पयामास ॥ ९ ॥

पाञ्चजन्यध्वनिं श्रुत्वा युगान्ताशनिभीषणम् ।
मुरः शयान उत्तस्थौ दैत्यः पञ्चशिरा जलात् ॥ १० ॥

सत्यधर्मीया — अशानिवद्भीषणम् । पञ्चशिरांसि यस्य स मुरः । जलात्प्राक्-स्तम्भितादम्भसः ॥ १० ॥

सुमनोरञ्जिनी — युगान्ताशनिवद्भीषणम् । मुरः तन्नामको दैत्यः । पञ्च शिरांसि यस्य सः ॥ १० ॥

त्रिशूलमुद्यम्य सुदुर्निरीक्ष्यो युगान्तसूर्यानिलरोचिरुज्ज्वलः ।
ग्रसंस्त्रिलोकानिव पञ्चभिर्मुखैरभ्यद्रवत् तार्क्ष्यसुतं यथोरगः ॥ ११ ॥

सत्यधर्मीया — युगान्तः प्रलयस्तत्कालिकौ यौ सूर्यानिलौ तयो रोचिषा तत्सम-कान्त्योज्वलः । पञ्चभिर्मुखैः त्रिलोकाद्विशेषणसमासः ॥ ११ ॥

सुमनोरञ्जिनी — सु अत्यन्तं प्राणिभिः दुर्निरीक्ष्यः ईक्षितुमशक्यः । युगान्ते विद्यमानौ यौ सूर्यानलौ । तद्रोचिरिव रोचिर्यस्य । तार्क्ष्यसुतं गरुडम् ॥ ११ ॥

आविध्य शूलं तरसा गरुत्मते निरस्य वक्त्रैर्व्यनदन् स पञ्चभिः ।
खं रोदसी सर्वदिशोऽन्तरं महानापूरयन्नण्डकटाहमावृणोत् ॥ १२ ॥

सत्यधर्मीया — आविध्य भ्रामयित्वा निरस्य क्षिप्त्वा पक्षिणे गरुत्मते पञ्चभिर्मुखैर्व्यनदन्ननाद । खं रोदसी द्यावापृथिव्यौ सर्वा दिशोऽन्तरं विदिशोऽण्डकटाहं चापूर्य नादेनावृणोदाच्छादितवान् ॥ १२ ॥

सुमनोरञ्जिनी — आविध्य आतोलयित्वा भ्रामयित्वा । गरुत्मते निरस्य । खं आकाशम् । रोदसी द्यावाभूमी । सर्वासां दिशां अन्तरं मध्यम् । आपूरयन् नादेनेति शेषः ॥ १२ ॥

तमापतन्तं त्रिशिखं गरुत्मते चकर्त बाणद्वितयेन केशवः ।
मुखेषु तस्यापि शरान् समर्पयत् पुनर्गदां सोऽप्यमुचन्मधुद्विषे ॥ १३ ॥

सत्यधर्मीया — तं शूलम् । खलशूलाः पुंसि चेति लिङ्गानुशासनात्पुल्लिङ्गोऽपि शूलशब्दः । सोऽपि मरुरपि ॥ १३ ॥

(एतावत्पर्यन्तं सुमनोरञ्जिनी व्याख्या लब्धा । इत:परं न लब्धा । यावल्लब्धं तावन्मात्रं मुद्रापितम्। येषु केषु च उपरितनव्याख्या विद्यते चेत् अस्मान् प्रापयतु । पुनर्मुद्रणे मुद्रापयितुं शक्यते ।)

तामापतन्तीं गदया गदाग्रजो गदां मृधे निर्बिभिदे सहस्रधा ।
उद्यम्य बाहूनभिधावतो रिपोः शिरांसि चक्रेण जहार लीलया ॥ १४ ॥

सत्यधर्मीया — गदाग्रजो गदां गदया कौमोदक्या सहस्रधा निर्बिभेद । दिशः प्रति ॥ १४ ॥

व्यसुः पपाताम्भसि कृत्तकन्धरो निकृत्तशृङ्गोऽद्रिरिवेन्द्रतेजसा ।
पपात विष्णोः शिरसि प्रमोदिनी प्रसूनवृष्टिर्निहते मुरेऽसुरे ॥ १५ ॥

सत्यधर्मीया — इन्द्रतेजसा वज्रनिहितेन मुरेऽसुरे निहते प्रमोदिनी प्रसूनवृष्टिर्विष्णोः शिरसि पपात ॥ १५ ॥

तस्यात्मजाः सप्त पितुर्वधातुराश्चिकीर्षवस्तस्य रणे प्रतिक्रियाम् ।
ध्रुवश्चरिष्णुः श्रवणो विभावसुर्नभो वसुस्वानरुणश्च सप्तः ॥ १६ ॥

सत्यधर्मीया — प्रतिक्रियां हरिं हत्वा मृतापचितिरूपां प्रतिक्रियाम् । तन्नामान्याह ॥ **ध्रुवश्चेत्यादिना ।** ध्रुवश्चरिष्णुरित्यत्र चरिष्णुरिति वा रिष्णुरिति नाम वेति दैत्यगुरु र्विचार्यः । ताम्रोऽन्तरिक्ष इति च पठन्ति ॥ १६ ॥

रथान् समारुह्य वृषप्रयुक्तान् भौमप्रयुक्ता भवनान्निराक्रमन् ।
प्रयुञ्जतासज्य शरासनान् भटाः शक्त्यर्ष्टिशूलानमिते रुषोल्बणान् ॥ १७ ॥

सत्यधर्मीया — भवनान्निराक्रमन् बहिः । शरा अस्यन्तेऽनेनेति शरासनश्चापः । करणाधिकरणयोश्चेति ल्युट् । तान् अमिते कृष्णे आसज्य सज्यं कृत्वा शरान्प्रयुञ्जत प्रायुञ्जत ॥ १७ ॥

तच्छस्त्रकूटं भगवान् स्वमार्गणैरमोघवीर्यस्तिलशश्चकर्त ।
तान् योद्धुमिच्छूननयद् यमक्षयं निकृत्तशीर्षोरुभुजाङ्घ्रिकार्मुकान् ॥ १८ ॥

सत्यधर्मीया — तच्छस्त्रकूटं तच्छत्रुमुक्तं शस्त्रसमूहं तिलशो मार्गणैश्चकर्त । निकृत्तत-शीर्षोरुभुजाङ्घ्रिकार्मुकांस्तान् सप्त । यमक्षयं यमगृहमनयत् ॥ १८ ॥

ततो द्रुततरं गत्वा भटा राजपुरं महत् ।
हतान् मुरसुतान् सर्वान् नरकाय न्यवेदयन् ॥ १९ ॥

सत्यधर्मीया — भटा मृतोर्वरिताः सर्वान् सप्तापि ॥ १९ ॥

स्वानीकपानच्युतचक्रसायकैर्हतान् निशम्याशु चुकोप भूमिजः ।
निरीक्ष्य दुर्मर्षण आस्रवन्मदैर्गजैः पयोब्धिप्रभवैर्निराक्रमत् ॥ २० ॥

सत्यधर्मीया — दुर्मर्षणः सहनहीन आस्रवन्तो मदा येभ्यस्तैः । पयोब्धिः क्षीरसमुद्रस्तस्मात् प्रभवन्तीति ते तथा तैः सह निराक्रमत् ॥ २० ॥

रथैरनेकसाहस्रैर्गजैश्च बहुभिर्वृतः ।
महत्या सेनया युक्तश्चायादायोधनं बली ॥ २१ ॥

सत्यधर्मीया — सहस्रमपि साहस्रम् । लक्ष्मिर्लक्ष्मी हरेः प्रियेति द्विरूपकोशः । अनेकसाहस्त्रैरायोधनं समरस्थलमायात् । न उत्तरवदुत्तरत्र भावीत्याह ॥ **बलीति** ॥ २१ ॥

दृष्ट्वा सभार्यं गरुडोपरिस्थितं सूर्योपरिष्टात् सतडिद्घनं यथा ।
गृहीतकोदण्डमुदारशङ्खकौमोदकीचक्रधरं चतुर्भुजम् ॥ २२ ॥

सत्यधर्मीया — गरुडोपरि स्थितं सभार्यं । सूर्यस्योपरिष्टात्तदुपरि विद्यमानतटिता सहितं घनं मेघमिव गरुडसमः सूर्यः । तटित्समा सत्यभामा । घनसमः श्रीघन इति तदेतदानुरूप्यं ज्ञेयम् । उदारेति शङ्खादिचक्रान्तविशेषणम् ॥ २२ ॥

नीलजीमूतसङ्काशं दृष्ट्वा तं गजवाहनम् ।
शङ्खमाध्माय गोविन्दः सिंहनादं व्यनीनदत् ॥ २३ ॥

सत्यधर्मीया — गजः सुप्रतीकः व्यनीनदच्चकार ॥ २३ ॥

वरुथिनी दैत्यपतेः सुघोरान् शरान् ववर्षाच्युतमूर्ध्नि दुर्जया ।
कृष्णे स भौमो व्यसृजच्छतघ्नीं लोहायसीं तेन भृशं स विव्यथे ॥ २४ ॥

सत्यधर्मीया — दुर्जया वरूथिनी सेना । लोहमयीं किञ्चित्स्थलेऽयोमयीं शतघ्नीं तन्नाम्नीं शक्तिं तेन तत्क्षेपणेन विव्यथे ताडितोऽभूत् व्यथित इवाभवत् ।

"आश्वस्तोऽथ हृषीकेशः सञ्ज्ञां प्राप्य च केशवः ।
धनुस्तस्यै ततो दत्वा शार्ङ्गभारसंहरणे ।
युद्ध्यस्व नरकं देवि श्रान्तोऽस्मि युधि पीडितः ।
तदा युद्धं समारेभे नरकेण दुरात्मना"

इत्यारभ्य

"शक्तिर्भगवतो देवि वासुदेवस्य पश्यतः ।
ततः प्रीतोऽथ तां वीक्ष्य परिष्वज्य महाविभुः ।
श्रमाम्भश्चापि तस्यास्तु परिमृज्याथ केशवः ।

कण्ठस्याभरणं तस्यै ददौ प्रीतमना हरिः ।
न दृत्तमथ रुग्मिण्यै दत्तं तस्यै महात्मना ।
महार्ध्यं लोकविख्यातं हृतं बलिमखे तदा''

इत्यन्तेन ग्रन्थेन हरिवंशोक्तां सूचयामास व्यासो विव्यथ इत्यनेनानुसन्धेयम् । इत्येव कृष्णो दर्शयन् श्रान्तवत्स्वम् । तदा दृप्तं नरकं वीक्ष्य देवी सत्याददे कार्मुकं शार्ङ्ग सञ्ज्ञम् । चकार तं यतमानं च भौमं निरायुधं विरथं च क्षणेनेत्याचार्योक्तेश्च ॥ २४ ॥

अनेकबाणान् निर्मुक्तान् नरकेण स्मयन्निव ।
चकर्त बाणैर्युगपत् तदद्भुतमिवाभवत् ॥ २५ ॥

सत्यधर्मीया — अनेकबाणानेकदा ॥ २५ ॥

ततोऽनु सैन्यं भगवान् गदाग्रजो विचित्रपत्रैर्निशितैः शरौघैः ।
निकृत्तबाहूरुशिरोङ्घ्रिविग्रहं चकार तूर्णं नृप साश्वकुञ्जरम् ॥ २६ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे त्रिषष्ठिरध्यायः ॥

सत्यधर्मीया — विचित्रपत्रैः शरौघैः । विग्रहः शरीरम् । हे नृप परीक्षित् । तत्तदवान्तर-नरपाश्च साश्वाः कुञ्जराश्च यस्मिंस्तदिति वा ॥ २६ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
दशमस्कन्ध उत्तरार्धे त्रिषष्ठिरध्यायः ॥ १०-६३ ॥

॥ अथ चतुःषष्ठिरध्यायः ॥

श्रीशुक उवाच —

यानि योधैः प्रयुक्तानि शस्त्रास्त्राणि कुरूद्वह ।
अच्छिनत् केशवस्तीक्ष्णैः शरैरेकैकशस्त्रिभिः ॥ १ ॥

सत्यधर्मीया — एकैकश एकमेकं त्रिभिस्त्रिभिः शरैः ॥ १ ॥

उह्यमानः सुपर्णेन पक्षाभ्यां निघ्नतान् गजान् ।
गरुत्मता हन्यमानास्तुण्डपक्षनखैर्गजाः ॥ २ ॥

सत्यधर्मीया — गजान्पक्षाभ्यां निघ्नता सुपर्णेनोह्यमानः गरुत्मता गतम् ॥ २ ॥

तुरङ्गमाश्च दुर्द्धर्षाः पेतुरुर्व्यां गतासवः ।
दृष्ट्वा विद्रावितं सैन्यं गरुडेनार्दितं स्वकम् ॥ ३ ॥

सत्यधर्मीया — तुरङ्गमास्तुरगाः । तुरगोऽपि तुरङ्गश्च तुरङ्गम इतीष्यत इति त्रिरूप-कोशः । गतासवा निष्प्राणाः ॥ ३ ॥

तं भौमः प्राहरच्छत्त्या वज्रेणेव हरिर्गिरिम् ।
तयाऽतिविद्धो गरुडो मालाविद्ध इव द्विपः ॥ ४ ॥

सत्यधर्मीया — हरिरिन्द्रः तया शत्त्या । अतिविद्धो नरकादि दृष्ट्वा (?) मालाहतो द्विपो हस्तीव ॥ ४ ॥

न किञ्चिदपि राजेन्द्र चचाल नरकाहवे ।
ततः कार्मुकमादाय नरकः शरसञ्चयान् ॥ ५ ॥

सत्यधर्मीया — किञ्चिदीषदपि न चचाल ततः शक्तिमुक्त्यनन्तरम् ॥ ५ ॥

मुमोच कृष्णे तान् सर्वानच्छिनत् केशवः शरैः ।
ततोऽर्धचन्द्रं नरकं सुसंधाय शरासने ॥ ६ ॥

आक्रष्टुकामं विज्ञाय तच्चापं केशवोऽच्छिनत् ।
ततः कालायसमयीं गदां गुर्वीं धरासुतः ॥ ७ ॥

सत्यधर्मीया — अर्धचन्द्रम् शरम् । शरासने सन्धायाक्रष्टुकामं नरकं विज्ञाय । तच्चापं सन्धितार्धचन्द्रधनुः केशवोऽच्छिनत् । कालायसमयीं कृष्णायोविकृताम् ॥ ६,७ ॥

आददे तां क्षुरप्रेण चकर्त मधुसूदनः ।
ततो निशातं परशुं भौमः परबलार्दनः ॥ ८ ॥

सत्यधर्मीया — मधुसूदनस्तां क्षुरप्रेण चकर्त निशातमुत्तेजितं परशुं भौमः प्राहिणोत् ॥ ८ ॥

प्राहिणोद् विष्णवे तं च चिच्छेद श्रीधरोऽसिना ।
ततः कृष्णाय चिक्षेप तोमरान् पञ्चसप्तति ॥ ९ ॥

सत्यधर्मीया — तं चासिना श्रीधरश्चिच्छेद पञ्चसप्तति तोमरान् चिक्षेप ॥ ९ ॥

चकार सिंहनादं च नरकः परवीरहा ।
तांस्तोमरान् कुरुश्रेष्ठ शरेणैकेन केशवः
चिच्छेद यौगपद्येन तदद्भुतमिवाभवत् ॥ १० ॥

सत्यधर्मीया — एकेन तत्रापि यौगपद्येनेति तदद्भुतमिवाभवत् । नेदं देवस्याद्भुतमिति सूचयतीवेन ॥ १० ॥

शूलं भौमोऽच्युतं हन्तुमाददे वितथोद्यमः ।
तद्विसर्गात् पूर्वमेव नरकस्य शिरो हरिः ।
अपाहरद् गजस्थस्य चक्रेण क्षुरनेमिना ॥ ११ ॥

सत्यधर्मीया — वितथोद्यमो व्यर्थोद्यमो विगतं तथा सत्यं यस्मात्स वितथ उद्यमो यस्य सः । मिथ्या मृषा च वितथ इत्यमरोक्तेरयं वाच्यलिङ्गः शब्दः । तद्विसर्गाच्छूलोत्सर्जनात् । क्षुरवद्विद्यमाननेमिवता चक्रेण गजस्थस्य शिरोऽपाहरत् ॥ ११ ॥

सकुण्डलं चारुकिरीटभूषितं बभौ पृथिव्यां पतितं समुज्ज्वलत् ।
हाहेति साध्वित्यृषयः सुरेश्वरा माल्यैर्मुकुन्दं विकिरन्त ईडिरे ॥ १२ ॥

सत्यधर्मीया — पृथिव्यां पतितमुज्वलत्प्राक् । इदानीं सद्यः पतितत्वात्तत्रापि मातरि एव पातात् बभौ इति उचितं भानम् । हाहेति नारका अवदन्निति शेषः । यद्वा हाहेति किं हससीत्याभाणकमूलमिदं सत्साध्विति हाहेति ऋषयः सुरेश्वरा इत्यनेनान्वेति । मुकुन्दं माल्यैः पुष्पैर्विकिरन्तस्तडिरेऽस्तुवन् ॥ १२ ॥

हत्वा हरिर्नरकं दैत्यवर्यं मरुद्गणैः सहितो लोकपालैः ।
समाहूतः पौरमुख्यैः सभार्यः प्राग्ज्योतिषं प्राविशद् द्रष्टुकामः ॥ १३ ॥

सत्यधर्मीया — हरिर्नरकं हत्वा आश्वयुजचतुर्दश्यां पौरमुख्यैः समाहूतो द्रष्टुकामः प्राग्ज्योतिषं प्राविशत् ॥ १३ ॥

तत्रापश्यद् यदुश्रेष्ठो विचित्रं मणिपर्वतम् ।
छत्रं च वारुणं हृद्यं सलिलस्राविं भारत ॥ १४ ॥

सत्यधर्मीया — मणिपर्वतं सुरगिरित उत्कृत्य नीतम् सलिलस्रावि सदा वरुणसम्बन्धि छत्रं चापश्यत् ॥ १४ ॥

शक्राय प्राहिणोद् भूयः केशवो मणिपर्वतम् ।
वरुणाय तथा च्छत्रं प्राहिणोद् दैत्यकिङ्करैः ॥ १५ ॥

सत्यधर्मीया — शक्राय मणिपर्वतं वरुणाय छत्रं च दैत्यकिङ्करैः प्राहिणोत् । त्रिविष्टपपर्यन्तं गरुडोपर्यारोप्य नीत्वेन्द्राय दत्वा दैत्यकिङ्करैः प्राहिणोद्वरुणायेत्यर्थः । यथोक्तम् । समन्ततो योजनानां शते द्वे प्रवृद्धमिन्द्रस्य सरत्नपर्वतम् । नित्यामृतस्रावि जलेश्वरस्य छत्रं च दोर्भ्यां गरुडे न्यधाद्धरिरित्याचार्यैः । तांस्तान्पदार्थास्तत्र तत्र प्रेषयामास । अनेन निस्पृहता ध्वनिता ॥ १५ ॥

तान् विसृज्य हरिर्देवान् स्वयमेव जगत्पतिः ।
प्राविशद् भौमसदनं पुरन्दरपुरोपमम् ॥ १६ ॥

सत्यधर्मीया — तान्देवान्विसृज्य राजाऽन्तःपुरम् इतरैर्नागन्तव्यमित्यमरपरित्यागः ॥ १६ ॥

ततो धरा कृष्णमुपेत्य कुण्डले प्रतप्तजाम्बूनदरत्नभास्वरे ।
पौत्रं च वीरं भगदत्तसञ्ज्ञितं निवेद्य मालामपि वैजयन्तीम् ॥ १७ ॥

सत्यधर्मीया — ततोऽन्तरागमनानन्तरं धरा कृष्णमुपेत्य सङ्गम्य प्रतप्तं जाम्बूनदं निष्ठापितमष्टापदं तदात्मके च ते रत्नैर्भास्वरे चेति ते । अदितिकुण्डले भगदत्तसञ्ज्ञितं पौत्रं च तथा वैजयन्तीं मालां च निवेद्य अर्पयित्वा ॥ १७ ॥

अस्तौषीदथ विश्वेशं देवी देववरार्चितम् ।
प्राञ्जलिः प्रणता राजन् भक्तिप्रवणया धिया ॥ १८ ॥

सत्यधर्मीया — देववरार्चितं देवी प्राञ्जलिः प्रणता सती भक्तिप्रवणया भक्त्या सदाऽवक्रया धियाऽस्तौषीत् ॥ १८ ॥

पृथिव्युवाच —

नमस्ते देवदेवेश शङ्खचक्रगदाधर ।
भक्तेच्छोपात्तरूपाय परमात्मन् नमोऽस्तु ते ॥ १९ ॥

सत्यधर्मीया — हे देवदेवेश देवदेवानां ब्रह्मादीनामीश शङ्खचक्रगदाधर भक्तानामिच्छया तत्संरक्षणेच्छयोपात्तं रूपं देहो येन तस्मै ते नमो नमः ॥ १९ ॥

नमः पङ्कजनाभाय नमः पङ्कजमालिने ।
नमः पङ्कजनेत्राय नमस्ते पङ्कजाङ्घ्रये ॥ २० ॥

सत्यधर्मीया — पङ्कजमालाऽस्यास्तीति तस्मै । शिखादिः ॥ २० ॥

नमो भगवते तुभ्यं वासुदेवाय विष्णवे ।
पुरुषायादिबीजाय पूर्णबोधाय ते नमः ॥ २१ ॥

सत्यधर्मीया — आदित्वेनेतरमतानां बीजं तस्मै पूर्णबोधाय ज्ञानात्मने ॥ २१ ॥

अजाय जनयित्रेऽस्य ब्रह्मणेऽनन्तशक्तये ।
चराचरात्मन् लोकेश परमात्मन् नमोऽस्तु ते ॥ २२ ॥

सत्यधर्मीया — अस्य जगतो जनयित्रे जनकाय । तेन न किञ्चित्प्रयोजनमिति तृना द्योत्यते । स्वस्य जनकोऽस्ति चेन्न । निरवधिकजगज्जनकता तस्येत्यत ॥ **उक्तमजायेति** । ब्रह्मणे गुणपूर्णायानन्तशक्तयेऽपरिमितसामर्थ्यायाप्रतिबद्धशक्तये वा । अनन्तमक्षरतत्त्वं रमा शक्तिर्भार्या यस्य सः । शक्यत्वाच्छक्तयो भार्या इत्युक्तेः । चराचरात्मन् । तदन्तर्गत परमात्मन् विशिष्टचेतन लोकेश लोकनायक । अनेकश्रुतिप्रतीकत्वान्नासङ्गतिरियं पुनरुक्तिरर्थतोऽपि न दोषायेति ज्ञेयम् ॥ २२ ॥

त्वं वै सिसृक्षू रज उत्कटं प्रभो तमो निरोधाय बिभर्षि संवृतम् ।
स्थानाय सत्वं जगतो जगत्प्रभो कालः प्रधानः पुरुषोऽस्यपारः ॥ २३ ॥

सत्यधर्मीया — यदा त्वं सिसृक्षुः सर्जनेच्छावांस्तदोत्कटं कार्याभिमुखं रजो बिभर्षि । निरोधाय नाशं कर्तुमिच्छसि तदा संवृतं ज्ञानद्यावरकं तमोगुणमुत्कटं बिभर्षि । तथा स्थानाय पालनार्थमुत्कटं सत्त्वं बिभर्षि । उत्कटप्रभो इति पाठे हे उत्कटोत्कृष्ट प्रभो स्वामिन्नित्यर्थः । अपारोऽपरिच्छिन्नोऽस्य जगतः पारः पारयितेति वा । गुणवानपि नागुणवांल्लोकवदित्याह ॥ **अपार इति** । अपगता अरा दोषा यस्मात्स इति वा । पुनर्जगत्प्रभो इति वदन्ती धरा वराहाभिन्नत्वेन जगत्प्राणः समीरण इत्यमरैकव्याकृतिमाश्रित्य मत्प्राणनाथेति समबोधयदिति बोध्यम् ॥ २३ ॥

अहं पयो ज्योतिरथोऽनिलो नभो मात्राणि देवा मन इन्द्रियाणि ।
कर्ताऽभिमानीत्यखिलं तु कारणं त्वय्यद्वितीये भगवन्नयं भ्रमः ॥ २४ ॥

सत्यधर्मीया — अहं मही पय आपो ज्योतिरग्निरनिलो वायुर्नभो गगनं मात्रा गन्धाद्या देवा इन्द्रियाभिमानिनो मनः । मन एव मनुष्याणामित्युक्तेरिन्द्रियेभ्यः पृथक्कृत्योक्तम् । इन्द्रियाणीतराणि कर्ताऽहङ्काराभिमानी हरोऽभिमानी महत्तत्त्वाभिमानी ब्रह्मेत्यखिलं

इति यत्कारणं तत्सर्वमद्वितीयेऽसदृशे त्वदाधारतया वर्तते । यदा कदाचिद्यस्य कस्यचिद्य-त्किञ्चिदधीनं भवति न तथेत्याह । भगवन् अयं भ्रमो जगच्चक्रपरिवर्तनं त्वय्येवेति । सदा त्वदधीन एवायमिति भावः । एवं सति यच्चाहं कर्तेत्याभिमानी अभिमानवान्सोऽयं भ्रमोऽन्यथामतिरित्यर्थः ॥ २४ ॥

तस्यात्मजोऽयं तव पादपङ्कजं भीतः प्रपन्नार्तिहरं प्रसादितुम् ।
तत्पालयैनं कुरु हस्तपङ्कजं शिरस्यमुष्याखिलकल्मषापहम् ॥ २५ ॥

सत्यधर्मीया — एतावत्स्तवनेनावनि किं फलितमभिलपेत्यतो लपति ॥ **तस्येति** । तस्य त्वन्मारितस्य मम कुमारस्यायमात्मजो भीतस्तातघातात् । प्रपन्नार्तिहरं तव पादपङ्कज-मुपसादितः प्राप्तो यतस्ततोऽखिलकल्मषापहं तव हस्तपङ्कजममुष्य शिरसि कुर्वेनं पालय च ॥ २५ ॥

श्रीशुक उवाच —

इति भूम्याऽर्चितो वाग्भिर्भगवान् भक्तिनम्रया ।
प्रसन्नः प्रददौ तस्मै भगदत्ताय चाभयम् ॥ २६ ॥

सत्यधर्मीया — वाग्भिर्भूम्याऽर्चितस्तस्मै तदुपदिष्टाय भगदत्ताय प्रसन्नः सन्नभयं प्रददौ ॥ २६ ॥

राज्ये नियोज्य तं वंश्ये तदमात्यांश्च तत्पदे ।
भौमावरोधकान्तानां श्रेणीः स प्राविशद्धरिः ॥ २७ ॥

सत्यधर्मीया — वंश्ये वंशपरम्परायाते राज्ये तं भगदत्तं नियोज्य तत्पदे तत्तत्पदे अमात्यांश्च नियोज्यानन्तरं भौमेन नरकेणोपरुद्धानां कान्तानां योषितां श्रेणीः पङ्क्तीः प्राविशत् ॥ २७ ॥

तत्र राजन्यकन्यानां षट्सहस्राधिकायुतम् ।
भौमाहृतानां विक्रम्य राजभ्यो ददृशे हरिः ॥ २८ ॥

सत्यधर्मीया — षट्सहस्रैरधिकं यद्युतं दशसहस्रं तच्छोडशसहस्रमित्यर्थः । षट्सहस्रैस्तथाऽधिकेन शतेन च सहितं यद्युतं तद्ददृश इत्यर्थः । यथोक्तं पराशरेण । कन्यापुरे स कन्यानां षोडशातुलविक्रमः । शताधिकानि ददृशे सहस्राणि महामुन इति । आचार्यवर्याश्च । व्यष्टौ सहस्राणि शतं च रूपशीलोदारा अक्षताः सद्व्रतस्था इत्युक्तवन्तः । विक्रम्य विक्रमं कृत्वा राजभ्यो राजसिद्धादिभ्यो राजतयाऽवतीर्णसिद्धादिभ्यो वा । यथोक्तं पराशरेण च –

'देवसिद्धासुरादीनां नृपाणां च जनार्दन ।
हत्वा हि सोऽसुरः कन्या रुरोध निजमन्दिरे' इति ।

भौमाहृतानां देवगन्धर्वकन्यास्तासां प्रधाना त्वष्टृपुत्री कशेरुरित्युक्तेस्तासां स्वरूपं ज्ञेयम् ॥ २८ ॥

तं प्रविष्टं स्त्रियो वीक्ष्य ताः सर्वा नवयौवनाः ।
स्वलङ्कृता विचित्राङ्ग्यो नरवर्य विमोहिताः ॥ २९ ॥

सत्यधर्मीया — नवयौवना इति विवृतमाचार्यैरक्षता इति । स्वलङ्कृता विचित्राङ्ग्यः स्वलङ्कृता इव विचित्राङ्ग्यः इति योजनीयम् । तथा हि हरिवंशे । एकवेणीधरास्त्रियः । सर्वाः काषायवासिन्यः सर्वाश्च नियतेन्द्रिया इति स्वभावशोभानुपमेति भावः । नरवर्य हे राजन् । विमोहिता इत्युत्तरेणान्वेति । नरवर्येण कृष्णेन विमोहिता इति वा ॥ २९ ॥

मनसा वव्रिरेऽभीष्टं पतिं दैवोपपादितम् ।
भूयात् पतिरयं मह्यं धाता तदनुमोदताम् ॥ ३० ॥

सत्यधर्मीया — दैवोपपादितमदृष्टनियामकश्रीहरिघटितमभीष्टं पतिं वव्रिरे । धाता विधिः । तद्भर्तृभवनम् ॥ ३० ॥

इति सर्वेश्वरे कृष्णे ता नार्यो हृदयं दधुः ।
ताः प्राहिणोद् द्वारवतीं सुमृष्टरुचिराम्बराः ॥ ३१ ॥

सत्यधर्मीया — इति सर्वेश्वरे कृष्णे । एवं प्रकारेण ता मनो दधुः । सुमृष्टं शुद्धं रुचिरमम्बरं यासां ताः । इदानीं दानवारिनारिभ्योऽम्बराण्याभरणं च दत्वा प्राहिणोदिति रुचिराम्बरत्वादिकं तासाम् ॥ ३१ ॥

खरैरुष्ट्रैर्महाकोशान् रथांश्च द्रविणं महत् ।
ऐरावतकुलेभांश्च चतुर्दन्तान् मदोत्कटान् ॥ ३२ ॥

सत्यधर्मीया — महाकोशान् द्रविणमुपविद्यमानं । ऐरावतकुलजगजान् चत्वारो दन्ता येषां ते तान् ॥ ३२ ॥

भगदत्ताय दत्वैकं सुप्रतीकं ततोऽपरान् ।
पाण्डुरांश्च चतुःषष्टिं प्रेषयामास केशवः ॥ ३३ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे चतुःषष्ठिरध्यायः ॥

सत्यधर्मीया — तदर्थं कुबेरो भगदत्तोऽभवत्तस्मै न भगवद्दत्तः स इति नेत्याह । भगदत्तायैकं सुप्रतीकं तन्नामानं नागं दत्वा । अपरान्पाण्डुरांश्च चतुःषष्टिं केशवः प्रेषयामासेति ॥ ३३ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे चतुःषष्ठिरध्यायः ॥ १०-६४ ॥

॥ अथ पञ्चषष्टिरध्यायः ॥

श्रीशुक उवाच —

हत्वा नरकमत्युग्रं दानवं दानवान्तकः ।
आरुह्य गरुडं प्रायात् प्राग्ज्योतिषपुरान्नृप ॥ १ ॥

सत्यधर्मीया — दानवान्तकोऽत्युग्रं नरकं हत्वैवं कृत्वाऽऽगत इत्याह ॥ **नरकमिति** । नरकमत्युग्रं हत्वा प्रापयित्वा तमआदिकम् । हन हिंसागत्योरिति स्मरणात् । अन्तर्णीत-ण्यर्थश्च ॥ १ ॥

स गच्छन् गगने विष्णुर्वन्दितुं देवमातरम् ।
जगाम त्रिदशावासं सहितः सत्यभामया ॥ २ ॥

सत्यधर्मीया — देवमातरमदितिं सहितो युक्तो भाविकुण्डलमण्डलनहितसमेत इति च ॥

स्वर्गद्वारं गतो विष्णुर्दध्मौ शङ्खं महास्वनम् ।
उपाजग्मुस्तदाकर्ण्य सार्घ्यपाद्या दिवौकसः ॥ ३ ॥

सत्यधर्मीया — सार्घ्यपाद्याः पादार्घ्याभ्यां चेति यत् । दिवौकसो दिवोकस इति द्वावपि शब्दावद्वन्द्वार्थावुपपादितं च प्राक् ॥ ३ ॥

पूजितस्तैः सुरैः कृष्णो भक्तिनम्रैर्गतज्वरैः ।
सुरेन्द्रभवनं दिव्यं प्रविवेश मनोरमम् ॥ ४ ॥

सत्यधर्मीया — हत्वा नरकमत्युग्रं दानवं दानवान्तकः । आरुह्य गरुडं प्रायात् प्राग्ज्योतिषपुरागतः । ज्वरो नरकासुररूप उपतापो येषां तैस्तत्कृत इति वा । दिव्यं तल्लोकम् ॥ ४ ॥

तत्र शक्रः समं शच्या पूजयामास केशवम् ।
रत्नैराभरणैर्दिव्यैर्गन्धमाल्यैश्च शोभनैः ॥ ५ ॥

सत्यधर्मीया — दिव्यैरिति सर्वान्वयि ॥ ५ ॥

ततः प्रायात् पुरीं मातुरदित्याः सह भार्यया ।
दृष्ट्वोपतस्थे तं देवी पुत्रमायान्तमच्युतम् ॥६॥

सत्यधर्मीया — पुरीममरावतीगतभवनविशेषाम् । तं पुत्रमायान्तं दृष्ट्वा । उपतस्थे गतम् ॥ ६ ॥

ववन्दे तां हरिस्तं सा पूजयामास भामिनी ।
आशीर्भिः परमप्रीता चिरदृष्टं यदूत्तमम् ॥ ७ ॥

सत्यधर्मीया — तां मातरमाशीर्भिः पूजयामास ॥ ७ ॥

सत्यभामाऽपि कौरव्य श्वश्र्वाः कृष्णेन चोदिता ।
पादयोः कुण्डले तस्या निधाय प्रणनाम वै ॥ ८ ॥

सत्यधर्मीया — श्वश्र्वाः पत्युर्मातुः कुण्डले नरकं हत्वा नीते ॥ ८ ॥

स्नुषामाश्लिष्य सन्तुष्टा सा पुनर्लब्धकुण्डला ।
आनन्दबाष्पप्रचुरा प्राहेदं कश्यपप्रिया ॥ ९ ॥

सत्यधर्मीया — कश्यपप्रिया तद्भार्या ॥ ९ ॥

न ते जरा न वैरूप्यं कान्तेन सह विप्रियम् ।
भूयात् कल्याणि सुव्यक्तं मत्प्रसादात् कदाचन ॥ १० ॥

सत्यधर्मीया — विप्रियम् । अव्ययं विभक्तीत्यर्थाभाव्येऽव्ययं विरोध इति यावत् । सुव्यक्तं यथा भवति तथा । मत्प्रसादं प्राप्य स्थितायास्त इत्यन्वयः ॥ १० ॥

ततोऽनुज्ञाप्य तां देवीं त्रिदशानपि केशवः ।
आरुह्य प्रययौ तार्क्ष्यं सहितः सत्यभामया ॥ ११ ॥

सत्यधर्मीया — देवीमदितिम् ॥ ११ ॥

महात्मना गगने देवदेव्यौ गरुत्मता नीयमाने विचित्रम् ।
अपश्यतां नन्दनं चारगुप्तं शचीभर्तुर्दयितं हृद्यगन्धम् ॥ १२ ॥

सत्यधर्मीया — देवदेव्यौ । नैकशेषः परवल्लिङ्गता च । नीयमाने ऊह्यमाने सत्यामनोऽनुसारिणी हरिप्रवृत्तिरिति द्योतयितुमेवं निर्दिदेशेति ज्ञेयम् । चाराः इन्द्रभटाः । चार्विति पाठे वनविशेषणम् । गुप्तं दूतैरिति शेषः ॥ १२ ॥

वनं दृष्ट्वा दिव्यगन्धं सुपुष्पं कृष्णं सत्या प्राह पाणौ गृहीत्वा ।
प्रविश्यास्मिन् साधुचित्तं विहर्तुं मुहूर्तं मे कामयते केशवेति ॥ १३ ॥

सत्यधर्मीया — पाणौ गृहीत्वा गतम् । मुहूर्तं मे चित्तं विहर्तुं कामयते । कामय इति पाठे चित्रमिति । मुहूर्तमित्यत्यन्तसंयोगे द्वितीया ॥ १३ ॥

अथावरुह्य गरुडात् तस्या वचनगौरवात् ।
प्रविवेश वनं कृष्णः पालितं शक्रकिङ्करैः ॥ १४ ॥

सत्यधर्मीया — तस्याः सत्यभामाया वचनगौरवात्तद्गुरुत्वात् । आन्तरङ्गिको भावस्तु तस्या यद्वचनं दातास्म्यहं पारिजातं तरुं त इति स्ववचनं तद्गौरवादिति ॥ १४ ॥

तत्रापश्यत् तरून् दिव्यान् मत्तसारङ्गनादितान् ।
फलभारनतान् भूरिप्रसूनरजसाऽऽवृतान् ॥ १५ ॥

सत्यधर्मीया — सारङ्गा भ्रमराः । रजसा परागेण ॥ १५ ॥

चलत्किसलयोपेतान् विहङ्गध्वनिशोभितान् ।
विचरन्ती तथा तत्र पारिजातं महाद्रुमम् ॥ १६ ॥

सत्यधर्मीया — चलद्भिः किसलयैरुपेतान् । तत्र नन्दने तथा यथा मनस्तथा ॥ १६ ॥

दृष्ट्वा पप्रच्छ गोविन्दं विस्मयाकुललोचना ।
किन्नामाऽयं तरुर्देव विचित्रो भुवनत्रये ॥ १७ ॥

सत्यधर्मीया — विस्मयेनाकुले लोचने यस्याः सा । नाम्ना को विचित्रो विशिष्टश्चित्रादिति विचित्रः । चित्रं स्यादद्भुतालेख्यतिलकेषु विहायसीति विश्वः । द्युलोके श्रेष्ठ इत्यर्थः ॥ १७ ॥

सत्यमेतस्य वृक्षस्य कृतार्थाः फलभागिनः ।
प्रवालमूलो विपुलो जातरूपमहातनुः ॥ १८ ॥

सत्यधर्मीया — एतस्य वृक्षस्य । फलभागिनः कृतार्था इति नोपचरितमितीरयति ॥ **सत्यमिति** । प्रवाला विद्रुमास्तदात्मकं मूलं वा मूलो यस्य सः । विपुलो विशालो जातरूपमयी महती तनुर्यस्य सः ॥ १८ ॥

इन्द्रनीलच्छदच्छन्नो लसद्वैडूर्यवेदिकः ।
माणिक्यपुष्पो विविधमुक्ताफलफलान्वितः ॥ १९ ॥

सत्यधर्मीया — इन्द्रनीलमहच्छदाः पत्राणि तैश्छन्नः । च्छदः पालाश इति विश्वः । लसन्ती वैडूर्यमयी वेदिका यस्य । माणिक्यान्येव पुष्पाणि यस्य सः । मुक्ताफलानि मुक्ता एव फलानि तैरन्वितः ॥ १९ ॥

गोमेदपक्वप्रकरो वज्रकिञ्जल्करञ्जितः ।
स्फुरन्मरकतस्थूलशाखाशतविराजितः ॥ २० ॥

सत्यधर्मीया — गोमेदात्मा पक्वः । पचो व इति वः । स्वयं पातात्पक्वता । प्रकरो विकीर्णः कुसुमादिर्यस्य सः । प्रकरश्चोपकारे स्याद्विकीर्णकुसुमादिष्विति विश्वः । वज्रा एव किञ्जल्कास्तैरञ्जितः । स्फुरन्मरकतात्मिकाः स्थूलाः शाखास्तासां शतेन विराजितः ॥२०॥

तरुरेष जगन्नाथ मनो मे हरते भृशम् ।
नेतव्योऽयं पुरीं वृक्षो यद्यहं ते प्रिया प्रभो ॥ २१ ॥

सत्यधर्मीया — हे जगन्नाथ । एष तरुर्मे मनो भृशं हरते । आदरातिशयात्पुनर्वृक्ष इत्युक्तिः । यदि तेऽहं प्रिया तर्हि नेतव्यः । पुरीं द्वारावतीम् ॥ २१ ॥

छायायामुपविष्टां मामन्यपत्न्यस्तवानघ ।
दृष्ट्वा मंस्यन्ति दयितां सर्वाभ्यो मां तवाच्युत ॥ २२ ॥

सत्यधर्मीया — अन्याश्च ताः पत्न्यश्च ताः । हे अच्युत । सर्वाभ्यो मां दयितां मंस्यन्तीति जानते ॥ २२ ॥

इत्युक्तो देवकीपुत्रः सत्यया प्रियकान्तया ।
प्राह नायं तरुर्भद्रे नेतव्यो नन्दनाद् वनात् ॥ २३ ॥

सत्यधर्मीया — प्रिया च सा कान्ता च तया । नन्दनाद्वनात् । हे भद्रे । न नेतव्यः ॥ २३ ॥

पुरा क्षीराम्बुधेर्जातो मथ्यमानात् सुरासुरैः ।
शक्राय दत्तः सकलैस्तदा तत्फलभोक्तृभिः ॥ २४ ॥

सत्यधर्मीया — तज्जन्मोक्त्वा तन्मनः प्रसादयितुं यतते ॥ **पुरेति** । सुरासुरैर्मथ्यमानात् क्षीराम्बुधेर्जातस्तदा तत्फलं समुद्रजातं भोक्तृभिर्देवैः स्वं स्वं गृहीत्वाऽयमिन्द्राय दत्त इति भावः ॥ २४ ॥

तन्नाहार्यमनादृत्य मया मित्रं शतक्रतुम् ।
तरुरत्नं सरोजाक्षि धर्ममेवानुतिष्ठता ॥ २५ ॥

सत्यधर्मीया — मित्रं शक्रमनादृत्य मया नाहार्यम् । तदनाहरणे हेतुमाह ॥ **धर्ममेवानुतिष्ठितेति** ॥ २५ ॥

नीयमाने च वृक्षेऽस्मिन् पारिजाते शुचिस्मिते ।
सङ्ग्रामो जायते घोरस्त्रिदशैर्जयकाङ्क्षिभिः ॥ २६ ॥

सत्यधर्मीया — हे शुचिस्मिते । पारिजाते वृक्षे नीयमाने जयकाङ्क्षिभिर्जयापेक्षा-वद्भिस्त्रिदशैः सङ्ग्रामो जायते ॥ २६ ॥

इत्युक्तो देवदेवेन सत्यभामा पुनर्हरिम् ।
प्राह भीषयसे किं मां व्यलीकैः कंसमर्दन ॥ २७ ॥

सत्यधर्मीया — देवदेवेन इत्युक्ता सत्यभामा । हे कंसमर्दन व्यलीकैरनृतैः किं मां भीषयस इति प्राह । अलीकं त्वप्रियेऽनृत इति विश्वः । कंसमर्दनेत्यनेन समर्थतां वचोऽलीकतामूलं ध्वनयति ॥ २७ ॥

नाभ्यनन्दद् दुराचारा शची मां गृहमागताम् ।
हेतुर्हि वृक्षस्तस्यायं भर्तृपौरुषगर्विता ॥ २८ ॥

सत्यधर्मीया — नलिननयन नयने तरोः कारणं किमित्यतः कथयति ॥ **नेति** । दुराचारा शची मां गृहमागतां नाभ्यनन्दन्न चाभिनन्दितवती न च सच्चकारेति इति यावत् । तत्र निमित्तं किमित्यत इदमित्याह ॥ **तस्येति** । तस्य मदनभिनन्दनस्य । अयं वृक्षो लोकविलक्षणो हेतुर्भर्तृपौरुषगर्वितेति । कृष्णेर्ष्याजननाय मुख्यः स हेतुरिति भावः ॥ २८ ॥

नेतव्यः सर्वथा वृक्षः पारिजातोऽयमच्युत ।
प्रियाऽहं तव चेन्नाथ नोचेद् विरम साम्प्रतम् ॥ २९ ॥

सत्यधर्मीया — अच्युत नाथ । अहं तव प्रिया चेत्सर्वथा सङ्ग्रामो वा किं वा भवतु भवताऽयं तरुः पारिजातो नेतव्यः । न प्रिया चेत्साम्प्रतं विरम तूष्णीमास्व । न व्यथाकर्त्र्या भाव्यमिति भावः । न चामरसमसमरे जयो नाप्यपजयो न वा मरणं तथा मरणं न निश्चित-मिति । न राज्यादिचुत्यभावेनान्यथासिद्धमच्युतपदमिति च न वद तव न मृत्युरित्यप्याह ॥ **यमच्युतेति** । यमाच्च्युतो यमवधातीतो विमृत्युरिति यावत् ॥ २९ ॥

इत्युक्तः सत्यया कृष्णस्ताननादृत्य रक्षकान् ।
उत्पाट्यारोपयामास पारिजातं गरुत्मति ॥ ३० ॥

सत्यधर्मीया — उत्पाट्य उत्कृत्य गरुत्मति गरुडे आरोपयामास गतम् ॥ ३० ॥

ततो निवारयामासुर्गोविन्दं वनपालकाः ।
केचिद् द्रुततरं जग्मुर्देवेन्द्राय निवेदितुम् ॥ ३१ ॥

सत्यधर्मीया — वनपालाः केचिद्द्रुततरं यथातथा केचिज्जग्मुः ॥ ३१ ॥

कृष्णकृष्ण न हर्त्तव्यस्तरुरेषोऽमरार्चितः ।
हरसे यदि तस्य त्वं फलं सद्योऽनुभोक्ष्यसि ॥ ३२ ॥

सत्यधर्मीया — हरसे चेत्सद्यस्तत्फलं हरणफलमनुभोक्ष्यसि ॥३२॥

प्राप्नोषि न पुरीं कृष्ण सहानेन महीरुहा ।
सद्यः पश्यसि देवेन्द्रं पृष्ठतोऽभ्युद्यतायुधम् ॥ ३३ ॥

सत्यधर्मीया — तदेव विविच्याहुः । अनेन महीरुहा सह पुरीं द्वारकां न प्राप्नोषि । किञ्च पृष्ठतोऽभ्युद्यतमायुधं वज्रं येन तं पश्यसीति ॥ ३३ ॥

सुरेन्द्रान्तिकमासाद्य द्रुतं ते वनरक्षकाः ।
उपविष्टं समं शच्या शक्रं दृष्ट्वाऽब्रुवन् नृप ॥ ३४ ॥

वनरक्षका ऊचुः —

अवज्ञायाखिलान् देवानिन्द्राणीं च त्वया सह ।
जहार कृष्णदयिता पारिजातं महाद्रुमम् ॥ ३५ ॥

सत्यधर्मीया — शच्या समं साकमेकासन उपविष्टं त्वया सहेन्द्राणीं चावज्ञाय धिक्कृत्य । कृष्णादयितेति वचनं तद्बोधितो जहार हरिरिति भावेनेति ज्ञेयम् ॥ ३४,३५ ॥

उक्ताऽस्माभिर्भृशं देव वारयद्भिर्हरिप्रिया ।
उपालभ्याहरद् वृक्षं भर्तृपौरुषगर्विता ॥ ३६ ॥

सत्यधर्मीया — भर्तृपौरुषगर्विता हरिप्रियाऽस्माभिर्निवारयद्भिरुक्ताऽपि भृशमुपालभ्य भर्त्सयित्वा वृक्षमहरत् ॥ ३६ ॥

श्रीशुक उवाच —

इत्याकर्ण्याप्रियं शक्रो दण्डाहत इवोरगः ।
शचीं विलोक्य पार्श्वस्थां नामृष्यत् तत्पराभवम् ॥ ३७ ॥

सत्यधर्मीया — पार्श्वस्थां शचीं विलोक्य तत्पराभवं नामृष्यन्न सेहे । तरुणी-पुरतोऽप्रतिष्ठा न सोढुं शक्येति शचीं पार्श्वस्थामित्यनेन ध्वनयति ॥ ३७ ॥

सन्नाहोद्योगमाघोष्य सन्निपात्य च सैनिकान् ।
लोकपालान् समाहूय निश्चक्राम सुरेश्वरः ॥ ३८ ॥

सत्यधर्मीया — सन्निपात्य मेलयित्वा सैनिकान्सेनासमवेतांस्तथा लोकपालांश्च समाहूय तैः सह निर्जगाम ॥ ३८ ॥

ऐरावतं चतुर्दन्तमारुह्य वरवारणम् ।
गृहीतवज्रं गच्छन्तमनुजग्मुर्दिवौकसः ॥ ३९ ॥

सत्यधर्मीया — ऐरावतं वरवारणं यद्वा वारं तदणयति गमयतीति वरवारणं मदोदक-स्रावणमिति यावत् । वराः प्रतिभटास्तेषां वारणं निवारणं येनेति वा वरान् वारयतीति वा । आरुह्य गृहीतवज्रं गच्छन्तमिन्द्रं दिवौकसोऽनुजग्मुः ॥ ३९ ॥

वैश्वानरस्तु तुरगमारुह्य दृढदंशितः ।
घोरां शतघ्नीमादाय स्रुवपुच्छां ययौ रणम् ॥ ४० ॥

सत्यधर्मीया — वैश्वानरोऽग्निः । तुरङ्गं तुरजो वाहमात्रेऽपि इत्युक्तेर्वाहनमुरणम् । मेषारूढं वरप्रदमित्युक्तेरारुह्य वैश्वानरोऽग्निः । वैश्वानरस्तूरणमिति च सरलः पाठः । विश्वे नरा अस्येति वैश्वानरः । नरे सञ्ज्ञायामिति विश्वशब्दस्य दीर्घः । स्रुवं पुच्छे यस्याः सा तां शतघ्नीमादाय रणं प्रति ययौ ॥ ४० ॥

यमस्त्वारुह्य महिषं दण्डमादाय वीर्यवान् ।
मृत्युकालादिभिर्युक्तो युद्धार्थी शक्रमन्वगात् ॥ ४१ ॥

सत्यधर्मीया — मृत्युकालावमात्यौ तदादिभिर्युक्तः ॥ ४१ ॥

निर्ऋतिश्च महातेजा घोरमारुह्य पौरुषम् ।
असिहस्तो महाबाहुर्युद्धाय प्रययौ नृप ॥ ४२ ॥

सत्यधर्मीया — पौरुषं स्वार्थेऽण् । पुरुषं । असिहस्तः खड्गपाणिः ।। ४२ ।।

मकरं भीषणाकारमारुह्य वरुणस्त्वरन् ।
पाशोद्यतकरः प्रायाद् युद्धायानुशचीपतिम् ।। ४३ ।।

सत्यधर्मीया — भीषणाकारं मकरमारुह्य वरुणस्त्वरन् पाशोद्यतकरः शचीपतिमनु युद्धाय प्रायात् ।। ४३ ।।

वायुः कृष्णमृगारूढो दंशितस्तोमरायुधः ।
सुरेश्वरमनुप्रायाद् योद्धुं चक्रभृता सह ।। ४४ ।।

सत्यधर्मीया — कृष्णमृगः सारङ्गः । तोमरमायुधं यस्य सः । चक्रभृता कृष्णेन ।।४४।।

ऊढां चतुर्भिः पुरुषैः शिबिकां नरवाहनः ।
योद्धुकामस्त्वरन् प्रायाद् विष्णुना मुद्गरायुधः ।। ४५ ।।

सत्यधर्मीया — नरवाहनः कुबेरः । चतुर्भिः पुरुषैरूढां शिबिकामारुह्येत्यन्वयः ।। ४५ ।।

ईशानो वृषभं तुङ्गमारुह्य शितशूलभृत् ।
वासवेन समं प्रायात् भूतकोटिसमन्वितः ।। ४६ ।।

सत्यधर्मीया — ईशानः शिवो भूतानां कोटयस्ताभिः समन्वितः ।। ४६ ।।

भेरीशङ्खमृदङ्गैश्च पणवानकगोमुखैः ।
सुवर्णसुषिरैर्दिव्यैः कांस्यतालैश्च भूरिभिः ।। ४७ ।।

रथनेमिनिनादैश्च हयानां खुरनिःस्वनैः ।
क्ष्वेलितास्फोटितैर्घोरैः सङ्ग्रामाह्वानगर्जनैः ।। ४८ ।।

सत्यधर्मीया — सुवर्णसुषिरैः सुवर्णात्मकसरन्ध्रैः काहिलीभिरित्यर्थः । सुषिरं विवरे वाद्ये सरन्ध्रे सुषिरोऽनिल इति विश्वः । भूरिभिर्बहुलैः ।। खुराणां निःस्वनास्तैः । क्ष्वेलितैः सिंहनादैरास्फोटितैरुर्वाद्यास्फालनैः सङ्ग्रामार्थमाव्हानं तद्रूपैर्गर्जनैः ।। ४७, ४८ ।।

तिष्ठतिष्ठेति मा याहि क यासीति पुनः पुनः ।
प्रवदद्भिः सुरगणैः शतशोऽथ सहस्रशः ॥ ४९ ॥

सत्यधर्मीया — तव मायेति प्रवदद्भिरिति वा । मा याहि न गच्छ । हि यस्मात्त्वया माया आश्रिता अतः ॥ ४९ ॥

कम्पयद्भिश्च शस्त्रोघैः प्रेषयद्भिश्च वाहनम् ।
पुरोऽहमिति गच्छद्भिः शतशोऽथ सहस्रशः ॥ ५० ॥

सत्यधर्मीया — अहं पुरोऽहं पुर इति गच्छद्भिः ॥ ५० ॥

घोरैर्ज्याघातनिर्घोषैः सिंहनादैश्च भूरिभिः ।
अभिदुद्रुवुरुद्धृत्ताः सिंहं गोमायवो यथा ॥ ५१ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे पञ्चषष्ठिरध्यायः ॥

सत्यधर्मीया — सिंहं गोमायवः सृगालाः ॥ ५१ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे पञ्चषष्ठिरध्यायः ॥ १०-६५ ॥

॥ अथ षट्षष्ठिरध्यायः ॥

श्रीशुक उवाच —

सुरानभिद्रुतान् दृष्ट्वा सत्यामाह जगत्पतिः ।
इमे प्राहुणिकाः प्राप्तास्तव वृन्दारका इति ॥ १ ॥

सत्यधर्मीया — ॥ हरिः ॐ ॥ प्राहुणिका आमन्त्र्य भोजयितव्याः । तव ॥ १ ॥

तथा ब्रुवाणे देवेशे प्रेषिता देवसैनिकाः ।
नदन्तो मुमुचुः कृष्णे शरवृष्टिं कुरूद्वह ॥ २ ॥

सत्यधर्मीया — प्रेषिता इन्द्रेण ॥ २ ॥

ततः शार्ङ्गं समादाय सत्या व्यसनविक्लवा ।
मुक्तांश्चिच्छेद बाणौघैस्ताञ्छरान् देवसैनिकैः ॥ ३ ॥

सत्यधर्मीया — अव्यसनविक्लवा व्यसनः खेदो विक्लवो विव्हलता ताभ्यां रहिता देवसैनिकैर्मुक्तान् बाणौघैस्ताञ्छरांश्चिच्छेद ॥ ३ ॥

ततो वैश्रवणः श्रीमान् बहुभिर्गुह्यकैर्वृतः ।
विष्फारयंस्तालमात्रं कार्मुकं कनकाटवि ॥ ४ ॥

सत्यधर्मीया — तालमात्रं तालस्य मात्रं प्रमाणं यस्य तत् कार्मुकम् । कनकाटवि कनकमयाटविः कोटिर्यस्य तत् । अटघटिभ्यां विरित्यविः ॥ ४ ॥

स्वर्णपुङ्खान् शरान् मुञ्चन् सिंहवच्च नदन् मुहुः ।
अभिदुद्राव समरे तिष्ठ तिष्ठेति चाब्रवीत् ॥ ५ ॥

सत्यधर्मीया — रे समसमरे तिष्ठ तिष्ठेति चाब्रवीत् ॥ ५ ॥

तं पञ्चभिः शरैः सत्या निशितैर्मर्मभेदिभिः ।
अर्पयामास वेगेन विशाले जठरे नृप ॥ ६ ॥

सत्यधर्मीया — विशाले विस्तृते जठरे उदरे ॥ ६ ॥

सोऽतिविद्धो रणे बाणैस्त्रिभिः भल्लैर्हरिप्रियाम् ।
अयोधयद् धनपतिः सिंहनादं व्यनीनदत् ॥ ७ ॥

सत्यधर्मीया — स धनपतिः ॥ ७ ॥

तानप्राप्तानर्धचन्द्रैस्त्रिभिश्चिच्छेद सा शरैः ।
भूयोऽष्टभिः शरैर्देवी वत्सदन्तैर्मनोजवैः ॥ ८ ॥

सत्यधर्मीया — सा सत्या ॥ ८ ॥

विव्याध गुह्यकपतेर्ललाटे कुरुपुङ्गव ।
पीडितस्तैर्भृशं बाणैः पौलस्त्यः क्रोधमूर्च्छितः ॥ ९ ॥

सत्यधर्मीया — गुह्यकपतेः गुह्यकेश्वरस्य ॥ ९ ॥

सन्दधे निशितान् बाणानेकविंशति संयुगे ।
तानन्तरे सत्यभामा सायकैः सप्तभिर्नृप ॥ १० ॥

चिच्छेद निमिषार्धेन त्रिधैकैकं हरिप्रिया ।
सत्यभामा ततः क्रुद्धा पौलस्त्यस्य महद्धनुः ॥ ११ ॥

सत्यधर्मीया — एकैकं त्रिधा चिच्छेद ॥ १०,११ ॥

अर्धचन्द्रेण चिच्छेद मुष्टिदेशे द्विधा नृप ।
ततोऽन्यच्चापमादाय सज्जं कृत्वा धनेश्वरः ॥ १२ ॥

सत्यधर्मीया — अर्धचन्द्रेण तदाकृतिमता बाणेन मुष्टिप्रदेशे तद्धार्यप्रदेशे । सति स्वापथेये न दानं वैश्रवणस्येति तन्मुष्टिदेशे ताडनं युक्तमिति भावः । अत एवाभाणकं बद्धमुष्टिरिति । सज्जं ज्यासहितम् ॥ १२ ॥

ववर्ष शरजालानि क्रोधात् सर्प इव श्वसन् ।
सर्वांस्तान् सायकान् सङ्ख्ये शरैः सन्नतपर्वभिः ॥ १३ ॥

सत्यधर्मीया — सङ्ख्ये युद्धे सन्नतानि पर्वाणि येषां ते तैः ॥ १३ ॥

चिच्छेद लीलया देवी तदद्भुतमिवाभवत् ।
ततः क्रुद्धो वैश्रवणः सत्यभामां विलोक्य च ॥ १४ ॥

सत्यधर्मीया — तत्रापि नायताक्ष्या आयास इत्याह ॥ **लीलयेति** ॥ १४ ॥

प्राह पश्य हनिष्यामि त्वामद्य मम पौरुषम् ।
इत्युक्त्वा तालमात्रे तु चापे गुह्यकसत्तमः ॥ १५ ॥

सत्यधर्मीया — त्वमद्य मम पौरुषं पश्य त्वां हनिष्यामीत्युक्त्वा तालमात्रे तु चापे ॥ १५ ॥

पश्यतां सर्वदेवानां मार्ष्टुकामः पराभवम् ।
सन्दधे सूदितुं देवीमर्धचन्द्रं शरोत्तमम् ॥ १६ ॥

सत्यधर्मीया — पराभवं पराजयं मार्ष्टुकामः परिहर्तुकामः शरोत्तममर्धचन्द्रं सन्दधे ॥ १६ ॥

तदवेत्य मनस्तस्य क्षुरप्रेण हरिप्रिया ।
चिच्छेद कार्मुकं तस्य मुष्टिदेशे कुरूद्वह ॥ १७ ॥

सत्यधर्मीया — तत्स्वहननोद्योगकरणमवेत्य ज्ञात्वा ॥ १७ ॥

ततो मुद्गरमादाय घोरं दानवभीषणम् ।
भ्रामयित्वा शतगुणं देव्यै चिक्षेप वित्तपः ॥ १८ ॥

सत्यधर्मीया — शतगुणं शतवारं भ्रामयित्वा देव्यै चिक्षेप ॥ १८ ॥

तं मुद्गरं महाघोरमायान्तं कुरुपुङ्गव ।
वामेन पाणिना कृष्णो जग्राहोच्चैर्जहास च ॥ १९ ॥

सत्यधर्मीया — वामेन पाणिना जग्राहानन्तरमुच्चैर्जहास च । वामेनेत्यनेन भार्याभागो वाम इति प्रसिद्ध इत्युक्तेस्तव भागहस्तेनैव धारणान्न तव पराजय इति ध्वनयामास ॥ १९ ॥

ततो निवृत्तसङ्ग्रामो विदुद्राव धनेश्वरः ।
शशंस देवीं कृष्णश्च समाश्लिष्याभिपूजयन् ॥ २० ॥

सत्यधर्मीया — समाश्लिष्याभिपूजयन्देवीं शशंस ॥ २० ॥

पलायिते धनपतौ सङ्ग्रामे कंसवैरिणा ।
वरुणोऽभ्यद्रवत् कृष्णं पाशमुद्यम्य संयुगे ॥ २१ ॥

सत्यधर्मीया — पाशमुद्यम्य संयुगे कृष्णमभ्यद्रवत् ॥ २१ ॥

तमायान्तमभिप्रेक्ष्य तार्क्ष्यो मकरवाहनम् ।
अभ्यद्रवन्महासत्वः शार्दूल इव गोवृषम् ॥ २२ ॥

सत्यधर्मीया — गोवृषं शार्दूलो व्याघ्रः ॥ २२ ॥

तयोः समभवद् युद्धं घोरं तार्क्ष्यजलेशयोः ।
यथा देवासुरे युद्धे बलिवासवयोरिव ॥ २३ ॥

सत्यधर्मीया — देवासुरे युद्धे प्रसक्ते बलिवासवयोरिवैतद्युद्धं यथा तथा युद्धं समभवत् । यथा तथा सम्यगिति वा ॥ २३ ॥

तत्र काश्यपपुत्रस्य कण्ठे पाशं जलेश्वरः ।
क्रुद्धश्चकर्ष विन्यस्य सिंहः सिंहमिवौजसा ॥ २४ ॥

सत्यधर्मीया — काश्यपपुत्रस्य गरुडस्य ॥ २४ ॥

तं पक्षकोट्या गरुडः समुद्धृत्य जलेश्वरम् ।
पद्भ्यां गृहीत्वा मकरं चिक्षेप वरुणालये ॥ २५ ॥

सत्यधर्मीया — गरुडस्तं वरुणं पक्षकोट्या समुद्धृत्य पद्भ्यां मकरं तद्वाहनं गृहीत्वा वरुणालये चिक्षेप ॥ २५ ॥

कृच्छ्राद् गृहीतपाशस्तु वरुणो गतवाहनः ।
पदातिरेव सङ्ग्रामाद् विदुद्राव यथागतम् ॥ २६ ॥

सत्यधर्मीया — कृच्छ्रात्कष्टाद्गृहीतो गरुडगलगतः प्रतिगृहीतः पाशो येन सः । यथाऽऽगतस्तथा विदुद्राव ॥ २६ ॥

तथा गते वार्धिपतौ सङ्ग्रामे वायुपावकौ ।
सममेवाभ्यवर्तेतां गोविन्दं कुरुसत्तम ॥ २७ ॥

सत्यधर्मीया — वार्धिपतौ समुद्रनाथे वायुपावकौ समं युगपदेव मरुत्सखो हुताशन इति मैत्र्यात् ॥ २७ ॥

पावकः पञ्चभिर्बाणैर्मारुतश्च तथा त्रिभिः ।
अयोधयद् हृषीकेशं तदद्भुतमिवाभवत् ॥ २८ ॥

सत्यधर्मीया — मारुतो वायुः ॥ २८ ॥

ततः प्रहस्य गोविन्दो बाणेनैकेन पावकम् ।
विव्याध सप्तभिश्चैव समीरणमरिन्दमः ॥ २९ ॥

एकेनाग्निः क्षुरप्रेण गाढं वक्षसि ताडितः ।
तमसाधारणं मत्वा विदुद्राव रणाद् द्रुतम् ॥ ३० ॥

सत्यधर्मीया — समीरणं समीरं । तं कृष्णमसाधारणं स्वाशक्यं मत्वा ॥ ३० ॥

दृष्ट्वा समीरणो युद्धादपयातं हुताशनम् ।
सायकाचितसर्वाङ्गमात्मानं चातिविह्वलः ॥ ३१ ॥

सत्यधर्मीया — आत्मानं स्वं सायकैराचितं सर्वमङ्गं यस्य स तम् ॥ ३१ ॥

विदित्वा पुण्डरीकाक्षं सङ्ग्रामे प्रत्युपस्थितम् ।
न्यवर्तत कुरुश्रेष्ठ प्राणत्राणपरायणः ॥ ३२ ॥

सत्यधर्मीया — पुण्डरीकाक्षं साक्षान्नारायणं विदित्वा ज्ञात्वा ॥ ३२ ॥

ततो महिषमारुह्य दण्डमुद्यम्य भास्वरम् ।
कृष्णमभ्यद्रवद् युद्धे यमः क्रोधारुणेक्षणः ॥ ३३ ॥

सत्यधर्मीया — यमोऽयमोऽसदृश इति वा ॥ ३३ ॥

तमुद्यतमहादण्डं दृष्ट्वा कमललोचनः ।
गदां विसृज्य तद्धस्तात् पातयामास भूतले ॥ ३४ ॥

सत्यधर्मीया — विसृज्य मुक्त्वा तद्धस्तात् यमकारात् महादण्डं भूतले पातयामास । अनेन वरं स मानयामास सारसासनस्येति ध्वनयति ॥ ३४ ॥

गदया ताडिते दण्डे त्रस्तहस्तः परेतराट् ।
विदुद्राव परावृत्य महिषेण कुरूद्वह ॥ ३५ ॥

सत्यधर्मीया — त्रस्तहस्तः कम्पितकरः परेतराट् प्रेतपतिः ॥ ३५ ॥

वैवस्वतं गतं दृष्ट्वा निर्ऋतिर्भयविह्वलः ।
नाभ्यवर्तत गोविन्दं योद्धुं विदिततद्बलः ॥ ३६ ॥

सत्यधर्मीया — विदिततद्बलो विदितं तस्य कृष्णस्य बलं येन सः । योद्धुमेव नाभ्यवर्तत नाभिससार ॥ ३६ ॥

शङ्करस्तु महातेजास्त्रिशूली वृषवाहनः ।
अनेकभूतसङ्घातैः कृष्णमभ्यद्रवद् रणे ॥ ३७ ॥

सत्यधर्मीया — त्रिशूली तद्वान् वृषो नन्दी ॥ ३७ ॥

तावुभौ लोकविख्यातौ बलिनौ वीर्यशालिनौ ।
चक्राते कदनं घोरं परस्परजयैषिणौ ॥ ३८ ॥

सत्यधर्मीया — परस्परं जयैषिणौ तदिच्छू कदनं युद्धम् ॥ ३८ ॥

ईशानो दशभिर्बाणैः कृष्णं तार्क्ष्यं च पञ्चभिः ।
विव्याध समरे राजन् तिष्ठतिष्ठेति चाब्रवीत् ॥ ३९ ॥

सत्यधर्मीया — ईशानः शिवो दशभिर्बाणैः कृष्णं तार्क्ष्यं च गरुडं च पञ्चभिः शरैर्विव्याध । समरे युद्धे रे सम लक्ष्मीरमण । तिष्ठ तिष्ठ कृष्णेति चावदत् । अनुवादेन साकं पिनाकोऽपि तेनानीत इति वादे ऊह्यमिति सूच्यते । त्रिषु स्थानेषु नतं च तच्छूलमायुधं धनुस्तदस्यास्तीति वाऽऽवृत्त्या पिनाकग्रहः । शूलं प्रहरण इति विश्वः । त्रयाणां लोकानां शूलं मृत्युर्येन सोऽस्यास्तीति वा । मृत्यो इति तत्रैवोक्तेः ॥ ३९ ॥

ततः शार्ङ्गं समादाय कृष्णः परपुरञ्जयः ।
त्रिंशद्भिर्युगपद् बाणैर्विव्याध वृषवाहनम् ॥ ४० ॥

सत्यधर्मीया — त्रिंशद्भिरेकस्य त्रिकं त्रिकमिति त्रिंशत्सङ्ख्यैः ॥ ४० ॥

गरुडः पन्नगरिपुः पद्भ्यां द्वाभ्यां च संयुगे ।
पक्षाभ्यां चञ्चुकोट्या च मर्दयामास तं वृषम् ॥ ४१ ॥

सत्यधर्मीया — पन्नगरिपुरिति तदलङ्कृतिकृदिति ध्वन्यते । द्वाभ्यां पद्भ्यां पक्षाभ्यां च चञ्चुकोट्या तत्प्रान्तेन तं वृषं मर्दयामास ॥ ४१ ॥

भूयोऽपि कृष्णो नाराचैः पञ्चाशत्प्रमितैर्नृप ।
योधयामास समरे शङ्करं लोकशङ्करम् ॥ ४२ ॥

सत्यधर्मीया — पञ्चशदिति प्रमितैर्गणितैः ॥ ४२ ॥

ततः त्रिशूलमाविध्य निशितं घोरदर्शनम् ।
प्राहिणोद् वासुदेवाय कुपितो धूर्जटिर्नृप ॥ ४३ ॥

सत्यधर्मीया — निशितं सशाणीकृतम् ॥ ४३ ॥

दृष्ट्वा त्रिशूलमायान्तं केशवस्तं निवारितुम् ।
गदां कौमोदकीं गुर्वीं प्राहिणोद् दैत्यमर्दनीम् ॥ ४४ ॥

सत्यधर्मीया — आयान्तं त्रिशूलम् ॥ ४४ ॥

ते वै कौमोदकीशूले कृत्वा नभसि सङ्गरम् ।
ज्वलमाने महाघोरे पेततुः सममम्बुधौ ॥ ४५ ॥

सत्यधर्मीया — कौमोदकीशूले । अभ्यर्हितत्वादादौ कौमोदक्युक्तिः । अम्बुधौ समुद्रे ॥ ४५ ॥

निपात्याब्धौ त्रिशूलं तद्गदाकौमोदकी पुनः ।
आससाद करं विष्णोस्त्रिशूलमपि शूलिनः ॥ ४६ ॥

सत्यधर्मीया — तत्त्रिशूलं निपात्याब्धौ सा कौमोदकी विष्णोः करं तथा शङ्करकरं शूलं चाससाद ॥ ४६ ॥

तत उद्यम्य निशितं खड्गं पन्नगभूषणः ।
कृष्णमभ्यद्रवत् सङ्ख्ये पार्ष्णिभ्यां चोदयन् वृषम् ॥ ४७ ॥

सत्यधर्मीया — निशितं खड्गम् । इदमुप्युक्तगतिकम् । पार्ष्णिभ्यां पादपृष्ठभागाभ्यां वृषं चोदयन् । अनेन गरुडबाधितस्य गमनासामर्थ्यं द्योतयति ॥ ४७ ॥

तूर्णं गृहीत्वा पाणिभ्यां विषाणे तस्य नन्दिनः ।
सशूलपाणिं चिक्षेप वैनतेयो धनुश्शतम् ॥ ४८ ॥

सत्यधर्मीया — तस्य नन्दिनो विषाणे । सप्तमी वा द्वितीयाद्विवचनं वा । बाहुभ्यां पद्भ्यां गृहीत्वा सशूलपाणिं सहहरं वैनतेयो धनुः शतं तत्परिमितं देशं प्रति चिक्षेप ॥४८॥

ततो विसृज्य सङ्ग्रामं त्रिशूली वृषवाहनः ।
प्रमथैः सहितः प्रायात् कुरुश्रेष्ठ यथागतम् ॥४९॥

॥ इति श्रीमद्भागवते दशमस्कन्धे षट्षष्टितमोऽध्यायः ॥

सत्यधर्मीया — ततः स्वपातानन्तरं वृषवाहनस्त्रिशूली शूलस्य मोघतां वृषस्य गमनासामर्थ्यतां ध्वनयितुमेवमुक्तिः । प्रमथैर्भूतगणैः पारिषदैः सहितो यथाऽऽगतं तथा प्रायात् । प्रेण स्वोपास्यं रामं किं राम समरः कर्तव्य इत्यप्राक्षीत् त्र्यक्ष इव तेन चाजित्यजनं क्षेम इत्युक्तमित्याभाणकमभिप्रैतीति मन्तव्यम् ॥ ४९ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे षट्षष्टिरध्यायः ॥ १०-६६ ॥

॥ अथ सप्तषष्ठिरध्यायः ॥

श्रीशुक उवाच —

ततः स्वयं देवपतिस्तुङ्गमारुह्य वारणम् ।
किरीटी बद्धतूणीरः प्रगृहीतशरासनः ॥ १ ॥

सत्यधर्मीया — ॥ हरिः ॐ ॥ ततः शर्वादिसर्वसुपर्वविद्रावणानन्तरम् ॥ १ ॥

अभ्यद्रवद् रणे कृष्णं गजः केसरिणं यथा ।
पारिजातकृते राजन् पौलोम्या वचनं स्मरन् ॥ २ ॥

सत्यधर्मीया — गजः केसरिणं सिंहं पारिजातकृते तन्निमित्तं पौलोम्या वचनं पराभाव्य भगवन्तं नगमानयेति मानिनीवाक्यम् । अनेनोभावपि भार्यामूलमेव कलहं कलयत इति द्योत्यते ॥ २ ॥

तमायान्तमभिप्रेक्ष्य हरिः पुरपुरञ्जयः ।
शङ्खं दध्मौ महानादं दिशः समभिपूरयन् ॥ ३ ॥

सत्यधर्मीया — हरिस्तमिन्द्रम् ॥ ३ ॥

तमभिद्रुत्य देवेन्द्रो महद् विष्फारयन् धनुः ।
क्षुरप्रेण सुतीक्ष्णेन कृष्णं विव्याध सङ्गरे ॥ ४ ॥

सत्यधर्मीया — महद्धनुर्विस्ष्फारयन् । सङ्गरे क्षुरप्रेण शरविशेषेण विव्याध । रे विव्याधसङ्ग विविधा व्याधास्तेषां सङ्गो यस्य स तत्सम्बुद्धिः । तैर्व्याधैर्विधेयकर्म पश्यतो हरत्वादिकं तत्त्वं कृतवानिति सम्बोधयामास वासवो वसुदेवं तथेति वाऽऽवृत्त्या ज्ञेयम् ॥४॥

हरिर्विद्धः क्षुरप्रेण देवराजेन वक्षसि ।
प्रहस्य साधु शक्रोऽसि युक्तं त इति चाब्रवीत् ॥ ५ ॥

सत्यधर्मीया — साधु सम्यक् त्वं शक्तोऽसि । अतस्त इदं मदङ्गताडनं युक्तं

न्याय्यमिति चाब्रवीत् । अनेनायं मम शयोऽधुनापि शीतलो जात इवेत्येव समये उपकारं विस्मृत्यायात इति हास इति ज्ञेयम् । न्यायसंयुक्तयोर्युक्तमिति यादवः ॥ ५ ॥

भूयोऽपि बाणान् दश देवराजः सन्धाय चापे भुजगेन्द्रकल्पे ।
आकर्णपूर्णं विनिकृष्य कृष्णे मुमोच चक्रेऽसहसिंहनादम् ॥ ६ ॥

सत्यधर्मीया — भुजगेन्द्रकल्पे मासृण्येनाकारेण च सर्पसमे । असहो दुस्सहो यो सिंहनादस्तम् । स इन्द्रः सिंहनादं च चक्रे हेत्यन्वयो वा ॥ ६ ॥

तानन्तरे कंसरिपुर्महात्मा छित्त्वा त्रिधैकेन शरेण बाणान् ।
विव्याध बाणैर्दशभिः सुधौतैः पुरन्दरं भारत लीलयैव ॥ ७ ॥

सत्यधर्मीया — सुधौतैर्निशितैः ॥ ७ ॥

ते शरा देवराजस्य गात्रं निर्भिद्य सावृति ।
शोणिताक्ताः प्रदृश्यन्ते भूयो वेगेन निर्गताः ॥ ८ ॥

सत्यधर्मीया — सावृति । आवृत्या तद्रूपेण वर्मणा सहितं तद्गात्रं निर्भिद्य भूयोवेगेन बहुवेगेन शोणिताक्ता वेगेन विनिर्गता भूयः पुनः प्रदर्श्यन्त इति वा ॥ ८ ॥

पुनश्च शक्रः कोदण्डे शरान् सन्धाय षोडश ।
मुमोचाकृष्य गोविन्दस्तांश्चकर्त शरैस्त्रिभिः ॥ ९ ॥

सत्यधर्मीया — तान् षोडश शरांस्त्रिभिः पतत्त्रिभिरेकेन षट् द्वाभ्यां पञ्चकं पञ्चकमिति विवेकः ॥ ९ ॥

भूयोऽपि बाणैस्त्रिंशद्भिः सुरराजानमाहवे ।
अयोधयद्धरिस्ते च ममज्जुः शक्रवक्षसि ॥ १० ॥

सत्यधर्मीया — सुरराजानं त्रिंशत्सङ्ख्या बाणाः ॥ १० ॥

ततश्चुकोप देवेन्द्रो दण्डाहत इवोरगः ।
प्रेषयामास तोत्रेण तार्क्ष्यं प्रति महागजम् ॥ ११ ॥

सत्यधर्मीया — तोत्रेणाङ्कुशेन ॥ ११ ॥

स राजः प्राप्य गरुडं पाकशासनचोदितः ।
चतुर्भिर्घट्टयामास दन्तैर्बाहुयुगान्तरे ॥ १२ ॥

सत्यधर्मीया — बाहुयुगान्तरे उरसि ॥ १२ ॥

ततस्तुण्डेन गरुडः पक्षाभ्यां च तथा नखैः ।
मर्दयामास कौरव्य गजमैरावताह्वयम् ॥ १३ ॥

सत्यधर्मीया — तुण्डेन चञ्चुना ॥ १३ ॥

शक्रस्तु वज्रमुद्यम्य घोरं दानवभीषणम् ।
पश्यतां सर्वभूतानां प्रजहार वृषाकपिम् ॥ १४ ॥

सत्यधर्मीया — वृषाकपिं हरिम् । वृषा इन्द्रः प्राक् हनुमन्तं प्रतीव प्रजहारेति लुप्तोपमा च । वासवो वृत्रहा वृषेत्यमरः ॥१४॥

तमागतं मधुरिपुर्वज्रं दुश्च्यवनायुधम् ।
वामेन पाणिना विष्णुर्जग्राह प्रजहास च ॥ १५ ॥

सत्यधर्मीया — मधुरिपुर्मधुसूदनः । इदानीं मधुर्मनोहरः सन्नेव रिपुः । न क्रौर्ये पुरस्तिष्ठेच्छक्र इति भावः । आगतं स्वसमीपं वज्रं वामेन करेण जग्राह । हे दुश्च्यवन । आगतं त आयुधं किलेति जहास चेत्यन्वयः ॥ १५ ॥

निरायुधः सुरपतिर्गरुडार्दितवाहनः ।
व्यावर्तत रणाद् राजन् व्रीडावनतकन्धरः ॥ १६ ॥

सत्यधर्मीया — निरायुधः क्षुरप्रादिवज्रान्तानामयुधानां विसर्जनाद्वर्जितायुधस्तथा

गरुडार्दितवाहनश्च व्रीडया व्रीडेन वाऽऽनता कन्धरा यस्य स सन् व्यावर्ततापासर्पदिति यावत् । व्रीडा व्रीडश्चेति द्विरूपकोशः ॥ १६ ॥

तं दृष्ट्वा भ्रष्टसङ्कल्पं पलायनपरायणम् ।
सत्यभामा सुरपतिं प्रहसन्तीदमब्रवीत् ॥ १७ ॥

सत्यधर्मीया — प्रहसन्ती भर्तृभ्रातृत्वादपहसन्ती ॥ १७ ॥

सत्यभामोवाच —

एहि शक्र निवर्तस्व मा याहि कुलिशायुध ।
पलायनमयुक्तं हि पौलोम्या वल्लभस्य ते ॥ १८ ॥

सत्यधर्मीया — हे शक्र । एहि निवर्तस्व । हे कुलिशायुधेति बव्हप्रतिष्ठां सूचयतीति मन्तव्यम् । अधुना मधुनाथहृतत्वात्तस्य । पौलोम्या वल्लभस्य पत्युस्ते पलायनं न युक्तं योग्यं न । पौलोम्या वल्लभस्येति स्वतदवमाननेर्ष्यामाविश्चकार सत्यभामेति ज्ञेयम् ॥ १८ ॥

ऐश्वर्यमत्ता पौलोमी भर्तृपौरुषगर्विता ।
अवमंस्यति सद्यस्त्वां भार्या रणपराजितम् ॥ १९ ॥

सत्यधर्मीया — ऐश्वर्यमत्ता भर्तृपौरुषगर्विता पौलोमी भार्या रणपराजितं त्वां सा त्वाम-वमंस्यत्यवमानयति ॥ १९ ॥

श्रीशुक उवाच —

इत्थं देव्या गिरं शक्रः सोपालम्भमुदीरिताम् ।
निशम्याभिमुखो भूत्वा प्राह देवीं शुचिस्मिताम् ॥ २० ॥

सत्यधर्मीया — सोपलम्भं सापहासमुदीरितां गिरं शक्रो निशम्याभिमुखो भूत्वा शुचिस्मितां देवीं प्राह ॥ २० ॥

इन्द्र उवाच —

येनामरासुरमहोरगयक्षसिद्धगन्धर्वकिन्नरपिशाचनिशाचराद्याः ।
सृष्टास्त्रिलोकगुरुणा रणमूर्ध्नि तेन को वा न याति परिभूतिमलं विरुद्ध्य ॥ २१ ॥

सत्यधर्मीया — गतासुरावेशः शचीशो हरिगुणानुदीरयन् स्वस्वभावमाविर्भावयति ॥ **येनेति** । अमराद्या निशाचरान्ताः सृष्टा उत्पादितास्तेन त्रिलोकगुरुणा को वा पुमान् रणमूर्ध्नि विरुद्ध्यालं परिभूतिमतिपराभवं न याति । परिभूतिमलं तद्रूपं कलङ्कं न यातीति वा। अलं विरुद्ध्येति तु नान्वयः सरसः । तस्य च तमोहेतुत्वात् । वक्ष्यमाणगोवत्स-न्यायोऽप्यननुगुणः स्यात् । अनयेनातिपरिभूतिमलमिति वा ॥ २१ ॥

वत्से यथा तनुबलः सकृदेत्य मातर्यूधस्यपानसमये कुरुते विरोधम् ।
तद्वद् वयं च निजशैशवमप्रमेये नाथे विरुद्ध्य पिशिताशनिदर्शयामः ॥ २२ ॥

सत्यधर्मीया — तनुबलोऽल्पं तनु बलं यस्य स वत्सस्तर्णकः सकृदेत्य झडित्युपा-गम्योधस्यमूधोभवं क्षीरं तस्य पानसमये मातरि गवि विरोधं मुखघट्टनादिकं कुरुते करोति । स्तन्याप्रदानसूचके कुरुते कुत्सिते शब्दे कृते सतीत्यप्यर्थः । तद्वद्वत्सवत् । अप्रमेये नाथे पत्यौ श्रीकृष्णे विरुद्ध्य किञ्चिद्विरोधम् । हे पिशिताशनि यज्ञीयान्नभोजने सत्ये निज-शैशवमस्मद्बालभावं मौर्ख्यमिति यावद्दर्शयामः । हे अप्रमेये । नाथे स्वामिनि पिशिताशनि बहिर्मांसभक्षिणि स्त्रीराक्षसीत्युपहासः । त्वयि विरुद्ध्येव निजशैशवं दर्शयाम इति वा । यद्वा हे देवान्नाशिनि अमृतभोजने । अस्मल्लोकस्तु पारिजातेन तथामृतेन च विशिष्ट इति विशिष्टस्तत्रैकस्तु बलादबले गृहीत इदमन्नं मदीयमपि गृहाणेति वचनं दुश्च्यवनस्येति ज्ञेयम् । याज्ञीयान्ने च मांसे च पिशितं देवभोजनमिति यादवः । इदं सर्वं निजशैशवं तव शैशवमेव न केशवस्येत्युपाहसदित्यपि ज्ञेयम् ॥ २२ ॥

इति सत्राजितः पुत्रीमुक्त्वा भारतसत्तम ।
कृताञ्जलिः प्रणम्याह वासुदेवं पुरन्दरः ॥ २३ ॥

सत्यधर्मीया — सत्राजितः पुत्रीं प्रत्युक्त्वा कृताञ्जलिपुटः पुरन्दरो वासुदेवं प्रणम्याऽह ॥

इन्द्र उवाच —

नमस्ते देवदेवेश पुण्डरीकाक्ष माधव ।
क्षमस्व मत्कृतं विश्वमपराधं जगत्पते ॥ २४ ॥

सत्यधर्मीया — विश्वं समस्तम् ॥ २४ ॥

न मां त्वदेकशरणं शरणागतवत्सलः ।
भूरिबालिशमक्षान्तं परित्यक्तुं त्वमर्हसि ॥ २५ ॥

सत्यधर्मीया — भूरिबालिशमतिमूर्खम् । सुवर्णदिवितरणकृत्तरुरिति भूरि भूरिप्रयुक्तं सुवर्णार्थं बालिश इति । भूरिर्ब्रह्माच्युतेषु भूरिप्राज्यसुवर्णयोरिति विश्वः । अक्षान्तं क्षमा-रहितम् । तथाऽपि त्वदेकशरणं त्वं मां त्यक्तुं नार्हसि । अहाने हेतुमाह ॥ **शरणागत-वत्सलेति** ॥ २५ ॥

ऐरावतश्च कुलिशं पारिजातश्च पादपः ।
देवराज्यं च भगवन्नियं चाप्यमरावती ॥ २६ ॥

सत्यधर्मीया — सर्वं त्वदधीनमित्युक्त्वा कश्चन विशेषं पुनः पारिजातप्रत्यर्पणविषयं तं मुखतो वादयितुं पीठमारचयति ॥ **ऐरावत इति** । कुलिशं भिदुरम् ॥ २६ ॥

त्वदधीनमिदं विश्वमहमाज्ञाकरस्तव ।
अत्र यद् रोचते नेतुं नीयतां तद् यथेच्छया ॥ २७ ॥

सत्यधर्मीया — इदं सर्वं त्वदधीनमहं तवाज्ञाकरः अत्रैतन्मध्ये यत्तुभ्यं रोचते यथा सम्यग-सन्देहेनेच्छया तदनुसारेण नीयताम् ॥ २७ ॥

किन्तु वक्ष्यामि गोविन्द मूलं त्वयि विरुद्ध्यतः ।
रमसे मानुषे लोके भगवंस्त्वमनन्यधीः ॥ २८ ॥

सत्यधर्मीया — इयन्मतिमता भवता कुतः कृतः कलह इत्यत आह ॥ **किन्त्विति** । त्वयि विरुद्ध्यतो मम मूलं निमित्तं वक्ष्यामि । अनन्यधीर्यदर्थमवतीर्णस्तत्कार्यादन्यत्र निर्गतमतिर्मानुषे लोके रमसे क्रीडसि ॥ २८ ॥

तत्र नीते पारिजाते भवता कल्पपादपे ।
तेन सा जायते स्वर्गान्निर्विशेषा वसुन्धरा ॥ २९ ॥

सत्यधर्मीया — तत्र पारिजाते नीते तेन सा वसुन्धरा भूः स्वर्गान्निर्विशेषा निर्गतो विशेषो यस्याः सा तथा जायते ॥ २९ ॥

तेनाहं यदुशार्दूल विरोधं कृतवांस्त्वयि ।
तत् क्षन्तव्यं त्वया देव कार्याकार्यं विजानता ॥ ३० ॥

सत्यधर्मीया — अस्मत्सदनवैशेष्यसाधनं भविष्यतीति कलहः कृत इति वक्ति ॥ **तेनेति** । त्वं त्विदं कार्यं न कार्यं चेति विजानन्निति त्वया तन्मम मौर्ख्यं क्षन्तव्यम् ॥३०॥

श्रीशुक उवाच —

इत्युक्तो देवराजेन देवदेवो जनार्दनः ।
पुरन्दरं कुरुश्रेष्ठ प्राह प्रहसिताननः ॥ ३१ ॥

सत्यधर्मीया — प्रहसिताननो मम तावन्ममताविशेषं दर्शयित्वा मोहयिष्याम्येनमिति हासः ॥ ३१ ॥

श्रीभगवानुवाच —

अपराधस्त्वया शक्र न कश्चिदपि चेष्टितः ।
यत् कृतं तन्ममैवागस्त्वभेदादावयोः परम् ॥ ३२ ॥

सत्यधर्मीया — हे शक्र त्वया न कश्चिदपराधश्चेष्टितः कृतः । यदागस्त्वया कृतस्तन्मयैव कारितम् । तवास्वतन्त्रत्वात् । आवयोस्त्वदन्तर्गतस्य मम चेत्यावयोः परमत्यन्तमभेदात् । आवयोरभेदान्मत्यैक्यादिति व्याकुर्वते । पूर्वश्लोकात्पुरन्दरमित्यत्रत्यमनुवर्तते । अथशब्दानुशासनं के ते शब्दा इतिवत् । आवयोः पुरं शरीरं यत्कृतं यन्निमित्तमेकं व्यक्तमेकमिति । तस्याभेदाद्भेदाभावादेकत्वादिति यावत् । एकपितृकत्वात्त्वया यदकारि साधु वाऽसाधु मयाऽकारि विचारणाऽत्रैतद्विषये न कार्या ॥ ३२ ॥

यत् त्वयाऽद्य सहस्राक्ष चेष्टितं साध्वसाधु वा ।
मयैव तत् कृतं सर्वं नात्र कार्या विचारणा ॥ ३३ ॥

सत्यधर्मीया — हे सहस्राक्ष साध्वसाधु वा यत्कृतं तत् त्वयाऽनया शच्या कृतमेव । तदुद्बोधनेनागतत्वात्तव । अत्र यत्सर्वं कृतं तन्मया सत्ययैव कृतम् । एतयोर्मध्ये आर्या का द्वे अपि बालिशे बाले इति भावः । विचारणा नास्तीत्यप्यान्तरङ्गिको भावोऽवसेयः ॥३४॥

पारिजातस्तरुश्रेष्ठो मय्यारूढे तरुर्दिवम् ।
मन्निर्देशात् सहस्राक्ष स्वयमेष्यति नन्दनम् ॥ ३४ ॥

सत्यधर्मीया — निर्विशेष्यं परिहरति । मयि दिवमारूढे तरुश्रेष्ठः पारिजातो मन्निर्देशादाज्ञया नन्दनं वनं स्वयमेष्यति । अतरुः अतो गतो रुः शब्दो यस्य स निश्शब्द एष्यतीति न तर्वतिरेकः । त्वया प्रेषणीयं मया प्रेष्यत इति शब्दं विनेत्यर्थः ॥ ३४ ॥

इत्युक्त्वा वासुदेवेन देवराजः कुरूद्वह ।
गोविन्दं सत्यभामां च प्रसाद्य गरुडं तथा ॥ ३५ ॥

सत्यधर्मीया — गोविन्दं सत्यभामां च गरुडं च प्रसादयित्वा ॥ ३५ ॥

पुत्रो मे रक्षितव्यस्ते स्यालो बीभत्सुरित्यपि ।
भूयोभूयः प्रार्थयित्वा कृतानुज्ञः पुरन्दरः ॥ ३६ ॥

सत्यधर्मीया — मे पुत्रस्तव स्यालो बीभत्सुरर्जनो रक्षितव्य इत्यपि भूयोभूयः प्रार्थयित्वा कृता दत्ताऽनुज्ञा यस्य सः पुरन्दरः ॥ ३६ ॥

सार्धं सकलदिक्पालैर्लब्धवज्रः पुरं ययौ ।
पुरन्दरं सदिक्पालं विसृज्य यदुनन्दनः ॥ ३७ ॥

सत्यधर्मीया — सकलदिक्पालैः सार्धं लब्धवज्रः कृष्णात्पुरममरावतीं ययौ ॥३७॥

गरुडं प्राह कौरव्य यास्यामो द्वारकामिति ।
गोविन्दं सत्यभामां च पारिजातं च पादपम् ॥ ३८ ॥

सत्यधर्मीया — गरुडो गोविन्दं सत्यभामां च पारिजातं पादपं च ॥३८॥

गरुडः पन्नगरिपुर्लीलयैव वहन् ययौ ।
सम्प्रविश्य पुरीं रम्यां द्वारतोरणभूषिताम् ॥ ३९ ॥

सत्यधर्मीया — पन्नगरिपुर्लीलयैव स्वान्तर्यामिभगवल्लीलयैव वहन् ययौ । न स्वतः पतत्त्रिणः समर्थता । उक्तं चोद्योगपर्वाणि । विष्णुरुवाच । अहमेवात्मनाऽत्मानं वहामि त्वां च धारये । इमं तावन्ममैकं त्वं बाहुं सव्यतरं वह । स्वहस्तन्यस्तभारेऽभूद्वासवस्नेहकारणात् । निपपातेत्यारभ्य क्षन्तुमर्हसीत्यन्तेन विश्वम्भरसर्वस्वादिकं सलघिमानं चकारेति लीलयैवेति वा ॥ ३९ ॥

पताकामालिनीं दिव्यां सिक्तसंमृष्टभूतलाम् ।
ऊढोपायनताम्बूलस्रग्गन्धकलशाक्षतैः ॥ ४० ॥

सत्यधर्मीया — ऊढा उपायनाक्षतान्ता यैस्तैः ॥ ४० ॥

उपस्थितैर्यदुश्रेष्ठैः पूजितश्चाभिवन्दितः ।
तूर्यमङ्गलनिर्घोषैर्वेदस्वाध्यायनिःस्वनैः ॥ ४१ ॥

सत्यधर्मीया — उपस्थितैर्यदुश्रेष्ठैः पूजितोऽभिवन्दितश्च ॥ ४१ ॥

प्रविवेश सभां दिव्यां सुधर्मां वृद्धसेविताम् ।
आहुकं वसुदेवं च बलभद्रं तथाऽग्रजम् ॥ ४२ ॥

सत्यधर्मीया — दिव्यां दिवि भवामेव अत्रायाताम् ॥ ४२ ॥

अभिवाद्य यथान्यायं पूजितस्तैर्यथोचितम् ।
उपविष्टः सभामध्ये काञ्चने परमासने ॥ ४३ ॥

सत्यधर्मीया — यथान्यायमभिवाद्य तैर्यथोचितं स्वयं पूजितश्च ॥ ४३ ॥

रराज राजशार्दूल बृहस्पतिपुरोगमैः ।
लोकपालैरुपासीनैर्दिवि वज्रधरो यथा ॥ ४४ ॥

सत्यधर्मीया — बृहस्पतिः पुरोधाः । तत्पुरोगमैस्तदाद्यैर्लोकपालैरुपासीनैर्दिवि वज्रधर इन्द्रो यथा तथा सभामध्ये काञ्चने परमासने उपविष्टो रराज । ननु पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिमिति गीतायां बृहस्पतेः पुरोधोऽग्र्यत्वम् । तथाऽन्यत्र च वसिष्ठस्य पुरोहितवैशिष्ट्यमुच्यते । तत्र कथं समाधिरिति चेत् । दैवपुरोधसां मध्ये बृहस्पतिर्मानुष-पुरोधसां वसिष्ठ इति विवेकसम्भवात् । यथोक्तमेकादशतात्पर्ये । वसिष्ठोऽभ्यधिकस्तेषां मानुषाणां पुरोधसामिति त्रैकाल्य इति । प्रसङ्गादिदमुक्तमिति ज्ञेयम् ॥ ४४ ॥

प्राङ्गणे सत्यभामायाः पारिजातं महाद्रुमम् ।
स्थापयामास गोविन्दः सर्वतो मणिकुट्टिमे ॥ ४५ ॥

सत्यधर्मीया — सर्वतः परितो मणिकुट्टिमे मणिनिबद्धभूमौ ॥ ४५ ॥

आयान्तं देवकीपुत्रं योषित्सार्थेन भूरिणा ।
श्रुत्वा द्रष्टुमुपाजग्मुः सकला यादवस्त्रियः ॥ ४६ ॥

सत्यधर्मीया — औत्सुक्यातिशयेन पुरत एव हरिसदः स्थितिमिव स्थापनं सुरतरो-स्तरुण्या अङ्गण उक्त्वा तत्पूर्वरङ्गं सङ्गमयन्नाह ॥ **आयान्तमिति** । योषित्सार्थेन शतोत्तर-षोडशसहस्रस्त्रीसमूहेन भूरिणैवंरूपेण बहुलेन सुवर्णादिना सह वा । आयान्तमागच्छन्तं तथा। नरकासुरलाभविनाशकमिति आयस्यान्तो विनाशो येन तमित्यर्थः । आयास्यान्तो निवासः कोशस्तं वा । अन्तः स्थानं स्थलं वासः प्रवेश इति चोच्यत इति बृहद्भाष्योक्तेः । श्रुत्वा तं द्रष्टुं सकलयादवस्त्रिय उपाजग्मुः ॥ ४६ ॥

वसुदेवस्तु कौरव्य रोहिण्याद्याः स्त्रियोऽखिलाः ।
आजग्मुः केशवं द्रष्टुं जितशत्रुमनामयम् ॥ ४७ ॥

सत्यधर्मीया — रोहिण्याद्या रोहिणी बाल्हीकपुत्र्येवाद्या यासां ताः । यथोक्तं बृहद्भाष्ये । बाल्हीकस्तु कौरव्यः । बाल्हीकपुत्री रोहिणी । अतो बलभद्रः कौरव्यायणीपुत्र इति । स्त्रियो वसुदेवपत्न्यः ॥ ४७ ॥

स दृष्ट्वा मातरो विष्णुर्देवक्या सह सङ्गताः ।
चक्रे प्रणाममाशीर्भिस्ताश्च तं प्रत्यपूजयन् ॥ ४८ ॥

सत्यधर्मीया — देवक्या साक्षाज्जनन्या सह दृष्ट्वा ताभ्यः प्रणामं चक्रे ता मातरोऽप्याशीर्भिः प्रत्यपूजयन् ॥ ४८ ॥

रुग्मिण्याद्यास्तथा सप्त महिष्यः कृष्णवल्लभाः ।
प्रणेमुर्देवमभ्येत्य दिव्यरूपाः स्वलङ्कृताः ॥ ४९ ॥

सत्यधर्मीया — सप्तमहिष्यो नगरगा दिव्यरूपाः स्वभावतः ॥ ४९ ॥

रेवती रामदयिता त्रिवक्रा च यशस्विनी ।
एकाङ्गना च तन्वङ्गी चित्रा च वरवर्णिनी ॥ ५० ॥

सत्यधर्मीया — रामदयिता बलाबला त्रिवक्रा । एकाङ्गनेति दुर्गानाम । तन्वङ्गी कोमलाङ्गी वा तन्नाम्नी काचना वा चित्रा सुभद्रा । सुभद्रा चित्रा तारेति विश्वः । अनुत्पन्नरजाः श्यामा तदृष्टा वरवर्णिनीत्यभिधानाद्वरवर्णिनी सद्यो दृष्टरजस्का । काचित्तन्नाम्नीति केऽपि ॥ ५० ॥

अन्याश्च कुरुशार्दूल भोजवृष्ण्यन्धकस्त्रियः ।
आनीतप्रमदासार्थं जिशत्रुमनामयम् ॥ ५१ ॥

सत्यधर्मीया — आनीतः प्रमदानां सार्थो येन तम् ॥ ५१ ॥

गोविन्दं सत्यभामां चाप्यानीतममरद्रुमम् ।
प्रीत्युत्फुल्लमुखाः सर्वे कौतुकाद् द्रष्टुमाययुः ॥ ५२ ॥

सत्यधर्मीया — गोविन्दं सत्यभामां चानीतममरद्रुममपि । चापिन्या आनीतम् । चापं धृत्वा समरं कृतवतीति विदितवृत्ताः प्रीत्युत्फुल्लमुखाः सर्वाश्च सर्वे च सर्वे कौतुकाद्द्रष्टुमाययुः ॥ ५२ ॥

ताः समेता यथाजोषं लाजप्रसवतण्डुलैः ।
स्पृष्ट्वा मूर्ध्नि मुकुन्दस्य जग्मुः स्वं स्वं निवेशनम् ॥ ५३ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे सप्तषष्टिरध्यायः ॥

सत्यधर्मीया — लाजाश्च भ्रष्टव्रीहयः । लाजाः स्युर्भ्रष्टधान्येषु लाजः स्यादार्द्र तण्डुलः । उशीरे लाजमुद्दिष्टमिति विश्वः । प्रसवाः पुष्पाणि फलानि च । प्रसवस्तु फले पुष्प इत्यमरः । तण्डुलैः कृष्णस्य मूर्ध्नि स्पृष्ट्वा विकीर्येति यावत् । स्वं स्वं निवेशनं गृहं जग्मुः ॥ ५३ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे सप्तषष्टिरध्यायः ॥ १०-६७ ॥

॥ अथ अष्टषष्टिरध्यायः ॥

श्री शुक उवाच —

आराध्य देवदेवेशं शङ्करं लोकशङ्करम् ।
तपसा तोषयित्वा तं कैलासगिरिवासिनम् ॥ १ ॥

रुग्मिण्यां तनयं लेभे दग्धं कामं पुनर्हरिः ।
वीरं प्रद्युम्ननामानं रूपौदार्यगुणान्वितम् ॥ २ ॥

सत्यधर्मीया — ॥ हरिः ॐ ॥ किङ्करादपि शङ्कराद्वरवरणे तत्सम्माननीयता भवति जगतीति जगदीशोऽपि मानिन्या सह तपोऽचरदिति वा येन यस्य कामस्य हानिस्तेनैव तस्य । कामं पुनस्तनुभवं चेदियदतिशयितः । स्वरूपनाशः कर्तव्य इति मनसा तपोऽचरदिव हरिरभूत्तथा जातः पोतः शम्बरमम्बरचरमसुरममीमरदित्यादि प्रतिपाद्यतेऽस्मिन्नध्याये । तत्रापि शुकः साम्मुग्ध्येनामुग्धं राजानं प्रति वक्तीति वक्ति ॥ **श्रीशुक इति** । श्लोकद्विकमेकान्वयम् । हरिर्लोकशङ्करम् । न स्वस्येत्यनेनैव ध्वन्यते । आराध्यो यो देवदेवः स्वयमेवेशो यस्य तम् । कैलासाख्यो गिरिस्तस्मिन्वासोऽस्यास्तीति तम् । यद्वा कैलासश्च गिरिर्वायुश्चासावाश्रित्य वर्तमानम् । कैलासेन सहितो गिरिस्तस्मिन्निति वा । एवञ्चेन्न द्वन्द्वाभ्यर्हितमादिप्रसक्तिरिति बोध्यम् । तपसा तोषयित्वा । अतो नाराध्येत्यतिरेकशङ्केति सन्तोष्टव्यम् । सामान्य-विशेषभावादिश्चागतिका गतिः । तेनैव दग्धं कामं पुनः प्रद्युम्नेति नाम यस्य तम् । रूपौदार्यगुणान्वितं वीरं तनयं रुक्मिण्यां प्रथमप्रमदायां लेभे प्राप ॥ १-२ ॥

पुत्रार्थमीश्वरं दृष्ट्वा स्वयं लब्धवरो हरिः ।
अवापकीदृशं पुत्रं किं नामानं वदस्वमे ॥ ३ ॥

सत्यधर्मीया — ईश्वरं हरं पुत्रार्थम् । सोऽयं मनुष्यलोकः पुत्रेण जय्यो नापुत्रस्य लोकोऽस्तीत्यादेर्लोकनायकोऽपि लोकमनुकुर्वन् । दृष्ट्वा तेन लब्धो वरो येन स सन् कीदृशं पुत्रम् । यद्यपि सामान्यतो रूपौदार्यगुणान्वितमिति प्रकार उक्तस्तथाऽपि विविच्य ज्ञातुमयं प्रश्न इति ज्ञेयम् । नाम्नः पूर्वं प्रद्युम्ननामानमित्युक्तेः पुनः किन्नामानमिति परीक्षिदपरीक्षक इव

कथमप्राक्षीदिति चेत्सत्यम् । किन्निमित्तं नाम प्रद्युम्नेति यस्य तं किन्नामानमित्यर्थपरत्वोपपत्तेः । हे स्व स्वामिन्मे वद । स्वश्चासावहं च तस्य । प्रकाशमानः सन्वदेत्यर्थे भासमानोपसम्भाषेत्यात्मनेपदता वा ॥ ३ ॥

कामस्तु वासुदेवांशो दग्धः प्राग् रुद्रमन्युना ।
देहोपपत्तये भूयस्तमेव प्रत्यपद्यत ॥ ४ ॥

सत्यधर्मीया — रुद्रमन्युना मामपि वशयितुमायातो "मायात इति कोपेन देवदेवेन शूलिना । खेदितेन कृतोऽनङ्ग" इति हरिवंशोक्तेः । यः प्राग्दग्धः कामस्तस्य पुनर्देहोपपत्तये भूयस्तमेव प्रत्यपद्यत गतवान् ॥ ४ ॥

स एव जातो वैदर्भ्यां कृष्णवीर्यसमुद्भवः ।
प्रद्युम्न इति विख्यातः सर्वतोऽनवमः पितुः ॥ ४ ॥

सत्यधर्मीया — वैदर्भ्यां कृष्णवीर्यसमुद्भवः सन् स एव जातः । नामागतिप्रकारमाह ॥ **वासुदेवांशः प्रद्युम्न इति विख्यात इति** । वासुदेवादिव्यूहमध्ये योंऽश एको भागः प्रद्युम्नस्तदावेशित्वात् प्रद्युम्न इति विख्यात इत्यर्थः । पितुः सर्वतः प्रकारसर्वस्वेनानवमः समः पुत्रीभवनयोग्य इति यावत् । उत्तरत्र पितुर्भाविनां नवानां सत्त्वादयं दशम इत्यनवम इत्यप्यर्थः ॥ ४ ॥

तं शम्बरः कामरूपी हृत्वा तोकमनिर्दशम् ।
स विदित्वाऽऽत्मनः शत्रुं पास्योदन्वत्यगाद् गृहम् ॥ ५ ॥

सत्यधर्मीया — शम्बरोऽनिर्दशमनतिक्रांतदशदिनमात्मनः स्वस्य । तं सप्तरात्रे सम्पूर्णे निशीथे सूतिकागृहात् । जहार कृष्णस्य शिशुम् । विदितं तच्च कृष्णस्य देवमायानुवर्तिनः । ततो न निगृहीतः स । समृत्युना परीतायुरित्युक्त्वा दोर्भ्यामुत्क्षिप्य नगरं स्वं निनाय महासुरः । अनपत्या तु तस्यासीद्भार्या रूपगुणान्विता । नाम्ना मायावती नामेत्यादिना हरिवंशे परत्वादेतदनुरोधेन मीनलीलत्वं दाशदानादिकं ग्रन्थान्तरसंवादाच्च ग्राह्यमिति नानुक्तिदोषः । शत्रुं शातयितारं विदित्वा तं तोकमर्भकं हृत्वा । ननु सति

भगवति सोऽरिष्टं गत्वा कथं हृतवानित्यत आह ॥ **कामरूपीति** । कामेन स्वेच्छया रूप-मस्यास्तीति कामेन हरीच्छया चेत्यपि स इत्यर्थः । ज्ञातैत्कर्मापि कृष्णस्तूष्णीकस्तन्मारणार्थं कुमारविषय इति तात्पर्यम् । उदन्वत्युदधौ प्रास्य क्षिप्त्वा गृहं स्वमगाद्ययौ ॥ ५ ॥

तं निर्जगार बलवान् मीनः सोऽप्यपरैः सह ।
वृतो जालेन महता गृहीतो मत्स्यजीविभिः ॥६॥

सत्यधर्मीया — बलवान्मीनो निर्जगार । मृत्वाऽपि मत्केतनकीर्तिव्यञ्जकः स्यामिति तदभिप्राय इत्यभिप्रायोऽस्य विभावनीयः । स मीनोऽपरैः सजातीयैरितरैर्मीनैः सह महता स्वेच्छाछेदनीयेन जालेनानायेन । जालं गवाक्ष आनाय इति विश्वः । आवृतो मत्स्यजीविभिर्दाशैर्गृहीतः ॥ ६ ॥

तं शम्बराय कैवर्ता उपाजह्रुरुपायनम् ।
सूदा महानसं नीत्वाऽवद्यन् स्वधितिनाऽद्भुतम् ॥ ७ ॥

सत्यधर्मीया — तमुपायनं शम्बराय कैवर्ताः । कैवर्तो दाशधीवरावित्यमरः । कैवर्तेत्यपि पठन्ति । दाशा उपाजह्रुः । सूदाः । सूदस्तु सूपकार इति विश्वः । महानसं पाक स्थानम् । अद्भुतं मीनं स्वधितिना कुठारशेषेण । परश्वधः कुठारः स्यात्परशुः स्वधितिस्तथेत्यभिधानम् । अवद्यन् अवाद्यन् अखण्डयन् । दो अवखण्डन इति धातोः । द्वयोः कुठारः स्वधितिः परशुश्च परश्वध इत्यमरः ॥ ७ ॥

दृष्ट्वा तदुदरे बालं मायावत्यै न्यवेदयत् ।
नारदोऽकथयत् सर्वं तस्याः शङ्कितचेतसः ॥ ८ ॥

सत्यधर्मीया — तदुदरे । उदरं च पुरो वर्तेतान्तः किञ्चित्किं वै तदेवैवमिति तद्विषयके संशये । उदरं संशयः प्रोक्तः परिनिष्ठा तु निश्चय इति तात्पर्योक्तिः । तदुदरे मत्स्यकुक्षौ बालं दृष्ट्वा सूदाः । मायावतीति रतिरेव शापत्तद्गृह एवावात्सीदतत्सङ्ग॥ यथोक्तं हरिवंशे नारदरौक्मिणेयसंवादे –

'सप्तरात्रे त्वसम्पूर्णे सूतिकागारमध्यगः ।

वधार्थं शम्बरेण त्वं ह्रियमाणोऽस्युपेक्षितः ।
केशवेन महाबाहो देवकार्यार्थसिद्धये ।
एषा मायावती नाम भार्या वै शम्बरस्य तु ।
रतिं तं विद्धि कल्याणीं तव भार्यां पुरातनीम् ।
तव संरक्षणार्थाय शम्बरस्य गृहेऽवसत् ।
मायां शरीरजामस्य मोहनार्थं दुरात्मनः ।
रतेरुत्पादनार्थाय प्रेषयत्यनिशं तदे'त्यादिना ।

तस्यै न्यवेदयत् ॥ ८ ॥

बालस्य तत्त्वमुत्पत्तिं मत्स्योदरनिवेशनम् ।
सा च कामस्य वै पत्नी रतिर्नाम यशस्विनी ॥ ९ ॥

पत्युर्निर्दग्धदेहस्य देहोत्पत्तिं प्रतीक्षती ॥ १० ॥

सत्यधर्मीया — शङ्कितचेतसस्तस्या मायावत्या नारदो बालस्य तत्त्वं मुख्यं रहस्यं कामत्वमिति वा उत्पत्तिं मत्स्योदरनिवेशनमित्यादिकं सर्वमकथयत् । सा च कामस्य पत्नी रतिः प्रतीक्षती प्रतीक्ष्यमाणा रुद्रोक्तं समयम् । यथोक्तं तत्रैव – "रत्या प्रसादितो देवः कामपत्न्या त्रिलोचनः" इत्यारभ्य

"विष्णोर्मानुषदेहस्तु द्वारकायां भविष्यति ।
तस्य पुत्रस्तु ते भर्ता भविष्यति न संशयः ।
तद्गच्छ शम्बरगृहं भार्या मायावती भव ।
मायारूपप्रतिच्छन्ना शम्बरं मोहयिष्यसि ।
तत्र त्वमात्मनः कान्तं बालरूपं विवर्धय ।
प्राप्तयौवनदेहः स शम्बरं निहनिष्यति ।
ततस्त्वया सहानङ्गो द्वारकां वै गमिष्यति ।
रमिष्यति त्वया सार्धं शैलपुत्र्या त्वहं यथा"

इत्यन्तेन ।

''कामपत्नी प्रणम्याथ देवदेवमुमापतिम् ।
जगाम शम्बरगृहं कालस्यान्तं प्रतीक्षती'' इति च ॥ ९,१० ॥

निरूपिता शम्बरेण सा सूपौदनसाधने ।
कामदेवं शिशुं बुद्ध्वा चक्रे स्नेहं सदाऽर्भके ॥ ११ ॥

सत्यधर्मीया — सुपौदनसाधने पाककर्मणि शिशुं कामदेवं नारदोक्त्या बुद्ध्वाऽर्भके सदा स्नेहं चक्रे ॥ ११ ॥

नातिदीर्घेण कालेन स कार्ष्णी रूढयौवनः ।
जनयामास नारीणां वीक्षन्तीनां च विभ्रमम् ॥ १२ ॥

सत्यधर्मीया — कृष्णस्यापात्यं कार्ष्णिः । नातिदीर्घेणाल्पीसया कालेन रूढं यौवनं यस्य सोऽभवत् । रसायनमहिम्ना । यथोक्तं तत्रैव –

''रसायनप्रयोगैश्च शीघ्रमेनमवर्धयदिति ।
व्यधत्त पुत्रमुत्तमं मनोभवं पुरातनम् ।
चतुस्तनोर्हरेः प्रभोस्तृतीयरूपसंयुतः ।
ततस्तदाव्हयोऽभवत्स रुग्मिणीसुतो बली ।
पुरैव मृत्यवेऽवदत्तमेव शम्बरस्य हि ।
प्रजातमब्जजाङ्कजस्तवान्तकोऽयमित्यपि ।
स मायया हरेः सुतं प्रगृह्य सूतिकागृहात् ।
अवाक्षिपन्महोदधावुपेक्षितोऽरिपाणिना ।
तमग्रसज्जलेचरः स दाशहस्तमागतः ।
कुमारमस्य तूदरे निरीक्ष्य शम्बरे ददुः ।
विपाट्य मत्स्यकोदरं स शम्बरः कुमारकम् ।
न्यवेदयन्मनोभवप्रियाकरे सुरूपिणम् ।
अनङ्गतामुपागते पुरा हरेण साङ्गजे ।
वशं विरिञ्चशापतो जगाम शम्बरस्य हि ।

पुरा हि पञ्चभर्तृतां निशम्य कञ्जजोदिताम् ।
जहास पार्षतात्मजां शशाप तां ततस्त्वजः ।
भवासुरेण दूषितेति सा ततो हि मायया ।
पिधाय तां निजां तनुं जगाम चान्यया सुरम् ।
गृहेपि साऽसुरस्थिता निजस्वरूपतोऽसुरम् ।
न गच्छति स्म सा पतिं निजं समीक्ष्य हर्षिता ।
रसायनैः कुमारकं व्यवर्धयद्रतिः पतिम् ।
सुपूर्णयौवनोऽभवच्चतुर्भिरेव वत्सरैः ।
पतिं सुपूर्णयौवनं निरीक्ष्य तां विलज्जतीम् ।
उवाच कार्ष्णिरम्ब ते कुचेष्टितं कथं त्विति ।
जगाद साऽखिलं पतिं तदाऽस्य जन्म चागतिम्''

इत्याचार्योक्तकथाऽत्रानुसन्धेया । वीक्ष्यतीनां वीक्ष्यमाणानां विभ्रमं मनोविनोदम् ॥१२॥

सा तं पतिं पद्मदलायतेक्षणं प्रलम्बबाहुं नरलोकसुन्दरम् ।
सव्रीडहासोत्तमविभ्रमेक्षितैः प्रीत्योपतस्थे रतिरात्मनो धनैः ॥ १३ ॥

सत्यधर्मीया — सा रतिः पद्मदलायते ईक्षणे यस्य तम् । प्रलम्बौ बाहू यस्य तं नरलोके सुन्दरस्तं सव्रीडो यो हासः स चोत्तमो विभ्रमो विलासस्तद्युक्तानीक्षितानि पुनःपुनरवलोकनानि तैस्तदात्मभिरात्मधनैः प्रीत्या तं पतिमुपतस्थे ॥ १३ ॥

तामाह भगवान् कार्ष्णिर्मातस्ते मतिरन्यथा ।
मातृभावमतिक्रम्य वर्तसे कामिनीव मे ॥ १४ ॥

सत्यधर्मीया — हे मातस्तव मतिरन्यथा कुत इति कार्ष्णिस्तां प्राह । तमेवान्यथाभावं विवृणोति ॥ **मातृभावमिति** । मे मम विषये मातृभावं तत्त्वमतिक्रम्य कामिनीव वर्तस इति । यद्यप्यवद्यावमेति निपातितः शब्दोऽवतेर्मप्रत्यये निष्पन्न इति व्याख्या कौमुद्याम् । अवमे नीचे । कामिनी सती वर्तस इति वा । वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोरिति स्मरणात् । चतुर्थतात्पर्ये च । वधिमवधिमल्लोपेनेति । तथाऽप्यवमीयत इत्यवम इत्यमरसुधायां व्याख्यातमुपायान्तरमेतदिति ॥ १४ ॥

रतिरुवाच —

भवान् नारायणसुतः शम्बरेणाहृतो गृहात् ।
अहं तेऽधिकृता पत्नी रतिः कामो भवान् प्रभो ॥ १५ ॥

सत्यधर्मीया — इति पतिगिरं श्रुत्वा रतिरतीवहृष्टा स्वरत्युपयोगिनीं कथां कथयति ॥ **भवानिति** । गृहात् । कारागृहात् । अधिकृता विवाहिता नीयते इति वा । अत्र महानसेऽधिकृता । अनेन दत्ताधिकारेति वा । रतिस्तन्नाम्नी पत्नी भवान्कामस्तद्रूपः ॥ १५ ॥

एष त्वां निर्दशं सिन्धावक्षिपच्छम्बरोऽसुरः ।
मत्स्योऽग्रसीत् तदुदरादिह प्राप्तो भवान् प्रभो ॥ १६ ॥

सत्यधर्मीया — निर्दशं सप्तदिनकं तदुदराद्विपाटितान्मत्स्यकुक्षेः ॥ १६ ॥

तमिमं जहि दुर्धर्षं दुर्जयं शत्रुमात्मनः ।
मायाशतविदं त्वं च मायाभिर्मोहनादिभिः ॥ १७ ॥

सत्यधर्मीया — मायाशतविदं बहुमायाज्ञं मोहनादिभिर्मायाभिर्दुर्धर्षं दुर्जयं चात्मनस्तमिमं शत्रुं जहि ॥ १७ ॥

परिशोचति ते माता कुररीव गतप्रजा ।
पुत्रस्नेहाकुला दीना विवत्सा गौरिवातुरा ॥ १८ ॥

सत्यधर्मीया — द्वारकावृत्तं किञ्चित्कथयति । गतप्रजा हृतत्वद्रूपापत्ययुक्ता ते माता रुक्मिणी कुररीव कुक्रोशयोषेव । गतप्रजेति वा विवत्सेति वाऽत्राप्यन्वेति । कुक्रोशः कुररी मत इति कोशः । पुत्रस्नेहाकुला । दृष्टान्तद्वयप्रदर्शनं गमनमनस्त्वरण इति मन्तव्यम् । आतुरा शोचति ॥ १८ ॥

प्रभाष्यैवं ददौ विद्यां प्रद्युम्नाय महात्मने ।
मायावती महामाया सर्वमायाविनाशिनीम् ॥ १९ ॥

सत्यधर्मीया — एवं प्रभाष्य महात्मने स्मरणमात्रेण विद्याग्रहणपाटवमाहात्म्यवते ।

नन्ववमेयं वामा कथं विद्यामदादिति चेन्न । तस्या मूलकलेवरेणैव सत्त्वादेतस्य मानुषतनुषा युक्तत्वाद्युक्तं स्मारणमिति । सर्वा याः शम्बरसम्बन्धिन्यस्ता विनाशयतीति सा तथा । सर्वा हिंसिकाश्च ता मायाश्च ता विनाशयतीति सा तां वा ॥ १९ ॥

स च शम्बरमभ्येत्य संयुगाय समाह्वयत् ।
अवष्टभ्यौष्ठमाक्षेपैः क्षिपन् सञ्जनयन् कलिम् ॥२०॥

सत्यधर्मीया — ननु च क्व वा द्वारका क्व च प्रसवः क्व वाऽयमसुरस्तथाऽपि ज्ञात्वोदधौ क्षिपन्नयं कथं बालमालक्ष्य न मम रिपुरयमिति जानन्हिंसितवानिति चेत् । भगवदुपेक्षणमेवैतदुपेक्षणमूलमिति तदप्रतिभानसम्भवात् । ध्वजपातनादिकं तदमात्य-तत्सेनाहननादिकं हरिवंशोक्तमनुसन्धेयम् । फलितमभिलपति ॥ **स चेति** । ओष्ठमधरम् । दन्तैरिति शेषः । अवष्टभ्यालम्ब्य विदस्येति यावत् । अवाच्चालम्बनाविदुर्ययोः अवात्स्थम्भे-रेतयोरर्थयोः सस्य षः स्यादिति षत्वम् । अनिदितामिति नलोपः । आक्षेपैराक्षिप्यते एभिरित्याक्षेपास्तिरस्कारास्तैः कलिं कलहं सञ्जनयन् समाह्वयत् ॥ २० ॥

सोऽधिक्षिप्तो दुर्वचोभिः पदाहत इवोरगः ।
निश्चक्राम गदापाणिरमर्षात् ताम्रलोचनः ॥ २१ ॥

सत्यधर्मीया — पदा हत उरग इव मूकस्य नासिकाप्रदर्शने यथा मर्षस्तथा गूढ-पात्वात्सर्पस्य पदा हतिरतीवकोपकारणमित्येवमुक्तिरिति ज्ञेयम् । सा स्त्री तु गतैवेयमेव मत्पाणिगृहीतीति गदापाणिरित्यनेन ध्वन्यते ॥ २१ ॥

गदामाविध्य तरसा प्रद्युम्नाय महात्मने ।
प्रक्षिप्य व्यनदन्नादं वज्रनिष्पेषनिष्ठुरम् ॥ २२ ॥

सत्यधर्मीया — वज्रनिष्पेषनिष्ठुरं वज्रयोः सतोरर्थो निष्पेषसङ्घर्षस्तज्जन्यो नादो लक्ष्यते तद्वत्कठोरस्तन्नादं व्यनददकरोत् । वज्रनिर्घोषेति पाठे स्फूर्जथुवन्निष्ठुरमित्यर्थः । अमरेऽपि स्फूर्जथुर्वज्रनिष्पेष इत्यपि पाठः । पिष्लृ सञ्चूर्णने । घञ् । इगुपधज्ञेति कः । निष्पेष-शब्दस्तदुत्थशब्दपर इति भानुः । स्फूर्जथुर्वज्रनिष्पेष इति हलायुधोऽपि ॥ २२ ॥

तामापतन्तीं भगवान् प्रद्युम्नो गदया गदाम् ।
अपास्य शत्रवे क्रुद्धः प्राहिणोत् स्वगदां नदन् ॥ २३ ॥

सत्यधर्मीया — प्रद्युम्न आपतन्तीं तां तदीयाम् । गदया स्वयाऽपास्य निरस्य पुनर्नदंस्तां गदां शत्रवे क्रुद्धः प्राहिणोत् ॥ २३ ॥

स च मायां समाश्रित्य दैतेयीं मयदर्शिताम् ।
निर्ममेऽश्ममयं वर्षं कार्ष्णौ वैहायसोऽसुरः ॥ २४ ॥

सत्यधर्मीया — दैतेयीं मयदर्शितां तत्कृतां दैत्येभ्यो दत्तां मायां समाश्रित्य वैहायसो गगनग इति तत्सम्बन्धी । असुरः कार्ष्णौ अश्ममय वर्षं निर्ममे ॥ २४ ॥

बाध्यमानोऽश्मवर्षेण रौग्मिणेयो महारथः ।
सत्वात्मिकां महाविद्यां सर्वमायोपमर्दिनीम् ॥ २५ ॥

सत्यधर्मीया — महारथो रौग्मिणेयोऽश्मवर्षेण बाध्यमानः सत्त्वात्मिकां महाविद्यां रतिप्रीतिसमीरितां निर्ममे ॥ २५ ॥

ततो गौह्यकगान्धर्वपैशाचोरगराक्षसीः ।
प्रायुङ्क्त शतशो दैत्यः कार्ष्णिर्व्यधमयत् स ताः ॥ २६ ॥

सत्यधर्मीया — गौह्यकी च कौबेरी चेत्येवमाद्या मायाः शतशः प्रायुङ्क्त ताः स कार्ष्णिर्व्यधमयत् ॥ २६ ॥

निशातमसिमुद्यम्य सकीरीटं सकुण्डलम् ।
शम्बरस्य शिरः कायात् ताम्रश्मश्रोजसाऽहरत् ॥ २७ ॥

सत्यधर्मीया — ताम्राणि श्मश्रूणि यस्मिंस्तत् सकिरीटं सकुण्डलं निशातमसिमुद्यम्य शम्बरस्य तच्छिरः कायाज्जहार ॥ २७ ॥

आकीर्यमाणो दिविजैः स्तुवद्भिः कुसुमोत्करैः ।
भार्ययाऽम्बरचारिण्या पुरं नीतो विहायसा ॥ २८ ॥

सत्यधर्मीया — स्तुवद्भिः स्तोत्रं कुर्वाणैर्दिविजैः कुसुमोत्करैः पुष्पसङ्घैः कीर्यमाणः सन् अम्बरचारिण्या भार्यया विहायसा गगनमार्गेण पुरं द्वारकां नीतः ॥ २८ ॥

अन्तःपुरवरं राजन् ललनाशतसङ्कुलम् ।
विवेश पत्न्या गगनाद् विद्युतेव बलाहकः ॥ २९ ॥

सत्यधर्मीया — ललनाशतं तद्बहुसहस्रं तेन सङ्कुलमन्तःपुरवरं गगनादवरुह्य विद्युता तटिता सह बलाहको मेघ इव पत्न्या सह विवेश । गगनेऽततीति गगनादिति प्रथमा वा । उत्तरश्लोकेनान्वयः ॥ २९ ॥

तं दृष्ट्वा जलदश्यामं पीतकौशेयवाससम् ।
प्रलम्बबाहुं ताम्राक्षं सुस्मितं रुचिराननम् ॥ ३० ॥

अलङ्कृतमुखाम्भोजं नीलवक्त्रालकालिभिः ।
कृष्णं मत्वा स्त्रियो भीता निलिल्युस्तत्र तत्र ह ॥ ३१ ॥

सत्यधर्मीया — स्त्रियोऽन्तःपुरस्थाः । जलदश्याममित्यादीनि विशेषणानि कृष्णसारूप्यं साधयन्ति भ्रमसाधनानीति ज्ञेयम् । नीलानां वक्त्राणमलकानामालयः पङ्क्तयस्ताभिरलङ्कृतं मुखाम्भोजं यस्य तं कृष्णं मत्वा लज्जया तत्र तत्र निलिन्युर्निलीना अभवन् ॥३०, ३१॥

उपधार्य शनैरीशद्वैलक्षण्येन योषितः ।
उपजग्मुः प्रमुदिताः सस्त्रीरत्नं शुचिस्मिताः ॥ ३२ ॥

सत्यधर्मीया — ईषद्वैलक्षण्येन किञ्चिद्विलक्षणलक्षणवत्तया शनैर्मन्दं स्वैरं वोपधार्य नायं श्रीकृष्ण इति निश्चित्य सस्त्रीरत्नं स्त्रीरत्नेन सहितं प्रमुदिताः सत्य उपजग्मुः समीपमापुः ॥ ३२ ॥

अथ तत्रासितापाङ्गी वैदर्भी वल्गुभाषिणी ।
अस्मरत् स्वसुतं नष्टं स्नेहस्नुतपयोधरा ॥ ३३ ॥

सत्यधर्मीया —— तत्र तत्समये योषित्परिषदि वा । असितापाङ्गी नीललोचना वैदर्भी वल्गुभाषिणी रुग्मिणी स्नुहेन स्नुतौ पयोधरौ कुचौ यस्याः सा । पयोधरः स्यात्कुचकोश-कारकेति विश्वः । नष्टं सूतिकागार एवादर्शनं गतं स्वसुतमस्मरत्सस्मार ॥ ३३ ॥

कोन्वयं नरवैडूर्यः कस्य वा कमलेक्षणः ।
धृतः कया वा जठरे केयं लब्धाऽथ केन वा ॥ ३४ ॥

मम चाप्यात्मजो नष्टो नीतो वा सूतिकागृहात् ।
एतत्तुल्यवयोरूपो यदि जीवति कुत्रचित् ॥ ३५ ॥

सत्यधर्मीया —— अयं नरवैडूर्यः कः कमलेक्षणः कस्य पुत्र इति शेषः । कया कामिन्या गर्भे धृत इयं कामिनी काऽथ केनोपायेन लब्धेति तर्कयन्ती तत्प्रकारेणातर्कय-दित्याह ॥ **ममेति** । नष्टो मृतः सूतिकागृहान्नीतो यदि कुत्रचिज्जीवति चेदेतत्समवयोरूपो भवेत् ॥ ३४,३५ ॥

कथं त्वनेन सम्प्राप्तं सारूप्यं शार्ङ्गधन्वनः ।
आकृत्याऽवयवैर्गत्या स्वरहासावलोकनैः ॥ ३६ ॥

सत्यधर्मीया —— परश्चेन्नैवंरूपः स्यादित्यूहयति । अनेन शार्ङ्गधन्वनः सारूप्यं तुशब्द ईषव्द्यत्याससूचकः । प्राप्तं तदेव देव सारूप्यं देवी विविच्य वक्ति ॥ **आकृत्येत्यादिना** ॥३६॥

स एव वा भवेन्नूनं यो मे गर्भे धृतोऽर्भकः ।
अमुष्मिन् प्रीतिरधिका वामः स्फुरति मे भुजः ॥ ३७ ॥

सत्यधर्मीया —— यो मे मया गर्भे धृतः स एवायं भवेत् । नूनं निश्चयेन । कुत इत्यत आह ॥ **अमुष्मिन्निति** । अधिका प्रीतिर्भवति न भवेदन्यत्रैवमिति भावः । मे वामो भुजः स्फुरति । अन्यथैवं मङ्गलसूचकं शकुनमपि न स्यात् ॥ ३७ ॥

एवं मीमांसमानायां वैदर्भ्यां देवकीसुतः ।
देवकीवसुदेवाभ्यां नारदेन महात्मना ॥ ३८ ॥

अन्यैश्च यादवश्रेष्ठैरुत्तमश्लोक आविशत् ।
विदितार्थोऽपि भगवांस्तूष्णीमास जनार्दनः ॥ ३९ ॥

सत्यधर्मीया — वैदर्भ्यां रुग्मिण्यामेवं मीमांसमानायां विचारयन्त्यां सत्यां देवकी-वसुदेवाभ्यां नारदेन च महात्मनाऽन्यैश्च यादवश्रेष्ठैश्च सहाविशत् । तदन्तःपुरमिति शेषः । विदितार्थोऽपि जनार्दनस्तूष्णीमज्ञातैतत्क इवास ॥ ३८,३९ ॥

नारदोऽकथयत् सर्वं शम्बराहरणादिकम् ।
तच्छ्रुत्वा महदाश्चर्यं कृष्णान्तःपुरयोषितः ॥ ४० ॥

सत्यधर्मीया — नारदः शम्बराहरणादिकं शम्बरेण दैत्येनाहरणमपहरण एवादिर्यस्य तत्सर्वं वृत्तम् । शम्बरं जलं प्रत्याहरणं क्षेपः शम्बराज्जलादाहरणं गिलनं मीनेनैवेति शम्बरेणानन्तरं शम्बरात् मत्स्यादाहरादिकमिति वा । शम्बरं सलिले वित्ते लोध्रव्रत विशेषयोः । शम्बरो दैत्यहरिणमत्स्यशैलजलान्तर इति विश्वः । अकथयद्यत्तन्महदाश्चर्यं महतामाश्चर्यमिति वा । कृष्णान्तःपुरयोषितः ॥ ४० ॥

देवकीवासुदेवौ च कृष्णरामौ तथा स्त्रियः ।
दम्पती तौ परिष्वज्य रुग्मिणी च ययुर्मुदम् ॥ ४१ ॥

सत्यधर्मीया — देवकीवसुदेवौ कृष्णरामौ च तथा स्त्रियोऽन्याश्च रुग्मिणी च तौ दम्पती परिष्वज्य मुदं ययुः ॥ ४१ ॥

नष्टं प्रद्युम्नमायातमाकर्ण्य द्वारकौकसः ।
अहो मृत इवायातो बालो दिष्ट्येति चाब्रुवन् ॥ ४२ ॥

सत्यधर्मीया — द्वारकौकसो दूरागारा नष्टं प्रद्युम्नमायातमाकर्ण्य बालो मृत आयातश्चेद्यथा तथाऽऽयातः । अहो आश्चर्यम् । दिष्ट्या परमसुखमित्यब्रुवंश्च ॥ ४२ ॥

यं वै मुहुः पितृसरूपनिजेशभावा तन्मातरो मनसिजार्द्रहृदोरुभावाः ।
चित्रं न तत् खलु रमास्पदबिम्बभूते कामे स्मरेतेऽक्षविषये किमुतान्यनार्यः ॥ ४३ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे अष्टषष्टिरध्यायः ॥

सत्यधर्मीया — नारीणां विभ्रमं जनयामासेति यदुक्तं तदित्थं चेदपि नैतस्मिन्स्मरे चित्रं तदिति सहेतुकमाह ॥ **यमिति** । यं दृष्ट्वा तन्मातरः कृष्णपत्न्यः पितृसरूप इति कृष्ण-समानरूप इति निजेशे स्वस्वामिनि कृष्णे भावो मनो यासां तास्तथा । स्वरमणारमणेच्छवो मुहुः पुनर्मनसिजार्द्रं च तद्धृचेतना अभवन् । तच्चित्रं न खलु निश्चयेन । तत्र तन्त्रं रमास्पदबिम्बभूते रमाया आस्पदं हरिस्तस्य बिम्बभूते प्रतिबिम्बे । बिम्बं फले बिम्बिकायाः प्रतिबिम्बे च मण्डल इति विश्वः । आस्पदेति । स्मरे साक्षादक्षविषये यत्स्मरणादेवास्मरणं शरीरे नारीणां भवति किं वक्तव्यमेवं चेदिति भावः । अन्यनार्यः कामे कमनीयेऽक्षविषये उरुर्नानाविधो भावोऽभिप्रायो वा चेष्टो वा मनो वा यासां ताः । भवेयुरिति किं वक्तव्यमिति भावः । वैलक्षण्येन न नाथ इति मतिमतीनां तथा नारदोपदिष्टवृत्तानां समाश्लिष्टकार्ष्णीनां कृष्णानां तन्मातृणां एवंविधमोहस्यानूहास्पदत्वादप्रत्यवायश्च तासामित्यर्थो न क्लिष्ट इति मन्तव्यम् । भावः स्वभावाभिप्रायचेष्टासत्तात्मजन्मसु । क्रियालीलापदार्थेषु बुधजन्तुविभूति-ष्विति विश्वः ॥ ४४ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे अष्टषष्टिरध्यायः ॥ १०६८ ॥

॥ अथ एकोनसप्ततितमोऽध्यायः ॥

श्रीशुक उवाच —

पौण्ड्रको नाम राजा वै तस्मिन् काले कुरूद्वह ।
द्वारकां वृष्णिनिलयां निरुध्य बहुसैनिकः ॥ १ ॥

मर्दयामास कृष्णेन विदित्वा रहितां निशि ।
तं कामपालः शैनेयो वसुदेवोद्धवादयः ॥ २ ॥

सत्यधर्मीया — ॥ हरिः ॐ ॥ हरिसमताममतानां दशोद्दशी धुरीति विवरीतुं तथा मन्तुः पौण्ड्रकवासुदेवस्य यादववासुदेवेन कृतां क्रियां वक्त्यत्राध्याये । तत्रादौ बदरिकाश्रमं गतवति गरीयसी नगरी गृहीतुं सुशकेति मन्वानो द्वारकामगादित्याह ॥ **पौण्ड्रक इति ।** तस्मिन्काले बहुसैनिको बहवः सैनिका यस्य सः । कृष्णेन रहितां विदित्वा वृष्णिनिलयां निशि रात्रौ निरुद्ध्यार्दयामास । तं पौण्ड्रकं कामपालो हालयुधो वसुदेवश्चोद्धवश्चादी येषां ते ॥ १,२ ॥

उग्रसेनश्च कौरव्य ये चान्ये यदुपुङ्गवाः ।
तर्पयामासुरायान्तं कालयोग्यमिवातिथिम् ॥ ३ ॥

सत्यधर्मीया — हे कौरव्य । अतिथिं काले यथा तथाऽऽयान्तं तं प्रति शरीरानिति शेषः । अर्पयामासुः ॥ ३ ॥

राजोवाच —

कश्चासौ पौण्ड्रको नाम कस्मिन् देशे महीमतिः ।
कस्य वा तनयो ब्रह्मन् सर्वमेतद् वदस्व मे ॥ ४ ॥

सत्यधर्मीया — कः किंकुलः क वा राजा कस्य तनयो ब्रह्मन् एतत्सर्वं मे वदस्व ॥ ४ ॥

श्रीशुक उवाच —

अपुत्रः काशिराजो वै कन्यां सुतनुसञ्ज्ञिताम् ।
प्रायच्छद् वसुदेवाय राज्यशुल्कां कुरूद्वह ॥ ५ ॥

सत्यधर्मीया — अपुत्रः पुत्ररहितः काशीति नगरनाम । सुतनुरिति सञ्ज्ञिता ताम् । राज्यमेव शुल्कं यस्याः सा ताम् । वसुदेवाय प्रायच्छद्ददौ ॥ ५ ॥

तत्र जज्ञे महाबाहुर्दिवाकरसमद्युतिः ।
कुमारः पौण्ड्रको नाम बलवीर्यमदान्वितः ॥ ६ ॥

सत्यधर्मीया — तत्र सुतनौ पौण्ड्रको नाम कुमारो जज्ञे उदभूत् ॥ ६ ॥

वसुदेवसुतत्वाच्च वासुदेवेति शब्दितः ।
जाते तस्मिन् महाराजो वसुदेवो महाद्युतिः ॥ ७ ॥

राज्यं तस्मिन् समारोप्य सकोशबलवाहनम्
उवाह कंसावरजां देवकीं देवतोपमाम् ॥ ८ ॥

सत्यधर्मीया — वासुदेव इति नाम चैतस्मादित्याह ॥ **वसुदेवसुतत्वादिति** । शब्दितः सञ्जातशब्दस्तस्मिञ्जाते सति शुल्कत्वेन सङ्कल्पितं राज्यं तस्मिन्पौण्ड्रके समारोप्य । तदारोपणं न शून्यीकृत्येत्याह ॥ **सकोशबलवाहनमिति** । अनन्तरं कंसावराजां देवतोपमां देवकीमुवाह परिणिनाय ॥ ७,८ ॥

निरुद्धो भोजराजेन कंसेनानकदुन्दुभिः ।
कदाचिदपि न प्रायात् करवीरपुरीमपि ॥ ९ ॥

सत्यधर्मीया — कदाचिदपि करवीरपुरीमपि न प्रायात् । तां तु नेति किं वक्तव्यमित्यर्थसूचकोऽपिः ॥ ९ ॥

असह्यं मातृसापत्न्यमभ्रातृत्वं तथाऽऽत्मनः ।
स्मरमाणः स काशीशो यदूनुद्विजतेऽनिशम् ॥ १० ॥

स कृष्णरहितां श्रुत्वा समेत्य द्वारकां निशि ।
विमृद्य बलभद्रेण शैनेयेनापि निर्जितः ॥ ११ ॥

सत्यधर्मीया — मातुः सुतनोः सापत्न्यं सपत्नीसाहित्यम् । किञ्च पुनरनागमनाद्वसुदेवस्य न गर्भनिभृता मातुरिति स्वस्य भ्रातृकत्वं चासह्यं सोढुमशक्यम् । स्मरमाणः स्मरन् । यदूननिशमुद्विजते उद्वेजयति । विमृद्य मर्दयित्वा बलभद्रेण शैनेयेन चेत्युभाभ्यां निर्जितः पराभूतः ॥ ११ ॥

निहतानेकसाहस्रहयकुञ्जरसैनिकः ।
जगाम परशर्वर्यां पुरीं वाराणसीं नृप ॥ १२ ॥

सत्यधर्मीया — निहता अनेकसाहस्रहयकुञ्जरसैनिका यस्य स सन् । वारणसीं पुरीं स्वां परशर्वर्यामुषःकाले जगाम ॥ १२ ॥

प्रभातायां तु शर्वर्यां हरिर्बदरिकाश्रमात् ।
आययौ तार्क्ष्यमारुह्य द्वारकां रामपालिताम् ॥ १३ ॥

सत्यधर्मीया — शर्वर्यां प्रभातायां प्रभया सूर्यप्रभयाऽतायां गतायां तार्क्ष्यं पितापुत्रयोर्नामेदं गरुडम् ॥ १३ ॥

सपताकैः साध्व्यपाद्यैर्यदुवृष्ण्यन्धकादिभिः ।
अभिवर्णितवृत्तान्तः प्राविशत् केशवः सभाम् ॥ १४ ॥

कदाचित् पौण्ड्रको नाम काशिराजः प्रतापवान् ।
वासुदेवोऽहमित्यज्ञो दूतं कृष्णाय प्राहिणोत् ॥ १५ ॥

सत्यधर्मीया — अभिवर्णितवृत्तान्तोऽभिवर्णितो रामादिभिर्वृत्तान्तः पौण्ड्रकवार्ता यस्य सः । सभां सुधर्माम् । तिष्ठतु ज्येष्ठ इति कृष्णे तूष्णीके सति । तदायुरासन्नमिति मतिरियमुदभूत्तस्येति वक्ति । कदाचिद्दूतं कृष्णाय प्राहिणोत् प्रेषयामासेति । प्रह्वे इति पिङ्गलनागोक्तेः प्रोत्तरको यकारो लघुः सन् पौण्ड्रककार्यलाघवं सूचयतीति ज्ञेयम् ॥ १५ ॥

त्वं वासुदेवो भगवानवतीर्णो जगत्पतिः ।
इति प्रस्तोभितो बालैर्मेने स्वात्मानमच्युतम् ॥ १६ ॥

सत्यधर्मीया — इति बालैर्मूर्खैः प्रस्तोभितो वञ्चितोऽपि भवान्स्वात्मानमच्युतं मेने जानाति । त्वं देवशक्त्यां गुणकर्मयोनौ रेतस्त्वजायां कविरादधेऽज इत्युदाहृत्य ऋग्भाष्यटीकायां मध्यमपुरुषादिनियमो नास्तीत्युक्तेरनियमेन इत्यन्वयो वा । विस्तृतं चास्माभिरनुसन्धेयम् । बालालाप एव मूलं तवाच्युतनाम न स्यादिति भावः ॥ १६ ॥

दूतस्तु द्वारकामेत्य सभायामास्थितं हरिम् ।
कृष्णं कमलपत्राक्षं राजसन्देशमब्रवीत् ॥ १७ ॥

सत्यधर्मीया — राजसन्देशमज्ञपौण्ड्रकाज्ञाम् ॥ १७ ॥

वासुदेवोऽवतीर्णोऽहमेक एव न चापरः ।
भूतानामनुकम्पार्थं त्वं तु मिथ्याभिधां त्यज ॥ १८ ॥

सत्यधर्मीया — भूतानामुपर्यनुकम्पार्थं तां कर्तुं मिथ्याभिधां मुधानाम त्यज ॥१८॥

यानि त्वमस्मच्चिह्नानि मौढ्याद् बिभर्ष्यभीतवत् ।
त्यक्त्वैहि मा त्वं शरणं नो चेद् देहि ममाहवम् ॥ १९ ॥

सत्यधर्मीया — अस्मच्चिन्हान्यस्माकं चिन्हानि शङ्खचक्रादीनि । अभीतवन्मौढ्यान्मूढतया बिभर्षि । तानि त्यक्त्वा मा मां त्वं शरणमेहि नो चेन्ममाहवं युद्धं देहि ॥ १९ ॥

कत्थनं तदुपाकर्ण्य पौण्ड्रकस्याल्पमेधसः ।
उच्चकैरुग्रसेनाद्याः सभ्याः प्रजहसुस्तदा ॥ २० ॥

सत्यधर्मीया — अल्पमेधसः कत्थनमफलपर्यवसायिभाषणम् । उग्रसेनाद्याः सभ्याः सभायां साधवो जहसुः ॥ २० ॥

उवाच दूतं भगवान् परिहासकथामनु ।
उत्स्रक्ष्ये मूढ चिह्नानि यैस्त्वमेवं विकत्थसे ॥ २१ ॥

सत्यधर्मीया — परिहासः कथम् ? अनु तदनन्तरं यैः कल्पितैरल्पमते विकत्थसे तानि कृत्रिमचिन्हान्युत्स्रक्ष्ये त्याजयिष्ये ॥ २१ ॥

मुखं तव विधायाज्ञ कङ्कगृध्रबलैर्वृतम् ।
शयिष्यसे हतस्तत्र भविता शरणं शुनाम् ॥ २२ ॥

सत्यधर्मीया — हे अज्ञ । तव मुखं कङ्कगृध्रबकैर्वृतं विधाय यत्र शयिष्यसे तत्र शुनां सारमेयानां शरणं भविता ॥ २२ ॥

इति दूतस्तदाक्षेपं स्वामिने सर्वमाहरन् ।
कृष्णोऽपि रथमारुह्य प्रायात् काशीं ससैनिकः ॥ २३ ॥

सत्यधर्मीया — तदाक्षेपं तेन कृष्णेन कृतमाक्षेपं तिरस्कारगिरं स्वामिने पौण्ड्रकाया-हरन्काशीं प्रायात् ॥ २३ ॥

पौण्ड्रकोऽपि तदुद्योगमुपलभ्य महारथः ।
अक्षौहिणीभिः सहितो निश्चक्राम पुराद् द्रुतम् ॥ २४ ॥

सत्यधर्मीया — पुरात्काश्याः ॥ २४ ॥

तमायान्तं रथोपस्थे सुवर्णगरुडे स्थितम् ।
सुवर्णबाहुयुगलमपश्यत् पौण्ड्रकं हरिः ॥ २५ ॥

शङ्खार्यसिगदाशार्ङ्ग श्रीवत्साद्युपलक्षितम् ।
बिभ्राणं कौस्तुभमणिं वनमालाविभूषितम् ॥ २६ ॥

सत्यधर्मीया — गरुडप्रतिनिधितया सुवर्णकृतसुपर्णे । चतुर्भुजतां दर्शयितुं सुवर्ण-बाहुयुगलम् । शङ्खार्यसिगदाशाङ्गम् । सेनाङ्गत्वादेकवद्भावः । दधच्चासौ श्रीवत्सलक्षितश्च तम् । श्रीवत्सार्थे दग्धवक्षःस्थलोऽभूदित्यादेर्दहिन तत्र कालिमेति मन्तव्यम् ॥ २६ ॥

कौशेयवाससी पीते वसानं गरुडध्वजम् ।
आमुक्तमाल्याभरणं स्फुरन्मकरकुण्डलम् ॥ २७ ॥

सत्यधर्मीया — आमुक्तानि कण्ठे स्थापितानि माल्याभरणानि यस्य तम् ॥ २७ ॥

दृष्ट्वा तमात्मनाऽसाम्यं कृत्रिमाकारमास्थितम् ।
यथा नटं रङ्गगतं विजहास भृशं हरिः ॥ २८ ॥

सत्यधर्मीया — तमात्मनाऽसाम्यं न विद्यते साम्यं यस्य सोऽसाम्यः स नेति नासाम्यः साम्यवान् । आत्मना नासाम्यस्तम् । पदमेकं वेदम् । कृत्रिमाकारमास्थितम् । रङ्गगतं नटं यथा तथा तं कृत्रिमं दृष्ट्वा भृशं हरिर्जहास ॥ २८ ॥

क्षणेन तं काशिपतेः सैनिका दृढधन्विनः ।
शरैराच्छादयामासुर्मेघाः शैलमिवाम्भसा ॥ २९ ॥

सत्यधर्मीया — तं कृष्णं शरैः । यद्यपि शरशब्दो बाणस्येवोदकस्यापि वाचक इत्येकेनैव शैलशैलधरपक्षे बाणैरुदकैरित्यावृत्त्या तन्त्रेणेवार्थसम्भवेऽम्भसेत्यतिरिक्तं सद्यथोदकमकिञ्चित्करं गिरौ पतितं तथाऽरावपि पतितं न बबाधिर इति लिङ्गेन च सह ध्वनयामासेत्यवसेयम् ॥२९॥

केचिद् राजन् रथानश्वानास्थाय रणमूर्धनि ।
शूलैर्गदाभिः परिघैः शक्त्यृष्टिप्रासतोमरैः ।
असिभिः पट्टसैर्बाणैः प्रहरन्नरयो हरिम् ॥ ३० ॥

सत्यधर्मीया — आस्थायेति गजं रथांश्चेति द्वितीयान्तपदैरन्वेति । प्राहरन्नित्यपि सुपठम् ॥ ३० ॥

तस्य काशिपतेर्मित्रं पार्ष्णिग्राहोऽपरो नृपः ।
अक्षौहिणीभिस्तिसृभिरुपायान्नृप सङ्गरम् ॥ ३१ ॥

सत्यधर्मीया — अपरः सोऽपि काशीशः पार्ष्णिग्राहः पृष्ठरक्षस्तिसृभिरक्षौहिणीभिः सह ॥ ३१ ॥

कृष्णस्तु तत्पौण्ड्रककाशिराजयोर्बलं गजस्यन्दनवाजिपत्तिमत् ।
गदासिचक्रेषुभिरार्दयद् भृशं यथा युगान्ते हुतभुक् प्रभाज्वलन् ॥ ३२ ॥

सत्यधर्मीया — प्रभाज्वलन् हुतभुगग्निः । युगान्ते प्रलये ।। ३२ ।।

आयोधनं तद् रथवाजिकुञ्जरद्विपत्खरोष्ट्रैरिषुणाऽवखण्डितैः ।
बभौ च तन्मानवहं मनस्विनामाक्रीडनं भूतपतेरिवोल्बणम् ।। ३३ ।।

सत्यधर्मीया — आयोधनम् रणधरणीम् । रथाः स्यन्दना वाजिनोऽश्वाः कुञ्जरा गजा द्विपदः पदातयो गर्दभा उष्ट्राः क्रमेलकाः । मनस्विनां युद्धास्थावतां मानवहमभिमानप्रापकम् । इषुणेत्यनेनैकेनैवानेकेषामवखण्डनं सूचयता भगवत्सामर्थ्यवैपुल्यं द्योतितं भवति । भूपते-र्हरस्योल्बणमाक्रीडं क्रीडास्थानं श्मशानमिव बभौ ।। ३३ ।।

अथाह पौण्ड्रकं शोरिर्भोभो पौण्ड्रक यद् भवान् ।
दूतवाक्येन मामाह तान्यस्त्राण्युत्सृजामि ते ।। ३४ ।।

त्याजयिष्येऽभिधानं मे यत् त्वयाऽद्य मृषा कृतम् ।
व्रजामि शरणं तेऽद्य यदि नेच्छामि संयुगम् ।। ३५ ।।

इति क्षिप्त्वा शितैर्बाणैर्विरथीकृत्य पौण्ड्रकम् ।
शिरोऽहरद् रथाङ्गेन वज्रेणेन्द्रो यथा गिरेः ।। ३६ ।।

सत्यधर्मीया — अथ दर्शनानन्तरं दूतवाक्येन वासुदेवोऽवतीर्णोऽहमित्यादिना मामाह तान्यस्त्राणि ते समक्षमुत्सृजामि त्वया यन्मृषा कृतं मिथ्यात्वेन कृतमभिधानं त्याजयिष्येति शेषः । मां स्वयं त्याजयिष्ये । स्वार्थे वा णिच् । त्यक्ष्यामि । अद्य ते त्वां शरणं यामि । कदेदं सर्वमित्यत आह ।। **यदीति** । त्वया सह संयुगं यदि नेच्छामि तदेदं मदनुष्ठेयमिति भावः । इति क्षिप्त्वा तिरस्कृत्य शितैर्बाणैस्तं विरथीकृत्य रथाङ्गेन चक्रेण ।। ३४-३६ ।।

तथा काशिपतेः कायाच्छिर उत्कृत्य पत्रिभिः ।
न्यपातयत् काशिपुर्यां पद्मकोशमिवानिलः ।। ३७ ।।

सत्यधर्मीया — काशिपतेरेतद्देशैकदेशेशस्य पत्रिभिः शिर उत्कृत्यानिलः पद्मकोश-मिव काशिपुर्यां तन्नगर्यां न्यपातयत् ।। ३७ ।।

एवं मत्सरिणं हत्वा पौण्ड्रकं ससखं हरिः ।
द्वारकामाविशत् सिद्धैर्गीयमानकथामृतः ॥ ३८ ॥

सत्यधर्मीया — एवं मत्सरिणं मात्सर्ययुक्तं ससखं मित्रकाशीशसहितम् । आर्षष्टच् । अथवा अच्प्रत्यन्ववेति अजिति योगविभागादच्प्रत्ययः । यद्वा समानं खं स्वसुखेन सुखं यस्य स सखः । मित्रमिति यावत् । तेन सहितः ससखः । तं विराजते पद्मनाभसधर्म इत्यादेः । हत्वा सिद्धैर्गीयमाना कथैवामृतं तद्वत्तृप्तिकरी यस्य सः । द्वारकामाविशत् ॥३८॥

शिरः पतितमालोक्य राजद्वारि सकुण्डलम् ।
किमिदं कस्य वा वक्त्रमिति संशयिरे जनाः ॥ ३९ ॥

सत्यधर्मीया — किमिदमिति दूतो विलोक्य कस्य वेदं वक्त्रमिति समीपमुपेत्य जनाः संशयिरे संशयाश्चक्रुः ॥ ३९ ॥

राज्ञः काशिपतेर्ज्ञात्वा महिष्यः पुत्रबान्धवाः ।
पौराः शोकहता राजन् नाथनाथेत्युपाद्रवन् ॥ ४० ॥

सत्यधर्मीया — काशिपते राज्ञस्तच्छिर इति ज्ञात्वा नाथ नाथेति । नाथ अथ न किल त्वमित्युपद्रवन्निति वा ॥ ४० ॥

सुदक्षिणस्तस्य सुतः कृत्वा संस्थाविधिं पितुः ।
निहत्य पितृहन्तारं यास्याम्यपचितिं पितुः ॥ ४१ ॥

सत्यधर्मीया — पितुः संस्था मरणं तदनन्तरं क्रियमाणं विधिमावश्यकं कर्म कृत्वा पितृहन्तारं निहत्य पितुरपचितिमानृण्यम् । अर्चनायामपचितिप्रक्षये निष्कृतौ व्यय इति च ॥

इत्यात्मनाऽभिसन्धाय सोपाध्यायो महेश्वरम् ।
सुदक्षिणोऽर्चयामास परमेण समाधिना ॥ ४२ ॥

सत्यधर्मीया — आत्मना मनसा सोपाध्यायः सपुरोहितः परमेण समाधिना महेश्वरमर्चयमास ॥ ४२ ॥

प्रीतोऽविमुक्ते भगवांस्तस्मै वरमदाद् भवः ।
पितृहन्तुर्वधोपायं स वव्रे वरमीप्सितम् ॥ ४३ ॥

सत्यधर्मीया — अविमुक्ते काशीनामके क्षेत्रे प्रीतो भगवान्हरो वरमदात् तद्दानमनस्कोऽभूदित्यर्थः । स सुदक्षिणो वधोपायं वरं वव्रे । उपायमित्यनेन तन्मात्रविषयो वरो न वधविषय इति ध्वनयति । उपायः स्वयमपायवान्नेति नियमादर्शनात् ॥ ४३ ॥

दक्षिणाग्निं परिचर ब्राह्मणैः सह ऋत्विजः ।
अभिचारविधानेन स चाग्निः प्रमथैर्वृतः ॥ ४४ ॥

साधयिष्यति सङ्कल्पमब्रह्मण्यैः प्रयोजितः ।
इत्यादिष्टस्तथा चक्रे कृष्णायाभिचरन् नृप ॥ ४५ ॥

सत्यधर्मीया — सुदक्षिणं प्रति नेतरानलपरिचरणं कुर्विति वक्तव्यमित्याह । महादेवो दक्षिणाग्निमन्वहार्यपचननामानं परिचरेतीरयामासेति भावः । सह ऋत्विजः । ऋत्विक्शब्दपर्यायोऽयमृत्विजशब्दः । तैर्ब्राह्मणैः सह दक्षिणाग्निं परिचरेति वा । अभिचारविधानेनाभिचारिकेणाथर्वमन्त्रविधानेन । सदक्षिणा शुशुक्षणिः प्रमथैर्मद्दूतैर्वृतः सन् । अब्रह्मण्ये ब्राह्मणाचारविरहितेः प्रयोजितः संस्तदुपरि विसृष्टश्चेत्तव सङ्कल्पं साधयिष्यतीति हरेणादिष्टः कृष्णायाभिचरंस्तमुद्दिश्याभिचारिकमाचरंस्तथा शिवशंसितप्रकारेण चक्रे । अनेन किंवदन्त्या कृष्णोऽब्रह्मण्य इति मतिस्तस्येति स्फार्यते । किञ्च चक्र इत्यात्मनेपदेन तत्फलं तद्गामीति सूच्यते ॥ ४४,४५ ॥

ततोऽग्निरुत्थितः कुण्डान्मूर्तिमानतिभीषणः ।
तप्तताम्रशिखाश्मश्रुरङ्गारोद्गारिलोचनः ॥ ४६ ॥

सत्यधर्मीया — ततो मन्त्रतः परिचरणानन्तरं मूर्तिमान्साकारः । तप्तताम्रवद्दिद्यमानानि शिखाश्मश्रूणि यस्य सः । अङ्गारस्योद्गारिणीव सती लोचने यस्य सः ॥ ४६ ॥

दंष्ट्रोग्रभ्रुकुटीदन्तकठोरास्यः स्वजिह्वया ।
आलिहन् सृक्किणी रक्ते विधुन्वन् त्रिशिखं ज्वलत् ॥ ४७ ॥

सत्यधर्मीया — दंष्ट्रोग्रभ्रुकुटीदन्तैः कठोरं क्रूरमास्यं यस्य सः । स्वजिव्हया रक्ते ताम्रे सृक्किणी आलिहन् । तिस्रः शिखा अग्रभागा यस्य तत्त्रिशूलमिति शेषः । ज्वलद्विधुन्वन् ॥ ४७ ॥

पद्भ्यां तालप्रमाणाभ्यां कम्पयन् धरणीतलम् ।
सोऽभ्यधावद् वृतो भूतैर्द्वारकां प्रदहन् दिशः ॥ ४८ ॥

सत्यधर्मीया — तालप्रमाणाभ्यां पद्भ्यां धरणीतलं कम्पयन् भूतैर्हराज्ञसैर्दिशः प्रदहन् द्वारकामभ्यधावत् ॥ ४८ ॥

तमाभिचारदहनमायान्तं द्वारकौकसः ।
विलोक्य तत्रसुः सर्वे वनदाहे यथा मृगाः ॥ ४९ ॥

सत्यधर्मीया — वनदाहे मृगा यथा तथा । सर्वे द्वारकौकस आभिचारदहनं विलोक्य तत्रसुः । भीता अभवन् ॥ ४९ ॥

अक्षैः सभायां क्रीडन्तं भगवन्तं भयातुराः ।
त्राहि त्राहीति लोकेशं वह्नेः प्रदहतः पुरम् ॥ ५० ॥

सत्यधर्मीया — सभायामक्षैः पाशैः क्रीडन्तं भगवन्तम् । पुरीं प्रदहतो वह्नेस्त्राहि त्राहि । धात्वन्तररूपम् । त्रायस्व त्रायस्वेति भयातुरा लोकेशमवदन् ॥५०॥

श्रुत्वा तज्जनवैक्लव्यं दृष्ट्वा स्वानां च सङ्कटम् ।
शरण्येशः प्रहस्याह मा भैष्टेत्यवितास्म्यहम् ॥ ५१ ॥

सत्यधर्मीया — जनवैक्लव्यं श्रुत्वा स्वानां च साध्वसं च दृष्ट्वा मा भैष्टाहम-वितास्मीति धरणीशः प्रहस्याह ॥ ५१ ॥

सर्वस्यान्तर्बहिः सोऽथ कृत्यां माहेश्वरीं विभुः ।
विज्ञाय तद्विघातार्थं पार्श्वस्थं चक्रमादिशत् ॥ ५२ ॥

सत्यधर्मीया — स विभुः सर्वस्यान्तर्बहिश्च व्याप्त इति माहेश्वरीं हरसम्बन्धिनीं कृत्यां विज्ञाय तद्विघातार्थं तस्या विनाशार्थं पार्श्वस्थं चक्रं सुदर्शनमादिशत् ॥ ५२ ॥

तत् सूर्यकोटिप्रतिमं सुदर्शनं जाज्वल्यमानं प्रभयानलप्रभम् ।
स्वतेजसा खं ककुभोऽथ रोदसी चक्रं मुकुन्दस्य झटित्यपूरयत् ॥ ५३ ॥

सत्यधर्मीया — सूर्यकोटिप्रतिमं कोटिसूर्यसमप्रभम् । जाज्वल्यमानं प्रभयाऽनलस्यापि प्रभा यस्य तत्सुदर्शनं भक्तानां मुकुन्दस्य चक्रं स्वतेजसा खमाकाशं ककुभो दिशो रोदसी द्यावापृथिव्यौ झडित्यपूरयत् ॥ ५३ ॥

कृत्यानलः प्रतिहतः स रथाङ्गपाणेरस्त्रौजसा नृप विभग्नमुखो निवृत्तः ।
वाराणसीं प्रतिसमेत्य सुदक्षिणं तं सन्निर्जितं समदहत् स्वकृतोभिचारः ॥ ५४ ॥

सत्यधर्मीया — रथाङ्गपाणेरस्त्रौजसा प्रतिहतो विभग्नमुखो निवृत्तः सन् । स्वकृतः सुदक्षिणकृतोऽभिचारः कृत्यानलो वाराणसीं प्रति समेत्य सन्निहितं सुदक्षिणं समदहत् ॥ ५४ ॥

चक्रं च विष्णोस्तदनु प्रविष्टं वाराणसीं साट्टसभालयापणाम् ।
सगोपुराट्टालककोष्ठतोरणां सकेशहस्त्यश्ववरूथमन्दिराम् ॥ ५५ ॥

सत्यधर्मीया — तदनु सुदक्षिणदहनमनु विष्णोश्चक्रमट्टान्यन्नानि सभाश्चालयाश्चापणाश्च तैः सहिता ताम् । अट्टशूला इति विराटपर्वव्याख्यायाम् । अट्टमन्नं शिवो वेदः शूलो विक्रय उच्यते । केशो भग इति प्रोक्त इत्युक्तेः । अनेन नाट्टालकाट्टान्यतरातिरेकः । गृहाट्टालकगोपुराट्टालकभेदेन भेद इति त्वगतिका गतिः । सगोपुराट्टालककोष्टतोरणामिति गतम् । वरूथं मन्दिरं रथगुप्तिस्थानम् ॥ ५५ ॥

दग्ध्वा वाराणसीं सर्वां विष्णुचक्रं सुदर्शनम् ।
भूयः पार्श्वमुपातिष्ठत् कृष्णस्याक्लिष्टकर्मणः ॥ ५६ ॥

सत्यधर्मीया — सुदर्शनं पुनरक्लिष्टकर्मणः कृष्णस्य पार्श्वमुपातिष्ठत् । सकर्मकत्वान्नोपादिति प्रवर्तते ॥ ५६ ॥

य एतत् श्रावयेन्मर्त्य उत्तमश्लोकविक्रमम् ।
समाहितो वा शृणुयात् सर्वपापैः प्रमुच्यते ॥ ५७ ॥

तावुभौ सर्वपापेभ्यो ब्रह्महत्यादिभिर्नृप ।
विमुच्य देहावसाने विष्णुलोकं प्रयास्यतः ॥ ५८ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे एकोनसप्ततितमोऽध्यायः ॥

सत्यधर्मीया — समाहित इति श्रावकश्रोतृविशेषणम् । उत्तमश्लोकस्य विक्रमो यस्मिंस्तदेतच्चरितं श्रावयेच्छृणुयाच्च सर्वपापैः स प्रमुच्यत इति पृथक् पृथगन्वयः । उक्तमनूद्य फलमभिलपति ॥ **तावुभाविति** ॥ ब्रह्महत्यादिभिः सहितेभ्यः सर्वपापेभ्यः । तावुभावात्मानं विमुच्य विमोच्य देहावसाने सति विष्णुलोकं प्रयास्यतः । सर्वपापेषु तद्वत्सु इभ्यः श्रेष्ठश्च । सर्वपापेभ्यः सर्वपापभ्यश्चेति तावुभाविति वा । अतिपापिनावित्यर्थः ॥ ५७,५८ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे एकोनसप्ततितमोऽध्यायः ॥ १०६९ ॥

॥ अथ सप्ततितमोऽध्यायः ॥

श्रीशुक उवाच —

अथैकदा द्वारवत्यां वसतो रामकृष्णयोः ।
सूर्योपरागः सुमहानासीत् कल्पक्षये यथा ॥ १ ॥

सत्यधर्मीया — श्रीकलत्रे लोकमनुकर्तरि स्यमन्तपञ्चकं गन्तुमुद्यते सति तत्रायन्स्वर-किरणोपरागहेतोर्ग्रामीणा अपि सकलाः सबालवृद्धा इव नानाजनपदजना लोकनाथावलोक-नोत्सुका अपि समागुरिति निरूप्यतेऽत्राध्याये । तत्रादौ तत्क्षेत्रमाहात्म्यं तत्कर्तृगुणांश्चाह ॥ **अथेति** । एकदा कदाचिद्रामकृष्णयोर्द्वारकायां वसतोः सतोः । कल्पक्षये यथा प्रभाकर-प्रभाप्रतिबन्धस्तथेति महान् । अनेन सर्वग्रासो ध्वन्यते । सूर्योपरागः सूर्यग्रहणमासीत् ॥१॥

तं ज्ञात्वा मनुजा राजन् पुरस्तादेव सर्वशः ।
स्यमन्तपञ्चकं क्षेत्रं जग्मुः श्रेयोविधित्सया ॥ २ ॥

सत्यधर्मीया — तमुपरागं मनुजा ज्ञात्वा सर्वशः पुरस्तादेव भगवदागमादग्र एव श्यमन्तं पञ्चकं श्यमन्तनामकह्रदपञ्चकोपेतं कुरुक्षेत्रं श्रेयोविधित्सया श्रेयस्कृतीच्छया जग्मुः ॥ २ ॥

निःक्षत्रियां महीं कुर्वन् रामः शस्त्रभृतां वरः ।
नृपाणां रुधिरौघेण यत्र चक्रे महाह्रदान् ॥ ३ ॥

सत्यधर्मीया — कथं तत्पञ्चकभवनमित्यतस्तत्प्रपञ्चयति ॥ **निःक्षत्रियामिति** । निर्गताः क्षत्रिया यस्याः सा तां महीं कुर्वच्छस्त्रभृतां वरो रामो भार्गवो नृपाणां स्वहतानां रुधिरौघेण रक्तप्रवाहेण यत्र महाह्रदान्पञ्च चक्रे ॥ ३ ॥

ईजे च भगवान् रामो यत्रास्पृष्टोऽपि कर्मणा ।
लोकस्य सङ्ग्रहायेशो यथाऽन्योऽघापनुत्तये ॥ ४ ॥

सत्यधर्मीया — कर्मणाऽस्पृष्टोऽपि तदबद्धोऽपि भगवान्रामोऽन्यः परतन्त्रो यथाऽ-घानां पापानामपनुत्तिरपहृतिस्तस्यै यजति । तथा लोकस्य सङ्ग्रहाय यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन इत्यादेर्लोकं शासितुमीजे ॥ ४ ॥

महत्यां तीर्थयात्रायां तत्रागुर्भारतीः प्रजाः ।
कृष्णः षोडशसाहस्रमहिषीशिबिकान्वितः ॥ ५ ॥

सत्यधर्मीया — तस्मिन्काले महत्यां तीर्थयात्रायां भारतीर्भारत्यस्तत्खण्डगाः प्रजा आगुः । षोडशसहस्रमहिषीणां शिबिका नरवाहनानि ताभिरन्वितः । वर्षसाहस्रामित्यनु-व्याख्याव्याख्यावसरे सहस्रं परिमाणमस्येति साहस्रः सङ्घस्तदस्य परिमाणमित्यर्थे शतमानविंशतिकसहस्रवसनादणित्यणो विधानादिति सुधाभिधानादण् । विस्तरस्तु ननु सहस्रशब्दादित्यारभ्य तथा च सहस्ररूपपरिमाणोपाधिके सङ्घरूपेऽर्थे सङ्ख्यावाचिनः सहस्रशब्दसङ्ख्यायाः सञ्ज्ञासङ्घसूत्राध्ययनेष्वित्यनेनाण्प्रत्यये णित्वादादिवृद्धौ यस्येति चेत्यकारलोपे साहस्रशब्दनिष्पत्तिरुक्तं भवतीत्यन्तया वाक्यार्थचन्द्रिकया ज्ञेयम् ॥ ५ ॥

पुत्रपौत्रजनानीकैर्वारकान्ताकरेणुभिः ।
नगरस्त्रीकदम्बैश्च प्रियसार्थैश्च संयुतः ॥ ६ ॥

सत्यधर्मीया — वारकान्तारूढकरेणुभिः कदम्बैः समूहैः प्रियासार्थैः रुक्मिण्यादि-सङ्घैश्च संयुतः ॥ ६ ॥

वृष्णयश्च तथाऽक्रूरवसुदेवगदादयः ।
ययुर्भारत तत्क्षेत्रं स्वमघं क्षपयिष्णवः ॥ ७ ॥

सत्यधर्मीया — स्वं स्वसम्बन्धि पापं क्षपयिष्णवः ॥ ७ ॥

शठप्रद्युम्नसाम्बाश्च सुवज्रोद्धवसारणाः ।
आहुकं कृतवर्माणं संस्थाप्य पुररक्षणे ॥ ८ ॥

सत्यधर्मीया — शठादयो वज्रादय आहुकं कृतवर्माणं च पुररक्षणे संस्थाप्य ॥ ८ ॥

ते रथैर्देवविख्यातैर्हयैश्च तरलप्रभैः ।
गजैर्बृहद्भिरभ्राभैर्नृभिर्विद्याधरद्युभिः ॥ ९ ॥

सत्यधर्मीया — ते शठाद्या देवेष्वपि ख्यातैर्हयैस्तरलप्रभैस्तरलानां श्यामलानां च

जलदानां भावात् गजा अपि सिता असिताश्च ज्ञेया नृभिः । विद्याधराणां द्युः प्रकाशो येषां ते तैः ।। ९ ।।

व्यरोचन्त महाभागाः पथि काञ्चनमालिनः ।
वेदवादित्रनिर्घोषैः शङ्खदुन्दुभिनिस्स्वनैः ।। १० ।।

सत्यधर्मीया — सहशगद्या महाभागाः काञ्चनमालिनश्च पथि व्यरोचन्त ।। १० ।।

गायन्तः कृष्ण कृष्णेति गोविन्देति च सन्ततम् ।
ककुभः पूरयन् नादैर्जग्मुः सर्वे कुरूद्वह ।। ११ ।।

सत्यधर्मीया — कृष्ण कृष्णेति गोविन्देति पूरयन्नादाः पूरयन्तश्च ते नादाश्च तैः । काः पूरयन्तस्ते नादा इत्यत आह ।। ककुभ इति । एकदेशान्वयमात्रं सोढव्यम् । एकवचनं बहुवचनार्थं वा ।। ११ ।।

समन्तपञ्चकं प्राप्य क्षेत्रं त्रैलोक्यविश्रुतम् ।
तृणैः पर्णैस्तथा काष्ठैश्चक्रिरे भवनानि च ।। १२ ।।

सत्यधर्मीया — त्रैलोक्यविश्रुता भवनानि गृहान् ।। १२ ।।

कम्बलाजिनवस्त्राणां शिबिराणि महीभृताम् ।
आसन् विचित्ररूपाणि शतशोऽथ सहस्रशः ।। १३ ।।

सत्यधर्मीया — महीभृतां राज्ञां विचित्ररूपाणि नानावर्णानि ।। १३ ।।

तत्राजग्मुर्नृपानेके ब्राह्मणाश्च सहस्रशः ।
वैश्याः शूद्राश्च निःसङ्ख्या ये चान्ये वर्णनिन्दिताः ।। १४ ।।

सत्यधर्मीया — नृपानेक इति पदम् ।। नृपाश्च ते अनेके च अनेकनृपा इत्यर्थः । वर्णनिन्दिताःतद्बाह्याः ।। १४ ।।

ऋषयश्च महात्मानो विख्याताः संशितव्रताः ।
सोपाध्यायाः साग्निहोत्राः स्नातका गृहमेधिनः ॥ १५ ॥

सत्यधर्मीया — सोपाध्यायाः साचार्याः स्नातका दण्डोदककमण्डलुधरा गृहमेधिनः पञ्चयज्ञाधिकारिणः ॥ १५ ॥

अन्धाश्च बधिराश्चैव कुब्जवामनपण्डकाः ।
व्यङ्गा जडाश्च मूकाश्च कर्मक्षयमभीप्सवः ॥ १६ ॥

सत्यधर्मीया — कुब्जास्त्रिवक्रा वामनाः खर्वाः पण्डका षण्डा व्यङ्गाः करादिविकला जडा मूर्खा वोन्मादिनो वा कर्मक्षयपरीप्सवस्तमिच्छन्तः ॥ १६ ॥

गोविन्दचरणाम्भोजरेणुरञ्जितमस्तकाः ।
कटकाङ्गदकेयूरहारकुण्डलभूषणाः ॥ १७ ॥

सत्यधर्मीया — रेणुभी रञ्जितानि मस्तकानि येषां ते तथा । कटकाङ्गदकेयूरकुण्डलैर्भूषणं येषां ते ॥ १७ ॥

स्रग्गन्धदिव्यवसनाः कलत्रैः खेचरा इव ।
तत्र स्नात्वा महाभागा उपोष्य सुसमाहिताः ॥ १८ ॥

सत्यधर्मीया — कलत्रैर्भार्याभिः सह खेचरा गन्धर्वा इव तत्र तत्समये उपोष्योपोषणं कृत्वा ॥ १८ ॥

ब्राह्मणेभ्यो ददुर्धेनूर्वासः स्रग्रुग्ममालिनीः ।
रामह्रदेषु विधिवत् पुनराप्लुत्य वृष्णयः ॥ १९ ॥

सत्यधर्मीया — वासश्च स्रजः पुष्पाणां रुग्माणां माला आसां सन्तीति ता धेनूः । रामह्रदेषु पञ्चसु पुनराप्लुत्य ॥ १९ ॥

ददुः स्वन्नं द्विजाग्रेभ्यः कृष्णे नो भक्तिरस्त्विति ।
स्वयं च तदनुज्ञाता वृष्णयः कृष्णदेवताः ॥ २० ॥

सत्यधर्मीया — कृष्णे नो भक्तिरस्त्विति द्विजाग्रेभ्यः स्वन्नं षड्रसमन्नं ददुः । तदनुज्ञातास्तैर्ब्राह्मणैः ॥ २० ॥

भुक्त्वोपविविशुः कामं स्निग्धच्छायाङ्घ्रिपाङ्घ्रिषु ।
तत्रागतांस्ते ददृशुः सुहृत्सम्बन्धिनो नृपान् ॥ २१ ॥

सत्यधर्मीया — स्निग्धा निबिडा छाया येषां ते च तेऽङ्घ्रिपाश्च तेषामङ्घ्रयः । भुक्त्वोपविविशुः । सुहृदश्च सम्बन्धिनश्च तान्नृपांस्तत्रागातान्ददृशुः ॥ २१ ॥

मत्स्योशीनरकौसल्यविदर्भकुरुसृञ्जयान् ।
काम्बोजकेकयान् मद्रान् कुन्तिगान्धारकेरलान् ॥ २२ ॥

सत्यधर्मीया — मत्स्यादयो देशास्तद्भवान् ॥ २२ ॥

अन्यांश्चैवात्मपक्षीयान् परांश्च शतशो नृपान् ।
नन्दादीन् सुहृदो गोपान् गोपीश्चोत्कण्ठिताश्चिरम् ॥ २३ ॥

सत्यधर्मीया — परान्परपक्षीयांश्चिरं बहुकालमुत्कण्ठिता उत्कलितोपेताः ॥ २३ ॥

अन्योन्यसन्दर्शनहर्षरंहसा प्रोत्फुल्लहृद्वक्त्रसरोरुहश्रियः ।
आश्लिष्य गाढं नयनैः स्रवज्जला हृष्यत्त्वचो रुद्धगिरो ययुर्मुदम् ॥ २४ ॥

सत्यधर्मीया — रंहो वेग उत्फुल्लानि च तानि वक्त्रसरोरुहाणि च तेषां श्रीः शोभा येषां ते । अन्योन्यं परस्परं गाढमाश्लिष्य नयनैः स्रवन्ति गलन्ति जलानि येषां ते । हृष्यत्यस्त्वचो येषां ते । सरोमाश्चा रुद्धगिरस्तोषातिशयनिरुद्धवाचो मुदं ययुः ॥ २४ ॥

स्त्रियश्च संवीक्ष्य मिथोऽतिसौहृदाः सचापलापाङ्गदृशोऽभिरेभिरे ।
स्तनैः स्तनान् कुङ्कुमपङ्करूषितान् निहत्य दोर्भ्यां प्रणयाश्रुलोचनाः ॥ २५ ॥

सत्यधर्मीया — सचापला ललनास्वभावश्चापलपाङ्गे तत्सहिता दृशो नेत्राणि यासां ताः । अभिरेभिरे आलिलिङ्गिरे । आलिङ्गनभङ्गीमाह ॥ **स्तनैः स्तनानिति** ॥ २५ ॥

ततोऽभिवाद्य ते वृद्धान् यवीयैरभिवादिताः ।
स्वागतं कुशलं पृष्ट्वा चक्रुः कृष्णकथां मिथः ॥ २६ ॥

सत्यधर्मीया — यवीयैर्यवीयोभिः । स्वागतमित्युक्त्वा कुशलं पृष्ट्वा मिथः कृष्णकथां चक्रुः ॥ २६ ॥

पृथा भ्रातॄन् स्वसॄर्वीक्ष्य तत्पुत्रान् पितरावपि ।
भ्रातृपत्नीर्मुकुन्दं च जहौ सङ्कथया शुचः ॥ २७ ॥

सत्यधर्मीया — भ्रातॄन्वसुदेवादीन् स्वसॄर्भगिनीस्तत्पुत्रान्स्वस्रीयान् । पितरौ कुन्तिभोजं तद्भार्यां च सङ्कथया परस्परवार्तया शुचः शोकांस्तत्प्रापकाकारभेदाच्छुच इत्युक्तिः । जहौ तत्याज ॥ २७ ॥

कुन्त्युवाच —

आर्यभ्रातरहं मन्ये आत्मानमकृताशिषम् ।
यत आपत्सु मद्वार्तां नानुस्मरथ सत्तमाः ॥ २८ ॥

सत्यधर्मीया — सा वार्ता केत्यतः कीर्तयति ॥ **आर्येति** । भ्रातः कनिष्ठभ्रमं पितृव्यादिभ्रमं च वारयितुं ते पदे । आत्मानं मामकृताशिषमकृताऽसम्पादिताऽऽशीरभिमतार्थो यया तां मन्ये । आत्मपदविवक्षया तमिति वा । तत्र तन्त्रमाह ॥ **यत् इति** । यत आपत्स्वनेकास्वागतास्वपि मद्वार्तां नानुस्मरथेति । दुर्वृत्तानां किमिदं त्वदस्मरणं चित्रमित्यत आह ॥ **सत्तमा इति** ॥ २८ ॥

सुहृदो ज्ञातयः पुत्रा भ्रातरः पितरावपि ।
नानुस्मरन्ति स्वजनं यस्य दैवमदक्षिणम् ॥ २९ ॥

सत्यधर्मीया — लोके लोकानां दैवहीनानां दशेदृशीति भ्रातः कातर्यात्स्थापितः शब्दो न तवोपरीति वक्ति ॥ **सुहृद इति** । एते स्वजनमपि तं नानुस्मरन्ति । यस्य स्वजनस्य दैवमदक्षिणमसहकारि । अहं हीनदेवा यूयं किं करिष्यथेति भावः ॥ २९ ॥

वसुदेव उवाच —

अम्ब मास्मानसूयेथा देवक्रीडनकान् नरान् ।
ईशस्य हि वशे लोकः कुरुते कार्यतेऽथवा ॥ ३० ॥

सत्यधर्मीया — आदौ स्वापन्न वक्तव्य उपद्रुतेष्विति पर्यायतस्तदुदाहृतदैवपदार्थं विवृण्वंस्तां समाधाय स्वापदमपि वक्ति द्वाभ्याम् ॥ **अम्बेति** । मातर्भगिनि । अस्मान्नासूयेथा अस्मभ्यमसूयां न कुरु । देवक्रीडनकान् देवस्य क्रीडना यैरिति तत्क्रीडासाधनभूतान्नरान्हि यतस्तदेव देवक्रीडनकत्वं सामान्यत आह । ईशस्य हरेर्वशे स्थितो लोकः कुरुते तथा कार्यते कर्माणि । ईशेन यथा कार्यते तथा कुरुत इति वा । अतोऽत्र न वयं स्वतन्त्रा इति भावः ॥ ३० ॥

कंसप्रतापिताः सर्वे वयं याता दिशो दश ।
एतर्ह्येव पुनः स्थानं दैवेनासादिताः स्वसः ॥ ३१ ॥

सत्यधर्मीया — स्वसः कंसप्रतापिता वयम् । तत्रैव सर्वे सुहृदश्च दश दिशो याता इति भिन्नवाक्यतया योजनीयम् । अन्यथा वसुदेवस्यापि देशान्तरगमनापत्तेः । तस्य चादर्शनात् । एतर्हीदानीमेव पुनस्तदेव स्थानं दैवेनासादिताः स्वसाम्यं प्रापिता वयमपि बहुकष्टिन इति न विचारावसर इति भावः ॥ ३१ ॥

श्रीशुक उवाच —

वसुदेवोग्रसेनाद्यैर्यदुभिः सेविता नृपाः ।
आसन्नच्युतसन्दर्शपरमानन्दनिर्वृताः ॥ ३२ ॥

सत्यधर्मीया — नृपा देशान्तराधीशा अच्युतस्य दर्शो दर्शनम् । वायवायाहि दर्शत इत्यृग्भाष्ये दर्शतस्ततदृट्ष्टित्वात् । दृशेर्भावे घञि दर्शो दर्शनमिति तट्टीकायां चोक्तेः । तज्जनितो यः परमानन्दस्तेन निर्भराः पूर्णास्तस्य निर्भरो नैर्भर्यं येषां ते वा ॥ ३२ ॥

भीष्मो द्रोणोऽम्बिकापुत्रो गान्धारी ससुता तथा ।
सदाराः पाण्डवाः कुन्ती सञ्जयो विदुरः कृपः ॥ ३३ ॥

सत्यधर्मीया — ससुता गान्धारी । अनेन पित्रननुरूपता पुत्राणां ध्वनयति । अन्यथा ससुतोऽम्बिकापुत्र इति वदेदिति ध्येयम् । सदारा द्रौपद्यादिभार्यासहिताः ॥ ३३ ॥

कुन्तिभोजो विराटश्च भीष्मको नग्नजिन्महान् ।
पुरुजिद् द्रुपदः शैब्यो धृष्टकेतुश्च काशिराट् ॥ ३४ ॥

सत्यधर्मीया — भीष्मको रुग्मिणीपिता । पिता च नग्नजिल्लीलायाः ॥ ३४ ॥

दमघोषो विशालाक्षो मैथिलो मद्रकैकयाः ।
युधामन्युः सुशर्मा च ससुता बाह्लिकादयः ॥ ३५ ॥

सत्यधर्मीया — दमघोषः शिशुपालपिता विशालाक्ष इति यथार्थं विशेषणं वा कस्यचिद्राज्ञः स्वतन्त्रं नाम वेति निर्णये न नामकरणसमयवर्तिनो वयम् । ससुता बाल्हिकादयो राजानः ॥ ३५ ॥

राजानोऽन्ये च राजेन्द युधिष्ठिरमनुव्रताः ।
श्रीनिकेतं वपुः शौरेः सस्त्रीका वीक्ष्य विस्मिताः ॥ ३६ ॥

सत्यधर्मीया — शौरेः श्रीनिकेतं सम्पदाश्रयं रमाश्रयं वा वपुः सस्त्रीका वीक्ष्य विस्मिता अभवन्निति शेषः ॥ ३६ ॥

अथ ते रामकृष्णाभ्यां सम्यक्प्राप्तसमर्हणाः ।
प्रशशंसुर्मुदा युक्तास्तुष्टाः कृष्णपरिग्रहान् ॥ ३७ ॥

सत्यधर्मीया — सम्यक् स्वस्वयोग्यतानुसारेण प्राप्तं समर्हणं येषां ते स्वयं तुष्टा ये मुदा युक्तास्तान् कृष्णपरिग्रहान् भार्याः प्रशशंसुः । भगवदङ्गसङ्गोऽङ्गनानामहो इति पारोक्ष्येणास्तुवन् परिजनान् । परिग्रहः परिजने पत्न्यां स्वीकारमूलयोरिति विश्वः ॥ ३७ ॥

अहो भोजपते यूयं जन्मभाजो नृणामिह ।
यत् पश्यथासकृत् कृष्णं दुर्दर्शमपि योगिनाम् ॥ ३८ ॥

सत्यधर्मीया —— भोजपते उग्रसेन इह नृणां मध्ये यूयं जन्मभाजः । तत्र निमित्तमाहुः । योगिनामपि दुर्दर्शं कृष्णमसकृद्बहुवारं निरन्तरमिति यावत् । पश्यथेति यदिति ॥ ३८ ॥

यन्निःसृतं जगदिदं सकलं पुनाति पादावनेजनपयस्तु वचश्च शास्त्रम् ।
भूः कालभर्जितभगाऽपि यदङ्घ्रिपद्मस्पर्शोद्धशक्तिरभिवर्षति नोऽखिलार्थान् ॥ ३९ ॥

सत्यधर्मीया —— अधुनाऽपि मधुनाथदर्शनादिभाज इति जन्मभाज इति भोजराजादीन् प्रति राजानो वदन्ति ॥ **यन्निःसृतमिति** । तुरेवार्थे । तुः पयसः समयस्य च किञ्चित्प्रमितविशेषसूचको वा । तन्महत्त्वस्यागतगीतारूपं च यन्निःसृतमुत्पन्नं च व्यक्तं जगत्पुनातीत्यावृत्त्या तन्त्रेण वाऽन्वयः । तथा पादावनेजनपयश्च गङ्गारूपं तथा तद्वचश्च । गङ्गा गङ्गेति यो ब्रूयादित्यादेस्तव्याहरणं च पुनाति । कालेन भर्जितभग ऐश्वर्यादिर्यस्याः । दग्धस्वसम्पत्कादिदानीं यदङ्घ्रिपद्मयोः स्पर्शः सम्बन्धस्तेनेद्धाऽभिवृद्धा शक्तिर्यस्याः सा वीर्यवतीति यावत् । नोऽखिलार्थान् ईप्सितान् अभिवर्षति तमसकृत्पश्यथेति यूयं जन्मभाज इति प्रशशंसुरित्यतीतेनान्वयः । यन्निःसृतं वेदं शास्त्रं च पादावनेजनपयश्च योऽयं पुनातीति वा ॥ ३९ ॥

तद्दर्शनस्पर्शनानुपथप्रजल्पशय्यासनाशनसयौवनपिण्डबन्धाः ।
येषां गृहे निरयवर्त्मनि वर्ततां च स्वर्गापवर्गविरमः स्वयमास विष्णुः ॥ ४० ॥

सत्यधर्मीया —— निरयवर्त्मनि निरयः संसारस्तद्वर्त्मनि वर्ततां सांसारिकाणां निरयद्वारभूतत्वात्तद्वर्त्मनि वा वर्तमानानां येषां भवने गृहे स्वर्गापवर्गविरमोऽपवर्गः कर्मसाध्यफलात्मा स्वर्गश्चासौ स च तस्य विरमोऽप्राप्तिर्यस्मात्सः । स्वर्गो मुक्तिरपवर्गः स्वर्गस्तयोस्तयोर्विषये विरमोऽनभिलाषात्मा औदासीन्यं यस्मात् स एकान्तिनां स्वर्गापवार्गोऽपि वर्जनीय इति तदनार्जने मतिद इति भावः । अपवर्गस्त्यागमोक्षयोः । क्रियावसानसाफल्येष्वपवर्गः प्रयुज्यत इति विश्वः । अपवर्गः क्रियासाध्ये फलाप्तौ त्यागमोक्षयोरिति च । स्वर्गः सुषुप्तिरित्याख्या मुक्तेरपि समा यत इति बृहदारण्यक भाष्योक्तेः । विष्णुः स्वयं प्रधान आस । धात्वन्तररूपम् । अव्ययं वा । प्रधानवाचकत्वे कश्चानन्यः केवलस्वयमिति ब्रह्म इति तृतीयतात्पर्योक्तेः । स्वयं साक्षात्कृष्णकेशात्मेति वा । ये च तस्य दर्शनं स्पर्शनमनुपथो

गमनं प्रजल्पः सम्भाषणं शय्या च मिलित्वाऽऽसनं च सयौवनेन पिण्डेन देहेन बन्ध आलिङ्गनादिर्येषां ते । पिण्डो देहे जपापुष्पे निपाते सिल्लकेऽपि चेति विश्वः । निरयवर्त्म नरकमार्गो निवर्ततां गच्छत्वित्यासेत्यप्यर्थः । स्वर्गश्च सुखदुःखसम्भिन्नश्च लोकोऽपवर्गो मोक्षश्च तयोर्विरमो विरतिस्तथा विशेषतो रमो रतिश्च येन स इति वा । पिण्डा देहा जरादिना सहिताः सयौवनास्ते येन सम्बन्धो गाढालिङ्गनादिर्येषामिति वा । स्वयं सुशोभन-दैवं निमित्तीकृत्यासेति वा । अनेन निरयवर्त्मनीति प्रोक्तप्रतिषेधः कृत इति मन्तव्यम् । यूनो भावो यौवनम् । हायनान्तेत्यण् । अन्निति प्रकृतिभावः कर्म वा । केचिदुद्धवार्जुनौ सेनेयार्जुनौ यथासम्भवं द्वौ ग्राह्यौ । दर्शनाशनान्तैः । या सम्पदा सहितौ सयौ । एकारान्तः शब्दः । वने पिण्डबन्ध आलिङ्गनादियेषाम् । सर्वमुर्वरितं सममिति वा । सयौनसपिण्डबन्ध इति पाठे योनेरयं यौनः स च सपिण्डश्च तेन बन्धोऽनुबन्धस्तेन सहित इति स तथा । प्राहुणिकज्ञातिसम्बन्धवानिति यावत् ॥ ४० ॥

नन्दस्तत्र यदून् प्राप्तान् श्रुत्वा कृष्णपुरोगमान् ।
तत्रागमद् वृतो गोपैस्तरसा तद्दिदृक्षया ॥ ४१ ॥

सत्यधर्मीया — तत्र श्यमन्तपश्चके तरसा त्वरया ॥ ४१ ॥

तं दृष्ट्वा वृष्णयो हृष्टास्तन्वः प्राणमिवोत्थिताः ।
परिषस्वजिरे गाढं चिरदर्शनकातराः ॥ ४२ ॥

सत्यधर्मीया — तन्वः शरीरणि चिराद्दर्शनं तेन कातराः परिषस्वजिरे आलिलिङ्गुः । उपसर्गादिति षत्वम् ॥ ४२ ॥

वसुदेवः परिष्वज्य सम्प्रीतः प्रेमविह्वलः ।
स्मरन् कंसकृतान् क्लेशान् पुत्रन्यासं च गोकुले ॥ ४३ ॥

सत्यधर्मीया — पुत्रन्यासं सुतस्थापनं च स्मरन् ॥ ४३ ॥

कृष्णरामौ परिष्वज्य पितरावभिवाद्य च ।
न किञ्चनोचतुः प्रेम्णा साश्रुकण्ठौ कुरूद्वह ॥ ४४ ॥

सत्यधर्मीया — पितरौ यशोदानन्दौ ॥ ४४ ॥

तावुत्सङ्गं समारोप्य बाहुभ्यां परिरभ्य च ।
यशोदा च महाभागा सुतौ विजहतुः शुचः ॥ ४५ ॥

सत्यधर्मीया — यशोदा च नन्दश्चेति तौ सुतौ । उत्सङ्गमूरुम् । उत्सङ्गमुद्गत-सङ्गमेकमेकं चोत्कृष्टसङ्गं च जगद्ग्रहमिति तावित्यप्यर्थः ॥ समारोप्य तथा बाहुभ्यां परिरभ्य च शुचो विरहजशोकान् विजहतुः ॥ ४५ ॥

रोहिणी देवकी चैव परिष्वज्य व्रजेश्वरीम् ।
स्मरन्त्यौ तत्कृतां मैत्रीं बाष्पकण्ठे समूचतुः ॥ ४६ ॥

सत्यधर्मीया — व्रजेश्वरीं यशोदां बाष्पकण्ठे देवकी रोहिणी चेत्युभे । बाष्प-कण्ठाविति पाठे यशोदानन्दौ प्रति समूचतुरित्यर्थः । बाष्पकण्ठाविति पाठो ललितः । तत्कृतं यशोदानन्दकृतम् । मैत्रीं स्मरन्त्यौ ॥ ४६ ॥

को विस्मरेत वां मैत्रीमनुवृत्तां व्रजेश्वरि ।
अप्यवाप्यैन्द्रमैश्वर्यं यस्या नेह प्रतिक्रिया ॥ ४७ ॥

सत्यधर्मीया — हे व्रजेश्वरि हे व्रजेश्वर । वामनुवृत्तामविच्छिन्नां मैत्रीम् । को विस्मरेत विस्मरेत् । का विस्मरेतेति ते । प्रक्रमानुरोधेन वक्तव्ये क इति वदन्त्यौ स्मरणेऽस्मरणेच स्वातन्त्र्यं किञ्चित्प्रत्यादरणेऽपि न स्त्री स्वातन्त्र्यमर्हतीत्यादेर्नावयोः पत्यादेरिति सूचयत इति मन्तव्यम् । नैवास्ति प्रत्युपकृतियोग्यं किञ्चिदथवा दातव्यं चेल्लोकेऽविकत्वेन (?) सम्प्रतिपन्नं चैन्द्रमैश्वर्यं च यस्या मैत्र्याः प्रतिक्रिया तत्फलरूपं न ॥ ४७ ॥

एतावदृष्टपितरौ युवयोः स्म पित्रोः सम्प्रीणनाभ्युदयपोषणपालनानि ।
प्राप्योषतुर्भवति पक्ष्म ह यद्वदक्ष्णोर्न्यस्तावकुत्रच भयौ न सतां परस्तात् ॥ ४८ ॥

सत्यधर्मीया — अदृष्टौ पितरावहं वसुदेवश्चेत्येतौ याभ्यां तौ । यद्यपि नद्यृतश्चेति कपा भाव्यं तत्पितृत्वमेवाप्रामाणिकमिति ध्वनयितुं स नायात इति ज्ञेयम् । पित्रोर्यशोदा-

नन्दयोस्तथामतयोर्युवयोः सम्प्रीणनं सम्प्रीतिजननमभ्युदयो जातकर्माद्यभिवृद्धिव्यापारः पोषणं रसायनदिभोजनतः पालनमनलानिलादितः । एतानि प्राप्यास्माभिर्न्यस्तौ । मयूरव्यंसकादि-समासः । तर्हि लोकानुकरणार्थं सर्वमनुकुर्वतोः सद्भ्योऽपि भयं न किमित्यत आहतुः । न सतां परस्तादसद्भ्योऽन्यत्र सद्भ्य इति यावत् । सभयाविति शेषः । सतां परस्तादकुत्र च भयौ । पक्ष्मेत्येकवचनेन बलपक्षे यथाकथञ्चित् संरक्षणं भवेन्न भवेत्कथञ्चिदपि भगवत्पक्ष इति मन्तव्यम् । पक्ष्मेत्यक्षिलोमवाचकपदोत्तरमेकवचनेन शुक्लकेशकृष्णकेशयोरैक्यं सूच्यत इति वा । न सतां परस्तात् । असदन्येषां सतामिति यावत् । कुत्र न च विद्यते भयं याभ्यामित्यकुत्रचभयाविति वा ॥ ४८ ॥

गोप्यश्च कृष्णमुपलभ्य चिरादभीष्टं यत्प्रेक्षणे दृशिषु पक्ष्मकृतं शपन्ति ।
दृग्भिर्हृदीकृतमलं परिरभ्य सद्यस्तद्भावमापुरपि नित्ययुजां दुरापम् ॥ ४९ ॥

सत्यधर्मीया — गोप्योऽभीष्टं कृष्णं चिरादुपलभ्य यस्य प्रेक्षणे प्रसक्ते दृशिषु नेत्रेषु पक्ष्मकृतमुन्मीलनिमीलनादिरूपं तद्व्यापारम् । पक्ष्मणां कृतं धातारं वा शपन्ति । क्रिया-प्रबन्धे लट् । अशपन् । दृग्भिर्हृदी कृतमलमिति वृत्तलक्षणव्यत्यस्त्या तासां सद्वृत्तव्यत्यासं ध्वनयति । दृग्भिर्नीरीक्ष्यानन्तरे हृदि कृतं साकारमङ्कूरितमलं परिरभ्य नित्यं मनोयुजो योगिनस्तेषामपि दुरापं दुष्प्रापं तद्भावं तद्भक्तिम् । भावो भक्तिस्समुद्दिष्टेति बृहद्भाष्योक्तेः । आपुः । प्रेक्षण इति तादर्थ्ये सप्तमी वा ॥ ४९ ॥

भगवांस्तास्तथाभूता विविक्त उपसङ्गताः ।
आश्लिष्यानामयं पृष्ट्वा प्रहसन्निदमब्रवीत् ॥ ५० ॥

सत्यधर्मीया — भगवान्कृष्णो विविक्ते एकान्ते उपसङ्गता मिलिता आश्लिष्य तथाऽनामयं नीरोगतां पृष्ट्वा प्रहसन्निदमब्रवीत् ॥ ५० ॥

श्रीभगवानुवाच —

अपि स्मरथ नः सख्यः स्वानामर्थचिकीर्षवः ।
गतांश्चिरायितानन्यासङ्गात् कृपणचेतसः ॥ ५१ ॥

सत्यधर्मीया — हे सख्यः स्वानां ज्ञातीनामर्थं चिकिर्षव इति विग्रहः । न लोकेति षष्ठीप्रतिषेधात् । कृपणचेतसो गतान् । अन्यासङ्गात्कार्यान्तरासक्तेः । अन्यासामासङ्गात्त-दूहितोऽप्यर्थो भवतु का हानिरित्यपि भगवद्भावः । चिरायितान् आगमनालस्यं कृतवतो नः स्मरथापि स्मरथ किम् ॥ ५१ ॥

अवबुद्ध्य यथाऽस्मासु इदमेव विशङ्क्ये ।
नूनं भूतानि भगवान् युनक्ति वियुनक्ति च ॥ ५२ ॥

वायुर्यथा घनानीकं तृणतूलरजांसि च ।
संयोज्य क्षिपते भूयस्तथा भूतानि भूतकृत् ॥ ५३ ॥

सत्यधर्मीया — यथायथावत्सम्यगिति वा । अवबुद्ध्य विचार्यास्मासु यूयं वयं चेति वयम् । त्यदादित्वात्परस्यैकशेषः । इदमेवेत्यपरनिरासः । विशङ्क्ये तर्कयामि । किं तदित्यत आह ॥ **नूनमिति** । त्वमेव योजयिता वियोजयिता चेति तन्मुखत एव वादयितुं परोक्षत आह । भगवान् हरिभूतान्यस्मदादिभिर्युष्मदादीनि युनक्ति संयोजयति वियुनक्ति विनियोजयति च प्रागिह संयोगकर्तेदानीं विनियोगकर्तेश्वर इति भावः । एतमेवाभिप्रायं निदर्शनेन द्रढयति ॥ **वायुरिति** । घनानामनीकं मेघमण्डलं तथा तृणं च लघु तूलं कार्पासो रजांसि परागादीनि संयोज्यानन्तरं क्षिपते । तथा भूतकृद्धरिर्भूतानि संयोज्य भूयः पुनः क्षिपति । भूतकृद्यत्किञ्चिद्भूतकृद्वायुरपीति तदुभयान्वयीति ज्ञेयम् ॥ ५३ ॥

मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते ।
दिष्ट्याऽऽसीन्मयि सुस्नेहो भवतीनां मुदावहः ॥ ५४ ॥

सत्यधर्मीया — परमरहस्यदृष्टौ तु मम युष्माकं च सर्वथा वियोग इति वक्तुं तत्स्वभावमावेदयति ॥ **मयीति** । मयि भक्तिर्भूतानां जनानाममृतत्वाय मुक्तये कल्पते । किमापणवीथीकथया कथयोपयुक्तमित्यतः कथयति । मुदावहः स्वरूपसुखप्रापकः । अनेनामृतत्वेति विवृतार्थम् । भवतीनां सुस्नेहः इदमपि भक्तिशब्दार्थकथनमिति बोध्यम् । दिष्ट्या सुखेनासीत् । उत्पन्न इति ॥ ५४ ॥

अहं हि सर्वभूतानामादिरन्तोऽन्तरं बहिः ।
भौतिकानां यथा स्वं वा भूर्वायुर्ज्योतिरङ्गनाः ॥ ५५ ॥

सत्यधर्मीया —— अहं सर्वभूतानामादिरूत्पादकस्तथाऽन्तो नाशकोऽन्तरं मध्ये च बहिश्च वर्ते । हिरन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः । तद्दूरे तद्वन्तिके । तदन्तरस्य सर्वस्य तदु सर्वस्य बाह्यत इत्याद्यागमप्रसिद्धिद्योतकः । अङ्गना भौतिकानां पदार्थानां खमाकाशो जलं भूः पृथ्वी वायुर्ज्योतिरग्निः । भौतिकानामन्तर्बहिश्च यथा भूतानि वर्तन्ते इति न दृष्टान्तः । वृषा यूथे वेत्यृग्भाष्येऽल्पस्यापि प्रसिद्धचैव दृष्टान्तत्वं हि युज्यत इत्युक्ते-र्हरेर्निरवधिकव्याप्तत्वात् । यथा भूतानीत्युक्तौ न प्रतीयते कार्यकारणभावः । किञ्च क्रमेणोक्तौ स्वातन्त्र्यं च तेषां प्रतीयेतेत्येषामेकैकशो ग्रहणमिव व्यत्यस्योक्तिरिति च ध्येयम् ॥ ५५ ॥

एवमेतानि भूतानि भूतेष्वात्माऽऽत्मना ततः ।
उभयं मय्यथपरे पश्यताथ तमक्षरे ॥ ५६ ॥

सत्यधर्मीया —— एवमेतानि भूतानि भौतिकेषु ततानि परमात्मना ततानि तैनैवात्मा च ततः । तर्हि स आत्मा त्वदितरः किमित्यतोऽहमेव स इति विधत्ते । उभयं भूतान्यात्मेत्युभयं कोटिद्वयं मय्यक्षरे परे आततं पश्यथ । अथपर इति पदमेकम् । न विद्यतेऽन्नं यस्य स चासौ परश्च तस्मिन् । अनश्नन्नन्योऽभिचाकसीति । अन्यो निरन्नोऽपि बलेन भूयानित्यादि श्रुतिस्मृतयोऽत्र भवन्ति । अन्नं थमिति श्रुतेः ॥ ५६ ॥

श्रीशुक उवाच ——

अध्यात्मशिक्षया गोप्य एवं कृष्णेन शिक्षिताः ।
तदनुस्मरणध्वस्तजीवकोशास्तुमध्यगुः ॥ ५७ ॥

सत्यधर्मीया —— एवमध्यात्मशिक्षयाऽध्यात्मानं देहमधिकृत्य विद्यमानानां परमात्म-तत्त्वानां शिक्षयोपदेशेन कृष्णेन शिक्षिता उपात्तविद्या गोप्यस्तस्य कृष्णस्यानुस्मरणेन ध्वस्तो जीवकोशः शरीरं तदभिमान इति यावत् । यासां ताः श्रीकृष्णं तं हरित्वेनाध्यगु-र्व्यजानन् । या एवं प्राङ्न शिक्षितास्ता गोप्यः कृष्णेऽध्यात्मशिक्षया ब्रुवति सति । इतरं पुरावत् ॥ ५७ ॥

नताः स्म ते नाथ पदारविन्दं योगेश्वरैर्हृदि विचिन्त्यमगाधबोधैः ।
संसारकूपपतितोत्तरणावलम्बं गेहं जुषामपि मनस्युदियात् सदा नः ॥ ५८ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे सप्ततितमोऽध्यायः ॥

सत्यधर्मीया — अध्यगुरित्युक्तज्ञानवतीनां गोपीनां प्रार्थनाम् । प्रार्थनाऽस्माकमियमित्याहुः ॥ **नता इति** । नाथ ते अगाधबोधैर्योगेश्वरैर्हृदि विचिन्त्यं योगेश्वरमात्रविचिन्त्यं चेत्कार्यसमयसमयातानां मशकानां किमिति नीतिवन्नेति शंसति ॥ संसारेति । संसार एव कूपस्तत्पतितानामुत्तरणे ऊर्ध्वमागमनेऽवलम्बं निःश्रेण्याद्याश्रयं पदाराविन्दं नताः स्म । गेहं जुषां सेवमानानामपि नो मनसि सदा तत्पदारविन्दमुदियात् ध्यानकाले उदितं भवतु । एतदर्थं नताः स्मेति वाऽन्वयः । अस भुवीत्यस्याशिषि प्रयोगः । नता भवामेति प्रार्थयामहे । जन्मान्तरे तु त्वत्पादाब्जनमनमाशास्महे इत्यर्थ इत्यस्यार्थः प्रेक्षावदीक्षणीयः । भूरादेशस्य वर्जनीयत्वादिति केचित् । स्म तव महत्त्वं स्मृत्वेति वा ॥ ५८ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे सप्ततितमोऽध्यायः ॥ १०-७० ॥

॥ अथ एकसप्ततिरध्यायः ॥

श्रीशुक उवाच —

तथाऽनुगृह्य भगवान् गोपीनां स गुरुर्गतिः ।
युधिष्ठिरमथापृच्छत् सर्वांश्च सुहृदोऽव्ययम् ॥ १ ॥

सत्यधर्मीया — अत्रापि भक्तिमार्गमेव व्यक्तीकर्तुं कृष्णभार्याणां कृष्णायाश्च संवादादिकं प्रतिपाद्यते । तत्रादौ धर्मादिकुशलालापादिकरत्पीठिकां रचयति ॥ **तथेति** । गुरुरभिहितहितो गतिर्गम्यस्थानं भगवान् गोपीनां गोपीस्तासामुपरि वाऽनुगृह्यानुग्रहं कृत्वा स कृष्णोऽथ गोपायापनानन्तरं युधिष्ठिरम् । गवियुधिभ्यां स्थिर इति षत्वं सप्तम्या अलुक् । धर्मं तथाऽन्यांश्च सुहृदोऽव्ययं क्षेममपृच्छत् ॥ १ ॥

त एवं लोकनाथेन परिपृच्छ्य सुसत्कृताः ।
प्रत्यूचुर्हृष्टमनसस्तत्पादेक्षाहतांहसः ॥ २ ॥

सत्यधर्मीया — लोकनाथेन श्रीकृष्णेनैवमुक्तरीत्या परिपृच्छ्य पृष्ट्वा । सुसत्कृता बहुबहुमानितास्तत्पादयोर्वीक्षा निरीक्षणं तया हतमंहो दुरितं येषां ते तथा । कृष्णाङ्घ्रि-दृष्टिनष्टदुरिष्टा हृष्टमनसश्च प्रत्यूचतुः ॥ २ ॥

कुतोऽशिवस्त्वच्चरणाम्बुजासवं महन्मनस्तो मुखनिःसृतं क्वचित् ।
पिबन्ति ये कर्णपुटैरलं प्रभो देहं भृतस्तत्कृतमुच्छ्वसन्ति हि ॥ ३ ॥

सत्यधर्मीया — हे प्रभो । कर्णपुटैर्महन्मनस्तो महतां व्यासादीनां मनस्तो मनःपूर्वकं मुखतो निःसृतं त्वच्चरणाम्बुजासवं तव चरणकमलकथामृतं क्वचिदपि पिबन्ति तेषामशिवो न विद्यते शिवं मङ्गलं यस्मिन्स व्ययः कुतः स्यात् । ते चालं देहं भृतो बिभ्रति ये ते तत्कृतं तत्प्रापककर्मकर्तारं जनं वीक्ष्योच्छ्वसन्ति ह । अयं वृथा नश्यतीति क्लिश्यतीति भावः । हीतीदमर्थस्य प्रसिद्धिमाह । तत्कृतं तव व्यापारमुच्छ्वसन्ति शिष्यप्रशिष्यद्वारा प्रकाशयन्ति तेषां कुतोऽशिव इति वा । शिवं मोक्षे सुखे भद्रे शिवं भद्रमिति विश्वानेकार्थध्वनि पदमञ्जर्यौ । आश्वमेधिके पर्वणि गुरुशिष्यसंवादे नो मार्गाः शिवाश्च स्युरिति । तथाऽ-

न्यत्रापि एतादृशः शिवः पन्था इति प्रयोगात्पुल्लिङ्गो मङ्गलवाचीत्यशिवोऽमङ्गलमिति वा । ये देहं भृतस्तदभिमानवन्तस्तेषां चिज्ज्ञानं तत्कृतं स्वकर्माद्युच्छ्वसन्ति क्लिश्यन्ति तेषां कुतः । सार्वविभक्तिकस्तसिः । कौ शिव इति वा । परत्र क्लेश इति किं वक्तव्यमित्यर्थः ॥ ३ ॥

तं त्वाऽऽत्मधामविबुधात्मगतिं त्र्यवस्थमानन्दसम्प्लवमखण्डविकुण्ठबोधम् ।
कालोपसृष्टनिगमावपनात्तयोगमायाकृतिं परमहंसगतिं नताः स्मः ॥ ४ ॥

सत्यधर्मीया —— पिबन्ति ये कर्णपुटैरिति पारोक्षोक्त्या स्वेषां तदितरताऽपाततः प्रतीता तामपाकर्तुं तन्मध्ये वयमित्यवयन्ति ॥ **तमिति** । आत्मधाम आत्मनो धामाश्रयस्तं प्रतिष्ठितः स्वे महिम्नीत्यादेः । विबुधानां ज्ञानिसामान्यस्यात्मगतिं स्वरूपप्रापकमात्मना धात्रा। आत्मा सुधौतः सुमना विरिञ्चश्चेति कथ्यत इत्युक्तेः । धाम तेजआदिकं येषां ते च ते विबुधाश्च तेषामात्मगतिदं वा । अवस्थं तिस्रोऽवस्था जाग्रदाद्या यस्मात्सः । एकैक-स्यावस्थात्रिकदातेति वा । देवानां जागरणं दैत्यानां सुप्तिलक्षणाज्ञानं मानुषाणां स्वप्नलक्षण मिश्रज्ञानस्वभावं प्रापयतीति त्र्यवस्थं वा । आनन्दसम्प्लवं आनन्दस्य सम्प्लवो बाहुल्यं यस्य स तम् । अखण्डो विकुण्ठः सर्वगुणाभिन्नोऽप्रतिहतो बोधो यस्य तम् । एतादृशो मनुष्यलोके

कर्मवश इव कुतो जात इत्यत आहुः ॥ **कालेति** । कालेनोपसृष्टाः सोपसर्गाः उत्सन्ना इति यावत् । निगमा वेदास्तेषामावपनं व्यक्तिकरणरूपपुनरावापस्तस्मै आत्ता स्वीकृता योग-मायया नित्यावियोगिन्याऽऽत्मेच्छयाऽऽकृतिर्देहो येन स तम् । कालेन यवनेनोपसृष्टा ये निगमा वाऽन्तरपुराणि तेभ्य आवपनमन्यत्र स्थापनं तदर्थं आत्ता स्वीकृता योग उपाय-स्तत्साधिका या मायाशक्तिस्तस्याः कृतिर्व्यक्तिर्येन तम् । कालोपसृष्टानामीषत्तदुपद्रवाणां निगमे नगर इति द्वारकायामावपनमत्रत्यानां रात्रौ तत्र स्थापनं तदर्थे आत्ता स्वीकृता योगमायायाः कृतिरभिव्यञ्जनं येन स तं वा । एतदर्थसर्वस्वे मानमाहुः । परमहंसानामति-शुद्धानां वेदान्तनिष्ठानां गतिर्ज्ञानं यस्मिंस्तं तज्ज्ञानविषयीकृतवैभवमित्यर्थः । हंसगतिर्हंसेन गतिर्गमनं यस्य स तस्य परम इत्युत्तम इति परमहंसगतिस्तं वा । परमहं बहूत्सवं सगतिमस्माभिरनीश्वरैः सहापि गतिर्गमनादिकं यस्य स तं वा । अनेन कारुण्यं ध्वन्यते । आवपनार्थं योग उपायो येन तम् । आयाकृतिं सकललाभात्मकदेहवन्तम् । आकारो देह आकृतिरिति यादवः । तं त्वा त्वां तं तु नताः स्मः । तन्तुश्चासावात्मा च पुत्रो ब्रह्मा तस्य

धाम चासौ विबुधात्मगतिस्तं वा । तिस्त्रोऽवस्था आकारविशेषाः श्रीभूदुर्गेति यस्याः सा च सा मा च रमा च तस्या आनन्दसम्प्लवो येनेति वा । तिस्त्रोऽवस्था यस्मात्स चासौ(?) तम् । नन्दस्य नन्दगोपस्य सम्यक् सम्प्लवो वारिधिपारणे नौकायितं तं वरुणागारं गत्वा नीतवान्नन्दमिति ॥ ४ ॥

इत्युत्तमश्लोकशिखामणिं जनेष्वभिष्टुवत्स्वच्युतकौरवस्त्रियः ।
समेत्य गोविन्दकथां मिथोऽगृणन् नृलोकगीतां शृणु वर्णयामि ते ॥ ५ ॥

सत्यधर्मीया — उत्तमश्लोकशिखामणिं जनेष्वित्यभिष्टुवत्सु । अच्युतस्य तथा कौरवाणां च स्त्रियः समेत्यैकत्र मिलित्वा मिथःपरस्परम् । नृलोको विशिष्टनृणां लोकः स्वर्गादिस्तत्र गीताम् । यथोक्तम् । शर्मणा नृपत्नीरित्यृकूटीकायाम् । नरो देवाः प्रधान-पुरुषत्वादिति । गोविन्दकथामगृणन् । तां तेऽनुवर्णयामि त्वं च तां शृण्वित्यन्वयः ॥ ५ ॥

द्रौपद्युवाच —

हे वैदर्भ्यच्युतो भद्रे हे जाम्बवति कौसले ।
हे सत्यभामे कालिन्दि शैब्ये रोहिणि लक्ष्मणे ॥ ६ ॥

हे कृष्णपत्न्य एतन्नो ब्रूत वो भगवान् स्वयम् ।
उपयेमे यथा लोकमनुकुर्वन् स्वमायया ॥ ७ ॥

सत्यधर्मीया — हे वैदर्भि रुग्मिणि । हे भद्रे हे जाम्बवति हे कोसले सत्ये तस्या एव नीलेति नामान्तरम् । हे सत्यभामे हे कालिन्दि । शैब्ये मित्रविन्दे भो लक्ष्मणे । यत्तु श्रीधरीये रोहिणी नाम काचिदष्टमहिषीतुल्येति व्याकृतं तदुत्तरत्र तदुत्तरानीरणादस्वरसम् । किञ्चाष्टमहिषीतुल्येति तु बाधितमिति बोधनीयम् । किञ्च महिषीतुल्येति स्थूलदृष्टित उक्तौ चाष्टेति स्पष्टेदंमुद्रणविरोधो वज्रलेपायित इत्यलम् । रोहमारोहमुत्सङ्गः सोऽस्या अस्तीति रोहिणी । उपसर्गाश्च धातुलीनार्थद्योतका इति स्थितेः । मतुबर्थश्च प्राशस्त्यं सहोरूरिति-वद्वारारोह इति सर्वविशेषणमेवेति केचित् । वस्तुतस्तु जाम्बवत्त्या एव नामान्तरम् । प्रदाय रोहिणीं शुभां मणिं च तामित्याचार्योक्तेः ॥ नायं विवाहक्रमः । तथात्वे जाम्बवत्त्या रुग्मिण्यव्यवधानेनाभिधातव्यत्वात् । नाप्युत्तमक्रमः । रुग्मिण्यनन्तरं सत्यभामायास्तदनन्तरं

जाम्बवत्यास्तासां मध्ये जाम्बवती प्रधाना । रामेण तुल्या जाम्बवती प्रियत्व इत्युक्तेर्वक्तव्यत्वात् । कः क्रमोऽत्रेति चेत्सत्यम् । प्रत्यर्थमादितो रुग्मिणीसत्यभामाया औत्तम्याद्ग्रहणम् । जाम्बवत्याश्च रमावेशाभावदशायां किञ्चिन्न्यौन्यं षण्णामितरासामिति यथायथं ग्रह इति सम्भवात् । यथोक्तमाचार्यैः

'............ कृष्णस्यान्याः किञ्चिदूनाश्च तस्याः ।
यदाऽऽवेशो बहुलः स्याद्रमायास्तदा तासु प्रीयते केशवोऽलम् ।
यदा वंशो ह्रासमुपैति तत्र प्रद्युम्नतो विंशगुणाधिकाः स्युरि'त्यादिना ।

हे कृष्णपत्न्यः शतोत्तरषोडशसङ्ख्याः । पत्न्य इत्यनेन सर्वाऽपि तत्कर्तृकयज्ञफलभोक्त्र्य इति पाणिगृहीत्य इति सूचयति । स्वमायया लोकमनुकुर्वन् स्वयं प्रधानपुरुषः सन् यथा येन प्रकारेण व उपयेमे एतन्नोऽस्मान्प्रति ब्रूत ।। ६-७ ।।

रुग्मिण्युवाच —

चैद्याय माऽर्पयितुमुद्यतकार्मुकेषु राजस्वशेषभटशेखरिताङ्घ्रिरेणुः ।
निन्ये मृगेन्द्र इव भागमजावियूथात् तच्छ्रीनिकेतचरणाब्जसमर्चनाय ।। ८ ।।

सत्यधर्मीया — भौष्मी भाषते ।। **चैद्यायेति** । मा मां चैद्याय शिशुपालायार्पयितुं दातुं राजसु जरासन्धादिषु । उद्यत्कार्मुकेषूद्यतानि कार्मुकाणि येषां तेषु । उद्यतकार्मुकेषुराजस्विति पदं वा । समासान्तविधेरनित्यत्वान्न टच् । उद्यतकार्मुकानीषवश्चैषां ते राजानश्च तेषु । उद्यतकार्मुकेषु यथा भवति तथा राजस्विति वा । अशेषा अनप्रधाना मुख्याश्च राजानो भटाश्च तेषां शेखरितः शेखरवदाचरन्नङ्घ्रिरेणुर्येन सः । तन्मूर्धन्यरत्नकिरीटोपरि संस्थापितचरणचरेणुः । अजाश्चावयश्च तेषां यूथात् सङ्घान्मृगेन्द्रः सिंहः स्वभागमामिषादिकमिव मां निन्ये नीतवान् । न सौन्दर्यलुब्धः स नीतवानिति ममापि नाहन्ता किन्त्वेतत्कृत इत्याह ।। **तच्छ्रीनिकेतेति** । सा च सा श्रीश्च तस्या निकेतमाश्रयो यच्चरणाब्जं तस्य समर्चनं तदर्थम् ।। ८ ।।

सत्यभामोवाच —

यो मे सनाभिवधतप्तहृदा ततेन लिप्ताभिशापमपमार्ष्टुमुपाजहार ।
जित्वर्क्षराजमथ रत्नमदात् स तेन नीतच्छिदादिशत मां प्रभवेऽपि दत्ताम् ।। ९ ।।

तात्पर्यम् – नीतच्छित् भगवता प्राप्तभेदः ॥ ९ ॥

सत्यधर्मीया — यो मे सनाभीति श्लोकेऽप्रतीतेरिवार्थस्य तृतीयाभ्रान्तेश्च नीतच्छिदादिशतेत्यत्र स्वयं प्रथमान्ततया पदं विच्छिद्यानूद्य व्याख्याति ॥ **नीतच्छिद्भगवता प्राप्तभेद इति** । नीता च्छिद्येनेति विग्रहोऽनेन सूच्यते । भावे वा सम्पदादिक्विबित्युक्तं भवति । मित्रभेद इति यथेति टीकोक्तेः । भगवता प्राप्तवैमनस्य इति वा । ततश्चायं श्लोकार्थः । साक्षाल्लक्ष्म्यौ द्वे इति रुग्मिण्यनन्तरं सत्यभामा भाषत इति भाषते ॥ **सत्यभामेति** । सनाभिः समाना नाभिरुदरं यस्य सहोदरः प्रसेनः । समानो नाभिरिति वा । यद्यपि नाभिःक्षत्रिय इत्यनुशासने नायं प्राणिप्रतीकवाची स्त्रीलिङ्ग इति ज्ञायते । तथाऽपि कथं तर्हि समुल्लसत्पङ्कजपत्रकोमलैरुपाहितश्रीण्युपनीतनाभिरिति भारविः । उच्यते । दृढभक्तिरित्यादाविव सामान्ये नपुंसकं बोध्यम् । वस्तुतस्तु लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति भाष्यात्पुंस्त्वमपीह साधुः । अत एव नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् । द्वयोः प्राणिप्रतीके च स्त्रियां कस्तूरिकामृग इति मेदिनी । रभसोऽपि । मुख्यराट् क्षत्रियो नाभिः पुंसि प्राण्यङ्गके द्वयोः । चक्रमध्यप्रधाने च स्त्रियां कस्तूरीकामृग इति । एवमेवंविधेऽन्यत्रापि बोध्यमिति लिङ्गानुशासनवृत्त्युक्तेः प्रासङ्गिक्युक्तिः । तस्य वधः सिंहविहितः संहारस्तेन । ततेन तातेन । तत कस्मै मां दास्यसीति काठके तथा नाभागखण्डे च तताभाङ्तुरित्यादेः श्रौतानुवादो वा । ततोऽनुकम्प्ये जन इति विश्वाल्लौकिको वा । लिप्ताभिशापम् । स्वारोपितमवपादमपमार्ष्टुं मार्जयितुमृक्षराजं जाम्बवन्तं जित्वा रत्नमदात् । कृष्णस्तेन रत्नेन सह । तेन कृष्णेन भगवता नीतच्छित् प्राप्तभेदः सापराध इति यावत् । सन्मम पिता दत्तामपि वाचाऽक्रूरादिभ्यः सङ्कल्पितामिति दत्तप्रायामपि मां प्रभवे समर्थाय । अनेन तान्परित्यज्यात्र प्रदाने निदानं कर्तुमकर्तुमन्यथाकर्तुं समर्थत्वमित्युक्तं भवति । आदिशतादिशत् । रत्नं कन्यारत्नं च ददावित्यर्थः । सनाभिवधाज्जातं तप्तं तापो हृद्याततं व्याप्तं च तेन हृदयात्ततापेनेत्यर्थः । सुखविशिष्टाभिधानादितिवदाहिताग्न्यादिवद्विशेषणपरनिपातः । करणेन स्वेन लिप्तो लोपितोऽभिशापः कृष्णो ययाचे मणिं स मया न दत्त इति मद्भ्रातरं घातयित्वा नीतवान् रत्नमिति स्वारोपितोऽपवादस्तमृक्षराजं जित्वा यद्रत्नमुपाजहार यस्तस्मै प्रभवे नीतछित्पिता तेन रत्नेन सह दत्ता मामप्यादिशतेति वाऽन्वयः। यो मे पिता रत्नं मे मह्यमादिशत्तमवश्यं दिशेत्युक्तावपि सते प्रभवे तन्नोपजहार

न दत्तवान् । अथ प्रसेनमरणानन्तरमितरद्यथापूर्वं योज्यम् । अदाने हेतुमप्याह । रत्नमदात्तल्लाभप्रयुक्तो मदोऽहन्ता तस्मात् ॥ ९ ॥

जाम्बवत्युवाच —

आज्ञाय देहविकृतिं निजनाथदैवं सीतापतिं त्रिनवहान्यमुनाऽभियुध्य ।
ज्ञात्वाऽवधीरणमुपाहरदर्हणं मां पादौ प्रगृह्य मणिनाऽहममुष्य दासी ॥ १० ॥

सत्यधर्मीया — मम पिताऽपि अमुना कृष्णेन त्रिनवहानि सप्तविंशतिदिनानि । अभियुद्ध्य युद्धं कृत्वा देहविकृतिं कृष्णदेहस्य रामदेहतया भवनरूपमाज्ञाय ज्ञात्वा प्रत्यक्षतो दृष्ट्वा निजनाथदैवं स्वनाथनयोग्यं दैवमुपास्यं सीतापतिमाज्ञाय च । अनन्तरमवधीरणमनादरं ज्ञात्वा तच्छान्त्यै पादौ प्रगृह्य मणिना सहार्हणं मां तत्परिहारयोग्यामित्यर्हणरूपां मामुपाहरद्दत्तवान् । इत्यहममुष्य दासी । इहामुष्याज्ञा यदा भविष्यति तत्करिष्यामीति दासीति वाऽऽवृत्त्याऽन्वयः । त्रिनवाहानीति पठने छन्दोभङ्गभियाऽपि माषं मषं कुर्याच्छन्दोभङ्गं न कारयेदित्यादेर्ह्रस्वपाठः । यद्वा शकन्ध्वादिपाररूप्ये ह्रस्वता ज्ञेया । प्राज्ञाय देहकृदमुमिति पठन्तोऽपि प्राज्ञाय देहकृन्मम पितेति तत्रार्थः । अगणयित्वा गतदिनं त्रिनवहानीत्युक्तिरिति नाष्टाविंशतिदिनाभिधानविरोधः । देहस्य विकृतिर्यस्य तमिति वा । स्मृतिङ्गते तु राघवे तदाकृतिं यदूत्तमे । समस्तभेदवर्जितां समीक्ष्य सोऽयमित्यवेदित्युक्तविकृतिशब्द आकृतिपर्याय इति मन्तव्यम् । द्वितीयपाठे तु सीतापतिमित्येतद्विवरणपरमाचार्यवच इत्यनुसन्धेयम् ॥ १० ॥

कालिन्द्युवाच —

तपश्चरन्तीमाज्ञाय स्वपादस्पर्शकाम्यया ।
सख्योपेत्याग्रहीत् पाणिं योऽहं तद्गृहमार्जनी ॥ ११ ॥

सत्यधर्मीया — स्वपादस्पर्शकाम्यया तपश्चरन्तीं आज्ञाय ज्ञात्वा सख्याऽर्जुनेन सहोपेत्य यस्याः पाणिमग्रहीदहं तद्गृहमार्जनी । याऽहमिति पाठे सर्वोपेता च तद्दर्शनादिवद्देवतेत्यर्थः । तस्या गृहमार्जनीति विग्रहः । सख्योपेतेति च पाठ उपेतपदोपेतसूत्रस्मारक इति च वदन्ति ॥ ११ ॥

मित्रविन्दोवाच —

यो मां स्वयंवर उपेत्य विजित्य भूपान् निन्ये श्वयूथमिव चात्मबलिं द्विपारिः।
भ्रातॄंश्च मेऽपकुरुतः स्वपुरं श्रियोऽगात् तस्यास्तु मेऽनुभवमङ्घ्र्यवनेजनाम्भः ॥ १२ ॥

सत्यधर्मीया — यः कृष्णः स्वयंवरमुपेत्य भूपान्द्विपारिः सिंहः श्वयूथं ग्रामसिंहनिवहं विजित्यात्मबलिं स्वापहारमिव विजित्य मां निन्ये । न केवलं भूपान्विजित्य किन्त्वपकुरुत आगात्तस्य मेऽनुभवं प्रतिजन्म । अवनेजनाम्भोऽस्तु ॥ १२ ॥

नीलोवाच —

सप्तोक्षणोऽतिबलवीर्यसुतीक्ष्णशृङ्गान् पित्रा कृतान् क्षितिपवीर्यपरीक्षणाय ।
तान् वीरदुर्मदहनस्तरसा निगृह्य क्रीडन् बबन्ध ह यथा शिशवोऽजतोकान् ॥ १३ ॥

सत्यधर्मीया — यथा शिशवो बाला अजतोकान् छागशिशून्बध्नन्ति तथा । अतिबलवीर्यसुतीक्ष्णशृङ्गान् अत्यधिके बले च वीर्यं चैषां ते च ते सुतीक्ष्णानि शृङ्गानि येषां ते च ते ते च तान् । क्षितिपानां वीर्यपरीक्षणाय कृतान् । वीराणां दुर्मदमहदहङ्कारं घ्नन्तीति तान्वीरदुर्मदहनः सप्त उक्षणो वृषभान् । तरसा बलेन वेगेन क्रीडन्निगृह्य बबन्ध ह प्रसिद्धम् ॥ १३ ॥

यश्चेत्थं वीर्यशुल्कां मां दासीभिश्चतुरङ्गिणीम् ।
पथि निर्जित्य राजन्यान् निन्ये तद्दास्यमस्तु मे ॥ १४ ॥

सत्यधर्मीया — यश्चेत्थं वीर्यशुल्कं वीर्यमेव शुल्कं मूल्यद्रव्यं यस्याः सा ताम् । दासीभिः सहितां तथा च तुरङ्गसेनावर्ती पथि राजन्यान्निर्जित्य मां निन्ये । तद्दास्यं दासीत्वं मेऽस्तु ॥ १४ ॥

भद्रोवाच —

पिता मे मातुलेयाय स्वयमाहूय दत्तवान् ।
कृष्णे कृष्णाय तच्चित्तामक्षौहिण्या सखीजनैः ॥ १५ ॥

सत्यधर्मीया — मम मे पिता श्रुतकीर्तिः । हे कृष्णे द्रौपदी । मातुलेयाय मातृभातृपुत्राय कृष्णाय तच्चितां मां सखीजनैरक्षौहिण्या सेनया च सहिताम् । स्वयमाहूय कारयित्वा दत्तवान्यस्मै ॥ १५ ॥

तस्य मे पादसंस्पर्शो भवेज्जन्मनि जन्मनि ।
कर्मभिर्भ्राम्यमाणाया येन तच्छ्रेय आत्मनः ॥ १६ ॥

सत्यधर्मीया — तस्य पादस्पर्शः । जन्मनिजन्मनि पदमेकम् । कर्मभिर्भ्राम्यमाणाया आत्मनस्तद्येन श्रेयो भवेत् । श्रेयः प्राप्तिनिवृत्तिश्च कर्मणां येन स पादस्पर्शो जन्मनि जन्मनि भवेदित्यर्थः । कर्मभिर्भ्राम्यमाणा या गोपस्त्रियस्तासां तच्छ्रेयो येन । संस्पर्श आत्मनः कृष्णस्य मेऽस्त्विति वा ॥ १६ ॥

लक्षणोवाच —

ममापि राज्ञ्यच्युतजन्मकर्म च श्रुत्वा मुहुर्नारदगीतमास ह ।
चित्तं मुकुन्दे किल पद्महस्तया वृतः स्वयं यस्तु विहाय लोकपान् ॥ १७ ॥

सत्यधर्मीया — हे राज्ञि राजराजीवनयने द्रौपदि । अच्युतस्य जन्म कर्म च जन्मना सहितं च तत्कर्म चेति वा । तच्छ्रुत्वा वक्ता च नानृतवादी नापि कश्चिदनागोत्र इत्याह ॥ **नारदगीतमिति ।** मम चित्तं मुकुन्दे आस तल्लग्नमभूत् । न कयाऽपि स वृतो वृतः कथं कथय त्वयेत्यतः कथयति ॥ **स्वयं पद्महस्तयेति ।** पद्मं हस्ते यस्या सा तया लक्ष्म्या । लोकपालान्ब्रह्मादीन् । एष ब्रह्माऽतिवृद्धस्तपति दिनमणिश्चञ्चलो मातरिश्वा दिग्वासा नीलकण्ठ इत्यादेर्विहाय त्यक्त्वा वृतः किलेदं सत्यमित्यर्थः । किलशब्दस्तु वार्तायां सम्भाव्येऽनृतसत्ययोरिति विश्वः । स्वयमित्यनेन मयि तदावेशमात्रमिति ध्वन्यते ॥ १७ ॥

ज्ञात्वा मम मतं साध्वि पिता दुहितृवत्सलः ।
बृहत्सेन इति ख्यातस्तत्रोपायमचीकरत् ॥ १८ ॥

सत्यधर्मीया — हे साध्वि द्रौपदि । मम मतं दुहितृवत्सलो वृहत्सेन इति ख्यातः । पिता तत्र मन्मनोरथसम्प्पत्तावुपायमचीकरच्चकार ॥ १८ ॥

यथा स्वयंवरे राज्ञि मत्स्यः पार्थेच्छया कृतः ।
अयं तु बहिराच्छन्नो दृश्यते स जले परम् ॥ १९ ॥

सत्यधर्मीया — यद्यपि तव पिताऽपि मत्स्यवेधने मच्छरीरजां दास्यामीति प्रतिश्रुत्य चकार मत्स्यस्थापनं ततोऽपीदमसुसाध्यवेधं लक्ष्यममिति लक्षणा वक्ति ॥ **यथेति** । हे राज्ञि तव स्वयंवरः पार्थेच्छया पार्थात्मवरापेक्षया मत्स्यः कृतः । अयं मत्स्यः । तुशब्दः सर्वाशक्यवेधत्वरूपविशेषसूचकः । बहिराच्छन्नः प्रावृतसर्वाङ्गः । तर्हि कावलोक्य वेद्धव्यः स इत्यत आह ॥ **जले परं केवलं दृश्यत इति** । कन्यार्थं कथं मुखबन्धः कर्तव्यमिति लज्जां वर्जयित्वा जले प्रतिबिम्बितं मुखमधोविधाय कीचकान्तस्तत्तच्छायां लक्षयित्वा लक्ष्यं वेद्धव्यमिति तदसुसाधता बोधिताऽनेनेति ज्ञेयम् ॥ १९ ॥

श्रुत्वैतत् सर्वतो भूपा आययुर्मत्पितुः पुरम् ।
सर्वास्त्रशस्त्रतत्त्वज्ञाः सोपाध्यायाः सहस्रशः ॥ २० ॥

सत्यधर्मीया — मत्पितुः पुरं सर्वतो भूपा एतन्मत्स्यवेधनं श्रुत्वाऽऽययुः । सोपाध्यायाः साचार्याः सर्वास्त्रशस्त्रतत्त्वज्ञाः सर्वशो बहुलाः ॥ २० ॥

पित्रा सम्पूजिताः सर्वे यथावीर्यं यथावयः ।
आददुः सशरं चापं वेद्धुं पार्षति मद्धियः ॥ २१ ॥

सत्यधर्मीया — वेद्धुं लक्ष्यं मत्स्यं मद्धियो मद्विवाहमतयः सशरं चापमाददुः ॥२१॥

आदाय व्यसृजन् केचित् सज्जीकर्तुमनीश्वराः ।
आकोट्यां ज्यां समाकृष्य पेतुरेकेऽमुना हताः ॥ २२ ॥

सत्यधर्मीया — धनुरादाय सज्जीकर्तुमनीश्वरा असमर्थाः केचिव्द्यसृजन् धनुस्तत्यजुः । आकोटिज्यामिति तथाऽकोष्ठं ज्यामिति सरलौ पाठौ । आकोटि अग्रपर्यन्तं ज्यां मौर्वीं सामकृष्यामुना धनुरग्रेण हता एके केचन पेतुः । कोष्ठशब्दोऽपि कोटिवाची । आकोठ्यामिति पाठे द्वे पदे । सप्तम्यार्षी पञ्चमी चेदपि द्वे पदे परन्तु सानुशासिनिकी ॥ २२ ॥

सज्यं कृत्वा परे वीराः प्राग्ज्योतिमगधेश्वरौ ।
भीमो दुर्योधनः कर्णो नविन्दंस्तदवस्थितिम् ॥ २३ ॥

सत्यधर्मीया — प्राग्ज्योती च मागधश्च तेषामीश्वरौ नरकजरासन्धौ भगदत्तो वा प्रग्ज्योतीशः । ज्योतिश्शब्दपर्यायो ज्योतिशब्द इत्येकः प्रग्ज्योतिर्मगधेश्वराविति च पेठुः । ज्योतिषशब्दपर्यायोऽयं ज्योतिश्शब्द इति केऽपि । दुर्योधनः कर्णश्चेत्येते तदवस्थितिं नाविन्दन्नव्यजानन् । भीमश्च तदवस्थितिं तस्मिन्स्वोपविष्टस्थल एवावस्थितिमवस्थानं कृत्वा कृतवानित्यर्थः । यथावस्थानान्वये भीमस्यार्जुनापेक्षया दौर्बल्यम् । किञ्च साक्षात्प्राणात्मकस्य भगवन्मात्रयोग्यकार्ये प्रवृत्तिश्च स्याताम् । न च ते तत्र सम्भवतः । यथोक्तम् । भीमश्चापं लक्ष्यमप्येतदत्र द्रष्टुं च नैवैच्छदरीन्द्रधारिणः । योग्ये कर्मण्यायातंश्चापराधी स्यामित्यज्ञः पश्यानो महात्मेति । तर्हि न गमनमन एव कर्तव्यं भीमेनेति चेत् । सत्यम् । लक्षणासुलक्षणविवाहमङ्गलप्रापकत्त्वात्तदुपपत्तेः ॥ २३ ॥

मत्स्याभासं जले दृष्ट्वा ज्ञात्वा च तदवस्थितिम् ।
पार्थो यत्तोऽसृजद् बाणान् नाच्छिनत् पस्पृशे परम् ॥ २४ ॥

सत्यधर्मीया — मत्स्याछायां मत्स्याभासं जले दृष्ट्वा तदवस्थितिं ज्ञात्वाप्यर्थ चोऽप्येर्थः । बाणान् छिन्नानसृजत् लक्ष्यं नाच्छिनत् परं केवलं पस्पृशे पस्पर्श । ननु धनञ्जयः स्वात्मबलं प्रकाशयन्सज्जं कृत्वा धनुरैकलक्ष्यम् । नैवाददे बाणमनिच्छयैव प्राप्यां जानन् केशवेनैव तां चेति श्रीमदुक्तेरत्र पुनर्यत्तोऽसृजद्बाणानच्छिनत्पस्पृशे परमित्युक्तिरिति विरोध इति चेत् । नैवाददे बाणमित्यस्य तच्छेदो यथा स्यात्तथा नैवाददद इत्येवम्परत्वेन तूर्ष्णी स्पर्शानिवारणात् । इदमपि कार्यमर्जुनेन तथाऽपि मागधादिमानभङ्गार्थं तदमनस्कतयाऽनुष्ठानस्य प्रत्यवायानर्पकत्वात् । इदमप्युक्तं तत्रैव धनञ्जयः स्वात्मबलं प्रकाशयन्निति । यतश्छिन्ने मत्स्येऽपराधी भवेयमिति यतेन्द्रियः ॥ २४ ॥

राजन् येषु निवृत्तेषु भग्नमानेषु मानिषु ।
भगवान् धनुरादाय सज्जं कृत्वाऽथ लीलया ॥ २५ ॥

सत्यधर्मीया — मानिषु दुर्गर्ववत्सु भग्नमानेषु हीनमानेषु तथाऽशक्यमिति निवृत्तेषु सत्सु लीलयेति सज्जीकरण इवादानेऽपि क्रीडा ज्ञेया ॥२५॥

तस्मिन् सन्धाय विशिखं मत्स्यं वीक्ष्य सकृज्जले ।
छिन्नेषुणाऽपातयत् तं सूर्ये चाभिजिति स्थिते ॥ २६ ॥

सत्यधर्मीया — अभिजिति मध्येऽहनि सूर्ये स्थिते सति तं मत्स्यं छिन्नेषुणैकेनैकवारं तत्रापि छिन्नेनेषुणेति त्वन्मत्स्यवेधापेक्षया शक्यपातोऽयमिति प्रत्यपादयदिति ध्वन्यते ॥२६॥

दिवि दुन्दुभयो नेदुर्जयशब्दोऽपतद् भुवि ।
देवाश्च कुसुमासारान् मुमुचुर्हर्षविह्वलाः ॥ २७ ॥

सत्यधर्मीया — अपतत् शुश्रुव इति यावत् । कुसुमासारान् अविच्छिन्नपुष्पधारा सम्पातम् ॥ २७ ॥

तद्रङ्गमाविशमहं कलनूपुराभ्यां पद्भ्यां दिशो भ्रमयती चलपेशलाभ्याम् ।
वृत्ते पिधाय परिधाय च कौशिकाग्र्ये सव्रीलहासवदना कबरीधृतस्रक् ॥ २८ ॥

सत्यधर्मीया — स चासौ रङ्गश्च तम् । तत्तदेत्यर्थेऽव्ययं वा । रङ्गो रणे खरे रागे नृत्ये रङ्गं त्रपुण्यपीति विश्वः । कलमधुरध्वनिनी नूपुरे ययोस्ताभ्याम् । चलपेशलाभ्यां चलेनैकेकशो विक्षेपेण मनोहराभ्यां पद्भ्याम् । दिशो भ्रामयती तत्स्थितात् जनान् भ्रान्तान् कुर्वन्ती बुद्धिमतोऽपि दिग्भ्रमं जनयन्तीति वा वृत्ते सह जघने तथा कुचयोर्युगलं च पिधाय परिधाय कृमिकोशोत्थश्रेष्ठेति कौशिकाग्र्ये क्षौमे सव्रीडहासं वदनं यस्याः सा । जानपदेति ङीष् । केशपाशे धृता स्रजो माला यस्याः सा । रङ्गं नृत्यजनयुतम् । अन्यथा चेद्रणाङ्गणं चाविशम् ॥ २८ ॥

उन्नीय वक्त्रमुरुकुण्डलकुन्तलत्विड्गण्डस्थलं शिशिरहासकटाक्षमोक्षम् ।
राज्ञो निरीक्ष्य परितः शनकैर्मुरारेरंसेऽनुरक्तहृदया विदधे स्वमालाम् ॥ २९ ॥

सत्यधर्मीया — प्रविष्टा चाहम् । उरुणी च ते कुण्डले च तथा कुन्तलाश्च तेषां त्विट् कान्तिर्यस्मिंस्तद्गण्डस्थलं यस्य तत् । हासेन सहितः कटाक्षः शिशिरः शीतलश्चासौ हासकटाक्षश्च तस्य मोक्षो हि स्थापनमन्यत्र यस्य तत् । अजिरशिशिरेति निपातितः शब्दः । शिशिरस्तु ऋतोर्भेदे तुषारे शीतलेऽन्यवदिति विश्वः । वक्त्रमुन्नीयोन्नम्य परितो

राज्ञः कांश्चिदपलायितान्निरीक्ष्यानुरक्तं हृदयं यस्याः सा । राजपराजयार्थमियत्कृतम् । न मनस्तस्य त्वयीत्यतोऽप्याह ॥ **अनुरक्तहृदयेति** । अनुरक्तं मय्यासक्तं हृदयं कृष्णाख्यं ब्रह्म यस्याः सा । स्वभागहरणाद्यानात्फलानां यापनान्नृणाम् । हृदयं भगवन्विष्णुरिति वचनात् । हृदयं ब्रह्म आरुणा उपासते हृद्ययनाद्धृदयमित्यादेश्च । शनकैर्मुरारेरंसे स्कन्धे स्वामालां स्वधृतेति स्वमाला तां विदधे । नियमावहं विदध इति धात्रो लिट् सम्भवति । पारोक्ष्यं च देवदेवत्वाद्युज्यते । परोक्षप्रिया इव हि देवा इत्यादेः । दधधातोर्वा लिटि रूपम् । दधे दधावहे दधामह इति रूपाणि । क्रियाप्रबन्धे लडित्यतीतार्थतोपपद्यते ॥ २९ ॥

ततो मृदङ्गपटहशङ्खभेर्यानकादयः ।
निनेदुर्नटनर्तक्यो ननृतुर्गायका जगुः ॥ ३० ॥

सत्यधर्मीया — ततो मालाल्यापादांसमालासमासज्जनानन्तरम् ॥ ३० ॥

एवं वृते भगवति मयेशे नृपयूथपाः ।
न सेहिरे याज्ञसेनि स्पर्धिनो हृच्छयातुराः ॥ ३१ ॥

सत्यधर्मीया — मयेशे भगवत्येवं वृते सति । एवंवृत्त इति पाठे एवं वृत्तं यस्य स तस्मिन् । मायेश इति पाठे मायाया ईशो रमारमणस्तस्मिन् । हे याज्ञसेनि । स्पर्धिनः स्पर्धा येषामस्तीति स्पर्धिनः शिखादिः । मन्मथार्ता इति हृच्छ्रयातुराः ॥ ३१ ॥

मां रथं स समारोप्य लसद्धयचतुष्टयम् ।
शार्ङ्गमुद्यम्य सन्नद्धस्तस्थावीशश्चतुर्भुजः ॥ ३२ ॥

सत्यधर्मीया — हयानां शैब्यसुग्रीवमेघपुष्पादीनां चतुष्टयं यस्य स तम् । चतुर्भुजस्सन्नीशस्तस्थौ ॥ ३२ ॥

दारुकश्चोदयामास काञ्चनोपस्करं रथम् ।
मिषतां द्विषतां राज्ञि वृकाणां मृगराडिव ॥ ३३ ॥

सत्यधर्मीया — काञ्चनमय उपस्करो हि परिच्छदो यस्य स तम् । द्विषतां मिषतां पश्यतां सताम् । तानानादृत्येत्यर्थः । मृगराट् वृकाणां पश्यतां स्वभागं नीत्वा गच्छति यथा तथेति ॥ ३३ ॥

ते त्वसज्जन्त राजन्या निषेद्धुं पथि केचन ।
संयत्ता उद्धृतेष्वासा ग्रामसिंहा यथा हरिम् ॥ ३४ ॥

सत्यधर्मीया — केचन ते राजन्या निषेद्धुं पथि मार्गे संयुक्ता उद्धृतेष्वासा यथा ग्रामसिंहा हरिं तथाऽसज्जन्त सङ्गता अभूवन् ॥ ३४ ॥

ते शार्ङ्गच्युतबाणौघैर्नुन्नबाह्वङ्घ्रिकन्धराः ।
निपेतुः प्रधने केचिदेके सन्त्यज्य दुद्रुवुः ॥ ३५ ॥

सत्यधर्मीया — नुन्नाश्छिन्ना बाह्वङ्घ्रिकन्धरा येषां ते तथा प्रधने सङ्गरे सन्त्यज्य रणम् ॥ ३५ ॥

ततः पुरीं पतिजयभूत्यलङ्कृतां रविच्छदध्वजपटचित्रतोरणाम् ।
कुशस्थलीं दिवि भुवि चाभिसंस्तुतां समाविशत् तरणिरिव स्वकेतनम् ॥ ३६ ॥

सत्यधर्मीया — पत्युर्जयभूतिर्जयलक्ष्मीस्तयाऽलङ्कृतां रविं सूर्यं छादयन्तीति रविच्छदास्ते च ते ध्वजपटाश्च तैश्चित्राणि तोरणानि यस्यां सा सोमवंशसम्भवीयध्वजपटादे रव्याच्छादकता युक्तिमती । दिवि भुवि च जनैः संस्तुतां तरणिः सूर्यः स्वकेतनमुदयगिरिं यथा विशति तथा समाविशत् ॥ ३६ ॥

पिता मे पूजयामास सुहृत्सम्बन्धिबान्धवान् ।
महार्हवासोऽलङ्कारैः शय्यासनपरिच्छदैः ॥ ३७ ॥

सत्यधर्मीया — परिच्छदैरितरसाधनैः ॥ ३७ ॥

दासीभिः सर्वसम्पद्भिर्भटेभरथवाजिभिः ।
आयुधानि महार्हाणि ददौ पूर्णस्य भक्तितः ॥ ३८ ॥

सत्यधर्मीया — सर्वसम्पद्भिर्दासीभिर्भटेभादिभिश्च सर्वसम्पद्भिः सहायुधानि ददौ । एतेन तस्य किं स्वोद्धत्यै दत्तवानित्याह ॥ **पूर्णस्य भक्तित इति** । सर्वं तस्यैव तस्य दत्तमिति षष्ठ्या द्योतयति ॥ ३८ ॥

आत्मारामस्य तस्येमा वयं वै गृहदासिकाः ।
सर्वसङ्गनिवृत्त्याऽद्धा तपसा च बभूविम ॥ ३९ ॥

सत्यधर्मीया — सर्वसङ्गनिवृत्त्या तपसाऽद्धा सम्यक् । इमा वयं च गृहदासिका बभूविम । नास्मत्कृत्यं तस्य किन्तु दयया लालयत्यस्मानित्याह ॥ **आत्मारामस्य स्वरमणस्येति** ॥ ३९ ॥

महिष्य ऊचुः —

भौमं निहत्य सगणं युधि तेन रुद्धा ज्ञात्वा च नः क्षितिजये हृतराजकन्याः ।
निर्मथ्य संसृतिविमोक्षमपि स्मरन्तीः पादाम्बुजं परिणिनाय य आप्तकामः ॥ ४० ॥

सत्यधर्मीया — शतोत्तरषोडशसहस्रयोषितो भाषन्ते ॥ **भौममिति** । यः क्षितिजये स्वकृते राज्ञो निर्मथ्य हृता राजकन्यास्तेन नरकेण रुद्धा न केवलमेतत्कारागारमोक्षणाऽपि तु संसृतिविमोक्षणं स्मरन्तीरस्मरतीर्नो युधि तं भौमं सगणं निहत्य पादाम्बुजं परिणिनाय नीत्वा पादाम्बुजं स्मरन्तीः परिणिनायोवाहेति वा । नास्मदाशा तस्येत्याहुः ॥ **आप्तकामः पूर्णकाम इति** ॥ ४० ॥

न वयं साध्वि साम्राज्यं स्वाराज्यं भौज्यमप्युत ।
वैराज्यं पारमेष्ठ्यं वा आनन्त्यं वा हरेः पदम् ॥ ४१ ॥

कामयामह एतस्य श्रीमत्पादरजः श्रियः ।
कुचकुङ्कुमगन्धाढ्यं मूर्ध्ना वोढुं गदाभृतः ॥ ४२ ॥

सत्यधर्मीया — अग्निपुत्रत्वात्तपसा स्त्रीत्वमेतदिच्छयाऽऽप्तमतोऽस्ति वेदाधिकार इत्यावेदयितुं ता अष्टमपञ्चकद्वितीयाध्यायगतता राज्याय साम्राज्याय स्वाराज्याय वैराज्याय पारमेष्ठ्यायेत्यन्तखण्डमर्थतः सङ्गृह्यैतदादिसर्वापेक्षया हरिचरणपरिचरणमधिकमिति वदन्ति ॥ **नेति** । हे साध्वि । साम्राज्यं धर्मतः प्रजापालनयोग्यसम्राटत्वं भोज्यं भोगसमृद्धिः स्वाराज्यमनन्याधीनत्वं वैराज्यं प्रतिपक्षिक्षितिपेभ्यो वैशिष्ट्यम् । अथामुष्मिकं च नेति वदन्ति । स्वाराज्यं स्वर्गाधिपत्यं परामेष्ठ्यं सत्यलोकाधिपत्यमानन्त्यमनन्तो नाशशून्यो

लोको वैकुण्ठः स एवानन्त्यं हरेः पदं स्थानभूतं वयं न कामयामहे । आनन्त्यं भोगिनि विद्यमानं शेषसाम्राज्यं हरेरिन्द्रस्य पदं स्वर्गमिति वा । प्राचीमासन्दीमित्यादिबह्वच-ब्राह्मणोक्तप्रकारेण साम्राज्यस्वाराज्यवैराज्यानि क्रमादुत्तरपूर्वदक्षिणपश्चिमदेशाधीशत्वानीति ज्ञेयम् । एतस्य श्रियो रमायाः कुचयोः कुङ्कुमगन्धास्तैराढ्यं गदाभृतः श्रीमत्पादरजो मूर्ध्ना वोढुं कामयामहे ॥ ४१,४२ ॥

व्रजस्त्रियो यद् वाञ्छन्ति पुलिन्द्यस्तृणवीरुधः ।
गावश्चारयतो गोपैः पादस्पर्शं महात्मनः ॥ ४३ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे एकसप्ततिरध्यायः ॥

सत्यधर्मीया — एतादृक्कामनास्पदस्य श्रीमत्पदस्यास्मत्काम्यता नाश्चर्यावहेति तां ताः कान्ता वदन्ति ॥ **व्रजस्त्रिय इति** । आभीरभामिन्योऽज्ञता ध्वन्यते । तथा पुलिन्द्यः शबर-नार्यस्तृणानि वीरुधश्च तद्देवविवक्षयोत्प्रेक्षा वेति केचित् । गोपैः सहगाश्चारयतो महात्मनः कृष्णस्य पादस्पर्शं गावश्च यद्यतो वाञ्छन्ति किं कामना न भवेदस्माकमिति भावः॥ ४३ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे एकसप्ततिरध्यायः ॥ १०-७१ ॥

॥ अथ द्विसप्ततितमोऽध्यायः ॥

श्रीशुक उवाच —

श्रुत्वा पृथा सुबलपुत्र्यथ याज्ञसेनी माधव्य इत्थमनु याः परमप्रतीताः ।
कृष्णेऽखिलात्मनि हरौ प्रणयानुबन्धं सर्वा विसिस्म्युरलमश्रुकलाकुलाक्ष्यः ॥ १ ॥

सत्यधर्मीया — ॥ हरिः ॐ ॥ ज्ञानिमाहत्म्यं सहोत्सवस्तु वासुदेवमत्र विषयो मुक्तेः साधनं भगवत्तोष इत्यादिकमत्र प्रतिपाद्यते । तत्रादौ कृष्णं द्रष्टुं कृष्णद्वैपायनाद्युपयानं तदेतत्संवादं च वक्तुं द्रौपद्याद्या माधववधुबोधितवृत्ताः किं चक्रुरित्यतस्तदाह ॥ **श्रुत्वेति** । पृथा कुन्ती सुबलपुत्री गान्धारी अथ याज्ञसेनी द्रौपदी च । अनेन नैकान्ते श्रीकान्तकान्ताः प्रतिपप्रच्छ द्रौपदी किन्त्वेतदाद्यासु सतीष्वेति द्योत्यते । याः परमप्रतीता अतिख्याता अनुतरतमभावेन माधविकास्तासामित्थमखिलात्मनि हरौ कृष्णे इत्थं तदुक्तिसंक्तस्फोरितं प्रणयानुबन्धं याचनापूर्वकमनुबन्धं भक्तिम् । अनुबन्धस्तु भक्तिः स्याद्बन्धः स्नेह उदाहृत इति तात्पर्यान्तरात् । प्रणयः प्रेम्णि विश्रम्भे याश्वाप्रसरयोरपीति विश्वः । सविश्वासं स्नेहमिति वा श्रुत्वा सर्वाः पृथाद्या अश्रुकलाभिराकुलान्यक्षीणि यासां ताः सत्यः । अलमिति यथायथमन्वेतुमलम् । विसिस्म्युर्विस्मिता अभवन् ॥ १ ॥

इति सम्भाष्यमाणासु स्त्रीभिः स्त्रीषु नृभिर्नृषु ।
आययुर्मुनयस्तत्र कृष्णरामदिदृक्षया ॥ २ ॥

सत्यधर्मीया — सम्भाष्यमाणासु इति विपरिणत् लिङ्गं मन्नृष्वित्यनेनाप्यन्वेति । कृष्णरामयोर्दिदृक्षा दर्शनेच्छा तया मुनयस्तत्र स्यमन्तपञ्चके आययुः ॥ २ ॥

द्वैपायनो नारदश्च च्यवनो देवलोऽसितः ।
विश्वामित्रः शतानन्दो भरद्वाजोऽथ गौतमः ॥ ३ ॥

सत्यधर्मीया — तदभिधानाभिधानं मङ्गलकरमिति तन्नाम कीर्तयति ॥ **द्वैपायन इति** । व्यासो नारदो देवलोऽसित इति सामानाधिकरण्यं वैय्यधिकरण्यं वोभयथाऽपि व्युत्पादित-मस्माभिरालोचनीयम् । शतानन्दो गौतमसुतः ॥ ३ ॥

रामः सशिष्यो भगवान् वसिष्ठो गालवो भृगुः ।
पुलस्त्यः काश्यपोऽत्रिश्च मार्कण्डेयो बृहस्पतिः ॥ ४ ॥

सत्यधर्मीया — रामो भार्गवो भार्गवेयोऽपि वा । रामो भार्गवेय इति बव्हृचब्राह्मणं प्रागुदाहृतमनुसन्धेयम् । बृहस्पतिः ॥ ४ ॥

द्वितस्त्रितश्चैकतश्च ब्रह्मपुत्रस्तथाऽङ्गिराः ।
अगस्त्यो याज्ञवल्क्यश्च वामदेवादयोऽपरे ॥ ५ ॥

सत्यधर्मीया — एकतो द्वितस्त्रित इति क्रमः । बव्हृचब्राह्मणे एकतो द्वितस्त्रित इति । तथायाजुषे एकतायस्वाहा द्वितायस्वाहा त्रितायस्वाहेति चोक्तेः । गदापर्वणि बलदेव-यात्रायाम् । आसन् पूर्वयुगे राजन्मुनयो भ्रातरस्त्रयः । एकतश्च द्वितश्चैव त्रितश्चैवाग्नि-सन्निभाः। सर्वे प्रजापतिसमाः प्रजावन्तस्तथैव चेत्यारभ्य तत्राप्यमितविक्रान्तः स्पृष्ट्वा तोयं हलायुध इत्यन्तेन ग्रन्थेन तन्माहात्म्यमुक्तमनुसन्धेयम् । कूपे वहितो देवान्बत ऊतय इति श्रुतेः ॥ ५ ॥

तान् दृष्ट्वा सहसोत्थाय प्रागासीना नृपादयः ।
पाण्डवाः कृष्णरामौ च प्रणेमुर्लोकवन्दितान् ॥ ६ ॥

सत्यधर्मीया — प्राक् तदागतेः पूर्वमासीना उपविष्टा नृपादयः सहसाऽविलम्बेनोत्थाय पाण्डवाः कृष्णरामौ च लोकवन्दितांस्तान्प्रणेमुः ॥ ६ ॥

तानानर्चुर्यथा सर्वे सहरामोऽच्युतोऽर्चयत् ।
स्वागतासनपाद्यार्घ्यमाल्यधूपानुलेपनैः ॥ ७ ॥

सत्यधर्मीया — सर्वे पाण्डवाद्या यथा तानानर्चुस्तथा सहरामोऽच्युतः कृष्णोऽर्चयत् । सहरामो द्वैपायनोऽच्युतः श्रीकृष्णात्मैव । तथाऽपि लोकानुकारं स्वयमार्चयदिति भिन्न-वाक्यतयोक्तिर्यथाशब्दश्च सूचयतः । तत्पूजासाधनानि बोधयति ॥ **स्वागतासनेत्यादिना** ॥ ७ ॥

उवाच सुखमासीनान् भगवान् धर्मगुप्तनुः ।
सदसस्तस्य महतो यतवाचोऽनुशृण्वतः ॥ ८ ॥

सत्यधर्मीया — धर्मं गोपायतीति धर्मगुप् सा तनुर्यस्य सः । यता वाग्यस्य तत्तस्य । महतः सदसः सभाया अनुशृण्वतः सुखं यथा तथासीनान् । यतवाचो महतो मुनीन्प्रतीत्यप्यन्वयः ॥ ८ ॥

श्रीभगवानुवाच —

अहो वयं जन्मभृतो लब्धं कार्त्स्न्येन तत्फलम् ।
देवानामपि दुष्प्राप्यं यद् योगेश्वरदर्शनम् ॥ ९ ॥

सत्यधर्मीया — भगवानुवाच । यद्यतो योगेश्वरदर्शनं देवानामपि दुष्प्रापं तत्फलं जन्मनः फलं जन्मनः फलभूतं कार्त्स्न्येन लब्धम् । ततो वयं जन्मभृतः प्रशस्तदेहधारिणो दुर्घटं घटितमित्याह । रामपाराशर्ययोस्तादात्म्यादितरेषां चाहमित्युक्तौ स्यात्प्रत्यवाय इति वयमित्युक्त्याऽन्येषामस्मदीयानां तद्दौर्लभ्यं ध्वनयतीति मन्तव्यम् । यथाऽऽहुः प्रकाशिकायाम् । वयमस्मदीया इति मूलार्थः कृष्णस्य जन्माभावादिति ॥ ९ ॥

किं स्वल्पतपसां नृणामर्चायां देवचक्षुषाम् ।
दर्शनस्पर्शनप्रश्नप्रह्वपादार्चनादिकम् ॥ १० ॥

सत्यधर्मीया — देवानामपीत्यनेन नृणां का कथेति सूचितमर्थात्तद्विशदयति ॥ **किमिति** । स्वल्पं तपो येषां ते तथा तेषामर्चायां प्रतिमायामेव देवेति देवतेति चक्षुर्दर्शनं ज्ञानं येषां तेषां योगेश्वराणाम् । प्रह्वेति भावप्रधानम् । दर्शनं स्पर्शनं प्रश्न इष्टगोष्ठिः प्रह्वत्वेन प्रावण्येन पादानामर्चनमेवादिर्यस्य तद्दुष्प्रापमिति किमाश्चर्यमित्यर्थः ॥ १० ॥

न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ।
ते पुनन्त्युरुकालेन दर्शनादेव साधवः ॥ ११ ॥

तात्पर्यम् – अम्मयाद्यभिमानिन्यो देवताः उरुकालेनैव पुनन्ति गुरूपदेशं प्रापयित्वा ॥११॥

सत्यधर्मीया — न ह्यम्मयानि तीर्थानीति श्लोके न तत्र तीर्थादिषु परपवित्री-

करणशक्तिरस्ति चेदपि कालविलम्बेन तदिति तन्मात्रस्य जडस्य तथात्वं प्रतीयत इत्यतः स्वयं तात्पर्यमाह ॥ **अम्मयाभिमानिन्य इति** । अम्मयानि नद्यादीनि । आदिपदेन प्रतिमादिपरिग्रहः । एतदभिमानिन्योऽपि देवताः । देवा इति सति पुल्लिङ्गे देवता इति वदन्नन्ततो गत्वा वक्ष्यमाणसहकारिसमवधानेऽपि स्वातन्त्र्यं नास्ति किन्तु ममैवेति ध्वनयति। किञ्च पृथिव्याद्यभिमानिन्यो देवताः प्रथितौजस इत्यादिमानिकतां स्वोक्तेः स्फोरयति । उरुकालेनेति व्याख्याति **गुरूपदेशं प्रापयित्वेति** । तथा चोरोर्गुरोः कलयति जानात्यनेनेति कालः शास्त्रोपदेशस्तेन तदुपदेशं प्रापयित्वैव पुनन्ति स्वासां पारोक्ष्यात् । केचित्तूरुकाले जातेऽपि नैव पुनन्ति । किन्तु गुरूपदेशं प्रापयित्वैव पुनन्तीति बहिष्ठं योजनमाहुः । ननु तच्छब्देनाम्मयतीर्थानां देवानां च परामर्शो न सम्भवति । नपुंसकलिङ्गशब्दवाच्यानां पुल्लिङ्गेन परामर्शायोगात् । न चैकशेषेणादोषः । नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामिति नपुंसकशेषोक्तेः अतः कथमिति चेत् । उभयत्रापि बुद्धिस्थदेवपरामर्श इत्यर्थसूचकं त इति पदमिति नानुपपत्तिः ॥

ततश्चायं श्लोकार्थः ॥ तीर्थीकुर्वत्तीर्थादिकं यथेच्छं वर्तत इति किं साधु साधुदर्शनादिनेत्यत आह । अम्मयानि केवलजडजलानि न हि किन्तु तदन्तर्गता देवाः । मृच्छिलामयास्तद्विकृताकाराः प्रतिमादयो देवा न किन्तु तदन्तर्गता देवाः । न च सद्यस्तेषामपि पावनं सुशकं किन्तु तेऽम्मयास्तत्स्था देवाः प्रतिमान्तरस्थाश्चेति ते देवाः । त इति पुल्लिङ्गेन परामर्शं शंसन्व्यासो देवा अन्तस्थाः स्थानद्विकेऽपि ग्राह्या इत्यसूचयत् । अन्यथा त इत्यवक्ष्यत् । इदं चाचार्यस्याम्मयाद्यभिमानिदेवता इति व्याकुर्वतो मूलं मूलकृद्दर्शितमित्यवधेयम् । उरुकालेन गुरूपदिष्टज्ञानसाधनज्ञानोपदेशेन विलम्बेनैव पुनन्ति । उरुकालेऽपि नैवापरोक्ष्यात्स्वयं पुनन्ति किन्तूरुकालेन गुरूपदेशेन पुनन्तीत्यावृत्त्याऽन्वयः ।

तदुक्तं स्कान्दे वैशाखमाहात्म्ये षष्ठेऽध्याये । यान्यम्मयानि तीर्थानि देवा वा मृच्छिलामयाः । अपि ते न पुनन्त्येव दर्शनादेव साधव इति । सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवदिति । यथा वाऽचार्यस्य शिष्याः । वाराहे च । ज्ञानादिदानं देवानां विष्णुना साधु चोदितम् । वेदे च तेषां विहितं तत्राचार्यो महत्तरः । विहितः सहकारित्वे ॥ यद्गुरुः सुप्रसन्नः सन्दद्यात्तन्नान्यथा भवेत् । गुरुरेव परागतिरित्यादेरिति केचित् । तर्हि के सद्योऽविद्याबन्धं विध्वस्य पावित्र्यदा इत्यत आह ॥ **साधवो दर्शनादेवेति** । विना

गुरूपदेशादिकं न सुमिला एत इति तत्सम्पत्त्यनन्तरं तत्फलरूपास्त इति दर्शनादेवेत्युक्तिरत्र तदपेक्षया देवा जाग्रतो वर्तन्त इति भावः । फललाभानन्तरं तन्मात्रसाधनस्यानीप्सनीयत्वात् ॥ ११ ॥

नाग्निर्न सूर्यो न च चन्द्रतारकं न भूर्जलं खं श्वसनोऽथ वाङ्मनः ।
उपासिता भेदकृतो हरन्त्यघं विपश्चितो घ्नन्ति मुहूर्तसेवया ॥ १२ ॥

तात्पर्यम् – भेदकृतः अन्यथाज्ञानिनः । विपश्चितस्तु प्रत्यक्षदर्शनादन्यथाज्ञानमेवापगमयन्ति ॥ प्राकृतैः दृश्यमानन्तु न द्रवं तीर्थमुच्यते । देवाश्च न शिलामात्राः किन्तु तत्रान्तरस्थिताः ॥ गुरूपदेशेन(शं तु) विना न ते दृश्याः कथञ्चन ॥ न ज्ञायते च तद्रूपं अन्यथाज्ञानिनां च ते ॥ कोपाच्छापं प्रयच्छन्ति तस्माद्गुरुमुपाव्रजेत् । तस्मात्तीर्थानि देवाश्च नित्यं विद्वत्सु संस्थिताः ॥ इति गारुडे ॥ भिन्नस्याभेदतो दृष्टिरपि भेददृशिर्मता । वस्तुयाथात्म्यतस्तत्र भिन्नत्वादिति सूरिभिः । अन्यथाज्ञानमेवातो भेदज्ञानं विनिन्दितं । न विद्यमानभेदस्य दर्शनं निन्दितं क्वचित् ॥ शिला देव इति ज्ञानं देवोऽस्मीति तु या दृशिः । उत्तमस्याधमत्वेन नीचास्योच्चतया दृशिः । असमस्य समत्वेन समस्यासमदर्शनं । द्रवं तीर्थमिति ज्ञानं देहोऽहमिति या मतिः । असद्भर्यादिषु स्वीयदर्शनं चैवमादिकम् । भेदज्ञानमिति प्रोक्तं या चान्याप्यन्यथामतिः ॥ तस्मात्तदपहानाय संसेव्याः गुरवो वराः ॥ तत्रस्थाः देवताः सर्वाः प्रीयन्ते गुरुपूजया । नैवान्यथैषां प्रीतिः स्याद्गुरूक्तिमपहाय तु ॥ तस्मात्पूजाविशेषेण सतां कार्या नृणां सदा ॥ भक्तिस्तु तारतम्येन विशिष्टेष्वधिका भवेत् ॥ इति स्कान्दे ॥ उत्तमा अपि देवेशाः अवरान् विदुषो नृणां ॥ पूजायै सम्प्रयच्छन्ति परोक्षत्वप्रिया यतः । तेषु स्थित्वा स्वयं पूजां गृह्णन्त्यनुपमां सदा ॥ ज्ञानानि च प्रयच्छन्ति तस्मादेवंविदा सदा । पूजिताः सुरवराः सब्रह्माणः सकेशवाः ॥ इति वामने ॥ ११-१२ ॥

सत्यधर्मीया —— नाग्निर्न सूर्यो न च चन्द्रतारकमिति श्लोकेऽग्र्यादय उपासिताः परस्परं स्वेषां हरेश्च भेदकृतो भेदं करोति जानातीति स तस्याघं विपश्चितो ज्ञानिनो न घ्नन्ति न नाशयन्ति । विपश्चितः प्रसक्तभेदविरुद्धाभेदज्ञानिनस्त्वघं घ्नन्तीति भेदज्ञानिनिन्दामभिनन्दनमभेदज्ञानिन इत्यन्यथाप्रतीतिनिवारणाय स्वयं तत्पदार्थमाह ॥ **भेदकृतोऽन्यथाज्ञानिन इति** । देवाश्च तदेवाबादिकमाश्रित्यासत इति परोक्ष्यान्नान्यथामतिमहापयन्ति । विपश्चितस्तु प्रात्यक्षिका इति प्रत्यक्षदर्शनात् । तदुपेत्य । अज्ञानामधिकारिणामन्यथा-

ज्ञानमपगमयन्ति । तुस्तत्र तरतमभावरूपविशेषद्योतकः । एवकारस्तु सत्यधिकारे दर्शनस्यानन्यथाभावसूचकः । कुणपे त्रिधातुक इत्यादिमूलोक्तमन्यथाज्ञानमुपलक्षणपरमिति सूचयन्नुक्तश्लोकद्विकार्थे मानमाह ।। **प्राकृतैरिति** । प्राकृतैरज्ञैर्दृश्यमानं द्रवं तीर्थमिति नोच्यते तु नोच्यत एव । देवाश्च शिला एवेति शिलामात्रा न तर्हि क इत्यत आह ।। **तत्रान्तर(रा)स्थिता देवा इति** । तदन्तःस्थिता इत्येतावता पूर्तौ यत्तत्रेत्युक्तं तेन तं त्रायन्ते सर्वप्रकारेण पालयन्तीति तत्राश्च सन्तस्तन्मध्ये स्थिता अन्त आस्थिता वा देवा उच्यन्ते ज्ञानिभिः । तर्हि कथं ते दृश्यन्त इत्यत आह ।। **गुरूपदेशेनेति** । गुरूपदेशन्त्विति वा । अन्यथाज्ञानिनां तद्रूपं तदन्तर्गतं न दृश्यते च । तथामन्तॄणामनर्थमप्याह ।। **कोपादिति** । कोपाज्जडजलाद्यैक्यज्ञानजाच्छापं प्रयच्छन्ति । तस्माद्गुरुमुपाव्रजेत् । तस्मात्तीर्थानि देवाश्च सर्वदेवमयो द्विजः । तीर्थानि पदे विप्रस्य दक्षिण इत्यादेश्च तीर्थमृदादिप्रतिमान्तरस्थिता देवा विद्वत्सु ज्ञानिष्वेव संस्थिताः । अतः साधवो दर्शनादेवेत्युक्तमुपपन्नमिति भावः । यस्यात्मद्धिः कुणप इत्यत्रोपलक्षणमन्यथाज्ञानमेतल्लक्षणमिति मानेनाचष्टे ।। **भिन्नस्येति** । भिन्नस्य वस्तुनोऽभेदतोऽभेदेन दृष्टिर्दर्शनमपि भेदिभिर्नादरणीयेति । वस्तुयाथात्म्येन तस्य वस्तुनो भिन्नत्वादिति तदभेददृग्भेदज्ञानं विनिन्दितम् । विद्यमानस्याभेदस्य दर्शनं क्वचिदपि न निन्दितम् । न तद्वाक्यस्य तत्र तात्पर्यमिति तात्पर्यम् । शिलाः प्रतिमादयः । अस्म्यहं देवोऽहमिति च या दृशिरुत्तमस्याधमत्त्वेन दृशिरिति योज्यम् । नीचस्य चोच्चत्वेनासमस्य समत्वेन समस्यासम इति दर्शनं ज्ञानं द्रवं जडं जलं देहोऽहमिति च या मतिर्नास्तिकादीनामनुमानाभासजन्या । तदुक्तम् । देहात्मत्वं यदि न तत्प्राप्तं प्रत्यक्षतः क्वचिदित्यनुव्याख्यानव्याख्यासुधायां नास्त्येव देहात्मप्रतीतिर्याऽनुमानादिना । बाध्ये येषां चास्तिकादीनां तेषामपि ते इन्द्रियजा किन्तु अनुमानाभासजन्यैवेतीति । असतीषु भार्यास्वसत्सु सदितरेषु च स्वीया इति दर्शनम् । एवमादिकं भेदज्ञानमिति प्रोक्तं या चान्येत्यनेनाप्युपलक्षणीया साऽस्तीति ध्वन्यते । तस्मात्तस्या अन्यथामतेरपहानाय त्याजनाय वरा गुरवः संसेव्याः । समा तदकपटतामभिप्रैति । गुरूणां पूजया । सुप्सुपेति समासः । सर्वा देवताः प्रीयन्ते प्रीता भवन्ति । एषां गुर्वन्तर्वसतां प्रीतिरन्यथा न स्यात् ।

तदनन्यथात्वं स्वयं व्याकरोति ।। **गुरूक्तिं स्वाधिष्ठानगुरूपदेशमपहायेति** । नृणां सतां पूजा विशेषेण सदा कार्या । कृत्यानां कर्तरि वेति स्मरणान्नृणामित्युपपद्यते ।

विशिष्टेष्वधिका मध्यमेषु मध्यत इति भक्तिस्तारतम्येन भवेत् । सद्वाराः सुरा आराध्या इति स्वातन्त्र्येण तत्सपर्या न कार्येत्यायातः । तेऽपि वा साक्षात्स्वसमर्चनं विहायैव कुतः कुर्वन्तीत्यत आह ॥ **उत्तमा अपीति** । पूज्यत्वेन स्वसन्दर्शिते गुरुभ्य उत्तमा अपि देवेशाः स्वाधमान्विदुषो ज्ञानिनः पूजायै प्रयच्छन्ति ददति । तत्र तन्त्रं यतः परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विष इत्यादेः । तेषु स्थित्वाऽनुपमां पूजां सदा स्वयं गृह्णन्ति । ज्ञानानि च पूजितगुरुद्वारा प्रयच्छन्ति । एवंविदा गुर्वादिके पूजिते पूजिता देवाः । सब्रह्माणः सकेशवाः सुरवराः पूजिताः स्युः । न च सान्निध्यात्ते महायोगिन्पातकानि महन्त्यपि । सद्यो नश्यन्तीत्यादिवचनात्सज्जनदर्शनादेर्महापातकघातकत्ववत्पुराणादिषु गङ्गा गङ्गेति यो ब्रूयात् । प्रयागेति स्मरणं पापभाजनम् । प्रयागे मरणान्मुक्तिः स्मरणादरुणाचले । सेतुं दृष्ट्वा विमुच्यत इति पापापनोदकत्वं तथा मोचकत्वं चोच्यतेऽतः को निर्बन्धस्तीर्थाद्यपेक्षया प्रेक्षावदौत्तम्य इति वाच्यम् । पक्वयोगिनां ज्ञानद्वारैव पापापहानवादीनि तानि वचनानि मुक्त्यभिधायीनि च पापान्मुक्तिपराणि स्तुतिपराणि च । यथोक्तं तृतीयाध्यायगीताभाष्यटीकयोः । गत्यन्तरं च नान्यः पन्था इत्यस्य नास्ति । इतरेषां ज्ञानद्वाराऽप्यविरोधः । यत्र तीर्थाद्येव मुक्ति-साधनमुच्यते ब्रह्मज्ञानेन वा मुक्तिः प्रयागमरणेन वा । अथवा स्नानमात्रेण गोमत्यां कृष्ण-सन्निधावित्यादौ तत्र पापान्मुक्तिः स्तुतिपरता वा । तत्रापि कुत्रचिद्ब्रह्मज्ञानसाधनत्व-मेवोच्यते । अन्यथा मुक्तिं निषिद्ध्य ब्रह्मज्ञानं विना मुक्तिर्न कथञ्चिदपीष्यते । प्रयागादेस्तु या मुक्तिर्ज्ञानोपायत्वमेव हीत्यादौ । न च तीर्थस्तुतिवाक्यानि तत्प्रस्तावेऽप्युक्तज्ञाननियमं घ्नन्ति । यथा किञ्चिद्दक्षं भृत्यं प्रत्युक्त्वाऽयमेव हि राजा किं राज्ञेत्यादीनि । यथाऽऽह भगवान् । यानि तीर्थादिवाक्यानि कर्मादिविषयाणि च । स्तावकान्येव तानि स्युरज्ञानां मोहकानि च । भवेन्मोक्षस्तु मद्दृष्टेर्नान्यतस्तु कथञ्चनेति नारदीये । ननु यथा मोक्षस्य ज्ञानसाध्यत्वे तमेवमित्याद्यागमाः सन्ति तथा कर्मसाध्यत्वेप्यपाम सोममित्यादयो विद्यन्ते तत्कथं निर्णय इत्यतः सावकाशत्वनिरवकाशत्वबलादित्याह ॥ **गत्यन्तरं चेति** ॥ **ज्ञानद्वारेति** । स्तुतीति प्रशस्तत्वोपलक्षणेत्यर्थः । प्रशस्तत्वसादृश्येन गौणी वा दुष्टजनव्यामोहनार्थत्वस्योपलक्षणमेतत् । अज्ञानां सम्यग्ज्ञानायोग्यानामित्यन्तेन ग्रन्थेन ॥

अथ श्लोकद्विकार्थः ॥ न ह्यम्मयानीत्यादिनोक्तं वितत्य तथा दर्शनादेवेत्येवकारव्यावर्त्यः कालः कश्च ग्राह्य इत्यत आह ॥ **नेति** । प्रसिद्धकाष्टाधिरूढोऽग्निस्तदन्तर्गतो भेदकृतोऽ-

न्यथाज्ञानिनः पुंसः । भेदेऽभेदज्ञानिनः । एवमेव सूर्याद्याश्चन्द्रश्च तारकं च । सर्वो द्वन्द्वो विभाषयेत्येकवद्भावः । चन्द्रेण सहितं च तत्तारकं चेति वा । खमाकाशः श्वसनो मातरिश्वा वा तदभिमानीन्द्रोऽग्निश्च मनः । सोमस्य पृथग् ग्रहणादुमा वा तत्पतिर्वा । उपासितास्सेविता अपि अघं हरन्ति । विपश्चितो ज्ञानिनस्तु मुहूर्तं सेवा तयैवाघं तत्सङ्गं घ्नन्तीत्येकेनैवावृत्त्या घ्नन्ति घ्नन्तीत्यन्वयसम्भवे किमिति हरन्तीति पदमिति चेन्न । न घ्नन्तीत्यन्वयने मास्तु हरणं मरणं स्यादिति । तथाऽन्यत्र हरन्तीत्येवोक्तौ हृतस्यापि केशादेः पुनरङ्कुरणवत्पातकाज्जृम्भणं स्यादिति हरन्ति घ्नन्तीत्युक्तिः । तत्र हरणमेव नास्ति हननं तु दूरापास्तम् । अत्र तु हनने जाते न पुनर्भवस्तस्येति विशेषोऽपि बोधितः स्यादिति सन्तोष्टव्यम् । न ह्यम्मयानि तीर्थान्यपि तु देवास्तेऽपि न स्वातन्त्र्येण तीर्थेन शुद्धिकराणि किन्तु हरिरेव तीर्थं तद्भक्ताः साधव इति व्याकुर्वन्ते । विष्णुतीर्थीयवचनमुदचकथन् । सर्वशुद्धिकरत्वात्तु तीर्थाख्यो विष्णुरच्युत इति । तथा साधवः । नाम ब्रह्मेत्युपासीतेत्यादाविव प्रथमा सप्तम्यर्थे । साधुषु स्थिता देवाः । यदधीना यस्य सत्ता तत्तदित्येव भण्यत इत्यादेः साधुसत्ताया देवाधीनत्वात्सामानाधिकरण्ये साधवो देवा इति व्याचक्रुः ॥ १२ ॥

यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः ।
यत्तीर्थबुद्धिश्च जले न कर्हिचित् जनेष्वभिज्ञेषु स एव गोखरः ॥ १३ ॥

सत्यधर्मीया —— यस्याधिकारिणः कुणपे शवसदृशे त्रिधातुके प्राधानिकपृथिव्यप्तेजःकृते । वातपित्तश्लेष्मधातुयुते देहे । चेतन आत्मबुद्धिर्मम देह इति स्वाधीनतामतिरन्यथामतिः । कलत्रादिष्वसत्सु स्वधीः स्वकीया मतिः भौमे भूमिशिलादिकृतप्रतिकृताविज्या पूज्या इति बुद्धिर्यस्य सः । जले तीर्थबुद्धिस्तीर्थं शुद्धिकृदिति बुद्धिर्यस्य सः। अभिज्ञेषु जनेषु कर्हिचिद्यदाकदाचिदपि यस्य नेज्यधीरतीर्थबुद्धिर्वा स एव गोखरः । गवि भूमौ खरो गर्दभः । यद्वा देहोऽहमित्यन्यथाज्ञानमित्यर्थः । न च क्व च प्रत्यक्षतः प्राप्तमनुमागमबाधितम् । देहात्मत्वं यदि न तत्प्राप्तं प्रत्यक्षतः क्वचित् । मम देह इति ह्येव न देहोऽहमिति प्रमेत्याद्यनुव्याख्यानप्रतीतिरेव वा प्रमावानित्युक्तेः कथमिदमिति चेन्न । देहस्यात्मत्वं प्रत्यक्षतः प्राप्तमित्यारभ्य सुधायां क्वचित्प्रतीतेरभावात्क्वचित्प्रतीतिसद्भावेऽपि प्रत्यक्षजत्वाभावात् क्वचित् प्रत्यक्षप्रतीतिभावेऽप्ययथार्थत्वात्क्वचिदयथार्थत्वेऽपि प्रबलप्रत्यक्षेण बाधादित्यर्थः । अत एव क्वापीत्युक्तम् । अन्येनेत्यनुपजीव्येनागमादिनेत्यर्थः । तदेवं

स्वभावतः प्रबलेन प्रत्यक्षेण विरुद्धावनुमानागमावाभासावेवेत्यन्तेन ग्रन्थेन स्फुटविवेकाभावेन व्यवहारमिति निर्णीतत्वात् देहात्मबुद्धिर्नैषां ममाहमिति धीः श्वशृगालभक्ष्य इत्याद्यर्थोऽवसेय-स्तद्धर्मेनेति काऽत्र कथन्ता । गौः खर इति शब्दौ वाचकौ यस्य स गोखर इति वा । पश्यज्जनानां गवां नेत्राणां खर इव खर इति वा । गौश्च पशुप्रायश्चासौ खरो दुश्शब्द-कारित्वादिति केचित् । अनुव्याख्यासुधाद्यभिधानेन ब्रह्मपुराणादिगतवैकुण्ठमाहात्म्यादि-वचनानां क्षेत्रतीर्थमाहात्म्यप्रतिपादाकानां गतिरुक्ता वेदितव्या । तथा हि तानि –

''सद्धर्मरतिदाऽन्यत्र कतिसङ्ख्यानि तानि च ।
कति च ज्ञानदान्यत्र भक्तिवैराग्यदानि च ।
मुक्तिप्रदानि कान्यत्र तानि मे वद सुव्रत ।
सद्धर्मरतिदान्यत्र सन्ति चाष्टोत्तरं शतम् ।
भक्ति वैराग्यदान्यत्र षष्ठीन्यष्टोत्तराणि च ।
मुक्तिदान्यत्र षट्च'' इत्यादीनि ॥ १३ ॥

श्रीशुक उवाच —

निशम्येत्थं भगवतः कृष्णस्याकुण्ठमेधसः ।
वचो दुरन्वयं विप्रास्तूष्णीमासन् भ्रमद्धियः ॥ १४ ॥

सत्यधर्मीया — भगवतः कृष्णस्य दुरन्वयं दुस्साध्योऽन्वयस्तदर्थसम्बन्धस्तस्मिन्यस्य वा तत् । तत्रासम्बद्धमिति यावत् । तत्र तन्त्रमकुण्ठमेधस इति । मेधश्शब्दोऽयं स्वतन्त्रः । अप्रतिहतमतिः । यद्वा योऽकुण्ठमेधसोऽकुण्ठो मेधा यस्य च स चासौ साररूपत्वात्सश्च तस्य भगवतः कृष्णस्येति । सारत्वात्स इति प्रोक्त इत्यादेः । इत्थं निशम्य विप्रा मेधा-विनोऽपि । गृणन्तु विप्र ते धिय इत्यृकूटीकायां विप्र मेधाविन्नित्युक्तेः । विप्रो गृत्स इत्यादिचतुर्विंशतिनामसु पाठादिति तट्टिप्पण्युक्तेः तन्नामसु पाठात् । भ्रमद्धियो भ्रमन्ती धीर्येषां ते तथा सन्तः । तूष्णीं मौनवन्त आसन् ॥ १४ ॥

चिरं विमृश्य मुनय ईश्वरस्येशितव्यताम् ।
जनसङ्ग्रह इत्यूचुः स्मयन्तस्तं जगद्गुरुम् ॥ १५ ॥

सत्यधर्मीया — कथं जगाद एवं जगदीश इत्यालोच्यैवं निश्चित्यावदंश्चेत्याह ॥ **चिरमिति** । ईश्वरस्यापीशितव्यतां नियम्य कूटघटितताम् । तद्वचनतः प्राप्तं निशाम्य श्रुत्वाऽनन्तरं चिरं विमृश्य जगद्गुरुं कृष्णं प्रति स्मयन्तः सन्तो जनसङ्ग्रह इति लोकानुकृतिरित्यूचुः । यद्वा जनसङ्ग्रह इति स्वयं विमृश्य जगद्गुरुं प्रति स्मयन्त ऊचुरित्यन्वयः ॥१५॥

ऋषय उवाच —

यन्मायया तत्त्वविदुत्तमा वयं विमोहिता विश्वसृजामधीश्वर ।
यदीशितव्यायति गूढ ईहया अहो विचित्रं भगवद्विचेष्टितम् ॥ १६ ॥

सत्यधर्मीया — तदृषिवर्गः किमवादीदित्यत आह ॥ **ऋषय इत्यादिना** । हे विश्वसृजां ब्रह्मादिजगत्सर्जकानामधीश्वर स्वामिन् । तत्त्वविदुत्तमा वयमपि । यस्य तव मायया प्राज्ञया शक्त्येति वा विमोहिता मोहं प्राप्ता विमा विगता मा येभ्यस्ते विमा अज्ञा इत्युदिता इदं चर्येति ते तथेति वा । कथं तत्त्वविदुत्तमा इति आत्मनो निरहन्ता आहुरिति मोहिता इत्यनेन परास्तम् । स भवान् ईहया स्वेच्छया स्वचेष्टयेति वा गूढोऽनभिव्यञ्जितनिजचर्यः । ईशितव्यायति ईशितव्यश्च स्वप्रेयः स भवति । लोहितादिडाज्भ्यः क्यषिति क्यष् । स च भवत्यर्थे न त्वाचारार्थे । भृशादिभ्यो भुव्यच्वेर्लोपश्च हल इति भुवीत्यनुवृत्तेस्तदर्थस्तु भवत्यर्थ इत्युक्तेर्नाचारः । विकल्पतः पदयोरभिधानात्परस्मैपदता सम्भवति । तद्वद्भवतीति तात्पर्यम् । तत्तदनुकरणरूपं भगवच्च तद्विचेष्टितं च भगवदैश्वर्यादिमद्विचेष्टितं तत्स्वरूपत्वात्तस्येति सम्भवति चेष्टितस्यापि भगवत्त्वम् । अहो आश्चर्यम् पारोक्ष्योक्तिर्वा भगवतो विचेष्टितमहो । तर्हि मायया निगूढ इति मायिकत्वमुच्यत इति प्रतीयत इत्यत आहुः ॥ **विचित्रमिति** । विगता चित्रा माया यस्मात्तदमायिकामित्यर्थः । विचित्रं नानाविधमिति वा । अहो विचित्रमत्याश्चर्यकरमिति वा ॥ १६ ॥

अनीह एतद् बहुधैक आत्मना सृजत्यवत्यत्ति न बद्ध्यते यथा ।
भौमैर्हि भूमिर्बहुनामरूपिणी अहो विभूम्नश्चरितं विडम्बनम् ॥ १७ ॥

सत्यधर्मीया — तच्चेष्टावैचित्र्यं स्पष्टयन्ति ॥ **अनीह इति** । आत्मना स्वेनानीहः फलाकाङ्क्षाशून्योऽक्लिष्टकारी वा एकः प्रधान एतज्जगद्बहुधा सृजत्यवत्यत्ति । यथा भूमिर्भौमैः

स्वसम्बन्धिभिः पदार्थैः । बहुनामरूपिणी बहुविधानि नामानि च रूपाणि च सन्त्यस्या इति सा । यथा बद्धयते तथा भगवान्बद्धयते । किञ्चित्कार्यकर्त्र्या धात्र्या बन्धो बहुविधम् । विभूम्नो विशेषतो भूमा पूर्णता यस्य स विभूमा । विडम्बनं विडम्बयतीति तत्तथा हि यतस्तस्मादहो ।। १७ ।।

अथापि काले स्वजनाभिगुप्त्यै बिभर्षि स त्वं खलनिग्रहाय ।
स्वलीलया वेदपथं सनातनं वर्णाश्रमात्मा पुरुषः परो भवान् ।। १८ ।।

सत्यधर्मीया — विडम्बनं न च सदा किन्तु प्रयोजनमात्यायिकं तदैवं प्रवर्तस इति विज्ञापयन्ति ।। **अथापीति ।** स्वजनाभिगुप्त्यै स्वजनरक्षणाय स्वजना यतो वा इमानि भूतानि जायन्त इत्यादेः स्वजातास्तेषामभिगुप्त्यै येन जातानि जीवन्तीति श्रुतेः । स त्वं तदन्यतमो बिभर्षि । किञ्च काले वेदपथप्रतिबन्धने यथावस्थितार्थप्रतिबन्धे तथा । स आत्मा तत्त्वमसीत्यादावनकारप्रश्लेषेण छेदने च खलैः प्रस्ताविते तं वेदपथं भवांस्तं पथम् । वाटः पथश्च पन्थाश्चेत्युक्तेः । मार्गं वेदेति जानातीति स्वलीलया तत्खलनिग्रहाय बिभर्षि सनातनं सदातनं ससंवादं स्याद्यथा तथा बिभर्षि । प्रागुदाहृतं गीतातात्पर्यमनुसन्धेयम् । अनन्तरं वर्णाश्रमात्मा सकलवर्णाश्रमधर्मप्रवर्तक इति तत्स्वामी परः पुरुष उत्तमपुरुष इतीदम्भरणहेतुः । परोभवो भवतः पर इति परोभवा मुक्तास्तानपि बिभर्षीति वा । परोभवाननयति चेष्टयतीति स वा । नलोपाद्यभावस्तु तज्जलानित्यादिवदिति साधूक्तं प्रागनुसन्धेयम् । परो इत्युत्तमार्थकमव्ययम् ।

"रञ्जनात्प्रकृतिः प्रोक्ता रज इत्येव वैदिकैः ।
तस्या अप्युत्तमो विष्णुर्यतोऽतः स परोरजा" इति बृहद्भाष्ये ।

परो इति ततः परमिति छान्दोग्यभाष्ये तद्धदयमपीति मन्तव्यम् । स्वजनस्य स्वात्मजस्य विधेर्नाभौ नाभ्या वा गुप्त्यै रक्षणाय । हे खलनिग्रहाय खलस्य वेदस्तेयस्य हयास्यस्य निग्रहस्य हननस्यायो हि लाभो येन स तं यापयतीति तत्सम्बुद्धिर्वा । मत्स्यात्मा सन् काले तत्संहारे जाते सनातनं वेदपथं काले ब्रह्मणि बिभर्षि । वर्णाश्रमात्मा वर्णानां विषयेऽश्रमः श्रमरहित आत्मा मनो यस्य स सन् । पुरुषः प्राणो यस्य सः । परोभवान् बहुकान्तिमांश्चासीदिति शेषः ।

''हरिश्च प्रकृतिश्चैव ब्रह्मवायू तथैव च ।
सुपर्णशेषरुद्राश्च शक्रः सूर्ययमावपि ।
अग्निर्यमानुजश्चैव कालशब्दोदिताः क्रमात् ।
पूर्वोक्तास्त्वपरोक्तानां प्रभवः सर्वशो मता''

इत्यदिमहासंहितायामिति द्वितीयतात्पर्योक्तेः । खलान्निगृह्णातीति स तथा । स चासावायश्च तत्सम्बुद्धिरिति वा । महाफलप्रदत्वात्तु विष्णुराय इतीरित इति निरुक्त इत्येकादशतात्पर्योक्तेः । तत्रैवायस्तु फलमुद्दिष्टमिति चोक्तम् ॥ १८ ॥

ब्रह्म ते हृदयं शुक्लं तपः स्वाध्यायसंयमैः ।
यत्रोपलब्धं सुव्यक्तमव्यक्तं च ततः परम् ॥ १९ ॥

तात्पर्यम् – हृदयं प्रियं हृद्ययनात् ।

सत्यधर्मीया —— ब्रह्म ते हृदयमिति श्लोके ब्राह्मणजातेर्हृदयतादात्म्यमुच्यत इत्यन्यथा प्रतीतिनिरासाय तदनूद्य व्याचष्टे ॥ **हृदयं प्रियमिति** । कथं हृदयशब्दः प्रियार्थक इत्यतस्तं तस्मिन्निर्वक्ति ॥ **हृद्ययनादिति** । हृदाश्रितत्वात्प्रियस्येति भावः । द्वितीयतात्पर्ये च । हृदयं प्रियमुद्दिष्टं कान्तमित्यभिधीयत इति ॥

ततश्चायं श्लोकार्थः ॥ तपःस्वाध्यायसंयमैः शुक्लं गुह्यं ब्रह्म ब्राह्मणजातिस्ते हृदयं प्रियं परं च । तदुभयघटकमाह ॥ **यत्रेति** । ब्राह्मणकुलेऽव्यक्तं ब्रह्म सुव्यक्तं यथा भवति तथाऽव्यवधानेनेति यावत् । उपलब्धं दृष्टं यत्तमः परं शुक्लं च ॥ १९ ॥

तस्माद् ब्रह्मकुलं ब्रह्मन् शास्त्रयोनेस्तवात्मनः ।
सभाजयसि सद्धाम तद्ब्रह्मण्यगुणो भवान् ॥ २० ॥

सत्यधर्मीया —— किञ्च तस्मात्तत्र ब्रह्मोपलब्धिर्यस्मात् । हे ब्रह्मन् शास्त्रयोनेः शास्त्रं योनिः प्रमाणमस्येति शास्त्रयोनिस्तत्र सर्वस्वामिनः सद्धाम सन्मुख्याश्रयस्तस्मात्सम्भावयसि अहो वयं जन्मभृत इत्यादिना सम्भावयसि । यत्तद्ब्रह्मण्यगुणो ब्रह्मण्याः सर्वेऽपि गुणा अप्रधानीभूता यस्मात्स तच्छिखामणिर्भवान्भवतीति ॥ २० ॥

अद्य नो जन्मसाफल्यं विद्यायास्तपसो दृशः ।
त्वया सङ्गम्य सङ्गत्या यत् त्वं नः श्रेयसां परः ॥ २१ ॥

सत्यधर्मीया — अहो वयं जन्मभाज इति यत्तन्नटनं परमार्थत इदानीमिति विज्ञापयन्ति ॥ **अद्येति** । यद्वयं त्वया सङ्गम्य सङ्गं प्राप्य स्थितास्तस्मान्नोऽद्य जन्मसाफल्यं जन्मनः सफलता । साफल्यमिति विश्लिष्टं विद्यादिपदैरन्वेतव्यम् । विद्याया अभ्यस्तशास्त्रस्य तपसः कृच्छ्रादेर्दृशो ज्ञानस्य चक्षुषो वा साफल्यम् । कुत इत्यादीत्यत आह ॥ **यदिति** । सङ्गत्यैवं सहवासेन नस्त्वं श्रेयसां मध्ये परो विशिष्टश्रेयोरूप इति । सङ्गत्या लिङ्गभङ्गानन्तरं गमनेन प्राप्यश्रेयसां परः स्वामी । तद्विश्राणनकृत्तत इति वा । यद्वा त्वमसङ्गत्या किञ्चिद्वस्तुसङ्गाभावेन सन्नपि । असङ्गो ह्ययं पुरुष इति श्रुतेः । अथाऽपि त्वयैव सङ्गमि नो जन्म साफल्यम् । तत्र तन्त्रं यत्त्वं नः श्रेयसां मध्ये पर इति । यद्यपि न इत्येकोक्त्याऽलं न पुनर्न इति वक्तव्यम् । तथाऽपि तस्य नो इत्यव्ययरूपतया त्वयाऽर्थाज्जन्मभाज इत्यनेन यज्जन्मसाफल्यमुक्तं तत्तव नो किन्तु न इत्यर्थकं सदन्तरङ्गतः सार्थकमित्यवधेयम् ॥ २१ ॥

नमस्तस्मै भगवते कृष्णायाकुण्ठमेधसे ।
स्वयोगमायया च्छन्नमहिम्ने परमात्मने ॥ २२ ॥

सत्यधर्मीया — परोक्षस्तुतिस्त्वतिप्रीतिकृदिति तथा नमन्ति । भगवते हे अकुण्ठ-मेधसे हे सहितो या रमयेति सेस्तत्सम्बुद्धिर्हे स इति । अकुण्ठमेधस इति वा परमात्मने साक्षाद्विष्णुरूपाय कृष्णाय ते नमः । तर्ह्येवं किं गोपरूपगोपनं तस्येत्यत आह ॥ **स्वयोगेति** । स्वस्य स्वरूपभूता वा या योगशक्तिस्तया च्छन्नो महिमा यस्य स तस्मा इति वा ॥ २२ ॥

न यं विदन्त्यमी भूपा एकारामाश्च वृष्णयः ।
मायाजवनिकाच्छन्नमात्मानं कालमीश्वरम् ॥ २३ ॥

सत्यधर्मीया — अत एव न तेषां तव मनीषेति भाषन्ते ॥ **नेति** । ईश्वरमीशेभ्यो वरं सकलेप्सितदम् । माया तु स्वेच्छा तद्रूपिणी या जवनिका तिरस्करिणी । प्रतिसीरा जवनिका स्यात् तिरस्करिणी च सेत्यमरः । जुवत्यस्यां जुः । सौत्रो धातुर्गतौ वेगे च

ल्युट्स्वार्थे कन् । यमनिकेति वा पाठः । यमयति यम उपरमे ल्युट् । यवनिकेति नामरे पाठो न व्याख्याता च । तथाऽपि बहुव्यवहाराद्यु मिश्रण इत्यस्य यवनिकेति रूपमिति ज्ञेयम् । तया छन्नमात्मानं यं अमी भूपा मिलिता न विन्दन्ति । भवतु कदाचिन्मिलिता-नामवेदनं वेदनं तु सदा तदनुवर्तिनां यादवानामित्यतो नैते विन्दन्तीत्याहुः । एकरामा एकस्मिन्नैकेनैव वा रमन्त इति तथा वृष्णयोऽपि यं न विन्दन्ति । चः समुच्चये । तस्मै नम इत्यतीतेन वा तस्येत्युत्तरेण वाऽन्वयः ॥ २३ ॥

तस्याद्य ते ददृशिमाङ्घ्रिमघौघमर्षतीर्थास्पदं हृदि धृतं सुविपक्वयोगैः ।
उत्सिक्तभक्त्युपहताशयजीवकोशा आपुर्भवद्गतिमथानुगृहाण भक्तान् ॥ २४ ॥

सत्यधर्मीया — अद्य तस्याङ्घ्रिं ददृशिम । मोदेशः । एकान्तिनां तु ज्ञानमात्र-मर्थनीयमिति । वरिति ज्ञानमुच्यते । सव्यश्चाङ्घ्रिर्ज्ञानात्मेति तं ददृशिमेत्येकवचनेन ध्वनया-मासुः । हे अद्य उपजीव्येति वा । किं तद्दर्शनेनेत्यतो वदन्ति ॥ **अघौघमर्षतीर्थास्पदमिति ।** धातूनामनेकार्थत्वात् तितिक्षार्थोऽप्यत्र नाशार्थः । नाशयन्तीति तानि च तानि तीर्थानि च तेषामास्पदं स्थानभूतम् । सुविपक्वयोगैरत्यन्तं विपक्वः फलोन्मुखो योग उपायो भक्त्यादिर्येषां ते तर्हीदं धृतं ध्यातमिति यावत् । आस्पदं प्रतिष्ठायामिति निपातितः शब्दः । ध्यानमात्रं न पुरुषार्थ इत्यत आहुः । उत्सिक्तोद्रिक्ता या भक्तिस्तयोपहतोऽपहृत आशयो स्थानमभिप्रायो विषयाभिलाष इति यावत् । येषां ते ते च ते जीवकोशा जीवस्य कोशस्थानानीति लिङ्गानि येषां ते । भगवद्गतिमापुः । अथ तद्धृदयमपि तद्धृदि धृतवन्त इति तदनन्तरं भक्तान्नोऽनु-गृहाण । न उपर्यनुग्रहं कुर्विति यावत् । पूर्वं भक्तत्वेन ग्रहाणानन्तरं भगवद्गतिमनु-गृहाणेत्यप्यावृत्त्याऽन्वयः ॥ २४ ॥

श्रीशुक उवाच —

इत्यनुज्ञाप्य दाशार्हं धृतराष्ट्रं युधिष्ठिरम् ।
राजर्षिवर्यांस्तान् गन्तुं मुनयो दधिरे मनः ॥ २५ ॥

सत्यधर्मीया — दाशार्हं कृष्णमित्यनुज्ञाप्य विज्ञाप्य धृतराष्ट्रं युधिष्ठिरं तान् राजर्षि-वर्यान् राजर्षिश्रेष्ठान् राजश्रेष्ठान्कांश्चित्स्वतः पुरतस्तत्रायातान् ऋषिश्रेष्ठान्वाऽनुज्ञाप्य मुनयो द्वैपायनाद्या गन्तुम् ॥ २५ ॥

तद् वीक्ष्य ताननुव्रज्य वसुदेवो महायशाः ।
प्रणम्य चोपसङ्गृह्य बभाषेदं सुयन्त्रितः ॥ २६ ॥

सत्यधर्मीया — पश्चात्कृत्वा प्रणम्य । इदं किं पृच्छसि पृच्छेति तत्तदनुशासनमुपसङ्गृह्येदं वक्ष्यमाणं बभाषे । आर्षो बभाषेदमिति निर्देशः । बभाषेति पदव्यत्ययो वा । उत्तरत्र क्रत्वादेः करिष्यमाणस्य पत्न्यानुकूल्येन भाव्यमिति सा चानुवर्तिनीति वाऽहम् ॥ दंसुयन्त्रित इति । दमिति भार्यावाच्यव्ययम् । दं सुयन्त्रिता यस्य स इति तदर्थः । इदं च वां पुत्रतां गत इति वक्ष्यमाणानुगुणम् । दं कलत्रं बुधैः प्रोक्तं छेदे दातरीत्यनेकार्थध्वनिपदमञ्जरी । दस्तरौ दं कलत्रे च दाने छेदे च दातरीति विश्वश्च ॥ २६ ॥

वसुदेव उवाच —

नमो वः सर्वदेवेभ्यो ऋषयः श्रोतुमर्हथ ।
कर्मणा कर्मनिर्हारो यथा स्यान्नस्तदुच्यताम् ॥ २७ ॥

सत्यधर्मीया — सर्वे देवा येषु सन्निहिता इति सर्वदेवास्तेभ्यः । सर्वदेवमयो विप्रः । सर्वा देवता वेदविदि ब्राह्मणे वसन्तीत्यादेः । वो नमः । हे ऋषयः श्रोतुं मद्वचनं श्रोतुमर्हथ योग्या भवत । कर्मणाऽनुष्ठितेनेष्ट्यादिना नरकाद्यनर्थप्रापककर्ममूलच्छेदो यथा स्यात्तथा नः प्रत्युच्यन्ताम् ॥ २७ ॥

नारद उवाच —

नातिचित्रमिदं विप्रा वसुदेवो बुभुत्सया ।
कृष्णं मत्वाऽर्भकं यन्नः पृच्छति श्रेय आत्मनः ॥ २८ ॥

सत्यधर्मीया — वसुदेवेन वासुदेवे सकलफलरूपे समीपे सति कथमस्मान्प्रति कृतः प्रश्नः किमियदज्ञोऽयमिति कुतुकिनोऽन्यान्मुनीन्स्वयं स्वयम्भूर्नारद आह ॥ **नेति** । हे विप्रा वसुदेव आत्मनः श्रेयो बुभुत्सया नोऽस्मान्पृच्छतीति यत्तदिदं नातिचित्रम् । यद्यस्मात्कृष्णमर्भकं मत्वा स्थित इति । इदं मननं कुतोऽमतिहेतुरित्यतोऽप्याह ॥ **अर्भकमिति** । अर्भः को ब्रह्मा यस्य तमाद्याद्यम् ॥ २८ ॥

सन्निकर्षो हि मर्त्यानामनादरणकारणम् ।
गाङ्गं हित्वा यथाऽन्योऽम्भस्तत्रत्यो याति शुद्धये ॥ २९ ॥

सत्यधर्मीया — कश्यपस्यापि प्राग्वसुदेवस्य मानवतनुमत इदं सम्भवदेवेति तन्मौर्ख्यं सदृष्टान्तमाचष्टे ॥ **सन्निकर्ष इति** । मर्त्यानां सन्निकर्षोऽमर्त्यैः सन्निकर्षस्तदमर्त्यानादरणे कारणम् । हि लोकसम्मतम् । यथा तत्रत्यः । अमेहक्वतसित्रेभ्यः इति त्यः । तत्र सन् यः पामरो गांगमम्भो हित्वाऽन्यदीयमम्भः शुद्धये याति । सति जगज्जनकेऽस्मान्पृच्छति तदनादरणेनेति तद्वदयमिति भावः ॥ २९ ॥

यस्यानुभूतिः कालेन लयोत्पत्त्यादिनाऽस्य वै ।
स्वतोऽन्यस्माच्च गुणतो न कुतश्चन रिष्यति ॥ ३० ॥

सत्यधर्मीया — तन्मननान्यथात्वं विवरीतुं तन्मेयस्वभावमाह ॥ **यस्येति** । यस्यैतत्तनयस्यानुभूतिर्ज्ञानं न तथा । अस्य जगतो विश्वान्तर्निर्देशे तदुत्पत्त्यादिप्रयुक्तोत्पत्त्यादिना च । स्वतो नयनादिकण्डूयनसमये नखमुखदलने जातेऽशनैरशनसमये रदनैरशनारदने चेत्यवमादौ स्वतः । यथोक्तमेकादशे ।

''जनोऽस्य हेतुः सुखदुःखयोश्चेत्किमात्मनश्चात्र हि भौमयोस्ततः ।
जिह्वां क्वचित्सन्दशति स्वदद्भिस्तद्वेदनायां कतमाय कुप्येत् ॥'' इत्यादिना ।

अन्यस्माद्दृष्यादेः सत्त्वादिगुणाच्च । कुतश्च नातर्किता दशनिपातादेश्च । नरिष्यति न नश्यति । नरिष्यतीत्युक्तिस्तस्यास्तत्तादात्म्यात् । अस्य जगतो यथा तथा । यस्यानुभूतिः काले ज्ञानं स्वतोऽत्यन्तं व्याप्तः । स योऽतोऽश्रुत इति श्रुतेः । अन्यस्मादित्यादि पूर्ववत् ॥ ३० ॥

तं क्लेशकर्मपरिपाकगुणप्रवाहैरव्याहतानुभवमीश्वरमद्वितीयम् ।
प्राणादिभिः स्वविषयैरुपगूढमज्ञो मेने स सूर्यमिव मेघहिमोपरागैः ॥ ३१ ॥

सत्यधर्मीया — यो नरिष्यति क्लेशप्रापको यः कर्मपरिपाकस्तत्प्रापका ये गुणास्तेषां प्रवाहाः परम्परास्तैर-व्याहतोऽनुभवो ज्ञानमनुभावो वा यस्य स तम् । तत्र हेतुरीश्वरमिति । तदखण्डत्वे च हेतुरद्वितीयमिति । एतादृशं कृष्णम् । यथा मेघेन हिमेनोपरागेण राहुग्रहणेन च छादितं सूर्यमसूरिरप्रकाशं मनुजो मनुते तथा गुणप्रवाहैः प्राणादिभिर्गूढं सत्त्वरजसस्तमसां

शुक्लरक्तनीलत्वेन हिममेघोपरागाणां तथात्वेन तैर्गूढं सूर्यमिवेति निदर्शनम् । एवमन्वयान्तर-मिति ज्ञेयम् । केचिन्माञ्जिवर्णाश्चेति रामायणस्योक्तेरभ्रस्य रक्तता ज्ञेया । स्वविषयैः स्थूलेन्द्रियगोचरैः प्राणादिभिः प्राकृतैरुपगूढं मेने । प्राकृतशरीरं मेन इत्ययमज्ञोऽतः प्रश्नो युक्त इत्याशयः । स्वविषयैः स्वमातृमातृकैः प्राणादिभिर्बलादिभिश्चेष्टादिभिर्वा गूढं भवन्तमर्भकं मेन इत्यज्ञ इति वा । असुरविषयैरितरेषामिति वा ॥ ३१ ॥

अथोचुर्मुनयो राजन्नाभाष्यानकदुन्दुभिम् ।
सर्वेषां शृण्वतां राज्ञां तथैवाच्युतरामयोः ॥ ३२ ॥

सत्यधर्मीया — प्राज्ञा एतदज्ञताज्ञापनेनैव समयमगमयन्किंवोत्तरं तत्पृष्टस्यावद-न्नित्यत आह ॥ **अथेति** । मुनयः सर्वेषां राज्ञां शृण्वतां तथा रामकृष्णयोः शृण्वतोश्च । आनकदुन्दुभिमाभाष्योचुः ॥ ३२ ॥

कर्मणा कर्मनिर्हार एष साधुनिरूपितः ।
यच्छ्रद्धया यजेद् विष्णुं सर्वयज्ञेश्वरं मखैः ॥ ३३ ॥

सत्यधर्मीया — यद्यप्येतदपायोपायाः सन्ति बहवस्तथाऽपि वित्ततच्चित्ताः स मे मुनय इदं निर्हारकारणमैरयन्नितीरयति ॥ **कर्मणेति** । साधु यथा तथा निरूपिता शास्त्रे । साधुभि र्निरूपित इति सङ्ग्राह्यत्वे हेतूक्तिः । एष वक्ष्यमाणः सर्वयज्ञेश्वरं विष्णुं मखैर्यज्ञैश्च यजेत्पूजये-दिति यः स एष निरूपित इति वाऽन्वयः ॥ ३३ ॥

चित्तस्योपशमो यो वै कविभिः शास्त्रचक्षुषा ।
दर्शितः सुगमो योगो धर्मश्चात्ममुदावहः ॥ ३४ ॥

सत्यधर्मीया — मखैरिति युष्मन्मुखतो यदुक्तं तत्कर्मकरणक्षणे पुनस्तदन्तरकर्मा-करणात्कर्मणाकर्मनिर्हारो दुश्शकः । भित्तेर्जलेन सम्मार्जने मृत्तिकैवेति नयत इति न युक्ति-सहमिति वदतो मम शङ्का बहूपपादनेन श्लोकपञ्चके परिहरन्ति ॥ **चित्तस्येति** । चित्तस्य मनस उपशमो विषयेभ्य आहरणलक्षणः । यः कविभिः शास्त्रचक्षुषा तदुपरूपमात्रग्रहेण दर्शितः । स सुगमो योगः कर्मबीजभर्जनोपायोऽयमेव चात्मनः स्वस्य मुदावहो धर्मो नेतर इत्यर्थः । चशब्दोऽवधारणे । यस्योपशम उपशान्तिरक्रोधोपरोध इति यावत् । तस्य चिज्ज्ञानम् । तथा यः पारत्रिक्यः सम्पदश्च सुगमा इत्यप्यर्थः ॥ ३४ ॥

अयं स्वस्त्ययनः पन्था द्विजातेर्गृहमेधिनः ।
यच्छ्रद्धयाऽऽप्तवित्तेन शुक्लेनेज्येल पूरुषः ॥ ३५ ॥

सत्यधर्मीया — स्वस्तीत्यव्ययमिति पक्षे स्वस्त्ययनः स्वस्त्याश्रयः । अयनशब्दः स्त्रीलिङ्ग इत्ययन इति सम्भवति । विस्तृतश्च प्राक् तत्प्रकारः । स्वस्तिरस्तु न इत्यादेः स्वस्तेरयन इति च । अयं मङ्गलाश्रयो मार्गः । अधिकार्यत्र क इत्यत आहुः ॥ **द्विजातेः गृहमेधिनः गृहस्थाश्रमिण इति** । स किमात्मेत्यतो वदन्ति । श्रद्धया शुक्लेन न्यायार्जितेनेति निर्मलेन वित्तेन पुरुषं भगवन्तमिज्येतेति यः सोऽयमित्यन्वयः । आप्तेति सम्बोधनं च ॥ ३५ ॥

वित्तैषणां यज्ञदानैर्गृहैर्दारसुतैषणाम् ।
आत्मलोकैषणामेवं कालेन विसृजेद् बुधः ।
ग्रामे त्यक्तैषणाः सर्वे ययुर्धीरास्तपोवनम् ॥ ३६ ॥

सत्यधर्मीया — सन्यासस्तु विरक्तैरतिविरक्तैश्चेति द्विविधैर्ग्राह्यः । तत्र नानुपनीतस्य नाधिकारः । अधिकारश्च गृहिणाम् । तत्र द्वौ पक्षौ श्रौतः स्मार्तश्चेति । यदहरेव विरजेत्तदहरेव प्रव्रजेदित्याद्युदित आद्यः । अतिविरक्तोपनीतपरिणतविषयः । द्वितीयस्तु पित्रादिऋणपरिहारानन्तरं ग्राह्य इति विवेकं मनसि कृत्वा वदन्ति ॥ **वित्तैषणामिति** । यज्ञाश्च दानानि च तैर्वित्तैषणां द्रव्यापेक्षां विसृजेदिति सर्वत्रान्वेतव्यम् । विसृजेत् । बुधः संसारासारतावित् । गृहैस्तत्तदाश्रमैः सह दारसुतैषणाम् । धीरो धैर्यं तद्विसर्गहेतुरित्यर्थः । कालेन ज्ञातेन कालेन भगवता निमित्तेनात्मलोकैषणामात्मनः स्वस्य लोकविषयिणीं वैकुण्ठादिलोकेच्छां विसृजेत् । एकान्तिकत्वात् । स्वत एवागमिष्यति न याचनोचितेति भावः । एवं कालेन क्रमेणेत्यप्यर्थः । ग्राम्ये स्त्रीभोगे त्यक्तैषणाः सर्वे धीरा ब्रह्मचारिणोऽपि तपः प्रतिवनं ययुः । सन्यासिनः सन्तो वाऽतिविरक्ताः ॥ ३६ ॥

ऋणैस्त्रिभिर्द्विजो जातो देवर्षिपितृणां प्रभो ।
यज्ञाध्ययनपुत्रैस्तानानिस्तीर्य त्यजन् पतेत् ॥ ३७ ॥

ब्रह्मचर्यसुताभ्यां वै ऋषिपित्रोर्महामते ।
यज्ञैर्देवर्णमुन्मुच्य निर्ऋणोऽशरणो भवेत् ॥ ३८ ॥

सत्यधर्मीया — विरक्तेन इयदनुष्ठाय सन्यासो ग्राह्य इति तदाहुः ।। **ऋणैरिति ।** जात उत्पन्नो द्विजो देवऋषिपितॄणां चेति त्रिभि ऋणैः। क्रमात्तद्दापकानाहुः ।। **यज्ञे-त्यादिना ।** यज्ञेन देवानामृणपरिहारः । अध्ययनेन ऋषिऋणपरिहारः । पुत्रेण पितृऋण-मिति। तान्देवादींस्त्रीन् अनिस्तीर्य पुत्रेण जय्य इत्यादेस्तद्द्वारा जित्वेति यावत् । त्यजन्गृहाद्याश्रमं पतेन्नरकाद्यनर्थमृणबाधया प्राप्नुयात् । ननिस्तार्येति पाठे स एवार्थः । अतिविरक्तस्य तु तन्महिम्नैव तदादिऋणपरिहार इति मन्तव्यम् । ब्रह्मचर्यमत्र वेदाध्ययनम् । अध्ययनेति प्रागुक्तेः । पुत्रेति पुरोदीरणादत्रापि ब्रह्मचर्यपुत्राभ्यां चेति वक्तव्ये यद्ब्रह्मचर्य-सुताभ्यां चेत्याहुस्तेन ब्रह्मचर्यं च सुता च ताभ्यां तच्च सुतश्चेति ताभ्यामावृत्त्या सुतया सुतेन चर्षिपित्रो ऋणमुन्मुच्य । कन्योदिता बत कुलद्वयतारिणीति । पुत्राच्छतगुणं पुत्री यदि पात्रे प्रदीयत इत्यादेः । स्वायम्भुवययात्यादीनां दौहित्रयज्ञाष्टकादिभ्य ऋणमुक्तिः प्रसिद्धा चेति विशेषं सूचयामासुरित्यवसेयम् । हे महामते वसुदेव यज्ञैर्देवानामृणमुन्मुच्यैव निर्ऋणोऽशरणो गृहरहितः अ एव परमात्मैव शरणं यस्य सो वा भवेत् ।। ३७, ३८ ।।

वसुदेव भवान् नूनं भक्त्या परमया हरिम् ।
जगतामीश्वरं भेजे स यद् वां पुत्रतां गतः ।। ३९ ।।

।। इति श्रीमद्भागवते दशमस्कन्धे द्विसप्ततितमोऽध्यायः ।।

सत्यधर्मीया — जानता त्वया कृतः प्रश्नो लोकोद्धृत्यै तदुत्तरं च तदर्थमेवमस्माभि-रुक्तम् । वस्तुतस्तु त्वमेवंविध इति न तवावश्यकमिति तमुत्साहयन्त आहुः ।। **वसुदेवेति ।** हे वसुदेव भवान्परमया देवकी सर्वदेवतेत्यादेरुत्तमया देवक्या सह जगतामीश्वरं हरिं गतः शरणं यातो नूनं निश्चयः । कुतः स इत्यत आहुः । यद्यतः स हरिर्वां युवयोः पुत्रतां भेजेऽत इति । एवमर्थापने वामिति सुलग्नम् । परमया देवक्या सहेदानीं पुरा च पुरुषजन्मसु सभार्यो भवान्भेजे नूनं यतः स वां पुत्रतां गत इति वाऽन्वयः ।। ३९ ।।

।। इति श्रीसत्यधर्मयतिकृतायां श्रीमद्भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे द्विसप्ततितमोऽध्यायः ।। १०-७२ ।।

॥ अथ त्रिसप्ततितमोऽध्यायः ॥

श्रीशुक उवाच —

तन्मुखैर्वचनं श्रुत्वा वसुदेवो महामनाः ।
तानृषीन् ऋत्विजो वव्रे मूर्ध्नाऽऽनम्योपसृत्य च ॥ १ ॥

सत्यधर्मीया — ॥ हरिः ॐ ॥ तन्मुखैरिति मुखवचनम् । तानेवर्षीनृत्विजो वव्रे ॥ १ ॥

त एवमृषयो राजन् वृता धर्मेण धार्मिकम् ।
तस्मिन्नयाजयन् क्षेत्रे मखैरुत्तमकल्पकैः ॥ २ ॥

सत्यधर्मीया — धर्मेण यथा वरणं कर्तव्यं तद्धर्मेण वृता धर्मेण कल्पोक्तेन च तस्मिन् क्षेत्रे उत्तमकल्पकैरुत्तमः कल्पो धरणीवितरणादिरूपः पक्षो येषु तैर्मखैः । उक्तश्चाश्वमेधे पर्वणि । पृथिवी दक्षिणा चात्र विधिः प्रथमकल्पकः । विद्वद्भिः परिदृष्टोऽयं शिष्टे विधि-विपर्यय इति । प्रभुः प्रथमकल्पे तु योऽनुकल्पं प्रवर्तते । न तस्य साम्परायः स्याच्छुतिरेषा सनातनीत्यनन्तदेवीये । तथा प्रथमस्कन्धीयाजयित्वाऽश्वमेधैस्तं त्रिभिरुत्तमकल्पकैरिति श्लोकव्याकृतौ यादवार्यैस्तद्यज्ञपश्चकमजस्त्रिगुणां स एभ्यः सद्दक्षिणामित्युदाहृत्य श्रीमदुक्तिं दक्षिणादिविषये विहितोत्तमकल्पयुतैरित्यर्थ इत्युक्तेश्च ॥ २ ॥

तद्दीक्षायां प्रवृत्तायां वृष्णयः पुष्करस्रजः ।
स्नाताः सुवाससो राजन् राजानः सुष्ठ्वलङ्कृताः ॥ ३ ॥

सत्यधर्मीया — तस्य दीक्षा व्रतसङ्ग्रहस्तस्यां प्रवृत्तायां सत्यां पुष्करस्रजः कमलमाला रलयोरैक्याद्बहुमुक्तादिमाला इति वा । राजान इतरे । सुठ्ष्वित्यव्ययम् । सुष्ठु प्रशंसनेऽपि स्यादत्यर्थेऽपि च कथ्यत इति विश्वः । स्तुत्यमलङ्कृतमलङ्कारो येषां ते । सुष्ठु भृशं यथाऽलङ्कृता इति ॥ ३ ॥

तन्महिष्यश्च मुदिता निष्ककण्ठ्यः सुवाससः ।
दीक्षाशालामुपाजग्मुरालिप्ता वस्तुपाणयः ॥ ४ ॥

सत्यधर्मीया — तन्महिष्यो वसुदेवदेव्यो निष्कं वक्षोऽलङ्करणं तद्युक्ताः कण्ठा यासां ता आलिप्ता गन्धादिना । वस्तूनि हिरण्यफलादीनि पाणिषु यासां ता हिरण्यं रजतं वाऽपि गृहीत्वा क्रमुकं फलम् । शालां विशेद्यज्ञपत्नी शपेयुस्त्वन्यथा सुरा इति । व स्तुशास्त्रं वा । यच्छमित्री यजमानमानिनी निशातं शस्त्रं गृहीत्वा प्रविशेच्छालामिति याज्ञिकाः ॥ ४ ॥

नेदुर्मृदङ्गपटहशङ्खभेर्यानकादयः ।
ननृतुर्नटनर्तक्यस्तुष्टुवुः सूतमागधाः
जगुः सुकण्ठ्यो गन्धर्व्यः सुगीतं सहभर्तृकाः ॥ ५ ॥

सत्यधर्मीया — मृदङ्गपटहशङ्खभेर्यानकमादिर्येषां त इति विग्रहः । तूर्याङ्गत्वात् । गन्धर्व्यस्तद्भार्या अप्सरस इति न स्वरसम् । सहभर्तृका इत्युक्तेः ॥ ५ ॥

तमभ्यषिञ्चन् विधिवद् भक्तमव्यग्रमृत्विजः ।
पत्नीभिरष्टादशभिः सोमराजमिवोडुभिः ॥ ६ ॥
ताभिर्दुकूलवलयहारनूपुरकुण्डलैः ।
स्वलङ्कृताभिर्विभवैर्दीक्षितोऽजिनसंवृतः ॥ ७ ॥

सत्यधर्मीया — तमभ्यषिञ्चन्विधिवद्भक्तमव्यग्रभक्तमृत्विज इति सरलः पाठः । अव्यग्रमव्याकुलं भक्तं वसुदेवमव्यग्रं यथा भवति तथाऽभ्यषिञ्चन्निति वाऽन्वयः । विधिवदयक्तमिति पाठस्तु बहुश्लिष्टः । अक्तं नयनयोः कज्जलेन प्रायस्त्रैककुदेन तन्न चेद्येन केन वा । यथोक्तं वाजसनेयके । यदाञ्जनं त्रैककुदमिति । त्रैककुदेनाञ्जनेनाङ्क्ते । यदि त्रैककुदं नाधिगच्छद्येन केन वाऽञ्जनेनाञ्जीतेति । तथैवापस्तम्बारणेरणं चयदाञ्जनं त्रैककुदं जात९ हिमवतस्परि । तेनामृतस्य मूलेनारातीं जम्भयामसीति । तत्फलं च प्रथमपञ्चकतृतीयखण्डे आञ्जन्त्येनं तेजो वा एत यदाञ्जनं स तेजसमेवैनं कृत्वा दीक्षयन्त्येकविंशत्या दर्भपिञ्जूलैः पावयन्तीत्यादिनोक्तं ज्ञेयम् । पिञ्जूलशब्दः सङ्घवाची । तत्रापि दक्षिणस्याक्ष्णः प्रागञ्जनमनन्तरं वामस्य । दक्षिणं पूर्वमङ्क्त्वेत्यादेः । ककुच्छब्दः शृङ्गवाची । हिमवत्सम्बन्धिशिखरत्रये जातस्त्रैककुदोऽञ्जनविशेष इत्यर्थः । अभ्यक्तं नवनीतेन । तथा ह्यध्वरप्रस्तावे । हविष्यमुभौ भुक्त्वा लेपनपर्याप्तं नवनीतं त्रेधा विभज्यैकं भागं महीनां पयोऽसिदर्भपिञ्जूलाभ्यां

नवनीतमुद्यौतीत्याद्युक्तं नवनीतेन वाऽऽज्येन वा घृतेन वाऽऽयुतेन वेति विशेषो ब्राह्मणे-नावसेयः । अत्राज्यघृतशब्दयोरर्थभेद आयुतपदार्थश्च

य आज्यघृतयोर्भेदः पूर्वाचार्यैरुदाहृतः ।
सर्पिर्विलीनमाज्यं स्याद्घनीभूतं घृतं विदुः

इति वचनादवसेयः । विलीनं द्रवदायुतं चेषद्द्रवदाज्यमित्यर्थः । अधिकारिविशेषपरा चोक्तिः । दीक्षयन्ति नवनीतेनाभ्यञ्जन्तीत्युक्त्वाऽऽज्यं देवानां सुरभि घृतं मनुष्याणा-मित्यादेः। विस्तरस्तु ब्राह्मणव्याख्यातोऽवसेयः । अभ्यषिञ्चदष्टादशभिस्तत्सङ्ख्याभिः । उडूनि नक्षत्राणि तैरश्विन्यादिभिः सोमराजं चन्द्रं बहुत्वेन कान्तिमत्त्वेन च तन्निदर्शनं न तु तत्सङ्ख्यात्वेन सप्तविंशतिसङ्ख्यात्वात्तेषाम् । जनसंवृत इति पाठो नासंवृतः । अजिनसंवृत इति निरञ्जनः पाठः । सोमाध्वरपञ्चके । अत्र कृष्णाजिनेन यजमानं दीक्षयन्तीत्यारभ्य वृत्रघ्नस्य विष्टपमगममिति चेत्यन्तेन तदावश्यकतोक्तेः ॥ ६,७ ॥

तस्यर्त्विजो महाराज नूत्नकौशेयवाससः ।
सप्तादश विरेजुस्ते यथा वृत्रहणोऽध्वरे ॥ ८ ॥

सत्यधर्मीया — अपि मषं माषं नीत्या सप्तादशेति पाठ्यम् । ऋत्विजः । अध्वर्युः १ प्रतिप्रस्थाता २ नेष्टा ३ उन्नेष्टा ४ एवमध्वर्य्वादिचतुष्कम् । ब्रह्मा १ ब्राह्मणाच्छंसि २ आग्नीध्र ३ पोता ४ ब्रह्मचतुष्कम् । होता १ मैत्रावरुणा २ अच्छावाक ३ ग्रामस्तोता । ४ उद्गाता १ प्रस्तोता २ प्रतिहर्ता ३ सुब्रह्मण्य ४ ॥ ४-१६ ॥ सदस्य एक इति सप्तदशर्त्विजः । सोमप्रवाकस्तु नैतन्मध्ये निविष्ट इति सप्तदशेत्युक्तिः । वृत्रहण इन्द्रस्यऽध्वरे यज्ञे । अत्राल्लोपाभावस्तु यज्ञस्याङ्गवैकल्याभावसूचकः ॥ ८ ॥

तदा रामश्च कृष्णश्च स्वैःस्वैर्बन्धुभिरन्वितौ ।
रेजतुः स्वसुतैर्दारैर्जीवेशौ स्वविभूतिभिः ॥ ९ ॥

सत्यधर्मीया — जीवेशौ जीवयति सर्वानिति जीवः शेषः सर्वाधारकत्वात् । तदात्मकत्वाद्बलश्चेशश्च जीवेशौ । रामश्च कृष्णश्चेति प्रागुक्तश्चानुकूलितः । स्वविभूतिभिः स्वसन्निधानपात्रैः स्वसुतैर्दारैश्चान्वितौ स्वरूपभूताणिमादिभिर्वा ॥ ९ ॥

ईजेऽनुयज्ञविधिना अग्निहोत्रादिलक्षणैः ।
प्राकृतैर्वैकृतैर्यज्ञैर्द्रव्यज्ञानक्रियेश्वरम् ॥ १० ॥

सत्यधर्मीया — अनुयज्ञं प्रति प्रतिक्रतुं यो विधिः कल्पोक्तः प्रकारस्तेन । यथाऽग्निहोत्रादिचिह्नोपेतैरित्यग्निहोत्रादिलक्षणैः प्राकृतैः समाम्नातसर्वाङ्गा ज्योतिष्टोमादयः सप्त तैः । द्रव्यं पुरोडाशो ज्ञानमेतस्यात्र विनियोग इत्यादिज्ञानं क्रिया तदनुसारिकर्मेत्येतत् स्वामिनम् । द्रव्यज्ञानक्रियापदोत्तरं यज्ञपदमनुसन्धेयम् । ततश्च द्रव्ययज्ञो ज्ञानयज्ञः क्रियायज्ञस्तपोयज्ञस्तेषामीश्वरम् । द्रव्ययज्ञास्तपोयज्ञा ज्ञानयज्ञास्तथा पर इत्यादेः । ईजे ॥ १० ॥

अथर्त्विग्भ्योऽददात् काले यथाम्नातं सुदक्षिणाः ।
स्वलङ्कृतेभ्योऽलङ्कृत्य गोभूकन्या महाधनाः ॥ ११ ॥

सत्यधर्मीया — यथोत्तमकल्पत्वेनागमावगमिनं काले विहिते स्वलङ्कृतेभ्यः प्राग्दत्तालङ्कारेभ्यः पुनस्तानलङ्कृत्य गोभूकन्या महान्ति धनानि यासां ता अददात् ॥ ११ ॥

पत्नीसंयाजावभृथ्यैश्चरित्वाऽथ महर्षयः ।
सस्नू रामह्रदे विप्रा यजमानपुरस्सराः ॥ १२ ॥

सत्यधर्मीया — प्रति प्रतिभावं गतया जाघन्या पत्नी संयाजं करोति इत्यादेः । जाघन्या क्रियमाणपत्नीकर्तृकक्रतुविशेषः । तथाऽवभृथः समाप्तिस्तदाद्या वारुणेष्ट्यादीँश्चरित्वा कृत्वा तृतीया द्वितीयार्थे । तैः सहितमभिहितं कर्मेति वा । अथ तदनन्तरम् । न च नाथेति वक्तव्यम् । क्त्वाप्रत्ययेन तदानन्तर्यबोधनादिति वाच्यम् । तस्य नियमेन पूर्वकालानवगमकत्वात् । तथा ह्युदाहृतं मुखं व्यादाय स्वपितीत्यादि । अतोऽथेति सार्थकम् । रामह्रदे परशुरामनिर्मिते यजमानपुरःसरा विप्रा मेधाविनः सस्नुः ॥ १२ ॥

स्नातोऽलङ्कारवासांसि बन्दिभ्योऽदात् तथा स्त्रियः ।
ततः स्वलङ्कृतान् वर्णानाश्वभ्योऽन्नेन पूजयत् ॥ १३ ॥

सत्यधर्मीया — स्नातस्तातः कृष्णस्य बन्दिभ्यः स्तुतिपाठकेभ्योऽलङ्कारवासांसि अदात् तथा स्त्रियो वसुदेवभार्या अपि ददुः । ततः स्वलङ्कृतान्वर्णान् आश्वभ्योऽन्नेन पूजयदपूजयत् ॥

बन्धून् सदारान् ससुतान् पारिबर्हेण भूयसा ।
विदर्भकोसलकुरून् काशिकैकेयसृञ्जयान् ॥ १४ ॥

सत्यधर्मीया — पारिबर्हेण योग्यद्रव्येण । तानाह ॥ **विदर्भकोसलेत्यादिना** ॥१४॥

सदस्यर्त्विक्सुरगणा नृभूतपितृचारणाः ।
श्रीनिकेतमनुप्राप्य शंसन्तः प्रययुः क्रतुम् ॥ १५ ॥

सत्यधर्मीया — सदस्या ऋत्विजश्च सुरगणा आगताः । नरो भूता देवयोनयः पितरश्चारणाश्च श्रीनिकेतं श्रीनिवासं कृष्णमनुप्राप्य क्रतुं शंसन्तः प्रययुः ॥ १५ ॥

धृतराष्ट्रोऽनुजो द्रोणो भीष्मो द्रौणिः कृपस्तथा ।
नारदो भगवान् व्यासः सुहृत्सम्बन्धिबान्धवाः ॥ १६ ॥

सत्यधर्मीया — धृतराष्ट्रोऽनुजस्ततो जात्या हीनः सन् जात इति विदुरः । अनु हीने चेति विश्वः । व्यास इत्येते सुहृत्सम्बन्धिबान्धवान् ॥ १६ ॥

बन्धून् परिष्वज्य यदून् सौहृदक्लिन्नचेतसः ।
ययुर्विरहकृच्छ्रेण स्वदेशांश्चापरे जनाः ॥ १७ ॥

सत्यधर्मीया — बन्धून्यदून् सौहृदेन क्लिन्नं द्रवच्चेतो येषां ते ॥ १७ ॥

नन्दस्तु सह गोपालैर्महत्या पूजयाऽर्चितः ।
कृष्णरामोग्रसेनाद्यैर्न्यवसद् बन्धुवत्सलः ॥ १८ ॥

सत्यधर्मीया — पूजया तत्साधनेन ॥ १८ ॥

वसुदेवोऽञ्जसोत्तीर्य मनोरथमहार्णवम् ।
सुहृद्वृतः प्रीतमना नन्दमाह करे स्पृशन् ॥ १९ ॥

सत्यधर्मीया — वसुदेवो मनोरथमहार्णवमञ्जसोत्तीर्य करे नन्दं स्पर्शयन् ॥ १९ ॥

वसुदेव उवाच —

भ्रातरीशकृतः पाशो नृणां यः स्नेहसञ्ज्ञितः ।
तं दुस्त्यजमहं मन्ये सुराणामपि योगिनाम् ॥ २० ॥

सत्यधर्मीया — हे भ्रातः नृणां यः स्नेहसञ्ज्ञित ईशकृतः पाशस्तत्तुलः । ईशकृतत्वं तद्दुस्त्यजत्वे हेतुः । सुराणां च योगिनामपि दुस्त्यजं मन्ये का कथाऽस्माकमिति भावः ॥

अस्मास्वप्रतिकल्पोऽयं यत् कृतं ज्ञानसत्तमैः ।
मैत्र्यर्पिताऽफला वापि न निवर्तेत कर्हिचित् ॥ २१ ॥

सत्यधर्मीया — ज्ञानसत्तमैर्ज्ञानेन श्रेष्ठैर्युष्माभिरस्मासु यत्कृतं व्यापारोऽजानता महिमानं तवेदमित्युदाहृत्य बृहद्भाष्ये सलीलमुक्तं तच्चास्माभिः प्राग्लिखितमत्रानुसन्धेयम् । अप्रतिकल्प उपकरणीयप्रतिनिध्यन्तररहितः । किन्तु यत्क्षमं कर्तुं तन्मात्रं कथितं कृषेरिव पलालकुलमितिवत्कृतमित्याह । अफलाऽपि मैत्री अर्पिता साऽपि निवर्तेत कलिरिति नेत्यालपति ॥ **न निवर्तेत कर्हिचिदिति** ॥ २१ ॥

प्रागकल्पास्तु कुशलं भ्रातर्वो नाचरेमहि ।
अधुना श्रीमदान्धाक्षा न पश्यामः पुरः सतः ॥ २२ ॥

सत्यधर्मीया — यथा छन्नेऽच्छन्नेऽनवगमपटिम्न्यक्षिणि किम्वितिवदसौभाग्यसौभाग्य-दशयोर्न वैषम्यं फलं ते इति (आह) ॥ **प्रागिति** । हे भ्रातर्वो युष्मदादीनां कुशलं नाचरेम हि प्रसिद्धम् । कुत इत्यत आह । अकल्पाः कंससङ्कीलनचरणा इत्यसमर्था इति । अधुना तु पुरः सतो युष्मान् श्रीमदेनान्धान्यक्षीणि येषां ते तथा सन्तः पश्यामः । असद्विषये मीलितलोचनता युक्तेत्यतो न नन्दस्तादृश इत्याह ॥ **सतः सज्जनानपीति** ॥ २२ ॥

मा राज्यश्रीरभूत् पुंसः श्रेयस्कामस्य मानद ।
स्वजनान् भृत्यबन्धून् वा न पश्यति ययाऽन्धदृक् ॥ २३ ॥

सत्यधर्मीया — श्रीर्यासां मम तु भवतु किलान्येषामपीति तन्माहात्म्यवचनपूर्वक-मर्थयते । यया श्रियाऽन्धदृक्सन् स्वजनान् स्वो हरिस्तस्य जना दासास्तान् । भृत्या बन्धवो

जामात्रादयो भ्रात्रादयश्च तान्न पश्यति । भृतितो ये बन्धवोऽन्योन्यं स्नेहपात्राणि तानपीत्यप्यर्थः । सा राज्यश्रीः । हे मानद नन्द श्रेयस्कामस्य पुंसो माऽभूत् । अडागम आर्षः ॥ २३ ॥

एवं सौहृदशैथिल्यचित्त आनकदुन्दुभिः ।
रुरोद तत्कृतां मैत्रीं स्मरन्नश्रुविलोचनः ॥ २४ ॥

सत्यधर्मीया — सौहृदेन शैथिल्यं द्रवतेति यावत् । यस्य चित्तं यस्य स एव । आनकदुन्दुभिरश्रुविलोचनस्तत्कृतां मैत्रीमेव स्मरन् रुरोद ॥ २४ ॥

नन्दस्तु सख्युः प्रियकृत् प्रेम्णा गोविन्दरामयोः ।
अद्य श्व इति मासांस्त्रीन् यदुभिर्मानितोऽवसत् ॥ २५ ॥

सत्यधर्मीया — सख्युर्वसुदेवस्य प्रियकृत् । गोविन्दरामयोः प्रेम्णाऽद्य श्वःप्रातः प्रयाणोद्योग इति तस्मिंश्च निर्गमोद्योगेश्वर इति यदुभिर्मानितस्त्रीन्मासानवसत् ॥२५॥

ततः कामैः पूर्यमाणः सव्रजः सहबान्धवः ।
परार्ध्याभरणक्षौमनानानर्घ्यपरिच्छदैः ॥ २६ ॥

वसुदेवोग्रसेनाभ्यां कृष्णार्जुनबलादिभिः ।
आदाय पारिबर्हं तं यापितो यदुभिर्ययौ ॥ २७ ॥

सत्यधर्मीया — सव्रजो व्रजस्य स्वकीयलोकसहितः परार्ध्येति आभरणक्षौमाणां विशेषणम् । नानाविधानर्घ्यपरिच्छदैः पूर्यमाणः कृष्णार्जुनबलादिभिः कृष्णपरमप्रियत्वाद्बलस्य कदाऽपि वा विमनस्कत्वात् ततः प्रागुक्तः पार्थ इति ज्ञेयम् । कृष्णरामोद्धवादिभिरित्यपि पठन्ति । तं तद्दत्तं यदुभिर्यापितो ययौ ॥ २६,२७ ॥

तदा गोप्यश्च गोपाश्च गोविन्दचरणाम्बुजे ।
मनः क्षिप्तं पुनर्हर्तुमनीशा मधुरां ययुः ॥ २८ ॥

सत्यधर्मीया — गोप्यश्च काश्चन गोपाश्च केचन गोविन्दचरणाम्बुजे क्षिप्तं मनोऽपहर्तुं कार्यान्तरव्यापृतं कर्तुमिति यावत् । अनीशा असमर्था मधुरां ययुः ॥ २८ ॥

द्रोणौ भीष्मोऽङ्गराजश्च बाह्लीकविदुरादयः ।
सपुत्रो धृतराष्ट्रश्च जग्मुः स्वं स्वं निकेतनम् ॥ २९ ॥

अन्ये च सर्वराजानो देवयात्रार्थमागताः ।
गते मासत्रये भूयः स्वानेव विषयान् ययुः ॥ ३० ॥

सत्यधर्मीया — अङ्गराजः कर्ण इति च जानन्ति । पूर्वराजानः, सर्वराजान इति पठन्ति ॥ २९,३० ॥

पाण्डवाश्च महात्मानः पृथा च नृपसत्तम ।
अनुज्ञाताः केशवेन बाष्पगद्गदभाषिणः ॥ ३१ ॥

सत्यधर्मीया — बाष्पगद्गदभाषिणी च भाषिणश्च ते ॥ ३१ ॥

शक्रप्रस्थं ययुः सर्वे स्वजनैः परिवारिताः ।
बन्धुषु प्रतियातेषु वृष्णयः कृष्णदेवताः ।
परिवार्य हृषीकेशं ययुर्द्वारावतीं पुरीम् ॥ ३२ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे त्रिसप्ततितमोऽध्यायः ॥

सत्यधर्मीया — कृष्णो देवता येषां ते तथा ॥ ३२ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे त्रिसप्ततितमोऽध्यायः ॥ १०-७३ ॥

॥ अथ चतुःसप्ततितमोऽध्यायः ॥

श्रीशुक उवाच —

अथैकदात्मजौ प्राप्तौ कृतपादाभिवन्दनौ ।
वसुदेवोऽभिनन्द्याह प्रीत्या सङ्कर्षणाच्युतौ ॥ १ ॥

सत्यधर्मीया — विशारदैर्नारदादिभिरुद्बोधितबोधस्य वसुदेवस्य वासुदेवरामौ प्रति तत्त्ववचनं वचनं च तं प्रति भगवतस्तथा देवक्या मृतापत्यप्रदर्शनमित्यादिमाहात्म्यमितरश्रुतवद्भक्तिव्यक्तिकृदिति निरूप्यतेऽत्राध्याये । तत्रादौ पादाभिवन्दनं नन्दनयोर्वसुदेवस्याह ॥ **अथेति** । द्वारकागमनानन्तरं कदाचित्कृतं पादाभिवन्दनं याभ्यां तौ सङ्कर्षणाच्युतौ प्रीत्या भक्तिविशेषरूपिण्याऽभिनन्द्याहो नटनमिति । अभिनन्दनं कृत्वाऽऽह ॥ १ ॥

मुनीनां वदतां श्रुत्वा पुत्रयोर्धामसूचकम् ।
तद्वीर्यजातविस्रम्भः परिष्वज्याभ्यभाषत ॥ २ ॥

सत्यधर्मीया — आहेत्युत्साहेन प्रथमं प्रतिज्ञाय तदुपयुक्तमुक्त्वा तदुक्तिप्रकारमीरयति ॥ **मुनीनामिति** । वदतां मुनीनां सकाशात्पुत्रयोर्धाम तेजः पराक्रममिति यावत् । श्रुत्वा स्वयं च तयोर्वीर्याज्जातो विश्रम्भो विश्वासो यस्य सः । अनेनान्यथैवं सामर्थ्यं न स्यादिति स्वतर्केणेन च तत्सत्यतां निश्चितवानिति ध्वन्यते । स्वसाक्षिसिद्धवीर्यादिजनितविश्वासो वा । तौ परिष्वज्यालिङ्ग्य सूचकं तदुपदिष्टं स्वसाक्षिसिद्धं च न विस्मृतमपि तु वर्तते हृदीति सूचकं वचोऽभ्यभाषत । धामसूचकं वदतामिति वाऽन्वयः । वाचालोऽयमिति यथा नोपेक्षा भवेत्तयोस्तथाऽवदद्वसुदेव इत्यप्याह । वदतां वाग्मिनाम् । वदो वदावदो वाग्मीत्यमरः । परिष्वज्यालिङ्ग्य तमाश्रित्येति यावत् । अभ्यभाषतेति ॥ २ ॥

कृष्णकृष्ण महायोगिन् सङ्कर्षण सनातन ।
जाने वामस्य यत्साक्षात् प्रधानपुरुषौ परौ ॥ ३ ॥

सत्यधर्मीया — परिष्वङ्गे साक्षादेतस्य नाधिकार इति ध्वनयितुमादौ सङ्कर्षणाच्युतावित्यादौ सङ्कर्षणग्रहः । अधुना तु मधुनाथ एव वक्ष्यमाणलक्षणलक्षितः साक्षादिति च

तत्पुरस्करणमिति मन्तव्यम् । कृष्ण कृष्ण सनातन वेदवेद्य पुराणपुरुष वा हे सङ्कर्षण । बलेत्यनुक्त्वा सङ्कर्षणेति वदन् एतदसम्भावितगुणपात्रं तदन्तर्गतः सङ्कर्षण इति ध्वनयामासेत्यवसेयम् । अस्य जगतः प्रधानपुरुषौ । प्रधानपुरुषो मुख्यपुरुषः पुरुषोत्तम एक एकश्च प्रकर्षेणाधानं निधानं मूर्ध्नि यस्य स चासौ पुरुषश्चेति । परौ वा जाने । साक्षादिति ज्ञानस्य यथार्थतां ध्वनयति । यद्वा साक्षान्मुख्यतः परावित्यर्थः । अस्य जगतः सकाशात्परौ विलक्षणाविति साक्षात्प्रधानपुरुषौ जान इति वा ॥ ३ ॥

यत्र येन यतो यस्य यस्मै यद्यद्यथा यदा ।
स्यादिदं भगवान् साक्षात् प्रधानपुरुषेश्वरः ॥ ४ ॥

सत्यधर्मीया — तदेव प्रधानपुरुषेश्वरत्वादिकं घटयन्नाह ॥ **यत्रेति** । यत्रेदं तिष्ठति । यस्मिन्निदं सञ्च विचैधि सर्वमित्यादेः । येन । येन जातानि जीवन्तीति । यतः । यतो वा इमानि भूतानीति । यस्य यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः । मृत्युर्यस्योपसेचनम् । यस्य प्रसादादित्यादेः । यस्मा इदं क्रियत इति यस्मै । यत् । सच्च त्यच्चेति । यथा । धाता यथा पूर्वमकल्पयदिति । येन प्रकारेण स्थितं यदा काले । इदं विश्वं स्यात्तथा साक्षात्तत्कुर्वन् भगवानेव त्वमिति प्रधानपुरुषेश्वरः । यदधीना यस्य सत्तेत्यादेः । ब्रह्मैवेदं सर्वमिति श्रुतेः । साक्षात्प्रधानपुरुषेश्वरो भगवानेव स्यादित्यपि योजयन्ति । यत्र गोत्रादौ येन यतो मृदो यस्य कुलालादेः सम्बन्धेन । अकारकत्वात् षष्ट्याः । यस्मै जलाद्याहरणार्थं वा यद्धटादिकं यथा कम्बुग्रीवादिमत्त्वेन प्रकारेण यदा काले स्यात् तत्सर्वमित्यपि योजयन्ति ॥ ४ ॥

एतन्नानाविधं विश्वमात्मसृष्टमधोक्षज ।
आत्मनाऽनुप्रविश्यात्मन् प्राणान् जीवो बिभर्ष्यजः ॥ ५ ॥

सत्यधर्मीया — तदेव विवृणोति ॥ **एतदिति** । आत्मसृष्टं स्वोत्पादितमात्मना ततत्स्वभावेनात्मनाऽणुरूपेण वा तद्विश्वमनुप्रविश्यात्मन् आदानादिकर्तः हे अधोक्षज । प्राणानीन्द्रियाणि जीवो जीवयतीति जीवः । जीवो विनयिता साक्षी जीव इति भगवतोऽनिरुद्धस्याख्येति श्रुतेः । बिभर्षि पोषयसि । आत्मन्परमे व्योमन्निितिवदात्मनि वा बिभर्षि धत्से वा । एतत्सम्भावकमाह ॥ **अज इति** ॥ ५ ॥

प्राणादीनां विश्वसृजां शक्तयो याः परस्य ताः ।
पारतन्त्र्याद्वैसादृश्याद् द्वयोः श्रेष्ठे च चेष्टितम् ॥ ६ ॥

सत्यधर्मीया — तर्हीतरत्र दृश्यते कर्तृत्वादिकं कथमिति चेत्तत्राह । प्राणादीनां तथा विश्वसृजां प्रजाप्रत्यादीनां विश्वसृजां तत्त्वेन प्रवर्तमानानां ब्रह्मादीनां प्राणादीनां तदिन्द्रियाणां याः शक्तयो विषयग्रहणसामर्थ्यानि ताः । तथा चेष्टितं कर्मापि परस्य तदितरस्य तन्नियम्यत्वेन स्थितस्य । द्वयोर्मध्ये श्रेष्ठे सर्वं प्राणादिकं जीव इति हरिश्चेति द्वयोर्जीवेशयोः श्रेष्ठे कृष्ण एव वर्तते । तत्र हेतुः पारतन्त्र्यादिति । जीवजातस्य वैसादृश्यं विसदृशत्वं तस्माद्वैलक्षण्यादिति वा । द्वयोर्मध्ये श्रेष्ठे त्वयि चेष्टितं तदनुरूपं चेत्प्राणादीनां विश्वसृजां परस्य धातुरपि या रमाया अपि तास्तच्चेष्टितानुकूलाः शक्तयो भवन्ति । तत्र तन्त्रं पारतन्त्र्यादिति । तत्राप्यस्वतन्त्रवर्गे न साम्येनेत्याह । वैसादृश्याद्वैलक्षण्यादेव भवन्ति तरतमभावेनेति यावत् । पारतन्त्र्याद्वैसादृश्यादित्यस्याक्षरपरे लघु भवितव्यं तदर्थं चैवं वैसादृश्यात्पारतन्त्र्यादिति पाठे न किञ्चिद्वृत्तविच्छित्तिरथाऽप्येवं पठन् जीवत्वेनैकीकृत्योक्त-जीवानां परतन्त्राणां मध्ये द्वौ च तौ सदृशौ च । द्वीत्युपलक्षणे । ये ये द्वौ त्रयो वा ब्रह्मवायू इन्द्रकामौ शेषरुद्रगरुडाश्चैवमादयः । द्विसदृशयोर्भावो द्वैसादृश्यं तस्मात् । परस्य ब्रह्मणो यास्ताः शक्तयस्तच्चेष्टितं च वायोरित्यादिविशेषसूचनं ततानेति ज्ञेयम् । द्वैसादृश्या-त्पारतन्त्र्यादिति पाठे यद्यपि वृत्तसम्पत्तिश्चेदपि न वैसादृश्यप्रतीतिर्भवति । प्राक् प्रधान-पुरुषेश्वराविति द्वयोः साम्यं न किन्तु छत्रिन्यायेन मयोक्तमिति । यत्र येनेत्यादिनैकमेव गृह्णन् द्वयोः प्रधानपुरुषत्वेनोक्तयोर्मध्ये श्रेष्ठे ताः शक्तयश्चेष्टितं चेत्यन्तरङ्गं स्वस्य ध्वनयामासेति मन्तव्यम् ॥ ६ ॥

कान्तिस्तेजः प्रभा सत्ता चन्द्राग्न्यर्कसविद्युताम् ।
यत् स्थैर्यं भूभृतां भूमेर्वृत्तिर्गन्धोऽर्थतो भवान् ॥ ७ ॥

सत्यधर्मीया — विद्युद्भिः सहिताः सविद्युतश्चन्द्रश्चाग्निश्च ते च ते सविद्युतश्च तेषाम् । चन्द्राग्न्यर्कर्क्षविद्युतामिति सरलः पाठः । न च ऋक्षाणां पृथग्ग्रहणं न युक्तम् । पृथक् तद्गुणानीरणादिति वाच्यम् । ऋक्षविद्युतां सत्तैको गुण इति नानुपपत्तिः । चन्द्रस्य कान्तिरग्नेस्तेजोऽर्कस्य प्रभा ऋक्षविद्युतां सत्ता । एतत्कान्त्यादिकं त्वं त्वयैतेषां न

तत्प्रकाश्यस्त्वमिति तत्त्वम् । तथा च श्रुतिः । न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वम् । तस्य भासा सर्वमिदं विभातीति । स्मृतिश्च । यदादित्यगतं तेज इत्यादिका । भूभृतां पर्वतानां यत्स्थैर्यं भूमेर्वृत्तिराधारतयाऽवस्थानं सस्याद्यधिरोहकत्वेन जीवनदत्वं च यो गन्धस्तद्गुण इत्यादिसर्वमर्थतो मुख्यतो भगवान्नान्यः । पारतन्त्र्यमेव विवृतम् ॥ ७ ॥

तर्पणं प्राणनं चापां द्रवत्वं ताश्च तद्रसः ।
ओजः सहो बलं चेष्टा गतिर्वायोरियत्तव ॥ ८ ॥

सत्यधर्मीया — तर्पणं तृप्तिः प्राणनं चेष्टा द्रवत्वं स्पन्दनं ता आपस्तद्रसश्च मधुरस्त्वदधीनमदः सर्वम् । ओजोऽवष्टम्भः सहः सहनं बलं शक्तिः स्पन्दनं किञ्चिच्चलनं तर्वादिचालनं वा गतिः क्वचिन्मण्डलाकारगमनं सदेति वा गतिः स्पर्श इति वा वायोरियत्तव त्वदधीनम् ॥ ८ ॥

दिशां त्वमवकाशोऽसि शब्दस्त्वं स्फोट आश्रयः ।
नादो वर्णस्त्वमोङ्कार आकृतीनां पृथक्कृतीः ॥ ९ ॥

सत्यधर्मीया — दिशां त्वमवकाशस्तदवकाशत्वदो दिशस्त्वं भूताकाशश्च त्वं तद्गुणः शब्दश्च शब्दो वेदादिः स्फोटो वेणुदारणादिज आश्रयः पक्ष्याद्याधारतारूपो नादः नादो नाम वर्णविशेषोऽकाराद्यतिशान्तान्तः सोऽयमष्टाक्षरो मत इति तन्त्रसारे कर्मनिर्णयटीकायां च । नादो नामवर्णविशेषो मन्त्रशास्त्रे प्रसिद्ध इत्युक्तेः । वर्णोऽकारादिः । ॐकारस्त्रिमात्रोऽनन्तमात्रश्च । आकृतीनां पृथक्कृतीः । अकारोकाराद्यात्मना पृथक्करणानि । आकृतीनां संस्थानविशेषाणां त्वं ते त्वदधीना मन्ये । आकृतीनां ब्राह्मादीनां पृथक्कृतीः पृथक्क्रियाश्च त्वदधीना इति वा । वैयाकरणाश्च स्फोटो वाक्यपदयोरिति वर्णयन्ति । आश्रयः शङ्खादिकमाश्रित्य विद्यमानः शब्द इति वर्णयन्ति ॥ ९ ॥

इन्द्रियं त्विन्द्रियाणां त्वं देवाश्च तदनुग्रहाः ।
अवबोधो भवान् बुद्धेर्जीवस्यानुस्मृतिः सती ॥ १० ॥

सत्यधर्मीया — इन्द्रियाणां चक्षुरादीनां विषयमुद्दिश्य द्रवताम् । द्रवतां हीन्द्रियाणां तु नियन्ता प्राण एकराडिति पौत्रायणश्रुतिः । विषयद्रवणात्तेषामिन्द्रियत्वमुदाहृतमिति बृहत्संहितायामिति भाष्योक्तेः । त्वमेवेन्द्रियं तच्छक्तिप्रद इत्यर्थः । तदनुग्रहास्तेष्वनुग्रहो येषां ते तदनुग्रहा देवाः सूर्यादयो बुद्धेरवबोधो ज्ञानशक्तिरूपो जीवस्य सती यथावस्थितार्थविषयिणी स्मृतिः स्मरणशक्तिश्च ॥ १० ॥

भूतानामसि भूतादिरिन्द्रियाणां च तैजसम् ।
वैकारिकं विकल्पानां प्रधानमनुशायिनाम् ॥ ११ ॥

सत्यधर्मीया — भूतानां पञ्चानां भूतादिस्तामसाहङ्कार इन्द्रियाणां कारणं तैजसाहङ्कारो विकल्पानां विविधत्वेनाध्यात्मिकादिभेदेन कल्प्यन्त इति विकल्पा देवास्तेषां वैकारिकाहङ्कारः । देवा वैकारिकाः स्मृता इत्यादेः । वैकारिकान्मनो जज्ञ इत्यादेः । विकल्पानाम् । बहुवचनमाद्यर्थे । सङ्कल्पविकल्पाद्यात्मवृत्तिसहितमनश्चेति वा । अनुशायिनां संसारिणां जीवानाम् । कर्मानुशयनाच्चैव संसार्यनुशयी स्मृत इति तत्त्वनिर्णयोक्तेः । प्रधानं प्रकृतिः संसारकारणम् ॥ ११ ॥

नश्वरेष्विह भावेषु तदसि त्वमनश्वरः ।
यथा द्रव्यविकारेषु द्रव्यमात्रं निरूपितम् ॥ १२ ॥

सत्यधर्मीया — ईश्वरत्वमादिरित्युदीर्यान्ते नश्वरेषु त्वमनश्वरः स्थातेति स्थापयन्नाह ॥ **नश्वरेष्विति** । इह भावेषु पदार्थेषु नश्वरेषु नाशवत्सु त्वमनश्वरो नाशशून्यः । तद्द्रव्यं तादृग्वस्त्वसि । तत्र निदर्शनमाह ॥ **यथेति** । द्रव्यविकारेषु मृदादिविकारेषु घटादिषु नश्वरेषु मृन्मात्रं यथा निरूपितमस्तीति तज्ज्ञैस्तथेति योजयन्ति । अनवस्थानमा(?) निदर्शनं पादानतायां नेत्यनुसन्धेयम् । द्रव्यस्य घटादेर्विकारेषु महारजनाञ्जनादिजेषु कालतो नष्टेषु द्रव्यमात्रं पटमात्रं निरूपितं तथेति वा द्रव्यस्य परमाणे विकारेषु तत्संयुक्तघटादिनश्वरेषु द्रव्यमात्रं परमाणुमात्रं नित्यमिति निरूपितं तद्वेदिभिरिति योजयन्ति ॥ १२ ॥

सत्वं रजस्तम इति गुणास्तद्वृत्तयश्च याः ।
त्वय्यद्धा ब्रह्मणि परे कल्पिता योगमायया ॥ १३ ॥

सत्यधर्मीया — तर्हि यन्मूलद्रव्यत्वेनावशिष्टं तन्नित्यमिति न भगवदधीनमित्यायातमिति तत्राह ॥ **तदिति** । तद्यन्मूलद्रव्यं प्रधानादिकं सत्त्वं रजस्तम इति गुणास्तद्गुणा वृत्तयस्तव्द्यापाराश्च याः कियत्यस्ताः परे ब्रह्मणि योगमायया सर्वोपायस्वरूपेच्छया कल्पिताः समर्थिताः सत्या एवाद्धा निस्सन्देहेन वर्तन्ते । परमाणुपक्षे सत्त्वं शुक्लवर्णस्तेनाप्या रजसा पार्थिवास्तमसा वायवीया इति शब्देनादित्ववाचिना तैजसा लक्षिता इति चतुर्विधा गुणास्तन्तुस्थानीया इति ते तद्वृत्तयोऽपि संयोगादिलक्षणास्त्वयि समर्थिताः कार्यकारणक्षमत्वेनेत्यर्थ इत्युपपादयन्ति । अनित्यं पटादिद्रव्यं भवतु भगवन्नियतं प्रधानं नित्यं तत्कथमन्यनियतमित्यत आह । सत्त्वमित्यवतार्य नित्यं नित्यात्मना यत इत्यादेः प्रधानस्य सपरिकरस्य भगवन्नियतत्वे तत्पटादिकं किं वक्तव्यं तदायत्तमितीत्यर्थपरोऽयं श्लोक इति व्याकुर्वन्ति ॥ १३ ॥

तस्मान्न सन्त्यमी भावा यर्हि त्वय्यविकल्पिताः ।
त्वं चामीषु विकारेषु सन् सदा व्यावहारिकः ॥ १४ ॥

सत्यधर्मीया — अन्यथैतदेव स्थितिर्दुलभेति भाषते ॥ **यर्हीति** । यर्हि त्वय्यविकल्पिताः पारमार्थिका अमी भावा न सन्ति तस्मात्ते न सन्ति न स्थास्यन्ति नश्यन्ति । अनाधारत्वात् । तस्मादेतत्स्थितिहेतोस्त्वं चामीषु विकारेषु नानापदार्थेष्वमीषु मूलप्रधानादिद्रव्येषु तथा विकारेष्विति वा सदा सन्नवस्थितो व्यावहारिको हानोपादनादिव्यवहारनिर्वाहको वर्तसे नान्य इत्यर्थः । अव्यावहारिकस्तस्मात्सदा सन्नयं प्रपञ्च इति शेष इत्यपि योजयन्ति ॥ १४ ॥

गुणप्रवाह एतस्मिन्नबुद्ध्वा त्वखिलात्मनः ।
गतिं सूक्ष्मामबोधेन संसरन्तीह कर्मभिः ॥ १५ ॥

सत्यधर्मीया — इयति सति कुतः संसार इत्यत आह ॥ **गुणेति** । एतस्मिन्गुणप्रवाहे प्रपञ्चे वर्तमाना अखिलात्मनः सर्वस्वामिनस्तव गतिं स्थितिमबोधेनाबहिः प्रकाशनेनेति सूक्ष्मां कर्मभिर्ज्ञानप्रतिबन्धकैरबुद्ध्वेह संसरन्ति संसारं प्राप्नुवंति । प्रसादं विना न व्यक्तो भवसि त्वमिति स्वकर्मप्रतिबद्धसंविदः संसरन्ति त इति भावः । तदव्यक्तमाह हि । अतोऽनन्तेन तथा हि लिङ्गमित्यादेः ॥ १५ ॥

यदृच्छया नृतां प्राप्य सुकल्पामिह दुर्लभम् ।
स्वार्थे प्रमत्तस्य वयो गतं त्वन्माययेश्वर ॥ १६ ॥

सत्यधर्मीया — ननु नानाविधहीनतरशरीरेषु सतो यदाकदाचिद्यथाकथञ्चिन्मानवतनुसम्पत्तौ संवित्साधनेन मोक्षोऽपि स्यादित्यतोऽपि न त्वत्प्रसादं विनैतत्साधनमित्याह ॥ **यदृच्छयेति** । यदृच्छा त्वेतत्प्रापणमात्रहेतुर्भगवदिच्छा तया नृतां मनुष्यतां पुण्यवशात्प्राप्य । सा कीदृशीत्यत आह । सुकुल्पां संवित्सम्पादनसमर्थां दुर्लभमितरजन्मनीति । इह स्वार्थे प्रमत्तस्य प्रमादयुक्तस्योन्मत्तस्य मम मज्जातीयस्य च । तत्र तन्त्रं त्वन्माययेति । सा च कुतोऽतार्येत्यत आह ॥ **ईश्वरेति** । वयं वृथा गतम् । सुकल्पमिह दुर्लभमिति पाठेऽपि नृतामित्येतदर्थस्य नृत्वमित्यस्य विशेषणे इति ज्ञेयम् । विवृतः प्रागयं प्रकारोऽनुसन्धेयः । नृतामिहेदानीं प्राप्य यदृच्छया स्वेच्छयैव स्थितं सुकल्पं मुक्तिदानसमर्थं वयोगतं गरुडवाहनं त्वन्माययैव स्वार्थे प्रमत्तस्य पुंसो दुर्लभं मन्य इति शेषः ॥ १६ ॥

असावहं ममैवैते देहे चास्यान्वयादिषु ।
स्नेहपाशैर्निबध्नाति भवान् सर्वमिदं जगत् ॥ १७ ॥

सत्यधर्मीया — स प्रमाद एतादृश इति शंसति ॥ **असाविति** । ममासौ देहोऽहमेते च ममास्य देहस्यान्ववायादिष्वनुबन्धेषु । इन्द्रियजयादिषु । इदं सर्वं मदादिजगत्स्नेहपाशैर्भवानेव बध्नाति । अयं प्रमादस्त्वत्कर्तृकस्तत्कर्मायत्त इति भावः ॥ १७ ॥

युवां न नः सुतौ साक्षात् प्रधानपुरुषेश्वरौ ।
भूभारदैत्यक्षपणे अवतीर्णौ तथान्विह ॥ १८ ॥

सत्यधर्मीया — प्रीत्या सङ्कर्षणाच्युतौ पुत्रयोर्धामसूचकमिति तथा प्रधानपुरुषौ पराविति । द्वावपि प्रस्तुत्य यत्र येनेत्यारभ्येदं जगदिति पर्यन्तं बलकबलनानर्हगुणैस्तदर्हमेकं भगवन्तं स्तुत्वा प्रस्तावानुकूल्येन पुनर्द्वयोः स्तवनेन विद्यमानस्थितिं विज्ञापयति ॥ **युवामिति** । युवां नः सुतौ न । तर्हि काविति तत्राह ॥ **साक्षात्प्रधानपुरुषेश्वराविति** । तादृशौ चेच्छौरेऽत्र कुत इत्यत आह ॥ **भूभारेति** । तथा नु तथाऽपि भूभारायितदैत्यानां क्षपणे भाविन्यवतीर्णावतोऽसुतौ ॥ १८ ॥

तत् ते गतोऽस्म्यरणमद्य पदारविन्दमापन्नसंसृतिभयापहमार्तबन्धो ।
एतावताऽलमलमिन्द्रियलालसेन मर्त्यात्मदृक् त्वयि परे यदपत्यबुद्धिः ॥ १९ ॥

सत्यधर्मीया – स्तुत्यन्ते मङ्गलमाचरन्निवैक एव तस्येष्ट इति पुनरावश्यकं तं प्रत्येव प्रार्थयते ॥ **तदिति ।** हे आर्तबन्धो आपन्नसंसृतिभयापह । आपन्नानां शरणागतानां या संसृतिस्तस्या यद्भयं तदपहन्तीति तत्तत् ते पदारविन्दं पादकमलमद्याहं शरणं गतोऽस्मि । अस्म्यहं शरणं गत इति वा । एतावतेन्द्रियलालसेन विषयत्वमुद्दिश्य करणानां द्रवणौत्सुक्येनालमलमतिपर्याप्तम् । कुतो वसुदेवैतज्जिहासा तवेति वासुदेव वदसि चेदित इत्याह ॥ **यदिति ।** यद्यतो लालसान्मर्त्ये देहे आत्मदृगहमिति मतिस्तत्त्वयि परे सर्वोत्तमेऽपत्यमिति बुद्धिश्चाभूतां तेनालमलम् । परापरविवेकनाशको विषयलालस इति भावः । लालसो लालसाऽपि स्याद्याञ्चातृष्णातिरेकयोः । औत्सुक्ये त्विति विश्वः । विषयतृष्णयेति वा । आर्तबन्धाविति धर्मिण अपान्नसंसृतिभयापहमिति पदारविन्दरूपावयवस्योक्त्या तयोरैक्यं सूचयति । यः शरणं गतस्तस्यापन्नेत्यहं शरणं गत इति वा । अत्रापन्नाः स्युरित्युत्तरत्र संसृतिभयं च द्वयं च द्वयं सार्थकम् ॥ १९ ॥

सूतीगृहे ननु जगाद भवानजो नौ यद् यज्ञ इत्यनुयुगं निजधर्मगुप्त्यै ।
नानातनूर्गगनवद् विदधज्जहासि को वेद भूम्न उरुगाय विभूतिमायाम् ॥ २० ॥

सत्यधर्मीया — पुत्रौ नेत्यत्र त्वदुक्तिरपि मानमिति विज्ञापयति ॥ **सूतीगृह इति ।** अरिष्टेऽजो यज्ञोऽहं तन्नामेति । नौ जायापती प्रति भवाञ्जगाद ननु निश्चितम् । निजेन क्लृप्तो यो धर्मस्तद्गुप्त्यै गोपनार्थमनुयुगं प्रतियुगं नानातनूः सुरनरतिर्यगादिशरीराणि विदधत्स्वीकुर्वंस्तत्कार्यपर्याप्त्यनन्तरं ता जहासि मूले गमयसि । पूर्णमदः । स्वाप्यया दित्यादेः । हे उरुगाय ब्रह्मादिस्तुत्य तव विभूतिमायामैश्वर्यसामर्थ्यं को वेद न कोऽपि । को ब्रह्मा चेदपि न साकल्येन वेद किञ्चिद्वेदेत्यप्यर्थः । गगनवदिति निदर्शनमसङ्गत्व इति मन्तव्यमिव घटादिनाशे तदवच्छिन्नस्य तस्य मूलाकाशनिवेशवन्मूलनिवेशनं च । यज्ञो विष्णुर्देवतेत्यादेर्यज्ञो विष्णुः ॥ २० ॥

श्रीशुक उवाच —

आकर्ण्येत्थं पितुर्वाक्यं भगवान् सात्वतर्षभः ।
प्रत्याह प्रश्रयानम्रः प्रहसन् श्लक्ष्णया गिरा ॥ २१ ॥

सत्यधर्मीया — इत्थं पितुः पूर्वोदीरितरीत्या तातस्य वाक्यमाकर्ण्य श्रुत्वा प्रहसन् । अयं हास एव किञ्चिदुदञ्चितज्ञानजवजवनिकारूप इति ज्ञेयम् । प्रश्रयाद्विश्वासान्नम्रं श्लक्ष्णया गिरा । प्रति तदुत्तरतयाऽऽह । प्रति श्लिष्टतयाऽऽहेत्युक्त्या तत्कालं तदुक्तनिराकरणं च ध्वनयति । यद्वक्ष्यति यन्नः पुत्रान्समुद्दिश्येति । सात्त्वतर्षभ इति गतम् ॥ २१ ॥

वचो वः समवेतार्थं तातैतदुपमन्महे ।
यन्नः पुत्रान् समुद्दिश्य तत्वग्राम उदाहृतः ॥ २२ ॥

सत्यधर्मीया — हे तात वो वच एतत्समवेतः श्लिष्टोऽर्थो यस्य तत् युक्तार्थमिति यावत् । वयमुपमन्महे । यतो नः पुत्रान्समुद्दिश्य लक्षीकृत्य तत्त्वग्रामो रहस्यसमूह उदाहृतोऽतः ॥ २२ ॥

अहं यूयमसावार्य इमे च द्वारकौकसः ।
सर्वेऽप्येव यदुश्रेष्ठ विश्वं च सचराचरम् ॥ २३ ॥

सत्यधर्मीया — यूयमसावार्यो बलराम इमे द्वारकौकसश्च सर्व इतरे सचराचरं विश्वमहं मदधीनम् । सर्वं खल्विदं ब्रह्म । यदधीना यस्य सत्ता तत्तदित्येव भण्यत इत्यादेः ॥ २३ ॥

आत्मा ह्येकः स्वयञ्ज्योतिर्नित्योऽन्यो निर्गुणो गुणैः ।
आत्मसृष्टैस्तत्कृतेषु भूतेषु बहुधेयते ॥ २४ ॥

सत्यधर्मीया — स्वस्वरूपं स्वयमेव निरूपयति ॥ **आत्मेति ।** एकः प्रधान एकत्वादे करोतीति क ए चासौ कश्चेत्येक एकः सकलकर्तेत्यर्थः । स्वयंज्योतिः स्वयंप्रकाशो नित्य आत्मा तच्छब्दवाच्यः । पूर्वत्र च सामानाधिकरण्येन प्राप्ताभेदप्रतीतिं वारयन्नाह ॥ **अन्योन्य इति ॥** विलक्षण इत्यर्थः । निर्गुणः सत्त्वादिशून्यः स्वभिन्नगुणरहितः । आत्मसृष्टैर्गुणै-स्तत्कृतेषु भूतेषु प्रविष्टो बहुधेयते लोकैः । भूतेषु पञ्चसु वा ॥ २४ ॥

खं वायुर्ज्योतिरापो भूस्तत्कृतेषु यथाशयम् ।
आविस्तारोऽल्पभूर्येकनानात्वं यात्यसावपि ॥ २५ ॥

सत्यधर्मीया — पञ्चभूतानि प्रपञ्चयति ॥ खमिति । तत्कृतेषु पदार्थेषु यथाशयं यथास्थानं स्थिता भवन्ति यथा तथाऽसौ हरिराविस्तार उपरि छन्नः सन्नपि । अल्पभूर्येक-नानात्वमल्पस्थानेऽल्पत्वं भूरिस्थाने महति महत्त्वम् । एकस्मिन्नेकत्वं नाना नानास्थानेषु नानाभावो नानात्वं याति ॥ २५ ॥

एवं भगवता राजन् वसुदेव उदाहृतम् ।
श्रुत्वा विनष्टनामाधिस्तूर्ष्णीं प्रीतमना अभूत् ॥ २६ ॥

सत्यधर्मीया — वसुदेव एवं भगवतोदाहृतं श्रुत्वा विनष्टो नाम कुत्सित आधिर्यस्य सः । नाम कुत्सनसम्भाव्यप्रकाशेषु निगद्यत इति । यद्वा विनष्टं नामापि यस्य स विनष्टनामा स आधिर्यस्य स तथा । तन्नामाऽपि नष्टमिति यावत् । विनष्टनानाधिरिति सरलः पाठः । प्रीतमनास्तूष्णीमभूत् ॥ २६ ॥

अथ तत्र कुरुश्रेष्ठ देवकी सर्वदेवता ।
श्रुत्वाऽऽनीतं गुरोः पुत्रमात्मजाभ्यां सुविस्मिता ॥ २७ ॥

कृष्णरामौ समाश्राव्य पुत्रान् कंसविहिंसितान् ।
स्मरन्ती कृपणा प्राह वैक्लव्यादश्रुलोचना ॥ २८ ॥

सत्यधर्मीया — अथेति कथान्तरारम्भे । सर्वा देवता यस्यां सा देवकी शुचिस्मिता । आत्मजाभ्यां रामकृष्णभ्याम् । गुरोः सान्दीपनेः पुत्रं मृतमानीतं श्रुत्वा कृष्णरामौ समाश्राव्य कंसविहिंसितान् पुत्रान् स्मरन्ती कृपणा दीना वैक्लव्याद्विव्हलतयाऽश्रुलोचना प्राह ॥२७,२८॥

देवक्युवाच —

राम रामाप्रमेयात्मन् कृष्ण योगेश्वरेश्वर ।
वेदाहं वां विश्वसृजामीश्वरावादिपूरुषौ ॥ २९ ॥

सत्यधर्मीया — अप्रमेयात्मन् योगेश्वरेश्वर कृष्ण राम राम । विश्वसृजामीश्वरौ आदि-पुरुषौ वामहं वेद ॥ २९ ॥

कालविध्वस्तसेतूनां राज्ञामुच्छास्त्रवर्तिनाम् ।
भूमेर्भारायमाणानामवतीर्णो क्षयाय मे ॥ ३० ॥

सत्यधर्मीया — कालेन विध्वस्तः सेतुमर्यादा येषां ते तथा तेषामुच्छास्त्रवर्तिना-मुच्छृङ्खलवृत्तीनामत एव भूमेर्भारायमाणानां राज्ञां क्षयाय मे मय्यवतीर्णे मासत्रयानन्तरं दुर्गापवाहित आहितश्च गर्भे रोहिण्यामिति म इत्युक्तिर्युक्ता । अवतीर्णोऽसि ॥ ३० ॥

यस्यांशांशभागेन विश्वस्थित्युदयौ लयः ।
भवन्ति किल विश्वात्मंस्तं त्वाऽद्याहं गतिं गता ॥ ३१ ॥

सत्यधर्मीया — यस्यांशांशभागेनांशांशस्वीकारेणांशांशविभागेन विशेषकृतेन विश्व-स्थित्युदयौ लयश्चेत्येते भवन्ति । किलेति समयावर्ता । हे विश्वात्मन् । तं त्वा त्वामद्य आद्य वा । तन्तवो मत्पुत्रा आद्या यस्येति तत्सम्बुद्धिः । हे तन्त्वाद्य अनेनानयनाबन्धं सूचयति । गतिं प्राप्य स्थानं गता ॥ ३१ ॥

चिरान्मृतसुतादाने गुरुणा किल चोदितौ ।
आनिन्यथुः पितृस्थानाद् गुरवे गुरुदक्षिणाम् ॥ ३२ ॥

सत्यधर्मीया — किमियताऽस्मत्स्तवनेन तव मातरितःपरं वाऽभिलषितं भाषस्वेत्यत आह ॥ **चिरादिति** । अनेन तदुत्तरं स्वकुमारमारणमिति तदादानसौशक्यं ध्वन्यते । पितृस्थानात्पितृपतिस्थलात् । गुरवे गुरुदक्षिणां तदात्मानं मृतं सुतमानिन्यथुः ॥ ३२ ॥

तथा मे कुरुतां कामं युवां योगेश्वरेश्वरौ ।
भोजराजहतान् पुत्रान् कामये द्रष्टुमाहृतान् ॥ ३३ ॥

सत्यधर्मीया — तथा मे कामं योगेश्वरेश्वरौ युवां कुरुतम् । स क इत्यत आह ॥ **भेजराजेति** । भोजराजः कंसस्तेन हतान्पुनराहृतान्पुत्रान्द्रष्टुं कामये ॥ ३३ ॥

श्रीशुक उवाच —

एवं सञ्चोदितौ मात्रा रामकृष्णौ कुरुद्वह ।
सुतलं संविविशतुर्योगमायामुपाश्रितौ ॥ ३४ ॥

सत्यधर्मीया — सुतलं संविविशतुः । तत्र तन्त्रं योगमायामुपाश्रिताविति ॥ ३४ ॥

तस्मिन् प्रविष्टावुपलभ्य दैत्यराड् विश्वात्मदैवं सुतरां तथाऽऽत्मनः ।
तद्दर्शनाह्लादपरिप्लुताशयः सद्यः समुत्थाय ननाम सान्वयः ॥ ३५ ॥

सत्यधर्मीया — तस्मिन्स्वस्थाने प्रविष्टौ रामकृष्णौ दैत्यराड्बलिरुपलभ्य तयोर्मध्ये विश्वात्मदैवं सुतरामात्मनश्च दैवमुपलभ्य तद्दर्शनजनिताल्हादस्तेन परिप्लुत आशयोऽन्तःकरणं यस्य सः । सद्यस्तत्क्षणं समुत्थाय सान्वयः सपुत्रमित्रकलत्रो ननाम ॥ ३५ ॥

तयोः समानीय वरासने मुदा निविष्टयोस्तत्र महात्मनोस्तयोः ।
दधार पादाववनिज्य तज्जलं सवृन्द आब्रह्म पुनद् यदम्बुभिः ॥ ३६ ॥

सत्यधर्मीया — वरासने उत्तमासने । आसनवितरण एव सहभावः । समानीय दत्वा तयोर्मध्ये कृष्णस्य पादौ । अत एव पादावित्युक्तिः । अन्यथा पादानित्यवक्ष्यत् । किञ्च ब्रह्मेत्यादिकमयुक्तं च । अवनिज्य तज्जलं सवृन्दः कुटुम्बनिकुरम्बसहितो दधार शिरसीति शेषः । आब्रह्म पुनद्यदम्बुभिः । यदम्बु हेत्यपि पठन्ति हि । तत्र पक्षे यद्धारणम् । अम्बुभिर्धृतैः आब्रह्म ब्रह्माणमभिव्याप्य पुनत्पवित्रयत्प्रागवर्ततेत्यर्थः । द्वितीयः स्फुटोऽर्थः ॥ ३६ ॥

समर्हयामास महाविभूतिभिर्महार्हवस्त्राभरणानुलेपनैः ।
स्रग्धूपदीपामृतभक्षणादिभिः स्वगोत्रवित्तात्मसमर्पणेन च ॥ ३७ ॥

सत्यधर्मीया — महाविभूतिभिरिति विशदयति । अमृतं रसायनं घृतं वा ।

"अमृतं व्योम्नि देवान्ने यज्ञशेषे रसायने ।
अयाचिते जले जग्धौ मोक्षणे हेम्नि गोरसे ।
क्लीबे नात्वमरे स्त्री तु गुलूच्यां मद्यभिक्षयोः" इति

यादवप्रकाशः । अमृतं सलिले घृत इति विश्वः । गोरसभक्षणं वा । स्वस्य गोत्रं कुलम् । गोत्रं नाम्नि कुले चल इति । वित्तस्यात्मनः स्वतनोः समर्पणेन च समर्हयामासेत्यन्वयः ॥ ३७ ॥

स इन्द्रसेनो भगवत्पदाम्बुजं भ्रमन् मुहुः प्रेमविभिन्नया धिया ।
बभाष हानन्दजलाकुलेक्षणः प्रहृष्टरोमा नृप गद्गदाक्षरम् ॥ ३८ ॥

सत्यधर्मीया — इन्द्रसेनो बलिर्भगवत्पदाम्बुजे बिभ्रत्प्रेमभक्तिस्तद्विभिन्नयाऽभिवृद्धया धिया आनन्दजलाकुलेक्षणः प्रहृष्टरोमा गद्गदाक्षरमुवाच ॥ ३८ ॥

बलिरुवाच —

नमोऽनन्ताय महते नमः कृष्णाय वेधसे ।
साङ्ख्ययोगवितानाय ब्रह्मणे परमात्मने ॥ ३९ ॥

सत्यधर्मीया — महतेऽनन्ताय नमः । वेधसे ज्ञानात्मने । साङ्ख्यं शुद्धात्मतत्त्वविज्ञानं साङ्ख्यमित्यभिधीयत इत्यादेर्ज्ञानं योगः कर्म तयोर्वितानो विस्तारो येन कपिलादिना तस्मै । ब्रह्मणे गुणपूर्णाय परमात्मने मुख्यस्वामिने व्यास्यादिमते वा ॥ ३९ ॥

दर्शनं वां हि भूतानां दुष्प्रापमतिदुर्लभम् ।
रजस्तमःस्वभावानां यन्नः प्राप्तं यदृच्छया ॥ ४० ॥

सत्यधर्मीया — भूतानां प्राणिनां वा दर्शनं हि यतो दुष्प्रापं दुःसाधप्राप्ति तत्सदपि रजस्तमस्वभावानां किञ्चिद्रजोमिश्रतमःप्रचुरस्वभाववतां यदृच्छयाऽतिदुर्लभमपि यन्नः प्राप्तमतो दैवं मम विपुलमिति मन्य इति शेषः । सात्त्विकानां भूतानां दुष्प्रापमस्माकं त्वतिदुर्लभं तथाऽप्यनुग्रहात् प्राप्तमहो इति भावः । दुष्प्रापा मतिरेतद्धेतुज्ञानं तया तज्ज्ञानाभावादेव दुर्लभमिति पदमेकं वा । एवञ्च तद्दौर्लभ्यहेतुरपि सूचित इति ध्येयम् ॥ ४० ॥

दैत्यदानवगन्धर्वसिद्धविद्याधरादयः ।
यक्षरक्षःपिशाचाश्च भूतप्रमथनायकाः ॥ ४१ ॥

सत्यधर्मीया — दर्शनहेतुः कोऽपि नैवास्मास्विति युवयोर्दैवैव कारणमिति वदति ॥ **दैत्येति** । दैत्यदानवा अस्मदादयः । पिशाचाश्चेति पाठः ॥ ४१ ॥

विशुद्धसत्वधाम्यद्धा त्वयि शास्त्रशरीरिणि ।
नित्यं निबद्धवैरास्ते वयं चान्ये च तादृशाः ॥ ४२ ॥

सत्यधर्मीया — विशुद्धसत्त्वधाम्नि शास्त्रशरीरिणि शास्त्रं वेदादिकं च तच्छरीरं वा सन्निधानस्थानमस्यास्तीति तच्छरीरी तस्मिन् । त्वयि निबद्धवैरास्ते वयमन्ये राक्षासादयोऽपि तादृशा निबद्धवैराः । अनेनास्मव्द्यापारः शास्त्रविरुद्ध इति द्योतयामास ॥ ४२ ॥

केचनोद्बद्धवैरेण भक्ताः केचन कामतः ।
न तथा सत्वसंरब्धाः सन्निकृष्टाः सुरादयः ॥ ४३ ॥

सत्यधर्मीया — भक्तान्विविक्तानुक्त्वा स्वयं नैतदन्यतम इति स्वं तुच्छीकृत्य वदति । केचन शिशुपालादयः । तात्पर्यमुक्तमत्रशानुसन्धेयम् । कामतो गोपीजनाः । एतद्वत्सत्त्वसंरब्धाः सत्त्वगुणोद्रिक्तभक्तियुक्ताः सन्निकृष्टाः सदा समीपवर्तिनः सुरादयो नाचश्चलभक्ता इत्यर्थः । एतदपेक्षयोद्बद्धवैरा इत्याद्युक्तिः । सुरादयः सुरेभ्य आदयः सुरादयः पूर्वदेवा इत्यर्थः । सन्निकृष्टा अतिनीचा इत्यप्यन्तरर्थः ॥ ४३ ॥

इदमित्थमिति प्रायस्तव योगेश्वरेश्वर ।
न विदन्त्यपि योगेशा योगमायां कुतो वयम् ॥ ४४ ॥

तन्नः प्रसीद निरपेक्षविमृग्ययुष्मत्पादारविन्दधिषणः स्वगृहान्धकूपात् ।
निष्क्रम्य विश्वशरणाङ्घ्र्युपलब्धवृत्तिः शान्तो यथैक उत सत्वसखैश्चरामि ॥ ४५ ॥

सत्यधर्मीया — एतादृशा अपि विसदृशाः का कथाऽस्माकमिति कथयति ॥ **इदमिति** । हे योगेश्वरेश्वर । योगेशा अपि तव योगमायां सहजशक्तिमिदमित्थमिति प्रायो बाहुल्येन न विदन्ति न जानन्ति । वयं योगहीनाः कुतो जानीम इति । बलेरन्तरार्थस्तु कुतः कुं भूमिं निकृत्य योगेशा वयं च किञ्चिज्जानीम इति । स्वस्थितिं ज्ञानादिस्थितिं भागवतीं चोक्त्वा स्वाशयं विशदयति ॥ **तदिति** । निरपेक्षा एकान्तिकाः सन्न्यासिनो वा

तैर्विमृग्यं विचार्यं चिन्तनीयमिति यावत् । पादारविन्दे तयोर्वा धिषणा यस्य स सन् स्वगृहान्धकूपात्संसारात्प्रायान्निष्क्रम्य निर्गत्य विश्वस्य शरणं ययोस्तवाङ्घ्र्योः सेवयोपलब्धा वृत्तिर्जीविका यस्य सः ं। शातोषयानागतिगतकोपः । सत्त्वं त्वम् । सत्त्वं सद्गुणसारत्वा-दित्यादेः सखा येषां तैर्मनीषिभिः सहैकोऽनुबन्धिविधुरो यथा चरामि तथा नः प्रसीद । हे विश्वशरण अङ्घ्र्युपलब्धा वृत्तिर्मार्गो यस्य सः । तेवनकृदेवेति वा । चरामीत्यानुगुण्यमेवं चेदिति ज्ञेयम् । सत्त्वं गुणो ज्ञानं साधुत्वं वा सखा येषां तैरिति वा । समासान्त आर्षः । यद्वा सत्त्वस्य तव सखायो महान्तस्तैः सह चरामीति वा ॥ ४५ ॥

शाध्यस्मानीशितव्येश निष्कामान् कुरु नः प्रभो ।
पुमान् यच्छ्रद्धयातिष्ठंश्चोदनाया विमुच्यते ॥ ४६ ॥

सत्यधर्मीया — शास्त्रशरीरिणीति प्रागीरणाच्छासकस्त्वमिति शिक्षयेति शंसति ॥ **शाधीति** । हे ईशितव्यानामीशास्मान् शाधि । तच्छिक्षणफलं च त्वन्निमित्तमिति तथा कुर्वित्याह ॥ **निष्कामान्नः कुर्विति** । नासामर्थ्यं तवेत्याह ॥ **प्रभविति** । नः प्रभविति वाऽन्वयः । यच्छ्रद्धया यस्मिञ्छिक्षणे श्रद्धया तिष्ठन्पुमानधिकारी चोदनाया विधिनिषेधबन्ध-पात्रत्वाच्चोदना संसृतिस्तस्याः सकाशाद्विमुच्यतेऽतः शाधीति प्रस्तुतयोरेतद्वाऽनेक एवेत्येव-मुपसंहरणमिति ज्ञेयम् ॥ ४६ ॥

श्रीभगवानुवाच —

आसन् मरीचेः षट् पुत्रा ऊर्णायां प्रथमेऽन्तरे ।
देवलं जहसुर्वीक्ष्य सुताञ्छपितुमुद्यतम् ॥ ४७ ॥

सत्यधर्मीया — आगमनप्रयोजनं वक्तुं तदुपोद्घातमाह ॥ **श्रीभगवानिति** । प्रथमेऽन्तरे स्वायम्भुवमन्वन्तरे मरीचेः सकाशादूर्णायां तन्नाम्न्यां भार्यायां षट् तत्सङ्ख्याः पुत्रा आसन् । ते च स्वपुत्रान् शपितुं कदाचिदुद्यतं देवलं वीक्ष्य जहसुरपाहसन् । तत्कार्श्यं च दृष्ट्वा तेनामुनावद्यकर्मणा पापव्यापारेण । आसुरीं योनिं कालनेमिसुतत्वेनासुरजन्मागुः प्रापुः । देवाः कं जहसुर्वीक्ष्य सुतां यभितुमुद्यतमिति पठन्ति । देवा एते षट् । सुतां वाचं यभितुमुद्यतं कं प्रजापतिं वीक्ष्य जहसुरपहसन्नित्यर्थः । इतरत्समम् । तृतीयस्कन्धे । वाचं

दुहितरं तन्वीं स्वयम्भूर्हरतीं मनः । अकामां चकमे क्षत्तः सकाम इति नः श्रुतम् । तमधर्मे कृतमतिं विलोक्य पितरं सुताः । मरीचिमुख्या मुनयो विश्रम्भात्प्रत्यबोधयन् । नैतत्पूर्वैः कृतं त्वद्य न करिष्यन्ति ये परे । यः स्वां दुहितरं गच्छेदनिगृह्याङ्गजं प्रभुः । तेजीयसामपि ह्येतन्न सुश्लोक्यं जगद्गुरो । यद्वृत्तमनुतिष्ठन्वै लोकः क्षेमाय कल्पते । नमस्तस्मै भगवते य इदं स्वेन रोचिषा । आत्मस्थं व्यञ्जयामास स धर्मं पातुमर्हति । स इत्थं गृणतः पुत्रान्पुरो दृष्ट्वा प्रजापतीन् । प्रजापतिपतिस्तन्वीं तत्याज व्रीडितस्तदेत्येवोक्तेस्तकृतासुरजन्मोक्तिस्तथा मरीचिमुख्या इत्युक्तेरेतत् षट्पुत्रग्रहणं च पूर्वोत्तरापरामर्शमूलमित्युपेक्ष्यम् ॥ ४७ ॥

तेनासुरीमगुर्योनिममुनाऽवद्यकर्मणा ।
हिरण्यकशिपोः शापात् पुत्रास्ते योगमायया ॥ ४८ ॥

देवक्या जठरे जाता राजन् कंसविहिंसिताः ।
सा तान् शोचत्यात्मजान् स्वांस्त इमेऽध्यासतेऽन्तिके ॥ ४९ ॥

सत्यधर्मीया — हिरण्यकशिपोः स्वौदासीन्येन ब्रह्मोपास्तिक्रोधेनात्र हिरण्यकशिपोर्जाता इति पठित्वा तत्क्षण एव हिरण्यकशिपोर्जाता योगनिद्रया नीता इति केचिव्द्याचक्रुः । तस्य चिन्तयतस्त्वेवं पातालमगमन्मनः । यत्र ते गर्भशयनात् षड्गर्भा नाम दानवाः । अमरप्रतिमा युद्धे पुत्रा वै कालनेमिनः । आर्यकं वै परित्यज्य हिरण्यकशिपुं पुरा । उपासाञ्चक्रिरे दैत्याः पुरा लोकपितामहम् । ततो हिरण्यकशिपुः सरोषो वाक्यमब्रवीत् । मामुत्सृज्य वरो यस्माद्वृतो यः पद्मसम्भवात् । तस्माद्वस्त्याजितः स्नेहः शत्रुभूतांस्त्यजाम्यहम् । षड्गर्भा इति योऽयं वः शब्दः पित्रा विवर्धितः । स एव वो गर्भगतान्पिता सर्वान्वधिष्यति । षडेव देवकीगर्भे षड्गर्भा वै महासुराः । भविष्यथ ततः कंसो गर्भस्थान् वो हनिष्यतीत्युक्तिविरुद्धं तच्चैतदपीत्युपेक्ष्यम् । आचार्या अपि । मरीचिजाः षण्मुनयो बभूवुस्ते देवलं प्राहसन्कार्श्यहेतोः । तच्छापतः कालनेमिप्रसूता अवध्यतार्थं तप एव चक्रुः । धाता प्रादाद्वरमेषां तथैव शशाप तान्क्ष्मातले सम्भवध्वम् । तत्र स्वतातो भवतां निहन्तेत्यात्मान्यतो वरलिप्सून्हिरण्यः । दुर्गा तदा तान्भगवत्प्रचोदिता प्रस्वापयित्वा प्रचकर्ष कायात् । क्रमात्समावेशयदाशु देवकी गर्भाशये तान्यहनच्च कंस इति प्रोचुः । जगामाथ ततो विष्णुरित्यारभ्य स च मे न प्रणश्यतीत्येतदन्तेन हरिवंशे निद्रासंविधानमुक्तमनुसन्धेयम् ।

पुत्राः कालनेमेर्योगमायया भगवदाज्ञप्तया दुर्गया देवक्या जठरे न्यस्तास्त एव जातास्तत्क्षण एव कंसेन प्राक्कालनेमिना विहिंसिताः । सा मम माता तान्स्वानात्मजान्नुद्दिश्य शोचति । ते च क्व वर्तन्त एतर्हि स्वामिन्नित्यत आह ॥ **त इमे तवान्तिके समीपेऽध्यासत इति**

॥ ४८,४९ ॥

इत एतान् प्रणेष्यामो मातृशोकापनुत्तये ।
ततः शापविनिर्मुक्ता लोकं यास्यन्ति विज्वराः ॥ ५० ॥

सत्यधर्मीया — इत एतत्स्थलादेतान्प्रणेष्यामः । ततः शापेन देवलदत्तेन विनिर्मुक्ता विज्वरा अनुपतापा लोकं स्वदेहं यास्यन्ति सुरा भवन्ति ॥ ५० ॥

स्मरोद्गीथः परिष्वङ्गः पतङ्गः क्षुद्रभृत् घृणी ।
षडिमे मत्प्रसादेन पुनर्यास्यन्ति मद्गतिम् ॥ ५१ ॥

सत्यधर्मीया — तन्नामानि कीर्तयति ॥ **स्मरेति** । स्मरेण सहित उद्गीथः स्मरोद्गीथो द्वौ परिष्वङ्गादिघृण्यन्ताश्चत्वार आहत्य षट् । मत्प्रसादेन पुनस्तत्तनुगमनानन्तरं मुक्तिं यास्यन्ति ॥ ५१ ॥

इत्युक्त्वा तान् समादाय इन्द्रसेनेन पूजितौ ।
पुनर्द्वारावतीमेत्य मातुः पुत्रानयच्छताम् ॥ ५२ ॥

सत्यधर्मीया — इति बलिं प्रत्युक्त्वा तान्समादाय । इन्द्रेति विवक्षाभवादभावः सन्धेः । अनेन समादायो यस्येति समादाय आगता अपि देहान्तरत्वान्न ते विभागार्हाः पितृधन इति समादाय इत्यप्यर्थविशेषो द्योतित आवृत्त्येति ज्ञेयम् । अयच्छतां ददतुः ॥ ५२ ॥

तान् दृष्ट्वा बालकान् देवी पुत्रस्नेहस्नुस्तनी ।
परिष्वज्याङ्कमारोप्य मूर्ध्न्यजिघ्रदभीक्ष्णशः ॥ ५३ ॥

सत्यधर्मीया — मूर्ध्नि शिरसि । एकैकश आघ्राणनमित्येकवचनोपपत्तिः । अभीक्ष्णशः पुनः पुनः ॥ ५३ ॥

अपाययत् स्तनं प्रीता सुतस्पर्शपरिस्रुतम् ।
मोहिता मायया विष्णोर्यया सृष्टिः प्रवर्तते ॥ ५४ ॥

सत्यधर्मीया — सुतानां स्पर्शेन परिस्रुतं प्रसृतं स्तनं तयोः क्षीरमपाययत् । यया मायया सृष्टिः प्रवर्तते तया मायया मोहिता मृतानां पुनर्जातप्रायत्वाभिप्रायेयमुक्तिः ॥ ५४ ॥

पीत्वाऽमृतं पयस्तस्या पीतशेषं गदाभृतः ।
नारायणाङ्गसंस्पर्शप्रतिलब्धात्मदर्शनाः ॥ ५५ ॥

सत्यधर्मीया — गदाभृतो भुक्तशेषं तत्पीतशेषम् । अनेन किञ्चित्सङ्कुचित-स्वकलेवरस्य देवकीस्तनं दत्वा व्रजं प्रत्यनैषीदिति द्योत्यते । अत एवामृतम् । लुप्तोपमम् । अमृतवद्विद्यमानं पयः पीत्वा नारायणस्याङ्गस्पर्शप्रतिलब्धमात्मनो भगवतो दर्शनं येषां ते तथा ॥ ५५ ॥

ते नमस्कृत्य गोविन्दं देवकीं पितरं बलम् ।
मिषतां सर्वभूतानां ययुर्धाम विहायसा ॥ ५६ ॥

सत्यधर्मीया — ते गोविन्दं नमस्कृत्य तथा पितरं वसुदेवं बलं बलरामं च सर्वेषां भूतानां तत्रत्यानां मिषतां पश्यतां धाम स्वं विहायसा ययुः । देवकी स्वाभिलषितसिद्ध्युत्तरं न दुराग्रहं कृतवतीत्यप्याह । सा देवकी विहाय गन्तॄन्पुत्रान्विहायैव स्थितेति ॥ ५६ ॥

तं (तान्) दृष्ट्वा देवकी देवी मृतागमननिर्गमम् ।
मेने सुविस्मिता मायां कृष्णसंसूचितां नृप ॥ ५७ ॥

सत्यधर्मीया — तं दृष्ट्वेति पाठः । मृतस्यागमनसहितो निर्गमस्तं दृष्ट्वा सुविस्मिता मायां शक्तिं कृष्णसंसूचितां कृष्ण एव सम्यक् सु अत्यन्तमुचितां मेने । कृष्णेन संसूचितां मायां स्वरूपशक्तिं मेन इति वा ॥ ५७ ॥

एवंविधान्यद्भुतानि कृष्णस्य परमात्मनः ।
वीर्याण्यनन्तवीर्यस्य सन्त्यनन्तानि भारत ॥ ५८ ॥

सत्यधर्मीया — न चित्तं चित्रय परीक्षिदिदं परीक्ष्यास्मदादिमनोगोचराणां चानन्तानां भावादिति बोधयति ॥ एवंविधानीति । अनन्तवीर्यस्य कृष्णस्य परमात्मन एवंविधान्यनन्तानि वीर्याणि सन्ति ॥ ५८ ॥

य इदमनुश‍ृणोति श्रावयेद्वा मुरारेश्चरितममृतकीर्तेर्वर्णितं व्यासपुत्रैः ।
जगदघभिदलं तद्भक्तसत्कर्णपूरं भगवति कृतचित्तो याति तत्क्षेमधाम ॥ ५९ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे चतुःसप्ततितमोऽध्यायः ॥

सत्यधर्मीया — सूत एतत्फलं लपति ॥ **य इति** । अमृतकीर्तेर्मुक्तिप्रदा कीर्तिर्यस्य तस्य मृतानमृतवत्करणेन कीर्तिर्यस्य तस्य वा । मुरारेर्व्यासपुत्रैर्वर्णनप्रकारबाहुविध्याद्बहुवचनं पूजार्थे वा तदादिभिरिति वा वर्णितमिदं चरितं योऽनुश‍ृणोति यश्च श्रावयेत् । किञ्चाघं भित्तीति तत् । भक्तानां सत्समीचीनं कर्णपूरं कर्णाभरणरूपं श‍ृण्वन् श्रावयन्वा भगवति कृतं चित्तं यस्य स तत्क्षेमधाम मोक्षधाम याति । भक्तकर्णावतंस इति पाठेऽप्ययमेवार्थः । कालाद्यप्रतिहतमिति क्षेमधामेति ॥ ५९ ॥

॥ इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां दशमस्कन्ध उत्तरार्धे चतुःसप्ततितमोऽध्यायः ॥ १०-७४ ॥

श्रीभागवते पाङ्करी श्रीनिवासाचार्यकृतविरोधोद्धारे दशमस्कन्धे उत्तरार्धः

॥ हरिः ॐ ॥ **कार्याणामिति** । अत्र भार्गवरामेण कृष्णाय नमनं कृतमिति दृश्यते । तस्यायुक्ततामाशङ्क्य टीकाकारैः "सर्वावताराभिन्नोऽपि सर्वशक्तिरपि स्वयम् । पूज्यपूजकनीचोच्चं मोहनाय दुरात्मनाम् । अखण्डैकरसो विष्णुर्दर्शयेत्तत्र तत्र हि" इति तात्पर्यस्थषाड्गुण्यवचनेन परिहृता यद्यपि । तथाऽपि प्रणामं चक्रतुर्वीरावित्यत्र तद्विरोधपरिहारेऽपि नमस्ते पुण्डरीकाक्षेति भार्गवोक्तौ नायं परिहारो युज्यते । मोहस्यैव सम्भवात् । दुरात्मनां हि ह्यवताररूपाणां पृथग्दर्शनेन मोहसम्भवेऽपि ब्रह्मक्षत्रिययोः पूवापरवयसोश्च क्रमान्नम्यनन्तृभावस्य स्फुटत्वेनाज्ञानानुपपत्तिः । तस्मात्कृष्णाय भार्गवनमनोक्त्या विरोधः । तदर्थमर्थान्तरम् ।

पूर्वमेतदवतारात्प्राक् हे पुण्डरीकाक्ष पुण्डरीकस्य नाभ्यकमलस्याक्ष आधार । अक्षो रथाङ्ग आधारे इति यादवः । चतुर्दशभुवनानां तत्कमलकार्यत्वात्तन्मुख्यकर्तृत्वेनापि सम्बोधयति । हे विश्वलोकैककारण विश्वे ये सर्वा ये लोकाः सत्यलोकादिपातालपर्यन्ताश्चतुर्दशास्तेषां सर्वेषां एककारण मुख्यनिर्मातः । अत्रैकेति पदस्य मुख्यार्थत्वानङ्गीकारे

पद्मकोशं तदाविश्य भगवत्कर्मचोदितः ।
एकं व्यभांक्षीदुरुधा त्रिधा भाव्यं द्विसप्तधा ॥

इति वचनेन ब्रह्मण्यतिव्याप्तं लक्षणं स्यादतो मुख्यार्थकमेकेति पदं गृहीतम् । ब्रह्मणो लोककारणत्वेऽपि भगवत्कृतपद्मकोशस्योपादानीकरणात्, भगवत्कर्मचोदित इत्युक्त्या तत्प्रेरणाच्चा-मुख्यत्वात् । भगवतस्तु यस्येहावयवैर्लोकान्कल्पयन्ति मनीषिणः । ऊर्ध्वादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिरित्युक्त्याऽन्यकृतस्योपादानकारणाभावादन्यप्रेरणाभावाच्च लोकमुख्यस्रष्टृत्वम् ते त्वदीयं नमः नमस्कारः मा मां प्रति मामुद्दिश्येत्यर्थः । उद्देशस्य चतुर्थ्यर्थकत्वेन तन्त्रसारादौ गृहीतत्वात् । नमः स्वाहेत्यादिना प्राप्ताया अपि चतुर्थ्यभावप्रयुक्तदोषाभावः । अस्त्विति शेषः । नन्वावयोर्भेदा-भावान्मदीयनमनं तुभ्यं कथं युज्यत इत्यतो हेतुगर्भरूपविशेषणेन स्वात्मानं विशिनष्टि ॥ **आदि-पुरुषमिति** । आ अतिक्रम्य आदिपुरुषं पूर्वावतारं समं स्थितस्तं राघवव्यवधानेन पूर्वावतारमित्यर्थः । अतो नम्यत्वयोग्योऽहमिति भावः ॥

यद्वा ॥ मादिपुरुषं मां रमामादत्ते दारत्वेन स मादी स चासौ पुरुषश्च तं रमाकारणपुरुषं वा । मम योनिरप्स्वन्तः समुद्र इति श्रुतेः । मः शिवश्चन्द्रमविधा इत्यभिधानान्मस्य ब्रह्मण आदिः कारणं स पुरुषस्तं यो ब्रह्माणं विदधाति पूर्वमिति श्रुतेः । पूर्वमित्यावर्त्यम् । तन्मूलरूपं प्रतीत्यर्थः । त इत्युपलक्षणम् । ते मे च त्वदीयं मदीयं च नमोस्त्विति ।

आदिपुरुषत्वे च हेतुगर्भं विशेषणमाह ॥ कार्याणामिति । जगता सर्वप्राणिजातेन कार्याणां कर्तव्यानां कर्मणां पूर्वं कारणं मूलप्रवर्तकमित्यर्थः ॥ अथवा ॥ जगता अमा सह सहितस्येत्यर्थः । अमा सह समीपे स्यादित्यमरः । ते त्वदीयं नमः । मा षट्सु द्वितीयेति सूत्रेण द्वितीया चतुर्थ्यर्थे मह्यमस्त्वित्यर्थः । मदीयं नमः । कार्याणां कात् ब्रह्मणः सकाशात् आर्याणां श्रेष्ठानां सृज्यानां वाऽवताराणां पूर्वं मूलभूतं कारणं आदिपुरुषं प्रति अस्त्वित्यर्थे कृते नोक्तविरोधः ॥ २५ ॥

॥ इति श्रीभागवतटिप्पण्यां द्विपञ्चाशत्तमोऽध्यायः ॥ १०-५२ ॥

॥ हरिः ॐ ॥ स तावदिति । अत्र दृष्टिपातेनेति पदं व्यर्थम् । असङ्गतत्वात् । न च दग्ध इत्यनेन युज्यते । अग्निनेत्यस्य पदस्य सत्त्वात् । न च तयोर्विशेषणविशेष्यभावः । तत्पुरुषेण बहुव्रीहिणा वा समासेन तद्योगाभावात् । नापि दृष्टिपातोऽग्निकारणम् । देहजेनेत्युक्तत्वात् । देहदृष्टिपातयोरुभयोरग्निकारणत्वमपि दुर्वचम् । अन्यतरस्य वैयर्थ्यापत्तेः [illegible] । तस्मादयुक्तमुक्तम् । अतोऽर्थान्तरम् । स यवनस्तावत्प्रथमं तावता पत्ताऽनन वा रुष्टस्य मुचकुन्दस्य दृष्टिपातेन । उद्बोधितेनेति शेषः । देहजेन कालयवनदेहोद्भूतेनाग्निना दग्धः सन् क्षणात्तत्क्षणे भस्मसात् भस्माधीनः । भस्मरूप इति यावत् । अभवत् । अतो नासङ्गतं दृष्टिपातेनेति पदम् ॥ १२ ॥

सार्वभौमेति । अत्र भगवता मुचकुन्दं प्रति सार्वभौमेति सम्बोधितम् । तदयुक्तम् । मुचकुन्दस्येक्ष्वाकुवंश्यमांधातृतनयत्वेनोत्तरकौसलदेशाधिपतित्वात् । वैवस्वस्तस्य हि मनोर्ज्येष्ठपुत्रसुद्युम्नेन रुद्रशापप्राप्त स्वेलारूपे बुधजाताय पुरूरवसे सार्वभौमत्वं दत्वा स्वपुरुषरूपजातानामिक्ष्वाकुप्रभृतीनां च माण्डलिकत्वं च दत्तम् । अतो विरोधः । तस्मादर्थान्तरमुच्यते । सार्वभौममहाराजेत्येकं पदम् । सर्वभौमस्तात्कालिको धृतराष्ट्रः तस्मादपि महाराज पूज्यराजन् । तत्र हेतुमाह । मातरिति ॥ ते तव मतिः विमला निर्दोषा ऊर्जिता प्रगल्भा । धृतराष्ट्रस्य कुपुत्रसम्बन्धेन मतेर्निर्दोषत्वाभावात् । तदपेक्षया मुचुकुन्दस्यैव महाराजत्वं युक्तमिति भावः ॥ अथवा ॥ विमलोर्जितेत्येकं पदम् । विशेषेण विष्णोर्वा मा ज्ञानं यस्य तं प्राणदेवं लान्ति स्वामित्वेन स्वीकुर्वन्ति ते विमलाः देवाः । वि; पक्षिपरमात्मनोरित्यभिधानम् । मा ज्ञान इति धातुः, ला आधान इति धातुश्च । निष्पापत्वाद्विमला देवास्तेषूर्जिता मतिरस्तीति । धृतराष्ट्रस्य तु विशिष्टो मलो येषां तेषां स्वपुत्रेषु ऊर्जिता ॥ यद्वा ॥ धृतराष्ट्रस्य मतिः विमला वौ विष्णौ मला पापरूपिणी । अकयप्रविसंभूमसखहा विष्णुवाचका इत्यभिधानम् । ते युद्धविषये । तकारः कीर्तितश्चोरे मोहे युद्धे च कीर्तित इत्येकाक्षरात् । ऊर्जिता चिकीर्षा दृढाऽस्ति । अतो मुचुकुन्दस्य धृतराष्ट्रापेक्षया राजत्वं युक्तमिति भावः । विमलोर्जितत्वे हेतुः ॥ वैरैरित्यादि ॥ अतो न विरोधगन्धोऽपि ॥ ६० ॥

॥ इति श्रीभागवतटिप्पण्यां चतुःपञ्चाशोऽध्यायः ॥ १०-५४ ॥

॥ हरिः ॐ ॥ अहो इति ॥ यामत्रयेण विवाहव्यवधानमुक्तम् । तस्य श्वो भाविनि त्वमजितोद्वहने विदर्भान् आनर्तादिकरात्रेण विदर्भानगमद्धयैरित्येताभ्यां विरोधः । किञ्च श्रीमन्महाभारततात्पर्यनिर्णये – देवीति श्रीरुदीरितेत्युक्त्या, देवी भाग्यात्कि नृणामित्युक्त्या न च स्पर्धादयो दोषाः संविद्रूपां स्पृशन्ति तामिति तात्पर्योक्त्या च अल्पराधस इति स्वविशेषणे दत्ते विरोधान्तरं च । अतोऽर्थान्तरम् । अत्र त्रियामाशब्देन न यामत्रयकालो ग्राह्यः । किन्तु रात्रिर्ग्राह्या । त्रियामा क्षणदा क्षपा इत्यभिधानात् । अतो न पूर्वविरोधः मे मया सह अल्पराधसः । अल्पं राधो भाग्यं यस्य तस्य शिशुपालस्य उद्वाहः त्रियामान्तरितः एकरात्र्या व्यवहित इत्यहं न वेद्मि । किन्तु इदमहो आश्चर्यं वेद्मि । अत्र शिशुपालविवाहस्य त्रियामान्तरितत्वकथने इदं कारणम् । यत् अरविन्दाक्षः । कृष्णो नागच्छति । तस्यागमने तु शिशुपालोद्वाहस्य वार्ताऽपि न स्यादिति भावः । अतो विरोधान्तरमपि नास्तीत्यर्थः ॥ २३ ॥

दुर्भगाया इति ॥ अत्र दुर्भगाया इति स्वविशेषणे कृते भाग्यात्मिकाया रमारूपाया रुग्मिण्यास्तदयोगात् । ज्ञानरूपायाश्च भ्रमाभावादपि विरोधोऽतोऽर्थानुस्मृच्यते । लुप्तोपममिदं वाक्यम् । तथा च धाता ब्रह्मा । धाताऽब्जयोनिर्द्रुहिण इत्यमरः । अमहा न मा ज्ञानं येषां ते अमा दैत्याः । मा ज्ञान इति धातोः । तान् हन्तीति अमहा विष्णुः । दैत्यारिः पुण्डरीकाक्ष इत्युक्तेः । ब्रह्मेशयोः प्रसिद्धनामनी गृहीत्वा विष्णोरेव यौगिकनामग्रहणेन गुरोर्नाम न गृह्णीयाच्छिष्यो भार्या पतेरिति वचनात् । स्त्रीणां स्वभर्तृप्रसिद्धनामग्रहणे निषेधः सूचितः । ईश्वरो रुद्रः । ईश्वरः शर्व ईशान इत्युक्तेः । दुर्भगाया अलक्ष्म्या भाग्यहीनस्त्रियो वा नानुकूल इव मे मह्यम् । नानुकूलो न किन्त्वनकूल एवेत्यर्थः । धात्रादित्रयाणां कर्तॄणां पृथगन्वयोपगमात् नानुकूलैकवचनविरोधः ॥ यद्वा ॥ उत्तरार्धस्थवाशब्द उपमार्थो ज्ञेयः । उपमायां विकल्पे वेत्यमरोक्तेः । एवं सत्यपि भगवान् किं नागच्छतीति भावः । नन्वस्तु त्रिपुरुषानुकूल्यं तद्द्वारानुकूल्यं न स्याच्चेत्कथमिष्टसिद्धिः स्यादित्याशङ्क्य विमर्शयति ॥ देवीति । देवी लक्ष्मीः । देवीति श्रीरुदीरितेति वचनात् । गौरीः सरस्वतीत्यर्थः । गौरीर्मिमाय सलिलानि तक्षतीति सरस्वतीश्रुतेः । दीर्घत्वान्न रेफलोपः । रुद्राणी रुद्रपत्नी । शिवा भवानी रुद्राणीत्यमरः । अत्र रुद्राणीशब्देन किं दाक्षायणी गृह्यतेऽथवा हैमवतीत्याशङ्क्य समाधत्ते ॥ गिरिजेति । गिरिजा हैमवती सती दाक्षायणी चोभयरूपिण्यपीत्यर्थः । अविमुखा सम्मुखाऽस्ति ॥ अथवा ॥ देवी वेत्यत्र इवेति प्रश्लेषः ॥ २५ ॥

॥ इति श्रीभागवतटिप्पण्यामष्टपञ्चाशत्तमोऽध्यायः ॥ १०-५८ ॥

॥ हरिः ॐ ॥ अत्र प्रीतस्तुष्ट इति द्वाभ्यामर्थतः सूर्य इति द्वाभ्यां शब्दतश्च पुनरुक्तिद्वयमत

उच्यते । भक्तस्य परमः सखा सूर्यः सत्राजितः प्रीत आसीदिति पूर्वान्वयः । तुष्टः सूर्यस्तस्मै सत्राजिते स्यमन्तकं तदाख्यं मणिं प्रादादित्युत्तरान्वयः । पूर्वत्र प्रीतिविधानमुत्तरत्र तुष्टे सूर्ये मणिदातृत्वविधानम् । अत्रोत्तरत्र प्रीतेर्विधानाभावेनोद्देश्यस्य तुष्ट इति विशेषणत्वेन योजिते आसीत्प्रादादिति क्रियाद्वयेन कर्तृद्वयावश्यकत्वेन च न पुनरुक्तिद्वयापातः । किञ्च सत्राजित्तनयां तन्वीमित्यत्र सत्राजिच्छब्दस्याजन्तत्वाभावेनात्रान्यत्र तु सत्राजितः किमकरोद्ब्रह्मन् कृष्णस्य किल्बिषमित्यत्राजन्तत्वस्य दर्शनेनोभयथाऽपि सम्भवस्याङ्गीकारान्न विरोधः ॥ ३ ॥

प्रसेन इति । पूर्वं दुर्भिक्षमार्यरिष्टानि सर्वेऽपि व्याधयोऽशुभाः । न सन्ति मायिनस्तत्र यद्राष्ट्रेऽभ्यर्चितो मणिरिति वाक्येन मणिसाहचर्ये सति मायाद्यभावोक्त्याऽत्र प्रसेनादिवधकथनस्य विरोधोऽत उच्यते । यद्रेष्ट्रऽभ्यर्चितो मणिरित्युक्तेर्मण्यर्चनस्य प्रसेनादिभिरकृतत्वाद्वधप्राप्तिः । अतो न पूर्ववाक्यविरोधः ॥ यद्वा ॥ कृष्णस्य याञ्चाभङ्गनिमित्तेन मणेरुक्तसामर्थ्यपराहतेः प्रसेनादिवधप्राप्तौ न विरोधः । प्रातिकूले हरावर्थाः सर्वेऽनर्था भवन्ति हीत्युक्तेः ॥ १४ ॥

मणिहेतोरिति । अत्र प्राप्ता वयमिति बहुवचनाभ्यां प्रमृजन्नित्येकवचनेन च विरोधोऽत उच्यते । हे ऋक्षप जांबवन् वयं ते द्वारकौकसश्चाहं च वयमिह बिलप्रदेशे मणिहेतोः मणिशोधार्थमित्यर्थः । प्राप्ताः । न केवलमहमेक एवागतोऽस्मीति जानीहीति भावः ॥ तत्रामुना बालक्रीडनार्थमुपरि बद्धेन मणिना आत्मनः स्वस्य मिथ्याऽभिशापं प्रसेनवधमण्याहरणयोरकरणेऽपि तत्कर्तृत्वशब्दप्राप्तिं प्रमृजन् पराकुर्वन् अहमेक एव ते बिलं प्राप्त इति वचनविपरिणामेनान्वयः ॥ यद्वा ॥ इह भूमौ अस्मिन्नवतारे वा अमुना मणिना आत्मनः स्वस्य मिथ्याऽभिशापम् । षट्सु द्वितीयेति सूत्रात् । इयं द्वितीयार्थे । मिथ्याऽभिशापस्येत्यर्थः । प्राप्तौ सत्याम् । तमिति शेषः ।

प्रमृजन्मिथ्याऽभिशापमपाकुर्वन्मणिहेतोः स्यमन्तककृते बिलमयमगमम् । या प्रापण इति धातोः । लङुत्तमपुरुषः । अतो न वचनविरोधः ॥ यद्वा ॥ हे ऋक्षप ते तवायं शुभावहविधिम् । अनसृत्येति शेषः । अयः शुभावहो विधिरित्यमरः । बिलमगममित्यध्याहारः ॥ अथवा ॥ अयमिति बिलविशेषणम् ॥ किंवा ॥ हे ऋक्षप योऽयं मणिः ते तव बिलं प्रमृजन् उज्ज्वलीकुर्वन्नास्ते अमुना मणिना आत्मनो मिथ्याऽभिशापं प्रमृजन्नहं मणिहेतोः मणिरेव हेतुर्मिथ्याऽभिशापापाकृतिकारणं तस्य प्राप्तौ इह बिले आगतोऽस्मीति ॥ ३१ ॥

॥ इति श्रीभागवतटिप्पण्यां षष्ठितमोऽध्यायः ॥ १०-६० ॥

॥ हरिः ॐ ॥ त इति । अत्र देवकीमिति स्मरादिभिः षड्भिर्गोविन्दादिवन्दनं कृतम् । तत्र

वसुदेवदेवकीबलकृष्णेति वयःक्रमोऽपि नास्ति । किंवा कृष्णबलदेवकीवसुदेवेति व्युत्क्रमोऽपि नास्ति । तस्माद्विरोधोऽत उच्यते । गोविन्दस्य वयसाऽन्तिमत्वेऽपि सर्वोत्तमत्वेनाभ्यर्हितत्वात्तद्वन्दनस्य प्राथम्यम् । ततो बलभद्रस्य तत्कल्पत्वेन वन्द्यत्वेऽपि मातृदेवो भवेति प्रथमवन्दनविधायकश्रुत्या पित्रानृण्यं भवेन्मार्ग या या व्रजनादिना तवानृण्याय योगस्तु नास्त्यतः कृपयाऽव मामिति स्मृतेश्च । लक्ष्मीनारायणाय नम इत्यादिना नमनस्य स्त्रीपूर्वकत्वेन विधानदर्शनाच्च । स्वशापोद्धारस्य देवकी-प्रार्थनयैव जातत्वाच्चादौ देवकीवन्दनम् । ततः पितृवन्दनम् । व्यवधानेन सूतिस्तु पुंस्त्वमित्यभिधीयत इत्युक्त्या पितुर्व्यवहितत्वेन कारणत्वात्ततो बलवन्दनस्यापि युक्तता । अन्यमात्रुदरस्थत्वनिमित्तेनान्त एव नमनयोग्यत्वात् । तस्मान्नात्र कश्चिद्विरोधः ॥ ५६ ॥

॥ इति श्रीभागवतटिप्पण्यां चतुःसप्ततितमोऽध्यायः ॥ १०-७४ ॥

अथ दशमस्कन्धे उत्तरार्धे दुर्घटभावदीपिका

॥ हरिः ॐ ॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ जरासन्धो विंशद्भिरक्षौहिणीभिस्तिसृभिरक्षौहिणीभिश्च संवृतः सन् यदुराजधानीं सर्वतो दिशं सर्वा दिशो यस्याः सा तां मथुरां न्यरुणदपीति । एतेन तिसृभिश्चेति चशब्देनैव न केवलं विंशद्भि-रक्षौहिणीभिः किन्तु तिसृभिरक्षौहिणीभिश्चेति समुच्चयस्य प्राप्तत्वात्तिसृभिश्चापीत्यपिशब्दो व्यर्थ इति चोद्यं परिहृतम् । न केवलं परमोद्योगं चक्रे किन्तु मथुरां न्यरुणदपीति समुच्चयलाभार्थमपिशब्दः प्रयुक्त इत्यभ्युपगमात् । एतेनैव मथुरां सर्वासु दिक्षु न्यरुणदिति वक्तव्यम् । सर्वतो दिशमिति कथनमनुपपन्नमिति दूषणं निरस्तम् । सर्वतो दिशमित्यत्र सर्वा दिशो यस्याः सेति बहुव्रीहिः सर्वा इति प्रथमाया लुकं तसीत्यादेशं च स्वीकृत्य सर्वतो दिशमित्यस्य सर्वासु दिक्ष्विति तात्पर्यार्थ इत्यभ्युपगमात् ॥ ४ ॥

अहं भुवि भुवो भारं समाहितं सन्नद्धम् । ह्येतद्बलम् । हिशब्दोऽवधारणे । हनिष्यामि हनिष्याम्येवेति । एतेन भुवि भारं बलं हनिष्यामीत्यनेनैव पूर्णत्वात्समाहितमित्येतद्व्यर्थमिति दूषणं परास्तम् । समाहितमित्यस्य स्थापितमित्यर्थमनङ्गीकृत्य सन्नद्धमित्यर्थमङ्गीकृत्य बलस्य सन्नद्धताज्ञापनेन स्वपराक्रमज्ञापनं क्रियत इत्यूरीकरणात् ॥ ७ ॥

अक्षौहिणीभिः सङ्ख्यातं भटाश्वरथकुञ्जरैर्युक्तं बलं हनिष्यामीति पूर्वेणान्वयः । यतो भूयो रणोद्यमं कर्ताऽतो मागधोऽपि मागध एव न हन्तव्य इति । एतेन मागधबलं हनिष्यामीत्युक्तत्वात् न

केवलं मागधबलं न हन्तव्यं किन्तु मागधोऽपि न हन्तव्य इति कथनमयुक्तमिति दूषणं परिहृतम् । अपिशब्दस्यावधारणार्थत्वमङ्गीकृत्य मागधोऽपि न हन्तव्य इत्यस्य मागध एव न हन्तव्य इत्यर्थ इत्युक्तत्वात् ॥ ८ ॥

मेऽयमवतार एतदर्थो भवति । एतदर्थ इत्युक्तं विवृणोति ॥ भूभारेति । अयमवतारो भूभारहरणाय साधूनां संरक्षणाय मे मया कृतः । भूभारहरणायेत्युक्तं विवृणोति ॥ अन्येषामिति । साधुभ्योऽन्येषां दैत्यादीनां वधायायमवतारः कृत इति । एतेनैतदर्थ इत्येतच्छब्देन बुद्धिस्थभूभारहरणादेः परामर्शस्य कर्तव्यत्वेन भूभारहरणायेत्यादिकं व्यर्थमिति चोद्यस्यानवकाशः । एतच्छब्देन कस्य परामर्श इत्याशङ्कापरिहारार्थं बुद्धिस्थभूभारहरणादेः परामर्श इति वक्तुं भूभारहरणायेत्यादिनैतदर्थोऽवतारोऽयमित्यस्य विवरणं कृतमित्यभ्युपगमात् । एतेनैव भूभारहरणायेत्यनेनैवान्येषां वधायेत्यर्थस्य प्राप्तत्वात् अन्येषां वधायेत्येतव्यर्थमिति दूषणस्यानवकाशः । कोऽसौ भूभारस्तस्य हरणं कीदृशमित्याशङ्कापरिहारार्थं भूभारहरणायेत्यस्य विवरणं अन्येषां वधायेत्यनेन क्रियत इत्यूरीकरणात् ॥ ९ ॥

कृष्णो युगावसानार्णवघूर्णितोपमं युगावसानसमुद्रघोषोपमम् । तद्वीरभूपालकदम्बजृम्भितं वीराश्च ते भूपालाश्च वीरभूपालास्ते प्रसिद्धाश्च ते वीरभूपालाश्च तद्वीरभूपालास्तेषां कदम्बः समूहस्तस्य जृम्भितं निनादम् । जृम्भितं गात्रविनमे निनादे गोमुखेऽपि चेत्यभिधानात् । निशम्य चेतसा मनसाऽपि न चचाल किमु देहतः । अत्र दृष्टान्तमाह ॥ सृगालेति । सृगालघोषं निशम्योद्धतो मृगराट् सिंह इवेति ॥ २१ ॥

पुराट्टालकहर्म्यगोपुरं समाश्रिताः स्त्रियो हरिरामयोः कृष्णबलरामयोः सुपर्णतालध्वजचिन्हितौ गरुडतालध्वजाङ्कितौ रथौ मृधे विलक्षयन्त्योऽपश्यन्त्योऽत एव शुचार्पिताः सत्यः सम्मुमुहुः सम्यग्मोहं प्रापुरिति । एतेन कृष्णरामरथादर्शनस्यैव संमोहहेतुत्वात् रथावलक्षयन्त्य इति वक्तव्यम् । रथौ विशेषेण लक्षयन्त्य इति कथनमनुपपन्नमिति चोद्यं परास्तम् । विशब्दस्य नञर्थत्वमङ्गीकृत्य विलक्षयन्त्य इत्यस्यालक्षयन्त्य इत्यर्थ इत्युक्तत्वात् ॥ ४७ ॥

हे दुर्बुद्धे चैद्य । अतस्तव वीर्यादिमत्त्वात् । त्वं रणे मे स्वयं मुख्यं धानुष्मत्त्वं धनुष्मतो भावं धानुष्मत्त्वं दीर्घः छान्दसः । पश्येति । एतेन स्वयमित्येतव्यर्थमिति दूषणं परास्तम् । सर्वधनुष्मत्त्वापेक्षया मन्निष्टधनुष्मत्त्वं मुख्यमिति वक्तुं स्वयमित्युक्तमित्यभ्युपगमात् ॥ ५८ ॥

कृष्णः, पञ्चभिराशुगैर्बाणैस्तांस्तान् राज्ञः प्रत्येकशो विद्ध्वा त्रिभिस्त्रिभिः शरैः । राज्ञां सारथिं

चतुरो वाहान्यमसदनमनयन्भूयोऽपि पुनरपि यदुनन्दनः कृष्णो रणे नृपतीन् । वक्षसि आस्ये ललाटे चैकैकमेकैकेन बाणेन विव्याधेति । एतेनैकैकमित्येतदनन्वितमिति दूषणं परास्तम् । एकैकमिति द्वितीयैकवचनमेकैकेनेति तृतीयैकवचनादेश इति स्वीकृत्य विव्याधेत्यनेनान्वयस्योक्तत्वात् ।।५९,६१।।

किञ्चिद्राजन्यकटकं कालान्तमारुतोद्धूतशैलोपमं किञ्चिद्राजन्यकटकं कालान्तमारुतोद्धूतद्रुमोपमं किञ्चिद्राजन्यकटकं कालान्तमारुतोद्धूतलतोपममिति विवेको द्रष्टव्यः । एतेन राजन्यकटकस्य विरुद्धशैलादिसाम्याभिधानमयुक्तमिति चोद्यं परिहृतम् ।। ६५ ।।

नरकेशशैवला इत्यस्याश्वादिकेशव्यावृत्त्यर्थं नरेत्युक्तम् ।। ६९ ।।

हर्षवहाः परस्परमित्यस्य कृष्णसङ्कर्षणयोः परस्परं हर्षवहा इत्यर्थः । एतेन कृष्णसङ्कर्षणाभ्यामेव नदीप्रवर्तनस्य कृतत्वात् चैद्यादिभिर्नदीप्रवर्तनस्याकृतत्वात् परस्परं हर्षवहा इत्येतदनुपपन्नमिति चोद्यं प्रत्युक्तम् । कृष्णसङ्कर्षणयोरित्यस्य शेषमङ्गीकृत्य कृष्णकृतनदीदर्शनेन रामस्य हर्षो रामकृतनदीदर्शनेन कृष्णस्य हर्ष इत्युच्यत इत्यभ्युपगमात् ।। ७० ।।

।। इति श्रीभागवतटिप्पण्यामेकोनपञ्चाशोऽध्यायः ।। १०-४९ ।।

।। हरिः ॐ ।। अप्रविष्टाप्तवर्माण इत्यस्य केचनाप्रविष्टवर्माणः केचनानावाप्तवर्माण इत्यर्थः । एतेनानाप्तवर्माण इत्यनेनैवाप्रविष्टवर्माण इत्यर्थस्य लाभात् अप्रविष्टेत्येतद्व्यर्थमिति चोद्यं परास्तम् । केषाञ्चिद्वर्मप्राप्तिरेव जानतां केषाञ्चिद्वर्मप्राप्तौ सत्यामपि देहे वर्मणां सम्बन्धविशेषरूपः प्रवेशो न जात इत्युच्यत इत्यूरीकरणात् ।। १८ ।।

।। इति श्रीभागवतटिप्पण्यां पञ्चाशोऽध्यायः ।। १०-५० ।।

।। हरिः ॐ ।। दृष्टदर्शनकौतुकमित्यस्य दृष्टानि द्रष्टव्यकौतुकानि येन तमित्यर्थः । एतेन दृष्टकौतुकमित्यनेन पूर्णत्वात् दर्शनेत्येतद्व्यर्थमिति चोद्यं परास्तम् । दर्शनेति ल्युट् कर्मणीति स्वीकृत्य दर्शनशब्देन दृष्टकौतुकानां द्रष्टव्यत्वमुच्यत इत्यभ्युपगमात् ।। १२ ।।

हे राजन् । बाणो विचित्रशिबिकादीनामसङ्ख्यातं सङ्ख्याभावं जरासन्धाय ददौ । सङ्ख्याभावविशिष्टविचित्रशिबिकादिकं ददाविति यावत् । असङ्ख्यातं भाण्डशय्यासनादिकं च ददाविति । एतेन किमसङ्ख्यातशब्दः सङ्ख्याभावविशिष्टवाचक इत्युच्यते किंवा क्तप्रत्ययो भावः इत्यङ्गीकृत्य सङ्ख्याभाववाचक इत्यङ्गीक्रियते । नाद्यः । विचित्रशिबिकाच्छत्रव्यजनाकल्पवाससामित्यस्यानन्वय प्रसङ्गात् । न द्वितीयः भाण्डशय्यासनादिकमित्यस्यानन्वितत्वापत्तेरिति दूषणं परास्तम् ।

असङ्ख्यातमित्यस्य यदा विचित्रेत्यनेनान्वयस्तदा सङ्ख्याभाववाचकत्वं यदा भाण्डेत्यनेनान्वयस्तदा सङ्ख्याभाववद्वाचकत्वमित्यूरीकरणात् ॥ १७ ॥

यादवसत्तमः कृष्ण आहवलालसौ प्रोवाच । एतदेव विवृणोति ॥ सात्यकिमिति । सात्यकिं कृतवर्माणं प्रोवाचेति । एतेनाहवलालसाविति द्विवचनान्तशब्दस्य सात्यकिं कृतवर्माणमित्येकवचनान्तशब्दाभ्यामनन्वय इति चोद्यं प्रत्युक्तम् । आहवलालसौ कावित्याशङ्कापरिहारार्थमाहवलालसौ प्रोवाचेत्युक्तस्यैव विवरणं सात्यकिं कृतवर्माणं प्रोवाचेत्यनेन क्रियत इत्यभ्युपगमात् ॥ ३१ ॥

स्वहस्तेनेत्यस्य स्वातन्त्र्यात्स्वशब्दवाच्यस्य शुक्लकेशस्य स्वहस्तप्रविष्टेन हस्तेनेत्यर्थः । एतेन हस्तेनेत्येवोक्ते योग्यतया स्वहस्तस्यैव लाभात् स्वेत्येतद्व्यर्थमिति चोद्यस्यानवकाशः ॥ ४९ ॥

बलवान् रोहिणीसुतः स रामो गदया तूर्णं बलिनं मागधमुरस्याहत्य गदां विसृज्य मागधमाश्लिष्य जग्राहेति । एतेनाहत्येत्युक्तहननसाधनं नोक्तमिति शङ्का परास्ता । गदामित्यस्यार्थवशात्तृतीयान्ततया विपरिणाममङ्गीकृत्य गदाया हननसाधनत्वमुच्यत इत्यभ्युपगमात् ॥ ४८ ॥

॥ इति श्रीभागवतटिप्पण्यामेकपञ्चाशोऽध्यायः ॥ १०-५१ ॥

॥ हरिः ॐ ॥ लाजाञ्जलिभिरित्यस्याञ्जलिमुक्तलाजैरित्यर्थः । एतेनाञ्जलिमुक्तलाजैरिति वक्तव्यं लाजाञ्जलिभिरित्यनुपपन्नमिति दूषणं निरस्तम् । अञ्जलिशब्दस्याञ्जलिमुक्ततापरत्वं विशेषणस्य परनिपातत्वं चाङ्गीकृत्य लाजाञ्जलिभिरित्यस्याञ्जलिमुक्तलाजैरित्यर्थ इत्युक्तत्वात् ॥ ११ ॥

कञ्चनेत्यस्य सुखरूपं चेत्यर्थः । एतेन नमस्ते भार्गव श्रीमन्निति वक्ष्यमाणत्वेन मुनिमित्यस्य भार्गवमुनिमित्यर्थस्य सिद्धत्वात् कञ्चनेत्ययुक्तमिति चोद्यं प्रत्युक्तम् । कशब्दः सुखवाची । चशब्दार्थश्चनशब्दो वृक्षमूलनिवासिनमित्यादिविशेषणसमुच्चयार्थ इत्यभ्युपेत्य कञ्चनेत्यस्य सुखरूपं चेत्यर्थ इत्यभ्युपगमात् ॥ १८ ॥

साग्रजाय महात्मन इत्यस्य साग्रजाय महात्मने नम इत्यर्थः । एतेन साग्रजाय महात्मन इत्येतदनन्वितमिति शङ्का निरस्ता । अध्याहृतेन नम इत्यनेनान्वय इत्यभ्युपगमात् ॥ २४ ॥

सृगालो वासुदेवाख्य इत्यस्य सृगालसदृशत्वात्सृगालवासुदेवनामक इत्यर्थः । एतेन सृगालवासुदेवाख्य इति वक्तव्यं सृगालो वासुदेवाख्य इति कथनमयुक्तमिति दूषणं परिहृतम् । सृगालवासुदेव इति नाम्नि सृगालेत्येकदेशः सृगालसदृशत्वज्ञापनार्थं प्रवृत्त इति सूचनार्थं सृगाल इति सृगालसदृशत्वमुक्त्वा वासुदेवाख्य इति नामैकदेशग्रहणं कृतमित्यूरीकरणात् ॥ ३४ ॥

॥ इति श्रीभागवतटिप्पण्यां द्विपञ्चाशोऽध्यायः ॥ १०-५२ ॥

।। हरिः ॐ ।। फलभारेण नतैः स्कन्धैः स्थूलस्कन्धविशिष्टैर्नारिकेलैर्विराजितमित्यर्थः । एतेन फलभारनतस्कन्धविशिष्टैरिति वक्तव्यं फलभारनतैः स्कन्धैरिति कथनमनुपपन्नमिति चोद्यं पराकृतम् । नारिकेलानां फलभारनतत्वोक्त्याऽर्थात्स्कन्धानां फलभारनतत्वं लभ्यत इति स्वीकृत्य स्कन्धशब्दस्यार्श आद्यजन्तत्वमङ्गीकृत्य स्कन्धैरिति स्कन्धशब्देनासाधारण्येन व्यपदेशा भवन्तीति न्यायात्स्कन्धानां स्थूलत्वं चोच्यत इत्यभ्युपगमात् ।। ३ ।।

जानुनी धरणीं कृत्वेत्यस्य धरणीं जानुनी जानुद्वयविशिष्टां कृत्वेत्यर्थः । एतेन धरण्यां जानुनी स्थापयित्वेति वक्तव्यं धरणीं जानुनी कृत्वेत्यनुपपन्नमिति दूषणं निरस्तम् । जानुनी शब्दस्य जानु-विशिष्टपरत्वात् । जानुनी धरणीं कृत्वेत्यस्य धरण्यां जानुनी स्थापयित्वेति तात्पर्यार्थ इत्यूरीकरणात् ।। १७ ।।

पस्पर्शाङ्गं तदुत्तममित्यस्य तत्तस्य गरुडस्योत्तममङ्गं पस्पर्शेत्यर्थः । एतेन तच्छब्दस्योत्तम-मित्यनेन समस्तत्वात् अङ्गमित्यनेनान्वयो न संभवतीति दूषणं परिहृतम् । तदुत्तममित्यत्र तदिति भिन्नं पदमित्यभ्युपगमात् ।। १८ ।।

धर्मज्ञौ पलायमानैः सह युद्धं न कर्तव्यमित्यादिधर्मज्ञौ रामकृष्णौ सूतमागधबन्दिभिः स्तूयमानौ । चशब्द एवार्थे । मधुरां पुरीं च मधुरां पुरीमेव विविशतुः । न तु पलायमानमागधादि-भिर्युद्धं चक्रुरिति । एतेन धर्मज्ञावित्येतव्द्यर्थमिति दूषणं परास्तम् । पलायमानमागधादीननुगम्य युद्धं कुतो न कृतमित्याशङ्कापरिहारार्थं धर्मज्ञावित्यनेन पलायमानैः सह युद्धं न कर्तव्यमित्यादिधर्मज्ञा-वित्युच्यत इत्यूरीकरणात् ।। २४,२५ ।।

अविक्षयानित्यस्य विविधव्ययकृतक्षयो, न विद्यते विक्षयो येषां तेऽविक्षयास्तानित्यर्थः । एतेना-विक्षयानिति विशब्दः किं नञर्थः किंवा विशेषार्थः । नाद्यः । द्वौ नञौ प्रकृतमर्थं सातिशयं गमयत इति न्यायेनातिशयितक्षयोऽस्तीत्यर्थस्य प्राप्तेः । न द्वितीयः । विशेषतः क्षयो नास्तीत्युक्ते किञ्चित्क्षयोऽस्तीत्यर्थस्य प्राप्तेरिति दूषणं परास्तम् । उपसर्गाः क्रियावचनाभावे ससाधानं क्रियामाहु-रिति वचनात् । अत्र विक्षयक्रियाभावात् । वीत्युपसर्गस्य विविधव्ययकृत इत्यर्थकत्वमङ्गीकृत्या-विक्षयानित्यस्य विविधव्यये कृतेऽपि क्षयरहितानिति तात्पर्यार्थ इति स्वीकरणात् ।। ४१ ।।

।। इति श्रीभागवतटिप्पण्यां त्रिपञ्चाशोऽध्यायः ।। १०-५३ ।।

।। हरिः ॐ ।। अत्रेयं योजना । श्रीवत्सलाञ्छनश्चतुर्भुजोऽरविन्दाक्षो वनमाल्यतिसुन्दरः सोऽयं पुमान्वासुदेव इत्येतद्धि प्रमाणप्रसिद्धम् । इति नारदप्रोक्तैर्लक्षणैः श्रीवत्सलाञ्छनत्वादि लक्षणैरयं

वासुदेवादन्यो न भवितुमर्हतीति निश्चित्येति वक्ष्यमाणेन सम्बंध इति । एतेन वासुदेवो ह्ययमित्यादि-पदानामसमन्वय इति शङ्काऽनवकाशः । यत्तच्छब्दाध्याहारेणान्वयस्योक्तत्वात् ॥ ४ ॥

हे ब्रह्मन् । यः पुमान्गुहां गतः सन् शिश्ये स कः । एतदेव विवृणोति ॥ नामेति । यो गुहां गतः सन् शिश्ये तस्य नाम किम् । यो गुहां गतः सन् शिश्ये सः कस्य वंशे उत्पन्नः । किंवीर्यः कस्य वीर्यं यस्य सः किंवीर्यः । कस्य पुत्र इति यावत् । कस्मान्निमित्ताद्गुहां गतः सन् शिश्ये । यवनार्दनं तेजः किं किन्निमित्तकम् । इति प्रश्नानामुत्तरं वक्तव्यमेव । वाशब्दः प्रश्नसमुच्चय इति । एतेन यो गुहां गतः शिश्ये तस्य नाम किमिति वक्तव्यं तस्य नाम क इति कथनमयुक्तमिति चोद्यं प्रत्युक्तम् । क इति सामान्याकारेण प्रश्नं कृत्वा तस्यैव विवरणं नाम किमित्यादिना क्रियत इत्यभ्युपगमात् । एतेनैव नामेत्यत्र किंशब्दो नास्तीति चोद्यानवकाशः । किं तेजो यवनार्दनमित्यत्र विद्यमानस्य किंशब्दस्याकर्षणेनान्वय इत्यभ्युपगमात् । नामेत्यत्र किंशब्दो नास्तीति चोद्यस्या-नवकाशः । एवमेवैवशब्दोऽनन्वित इति दूषणं परिहृतम् । अध्याहृतेनेति प्रश्नानामुत्तरं वक्तव्य-मित्यनेनान्वय इत्यभ्युपगमात् ॥ १३ ॥

हे मुचकुन्द । कैवल्यमृते आत्मन आत्मभ्यो वरं वृणीष्व । ते भद्रमस्त्विति । एतेनात्मन इत्येतव्द्यर्थमिति शङ्का परास्ता । आत्मन इति पञ्चम्येकवचनं जातावित्यभ्युपेत्यात्मन इत्यस्यास्मदिति तात्पर्यार्थ इत्यभ्युपगमात् ॥ २० ॥

हे पुरुषव्याघ्र प्रभो । वयं त्वैक्ष्वाका इक्ष्वाकुकुलोत्पन्ना अत्र क्षत्रबन्धवः क्षतात्त्राणं कुर्वतां बन्धवो यौवानाश्वात्मजो मुचकुन्द इति प्रोक्तः प्रोक्ता इति । एतेन वयमित्युक्तत्वात् मुचुकुन्द इति प्रोक्ता इति वक्तव्यं प्रोक्त इत्येकवचनप्रयोगोऽनुपपन्न इति चोद्यं परिहृतम् । प्रोक्त इत्येकवचनं बहुवचनादेश इत्यङ्गीकारात् ॥ ३२ ॥

अविषह्यानिर्दुष्टेनैव तेजसा त्वां भूरि द्रष्टुमशक्नुमः । न शक्नुम इति । एतेन न शक्नुम इति कथनमयुक्तमिति दूषणं निरस्तम् । अ शक्नुम इति पदद्वयमङ्गीकृत्य अ शब्दस्य सम्बुद्ध्यन्तत्वं निर्दुष्टार्थकत्वं शक्नुम इत्यस्य काकुस्वरविशिष्टत्वेन न शक्नुम इत्यर्थकत्वमित्यङ्गीकारात् ॥ ३५ ॥

अहं रथेभाश्वपदात्यनीकपैर्वृतः सन् तत्तत्क्षेत्रस्थितं त्वामगणय्य । तत्तत्क्षेत्रस्थितत्वद्भजनादिक-मकुर्वन्निति यावत् । गां भूमिं पर्यटन् अभूवमिति । एतेन त्वामगणय्य दुर्मद इत्यनेनैव पूर्णत्वात् गां पर्यटन्नित्येतव्द्यर्थमिति दूषणं निरस्तम् । पर्यटनकाले तत्तत्क्षेत्रस्थितभगवद्भजनादिकं कर्तव्यम् । तन्न कृतमित्यत्र तात्पर्यात् ॥ ५० ॥

ईश । यदृच्छयेश्वरेच्छया । तवेच्छयेति यावत् । कृतो राज्यानुबन्धापगमस्ते तव ममानुग्रहो मद्विषयकानुग्रहः कार्य इति मन्य इति । एतेन राज्यानुबन्धापगमो यदृच्छया कृत इत्यनेनैव ते त्वया कृत इत्यर्थस्य प्राप्तत्वात्ते कृत इत्येतव्द्यर्थमिति चोद्यं परिहृतम् । त इत्यस्य कृत इत्यनेनान्वय इत्यनङ्गीकृत्वाऽनुग्रह इत्यनेनैवान्वयस्योक्तत्वात् ॥ ५५ ॥

हे विभो । त्वामाराध्याकिञ्चनप्रार्थ्यतमादकिञ्चनैरतिशयेन प्रार्थ्यतमात्तव पादसेवनादन्यं वरं न कामये । अत्र हेतुमाह ॥ कस्त्वामिति । हे हरे । अपवर्गं दत्वा प्राप्यात्मबन्धनं वरं क आर्यो वृणीत न कोऽपीत्येतद्धि प्रसिद्धमिति । एतेन मुचुकुन्देन निद्राया एव कृतत्वेनाराधनस्याकृतत्वात् त्वामाराध्यात्मबन्धनं वरं को वृणीतेत्यनुपपन्नमिति दूषणं पराकृतम् । आराध्येत्यस्याकिञ्चन-प्रार्थ्यतमादित्यनेनान्वयमभ्युपेत्य त्वामित्यस्याध्याहृतेन प्राप्येत्यनेनान्वय इत्यभ्युपगमात् ॥ ५७ ॥

त्वं वरैः प्रलोभित इति तत्प्रलोभनमप्रमादाय त्वन्निष्ठाप्रमादज्ञापनाय कृतमिति विद्धि । प्रमाद-प्रसादः कथमागत इत्यत आह नेति । मय्येकभक्तानां धीराशीर्भिः क्वचित्कदाचिदपि न भिद्यते त्वमपि मय्येकभक्तोऽतस्तव प्रमादो नास्तीति । एतेन भगवद्भक्तेरेवाप्रमादहेतुत्वात् प्रलोभनस्याप्रमाद-हेतुत्वाभावात् वरैः प्रलोभित इति यत्तत्प्रलोभनमप्रमादायेत्यप्रमादं प्रति प्रलोभनस्य हेतुत्वाभिधान-मयुक्तमिति चोद्यं पराकृतम् । अप्रमादवाचकेनाप्रमादशब्देन तज्ज्ञापनस्य गृहीतत्वात् ॥ ६१ ॥

॥ इति श्रीभागवतटिप्पण्यां चतुःपञ्चाशोऽध्यायः ॥ १०-५४ ॥

॥ हरिः ॐ ॥ हे कुरुसत्तम । रथा निष्पिष्टाः सन्तः क्वापि नेव दृश्यन्त इति । एतेनेवेत्ये-तव्द्यर्थमिति दूषणं परास्तम् । इवेत्यस्य निष्पिष्टा इत्यनेनान्वयमनङ्गीकृत्यैवार्थं चाङ्गीकृत्य नेत्यनेनान्वयस्योक्तत्वात् ॥ १० ॥

॥ इति श्रीभागवतटिप्पण्यां पञ्चपञ्चाशोऽध्यायः ॥ १०-५५ ॥

॥ हरिः ॐ ॥ नगरं हस्तिनपुरमित्यस्य हस्तिननामकं च तत्पुरं च हस्तिनपुरं नगरमित्यर्थः । एतेन हस्तिनपुरमिति पुरशब्देनैव पुरत्वस्योक्तत्वात् नगरमित्येतव्द्यर्थमिति दूषणं प्रत्युक्तम् । पुर-शब्दस्य पृ पालन पूरणयोरित्येतद्रूपत्वात्पुरशब्देन पूर्णत्वमिहोच्यते न तु पुरत्वमित्यङ्गीकारात् ॥३॥

युधिष्ठिरो यथार्थेन यथार्थात् हार्दिक्यवचनाद्दुर्जयं ब्रह्मदत्तं हतं ज्ञात्वा च हंसडिभिकौ हत इति यथार्थेन यथार्थं हार्दिक्यवचनात् हार्दिक्यवचनं श्रुत्वा चेत्यर्थः । एतेन हार्दिक्यवचनादित्यस्य पञ्चम्यन्तत्वात् यथार्थादिति वक्तव्यम् । यथार्थेनेति वचनमयुक्तमिति दूषणं निरस्तम् । यथार्थादिति

पञ्चम्येकवचनस्य यथार्थेनेति तृतीयैकवचनादेश इत्यङ्गीकारात् । एतेनैव ब्रह्मदत्तं दुर्जयं तं हार्दिक्य-वचनात्ज्ञात्वेति वक्तव्यम् । हार्दिक्यवचनाच्छ्रुत्वेति कथनमनुपपन्नमिति चोद्यं निरस्तम् । हार्दिक्य-वचनादिति पञ्चम्यन्तस्याध्याहृतेन ज्ञात्वेत्यनेनान्वयस्योक्तत्वात् । दुर्जयो ब्रह्मदत्तो हत इति हार्दिक्यवचनं श्रुत्वेति वक्तव्ये हार्दिक्यवचनात्ज्ञात्वेत्युक्तिस्तु हंसडिभिकहननश्रवणजन्यसुखापेक्षया ब्रह्मदत्तहननश्रवणजन्यसुखेऽतिशयोऽस्तीति ज्ञापनार्था । अत एव दुर्जयमिति ब्रह्मदत्तस्य विशेषण-मुक्तम् । एतेनैव हंसडिभिकौ हताविति यथार्थं हार्दिक्यवचनं श्रुत्वेति वक्तव्यं यथार्थात् हार्दिक्य-वचनाच्छ्रुत्वेति कथनमनुपपन्नामिति दूषणं परास्तम् । ज्ञात्वा श्रुत्वेति क्रियाद्वयस्य परस्परसमुच्चये चशब्द इत्यभ्युपगमात् ॥ ८ ॥

॥ इति श्रीभागवतटिप्पण्यां षट्पञ्चाशोऽध्यायः ॥ १०-५६ ॥

॥ हरिः ॐ ॥ हे भगवन् । अमिततेजसः कृष्णस्य माहात्म्यं श्रोतुमिच्छामि । किं तन्माहात्म्यमित्यत आह– यथेति । कृष्णो मागधसाल्वादीन् जित्वा यथा तत्पारं मागधसाल्वादीनां पारमागमत् तथा कृष्णस्य माहात्म्यं श्रोतुमिच्छामीति । एतेन कृष्णस्येति षष्ठ्यन्तमनन्वितमिति दूषणं परास्तम् । अध्याहृतेन माहात्म्यमित्यनेनान्वयस्योक्तत्वात् ॥ १७ ॥

सा गृहागतैर्गीयमानं तं कृष्णं सदृशं पतिं मेन इति । एतेन गृहागतैर्गीयमाना मुकुन्दस्य रूपवीर्यगुणश्रिय उपश्रुत्य तं सदृशं पतिं मेन इति वक्तव्यम् । गीयमानमिति कथनमनुपपन्नमिति चोद्यं परिहृतम् । आदौ गृहागतैर्गीयमानं तं सदृशं पतिं मेन इत्युक्त्वा कथं कृष्णस्य गीयमानत्वमित्याशङ्कापरिहारार्थं गृहागतैरित्यादिपदानामावृत्तिमङ्गीकृत्य गीयमानमित्यस्यार्थवशाद्गीय-माना इति विपरिणाममङ्गीकृत्य गृहागतैर्गीयमाना मुकुन्दस्य रूपवीर्यगुणश्रिय उपश्रुत्य तं सदृशं पतिं मेन इति विवरणं क्रियत इत्यभ्युपगमात् ॥ २१ ॥

आरादित्यस्याराच्छीघ्रं मां जायां विधेहीत्यन्वयो द्रष्टव्यः । एतेन शीघ्रं माऽभिमर्शत्वित्युक्ते-र्विलम्बेनाभिमर्शत्विति प्राप्नोत्यतो माऽभिमर्शत्वित्येव वक्तव्यमारान्माऽभिमर्शत्विति कथनमयुक्तामिति दूषणं निरस्तम् । आरादित्यस्य माऽभिमर्शत्वित्यनेनान्वय इत्यनङ्गीकारात् ॥ ३९ ॥

॥ इति श्रीभागवतटिप्पण्यां सप्तपञ्चाशोऽध्यायः ॥ १०-५७ ॥

॥ हरिः ॐ ॥ यथा रुग्मिणी मच्चित्ता तथाऽहमपि तच्चित्तो रुग्मिणीचित्तो रुग्मिणा द्वेषान्ममोद्वाहो निवारित इति लोकमुखादहं वेद चातो निश्यपि निद्रां नाध्यगमं किमु वेति । एतेन निशि निद्रां नाध्यगममिति विशिष्योक्त्या दिवा निद्रां नाध्यगममिति प्रतीयतेऽतो निश्यपि निद्रां

नाध्यगममिति वक्तव्यमिति दूषणस्यानवकाशः । अहमपीत्यपिशब्दस्यावृत्त्या निश्यपि निद्रां नाध्यगममित्यर्थस्योक्तत्वात् ॥ २ ॥

एधसोऽग्नेः शिखामिवेत्यस्यैधसः काष्ठमुन्मथ्याग्नेः शिखामिवेत्यर्थः । अग्निसादृश्यं भीष्मकस्य रुक्मिण्या अभूतोपमेयमग्निं विना केवलशिखाया आनयनाभावादिति द्रष्टव्यम् । एतेन दार्ष्टान्तिके राजन्यापसदानुन्मथ्येत्युक्तत्वात् दृष्टान्ते एध उन्मथ्येति वक्तव्यम् । एधस इति कथनमयुक्तमिति चोद्यस्यानवकाशः ॥ ३ ॥

भ्रातृस्नेहपरिप्लुतो भ्रातृकृष्णस्नेहपरिप्लुतो महता बलेन महता सामर्थ्येन युक्तो रामो गजाश्वरथ-पत्तिभिः सार्धं त्वरितः सन् कुण्डिनं कुण्डिनपुरं प्रागादिति । एतेन गजाश्वरथपत्तिभिः सार्धमित्यनेनैव पूर्णत्वान्महता बलेनेत्येतव्द्यर्थमिति दूषणं निरस्तम् । गजाश्वरथपत्तिभिर्युक्तेन महता बलेन सार्ध-मित्यर्थमनङ्गीकृत्य महता बलेन युक्तो रामो गजाश्वरथपत्तिभिः सार्धमित्यर्थस्योक्तत्वात् ॥ २१ ॥

किञ्चित्सुचरितम् । तेन तुष्टो भगवाननुगृण्हात्विति कथनमयुक्तमिति दूषणं परिहृतम् । महच्चेत्यस्य शेषमङ्गीकत्य सर्वपुण्यसङ्ग्रहोऽनेन कृत इत्यभ्युपगमात् ॥ ३९ ॥

स्त्रियः पतिमत्यो विप्रस्त्रियस्तस्यै रुग्मिण्यै ताः पूजाः प्रददुः । शेषा अवशिष्टाः क्षत्रियादिस्त्रियः आशिषो युयुजुः । वधूः रुग्मिणी ताभ्यो विप्रस्त्रीभ्यो देव्यै भवान्यै च नमश्चक्रे । शेषा अवशिष्टाः क्षत्रियादिस्त्रियो जगृहे हस्तग्रहणादिना क्षत्रियादिस्त्रीणां बहुमानः कृत इति यावदिति । एतेन तस्यै स्त्रियस्ताः प्रददुरित्यत्र कर्मानुक्तिरिति शङ्काऽनवकाशः । ता इत्यनेन विप्रस्त्रीकर्तृकभवानीपूजा गृहीता पूजानामेव कर्मत्वमिति स्वीकृत्य स्त्रियस्ताः पूजाः प्रददुरित्यस्यास्मत्कृतपूजाफलं तवैवेति विप्रस्त्रीभी रुग्मिणीं प्रत्युक्तमित्यत्र तात्पर्यमित्यभ्युपगमात् ॥ ५० ॥

सिञ्जत्कणन्नूपुरपादशोभितामित्यस्यातिशयितध्वनिं कुर्वत् यन्नूपुरं तद्युक्तपदाभ्यां शोभिता-मित्यर्थः । एतेन सिञ्जत्कणदित्येतत्पुनरुक्तमिति चोद्यं पराकृतम् । ध्वनेरतिशयलाभार्थं ध्वनिकर्तृत्वं द्विवारमुक्तमित्यभ्युपगमात् ॥ ५७ ॥

॥ इति श्रीभागवतटिप्पण्यामष्टपञ्चांशोऽध्यायः ॥ १०-५८ ॥

॥ हरिः ॐ ॥ स्वधनूंषीति धनुषां स्वकीयत्वोक्त्याऽभ्यासवशाद्धनुष्टङ्कारकरणेन महाशब्द उत्पन्न इति सूचितं भवति । एतेन धनूंषीत्युक्ते योग्यतया स्वधनुषामेव लाभेन परधनुःप्राप्तेरभावात्स्वेत्ये-तव्द्यर्थमिति चोद्यं पराकृतम् । परधनुर्व्यावृत्त्यर्थं स्वेत्युक्तमित्यङ्गीकारात् ॥ ३ ॥

भावविह्वललोचनेत्यस्य भयविह्वललोचनेत्यर्थः । एतेन भयविह्वललोचनेति वक्तव्यम् । अत एव भयविह्वलेति वक्ष्यति । भावविह्वललोचनेति वचनमयुक्तमिति दूषणं पराकृतम् । भयशब्दस्य छान्दसे दीर्घे यकारस्य वकारे भावेति रूपं निष्पन्नमित्यभ्युपेत्य भावविह्वललोचनेत्यस्य भयविह्वल-लोचनेत्यर्थस्योक्तत्वात् ॥ ५ ॥

ईश्वरस्याप्रमाणविदित्यस्य कृष्णस्य सम्यक् परिच्छेदोऽस्तीति ज्ञानवानित्यर्थः । एतेन परिच्छेद-ज्ञानस्य प्रवर्तकत्वात् ईश्वरस्य प्रमाणविदिति वक्तव्यमप्रमाणविदिति अपरिच्छेदज्ञानकथनमयुक्तमिति शङ्काऽनवकाशः । ईश्वरस्याप्रमाणविदित्यत्र नञः प्रश्लेषो न किन्तु आङ् इत्यङ्गीकृत्य सम्यगपरिच्छिन्ने कृष्णे सम्यक् परिच्छेदोऽस्तीति भ्रमो रुग्मिणो जात इत्युच्यत इत्यूरीकरणात् ॥ २४ ॥

हे कृष्ण । त्वयाऽस्मिन् शालके रुग्मिणि यदिदं वपनं कृतमिदमसाधु । यतो जुगुप्सितं ज्ञानिभिर्निषिद्धम् । सुहृदो वधस्य ज्ञानिभिर्निषिद्धत्वात्कथमिदं जुगुप्सितमित्यत आह– वपनमिति । सुहृदः श्मश्रुकेशानां वपनं वपननिमित्तकं यद्वैरूप्यं तत्सुहृदो वधमाहुर्ज्ञानिनोऽत इदमपि जुगुप्सित-मेवेति ॥ ४१ ॥

बलरामः कृष्णं प्रत्युक्त्वा रुग्मिणीं प्रत्याह– मैवेति । हे साध्वि । भ्रातुर्वैरूप्यचिन्तया । अस्मान्मैवासूयेथाः । तत्र हेतुमाह– सुखेति । यतः स्वस्मादन्यः सुखदुःखदो न भवति । अत्रापि हेतुमाह– स्वकृतेति । पुमान् यतः स्वकृतभुक् स्वकृतकर्मानुसारेण सुखदुःखभुगिति ॥ ४२ ॥

रुग्मिणो गौणवधवन्मुख्यवधोऽपि भविष्यतीति शङ्कां परिहरति– बन्धुरिति । वधार्हदोषोऽपि बन्धुः स्वेन दोषेणैव स्वापराधेनैव हतो मानभङ्गलक्षणहननं प्राप्तश्चेद्बन्धुर्वधं मुख्यवधं नार्हति किन्तु त्याज्यः । एतदेवोपपादयति– हत इतीति ॥ ४३ ॥

महादोषी बन्धुर्वधमर्हतीत्येतदुपपादयति – क्षत्रियाणामिति । क्षत्रियाणामयं प्रजापतिविनिर्मितो धर्मः । अयं क इत्यत आह– भ्रातेति । भ्राता भ्रातरमपि । अन्यत्किमु शालादिकं निमित्तं विना हन्यादिति शङ्कां निवारयति– येनेति । येन भ्रात्रादिना घोरतरोऽतिशयेन घोरः क्लेशो भवेत् । ततस्तं भ्रात्रादिकं हन्यादिति ॥ ४४ ॥

भ्राताऽपि भ्रातरं हन्यादित्ययं प्रवृत्तधर्म एव न तु निवृत्तधर्म इत्याह– राज्यस्येति । ये मानिनो देहाभिमानेन विशिष्टाः सन्तो राज्यादेर्हेतो राज्यादिविरोधिनं भ्रात्रादिकं क्षिपन्ति ते श्रीमदान्धा इत्येतद्धि निवृत्तधर्मशास्त्रप्रसिद्धमिति ॥ ४५ ॥

शत्रोर्हन्तव्यत्वाच्छत्रुहननं न कार्यमिति कथमुच्यत इत्याशङ्कापरिहारार्थं शत्रुत्वादिकं भ्रान्तिसिद्धमित्याह – आत्मेति । देहात्ममानिनां देह एवात्मेति भ्रान्तिविशिष्टानां नृणामयं सुहृदयं शत्रुरयमुदासीन इत्येष आत्ममोहो मनोधर्मो भ्रमो देवमायया कल्प्यते उत्पद्यत इति ॥ ४६ ॥

देवमाययेत्युक्तदेवोऽनेक इति भ्रमं वारयति – एक इति । सर्वेषामपि देहिनामात्माऽन्तर्बहिश्च नियामकः परो देव एक एव । अनेकत्वप्रतीतेः का गतिरित्यतोऽनेकत्वज्ञानं भ्रम एवेत्याह – नानेति । यथैक एव ज्योतिरङ्गुल्यवष्टम्भादिना नाना भिन्नमिति गृह्यते ज्ञायते । यथा वैकमेव नभो घटपटाद्युपाधिवशाद्भिन्नमिति ज्ञायते । तथा मूढैः । इवशब्द एवार्थे । एक एव देवस्य स्थानभेदान्नानेव भिन्न एवेति ज्ञायत इति ॥ ४७ ॥

देहात्ममानिनामित्यनेन देह एवात्मेति ज्ञानं भ्रम इत्युक्तम् । देह एवात्मेति ज्ञानस्य भ्रमत्वं कुत इत्याशङ्कापरिहारार्थं देहात्मनोर्विरुद्धधर्माधिकरणत्वेन भेदोऽत्र साध्यते । एष देह आद्यन्तवान् द्रव्यप्राणगुणात्मकः द्रव्याणि पृथिव्यादिपञ्चभूतात्मकानि, प्राणाः पञ्चप्राणाः, गुणाः सत्त्वरजस्तमोगुणा एतदात्मको भवति । आत्मा त्वाद्यन्तवान् द्रव्यप्राणगुणात्मको न भवति । एवं विरुद्धधर्माधिकरणत्वात् देहात्मनोर्भेद इति शेषः । प्रकारान्तरेण देहात्मनोर्विरुद्धधर्माधिकरणत्वमाह – आत्मनीति । एष देह आत्मन्यविद्यया जीवनिष्ठपरमेश्वरविषयकाज्ञानेन क्षिप्तः । प्राप्त इति यावत् । देहिनं देहाभिमानविशिष्टं जीवं संसारयति दुःखप्रचुरसुखापादकस्त्रीपुत्रादिविशिष्टं करोति । आत्मा तु नैवमिति ॥ ४८ ॥

प्रकारान्तरेण जीवदेहयोर्विरुद्धधर्माधिकरणत्वमत्रोच्यते । आत्मा जीवः शयानः स्वप्नावस्थायुक्तः सन् । स्वप्नावस्थायामिति यावत् । यथाशब्दोऽनुक्तसमुच्चये । जाग्रदवस्थायां चाध्रुवाननित्यान् । फलमेवेत्येवशब्दस्य यथेत्यनेन सम्बन्धः । यथैव यथाऽवस्थितानेव विषयान् शब्दादिविषयान् आत्मानं देहं फलं कदल्यादिफलम् । चशब्दोऽनुक्तसमुच्चये । अन्नादिकं चानुभङ्क्ते । अर्थे सुखलक्षणप्रयोजनेऽसत्यविद्यमानेऽप्यनुभुङ्क्ते । देहस्तु नैवम् । अतोऽपि जीव देहयोर्विरुद्धधर्माधिकरणत्वम् । सुखस्याल्पत्वेनाविवक्षामाश्रित्य सुखलक्षणप्रयोजनेऽविद्यमानेऽपीत्युक्तमिति ॥ ४९ ॥

॥ इति श्रीभागवतटिप्पण्यामेकोनषष्ठितमोऽध्यायः ॥ १०-५९ ॥

॥ हरिः ॐ ॥ सूर्यो भक्तस्य सत्राजितः सत्राजिद्राजस्य परमः सखाऽऽसीत् । कथं परमः सखाऽऽसीदित्युक्तं विवृणोति – प्रीत इति । सूर्यः सत्राजितो भक्त्या सेवया च प्रीतस्तुष्टोऽतिशयेन तुष्टः सन् । सत्राजिद्राजाय स्यमन्तकमणिं प्रादादिति । एतेन प्रीत इत्यनेनैव पूर्णत्वात्तुष्ट

इत्येतत्पुनरुक्तमिति चोद्यस्यानवकाशः । प्रीतस्तुष्ट इति द्विर्वचनमतिशयार्थ इत्यभ्युपगम्य प्रीतस्तुष्ट इत्यस्यातिशयेन तुष्ट इत्यर्थस्योक्तत्वात् ॥ ३ ॥

अज इत्यनेन सूर्य उच्यते । एतेन सूर्योऽजायतेति कथनमयुक्तमिति शङ्का परास्ता । अ इति ब्रह्मेति श्रुत्याऽकारस्य विष्णुवाचित्वस्य, चक्षोः सूर्योऽजायतेत्यादिश्रुत्या सूर्यस्य विष्णोर्जातत्वस्य च सिद्धत्वादज इत्यनेन सूर्य उच्यत इत्यूरीकरणात् ॥ ८ ॥

याञ्चाभङ्गमतर्कयदित्यस्यायं भावः । मया कृष्णकृतयाञ्चाभङ्गः कृतः । तेन मम किमनिष्टं भवतीति शङ्काऽऽविष्टो जात इति ॥ १३ ॥

भ्राता भ्रातृवत्सलः सत्राजिद्भ्रातरमपश्यन्पर्यतप्यतेति । एतेन सत्राजिद्भ्रातरमपश्यन्नित्यनेनैवार्था-त्सत्राजिद्भ्रातृत्वस्य प्राप्तत्वात् भ्रातेत्येतव्द्यर्थमिति दूषणं प्रत्युक्तम् । भ्रातेत्यनेन भ्रातृत्वमुच्यत इत्यनङ्गीकृत्य परितापोपपादनार्थं भ्रातृवात्सल्यमुच्यत इत्यङ्गीकारात् ॥ १६ ॥

भीतवदित्यस्य भीतमित्यर्थः । एतेनार्भकान्तिकस्थिता पूर्वनरदर्शनाद्धात्र्या भीतेरवर्जनीयत्वात् भीतमतीति वक्तव्यं भीतवदिति भीतसादृश्याभिधानमयुक्तमिति चोद्यं परास्तम् । भावार्थकक्त-प्रत्ययान्तभीतशब्दान्मतुपि छान्दसे ङीपो लोपे भीतवदिति रूपं निष्पन्नमित्यभ्युपेत्य भीतवदित्यस्य भीतमित्यर्थ इत्युक्तत्वात् ॥ २१ ॥

वज्रनिष्पेषपरुषैर्वज्रप्रहारवत्परुषैरितरेतरमुष्टिभिरितरेतरमुष्टिप्रहारैरष्टविंशाहमष्टविंशतिदिनपर्यन्तमहर्निशं तद्युद्धमविश्रमं निरन्तरं यथा भवति तथाऽऽसीदिति । एतेन मुष्टीनां वज्रसाम्येन परुषत्वं वक्तव्यं वज्रनिष्पेषपरुषैरिति वज्रप्रहारसाम्येन परुषत्वाभिधानमयुक्तमिति दूषणं प्रत्युक्तम् । इतरेतरमुष्टि-भिरिति मुष्टिशब्देन मुष्टीनां ग्रहणमित्यनङ्गीकृत्य मुष्टिप्रहाराणां ग्रहणमित्यङ्गीकारात् ॥ २४ ॥

सिद्धार्थः सर्वदा प्राप्तप्रयोजनो हरिः सदारः सन् देव्युपस्थानात् । प्रत्यादिष्टाशिषां प्राप्तिः स्वोपलब्धिहेतुः स्वप्रसादानाम् । तुशब्दोऽवधारणे । तेषां तु द्वारकौकसामेवाभिमुखो भवन्हर्षयन् प्रादुर्बभूवेति । एतेन तुशब्दो व्यर्थ इति दूषणं पराकृतम् । यैर्देव्युपस्थानं कृतं तेषामेव प्रथमदर्शनं नान्येषामिति वक्तुं तुशब्दः प्रयुक्त इत्यभ्युपगमात् । एतेनैव भवन्नित्येव्द्यर्थमिति दूषणं परिहृतम् । अभिमुख इति शेषपूरणेन द्वारकौकभिर्देवीपूजां कृत्वा स्वस्य गृहं प्रति यदा प्रयाणं कृतं तदैवाभिमुखः सन् प्रत्यक्षो बभूवेति वक्तुं भवन्नित्युक्तमित्यङ्गीकारात् ॥ ३६ ॥

॥ इति श्रीभागवतटिप्पण्यां षष्ठितमोऽध्यायः ॥ १०-६० ॥

अक्रूरं पार्ष्णिग्राहमयाचतेत्यस्याक्रूरपार्ष्णिग्राहं पार्ष्णिग्रहणमयाचत पृष्टं रक्षणार्थमक्रूरमयाचतेति भावः ॥ १८ ॥

विश्वसृजो ब्रह्मादयो मायया विष्णुरूपया मायया मोहिता यस्य चेष्टां न विदुरिति । एतेन विष्णुमायया मोहिता इति वक्तव्यं मायया मोहिता इति कथनमनुपपन्नमिति चोद्यं पराकृतम् । माययेत्यस्य शेषं यशब्दस्य विष्णुवाचित्वेन विष्णुस्वरूपार्थकत्वं चाङ्गीकृत्य विष्णुस्वरूपमायया मोहिता इत्यर्थस्योक्तत्वात् ॥ २१ ॥

आदिभूतायेत्यस्य सर्वकारणाय सर्वदा विद्यमानाय चेत्यर्थः । एतेनादिशब्देनैव कारणत्वस्योक्तत्वाद्भूतशब्दो व्यर्थ इति चोद्यं प्रत्युक्तम् । आदि शब्दोक्तसर्वकारणत्वोपपादनार्थं भूतशब्देन सर्वदा विद्यमानत्वमुच्यत इत्यूरीकरणात् ॥ २३ ॥

ततस्तदनन्तरं भगवान् श्रीकृष्णः सुहृद्भिः साकं मृतस्य बन्धोः सत्राजितः क्रियां साम्परायिकक्रियां कारयामासेत्येतद्वै प्रसिद्धम् । एतदेव विवृणोति – या या इति । साप्मरायिका या याः क्रियाः श्रुतिस्मृत्युक्ताः स्युस्ताः सर्वा अपि क्रियाः कारयामासेति । एतेन या याः साम्परायिकाः स्युरिति शब्दानां बहुवचनान्तत्वात्क्रिया इति बहुवचनान्तशब्दः प्रयोक्तव्यः । क्रियामित्येकवचनान्तशब्दप्रयोगोऽनुपपन्न इति दूषणं परास्तम् । क्रियां कारयामासेत्युक्ते काचन साम्परायिकक्रिया कारितेति भ्रान्तिः स्यात्तां वारयितुं क्रियां कारयामासेत्यस्यावृत्तिमर्थवशात्क्रिया इति विपरिणामं श्रुतिस्मृत्युक्तास्ताः सर्वा अपि इति शब्दानामध्याहारं च स्वीकृत्य क्रियां कारयामासेत्यस्य विवरणं या याः स्युः साम्परायिका इत्यनेन क्रियत इत्यभ्युपगमात् ॥ ३४ ॥

महता महति सुचिरेणातिबहुकालेनेह द्वारकायां स्थितैर्नोऽस्माभिरननुभूतान्यरिष्ठानीहेदानीं नोऽस्माकं कस्मादासन्निति । एतेन महता सुचिरेणेत्येतदनन्वितमिति दूषणं प्रत्युक्तम् । महतेति तृतीया सप्तम्यादेशः स्थितैरननुभूतानीति पदद्वयस्य शेष इति चाभ्युपेत्यान्वयस्योक्तत्वात् ॥ ३७ ॥

अरिष्टानि कस्मादासन्निति कृष्णेन पृष्टे वृद्धैः किमुत्तरं दत्तमिति परीक्षिद्राजस्य हार्दां शङ्कां शुकाचार्यः परिहरति – इतीति । हे अङ्ग । परीक्षिद्राज । वृद्धानां मध्ये एके वृद्धा विस्मिताः सर्वज्ञोऽपि भगवानस्मान्पृच्छतीति विस्मिताः सन्तो गदाभृतस्तव निवासनिकटे निवाससमीपस्थानेऽपि निमित्तान्तरेणानिष्टदर्शनं कथं घटेत । किमु निवासस्थाने । तस्मात्तवेच्छयैवारिष्टदर्शने कारणमित्युत्तरमुपदिशन्ति ॥ अवदन्निति । एतेन द्वारकाया निवासस्थानत्वात् निवास इति वक्तव्ये निवासनिकट इति कथनमयुक्तमिति चोद्यं निरस्तम् । अपीति शेषपूरणेन निवाससमीपस्थानेऽप्यरिष्ट-

दर्शनं न भवति । किमु निवासस्थान इति कैमुत्यन्यायं वक्तुं निवासनिकट इत्युक्तमित्यभ्युपगमात् ॥ ३८ ॥

श्लोकद्वयानन्तरं तस्मादक्रूरगमनमरिष्टदर्शनकारणमिति शेषं पूरयित्वेत्युत्तरं वृद्धानां मध्ये एके वृद्धा उपदिशन्ति अवदन्निति पूर्वेणान्वयो वक्तव्यः । एतेन देवे वर्षति काशीश इति श्लोकद्वय-मनन्वितमिति दूषणं परिहृतम् ॥ ३९,४० ॥

एतावदिह कारणमितीत्यस्यारिष्टदर्शने मदिच्छैव मुख्यकारणमक्रूरगमनममुख्यकारणम् । परन्त्वक्रूरगमनमेवेमुख्यकारणं न भवतीति । किन्तु रामगमनं मणिगमनं चेति द्वयमप्यमुख्यकारण-मिति मत्वेत्यर्थः । एतेनैतावदिह कारणमित्येतदनन्वितमिति दूषणं परिहृतम् । मत्वेत्यध्याहारे-णान्वयस्योक्तत्वात् ॥ ४१ ॥

विज्ञाताखिलतत्त्वज्ञ इत्यस्य विज्ञातमखिलं जगद्येन स विज्ञाताखिलः । तत्त्वं परतत्त्वं स्वात्मानं जानातीति तत्त्वज्ञो विज्ञाताखिलश्चासौ तत्त्वज्ञश्च विज्ञाताखिलतत्त्वज्ञ इत्यर्थः । एतेन विज्ञाताखिल-तत्त्व इत्यनेनैव पूर्णत्वात् ज्ञ इत्येतद्व्यर्थमिति शङ्का परास्ता । अखिलशब्देनाखिलजगत एव ग्रहणेन स्वात्मन इत्यभ्युपेत्य विज्ञाताखिलशब्देनाखिलजगज्ज्ञानमुच्यते । तत्त्वशब्देन मुख्यामुख्य-न्यायेन परतत्त्वाख्यस्वात्मन एव ग्रहणम् । नत्वपरतत्त्वस्येत्यङ्गीकृत्य तत्त्वज्ञशब्देन स्वात्मज्ञान-मुच्यत इत्यूरीकरणात् ॥ ४२ ॥

॥ इति श्रीभागवतटिप्पण्यामेकषष्ठितमोऽध्यायः ॥ १०-६१ ॥

नरेन्द्रकन्या वरं वरणीयं त्रिलोक्याभिमतं त्रिलोक्या लोकत्रयस्य आ सम्यगभिमतं रमापतिं रमारमणहेतुसमागतं कृष्णं चकमे । कथं चकमे इत्यत आह– भूयादिति । आशिषां पतिरयं कृष्णो मे पतिर्भूयात् । एतदेव विवृणोति– करोत्विति । सत्यो निर्दुष्टसर्वज्ञानः कृष्णो यदि धृतव्रतो धृतं स्वीकृतं व्रतं मत्कर्तृकव्रतं येन स धृतव्रतः स्यात्तर्हि मे पाणिग्रहणं करोत्विति ॥ ४० ॥

अर्चितं पुनरित्याहेत्यात्रार्चितं कृष्णं प्रतीति वक्ष्यमाणप्रकारेण पुनराहेत्युक्तत्वादर्चनात्पूर्वमपि किञ्चिदुक्तमिति ज्ञातव्यम् । एतेन पुनःशब्दो व्यर्थ इति चोद्यस्यानवकाशः । अर्चनात्पूर्वमपि किञ्चि-दुक्तमिति सूचनार्थं पुनरुक्तमित्यङ्गीकारात् ॥ ४१ ॥

भगवतः पूज्यत्वे लक्ष्म्यादीनामाचारोऽस्तीत्यत्रोच्यते । श्रीरब्जजो लोकपालैः सह गिरिशश्च यत्पादपङ्कजरजः शिरसा बिभर्ति यश्च भगवान्काले धर्मसेतुविघातकाले स्वकृतसेतुपरीप्सया स्वकृत-

पूजारूपधर्मसेतुपरिपालनेच्छया लीलातनू रामकृष्णादिलीलातनुरदधद्धार । उपलक्षणमेतत् । लक्ष्मीब्रह्मादिभिः कृतां रामकृष्णादिरूपाणां पूजां च स्वीकृतवानित्यपि द्रष्टव्यम् । स भगवान्स्वकृतेन श्रीब्रह्मविष्णुस्थितेन स्वेन कृतेन पूजारूपकर्मणा तुष्येत्तुष्टो भवतीति । लीलातनुरित्यनेन न केवलं भगवान्मूलरूपेण लक्ष्म्यादिभिः पूज्यः किन्तु पूजार्थमेव रामकृष्णादिरूपाणि गृहीत्वा तैरपि लक्ष्म्यादिभिः पूज्य इत्युक्तं भवति । एतेन पूज्यताप्रसङ्गे भगवदवतारकथनमसङ्गतमिति दूषणं परिहृतम् । स्वकृतेनेत्यनेन पूजारूपकर्मण्यपि भगवानेव स्वतन्त्र इत्युक्तं भवति ॥ ४२ ॥

हे क्षितीश्वर । विद्वांस इति शेषः । विद्वांसः स्वयंवरादन्यत्र काले विदुषोऽपि कन्याया अयाचितारं वरमुत्तममाहुः । पुरुषार्थभागिनां कन्यालक्षणपुरूषार्थभागिनां प्रभूणां मध्ये वेलां विना स्वयंवरकालं विना य आत्मन आह्वानं कारयति सोऽपि स एवोत्तमो वरो हि प्रसिद्धम् । हे नरेन्द्र ! कविभिर्न राजन्यबन्धोर्निजधर्मवर्तिन कन्यायाश्च विगर्हिता दूषिता । तथापि तव सौहृदेच्छया त्त्वदीयां कन्यां याचे । शुल्कं दास्यतीति भ्रमं वारयति । नहीति ॥ वयं शुल्कदा न इत्येतद्धि प्रसिद्धमिति । एतेन विदुष इत्येतदनन्वितं व्यर्थं चेति दूषणं परिहृतम् । अपि कन्याया इति शेषेण विदुषोऽपि कन्याया अयाचितारं वरमुत्तममाहुरित्येतदत्रोच्यत इत्यङ्गीकारात् । एतेनैवाह्वानमित्येतदनन्वितमिति दूषणं परिहृतम् । आत्मन इत्यादि शेषेणान्वयस्योक्तत्वात् ॥ ४४,४५ ॥

हे नाथ । अभ्यधिको गुणैरभ्यधिक ईप्सितोऽपेक्षितः । कन्यावर इहास्मत्समीपेऽस्ति तस्य सकाशादन्यः कोऽस्ति न कोऽपीति । एतेन सकाशादभ्यधिकः कोऽस्तीत्यनेनैव पूर्णत्वात् अन्य इत्येतव्द्यर्थमिति दूषणं परिहृतम् । य इत्यस्येह इत्यनेनान्वयमनङ्गीकृत्यान्य इत्यनेनैवान्वय इत्यभ्युपगमात् । एतेनैव ते सकाशादन्यो वरः क्वापि नास्तीति वक्तव्ये इह नास्तीति कथनं बाधितमिति चोद्यं निराकृतम् । स्थितस्येति शेषेण कन्यादाने समीपस्थत्वरूपनिमित्तांन्तरमिहेत्यनेनोच्यत इत्यभ्युपगमात्
॥ ४६ ॥(?)

राजपत्न्यः कृष्णं स्वदुहितुः प्रियं पतिं लब्ध्वा ज्ञात्वा परमानन्दं लेभिरे परमोत्सवश्च जात इति । एतेन कृष्णं स्वदुहितुः पतिं ज्ञात्वेति वक्तव्यं लब्ध्वेति कथनमयुक्तमिति दूषणं प्रत्युक्तम् । लब्ध्वेत्यस्य ज्ञात्वेति तात्पर्यार्थ इत्यङ्गीकारात् ॥ ५३ ॥

॥ इति श्रीभागवतटिप्पण्यां द्विषष्टितमोऽध्यायः ॥ १०-६२ ॥

॥ हरिः ॐ ॥ तस्य मुरस्य पितुर्वधातुरास्तस्य कृष्णस्य रणे प्रतिक्रियां चिकीर्षवः सप्तात्मजा सप्त भौमप्रयुक्ताः सन्तो वृषभप्रयुक्तान् रथान्समारुह्य भवनान्निराक्रमन् । तस्य सप्तात्मजा इत्युक्तम् ।

के ते सप्त इत्यत आह – ध्रुवश्चेति । ध्रुवो विष्णुश्च श्रवणो विभावसुः नभो वसुस्वानरुणश्चेत्येते सप्तेति । एतेन ध्रुवश्चेति वाक्यं पूर्वोत्तरवाक्याभ्यमनन्वितमिति चोद्यं प्रत्युक्तम् । सप्त के त इत्याशङ्कापरिहारार्थं प्रवृत्तं भिन्नं वाक्यमित्यङ्गीकारात् ॥ १६ ॥

॥ इति श्रीभागवतटिप्पण्यां त्रिषष्टितमोऽध्यायः ॥ १०-६३ ॥

॥ हरिः ॐ ॥ यदा हरेश्चक्रेण नरकस्य शिरः पृथिव्यां पतितं बभौ तदा नरकसम्बन्धिनो हाहेति चुक्रुशुः । ऋषयः सुरेश्वराः साध्वित्युक्त्वा माल्यैर्विकिरन्तः सन्तो मुकुन्दमीडिर इति । एतेन सकुण्डलश्चारुकिरीटभूषितमित्येतद्धरिर्नरकस्य शिरश्चक्रेणापाहरदित्यनेनान्वित इति दूषणं परास्तम् । हरिर्नरकस्य शिरश्चक्रेणापाहरदिति विधानानन्तरं तदा किं जातमिति शङ्कापरिहारार्थं यदा तदेत्यनयोः शेषेण, हरिरित्यादीनामावृत्त्या च, यदा हरिर्नरकस्य शिरोऽपाहरदित्यनुवादं कृत्वा तदा नरकस्य शिरः पृथिव्यां पतितं सद्बभावित्यनेनानन्वितमिति चोद्यं प्रत्युक्तम् । शङ्कापरिहारार्थं च हाहेत्यादि-शेषेण पृथिव्यामित्यादीनामावृत्त्या च यदा नरकस्य शिरः पृथिव्यां पतितं सद्बभावित्यनुवादनं कृत्वा तदा हाहेति चुक्रुशुरित्यादिकं विधीयत इत्यङ्गीकारात् । एतेनैव हाहेत्येतदनन्वितमिति दूषणं परिहृतम् । नरकसम्बन्धिनश्चुक्रुशुरित्यनयोः शेषं कृत्वाऽन्वयस्योक्तत्वात् । एतेनैव साध्वित्य-नन्वितमिति शङ्का परास्ता । उक्तेत्यस्य शेषमङ्गीकृत्यान्वयस्योक्तत्वात् ॥ १२ ॥

केशवो भूयः शक्राय शक्रभोगाय मणिपर्वतं प्राहिणोदिति । एतेन कृष्णेन पूर्वं मणिपर्वतस्या-प्रेषितत्वाद्भूयः प्राहिणोदिति कथनमनुपपन्नमिति चोद्यं निरस्तम् । भूय इत्यस्य प्राहिणोदित्यनेनान्वय इत्यनङ्गीकारात् ॥ १५ ॥

॥ इति श्रीभागवतटिप्पण्यां चतुःषष्टितमोऽध्यायः ॥ १०-६४ ॥

॥ हरिः ॐ ॥ चिरं दृष्टमित्यस्य चिरं बहुकालस्यानन्तरं दृष्टमित्यर्थः । एतेन बहुकालस्यानन्तरं दृष्टमिति वक्तव्यं चिरं दृष्टमिति कथनमयुक्तमिति दूषणं परिहृतम् । अन्यसर्वविभक्तिषु सादृश्याच्चिरमित्यस्य षष्ठ्यन्तत्वमनन्तरमित्यस्य शेषं चाभ्युपेत्य चिरं दृष्टमित्यस्य बहुकालस्यानन्तरं दृष्टमित्यर्थ इत्युक्तत्वात् ॥ ७ ॥

हे कल्याणि । मत्प्रसादात्कदाचन ते जरा न भूयाद्वैरूप्यं न भूयात् । कान्तेन सह विप्रियं कलहो न भूयात् । मत्प्रसादात्ते सर्वदा सुव्यक्तं सर्वसौभाग्यं च भूयादिति । एतेन सुव्यक्तं जरादिकं न भूयादित्युक्ते किञ्चिव्यक्तं जरादिकं भूयादिति प्रतीयते । अतः सुव्यक्तमित्येतदनुपपन्नमिति चोद्यं

पराकृतम् । सुव्यक्तमित्यस्य जरेत्यादिनाऽन्वयमनङ्गीकृत्याध्याहृतेन सर्वसौभाग्यमित्यनेनान्वय इत्यूरीकरणात् ॥ १० ॥

॥ इति श्रीभागवतटिप्पण्यां पञ्चषष्ठितमोऽध्यायः ॥ १०-६५ ॥

॥ हरिः ॐ ॥ स धनपतिः रणे बाणैरतिविद्धः सन् त्रिभिर्भल्लैर्हरिप्रियां अयोधयद्योधयामास । अनन्तरं सिंहनादं व्यनीनददिति । एतेन त्रिभिर्भल्लैर्हरिप्रियां विव्याधेति वक्तव्यं हरिप्रियामयोधयदिति कथनमयुक्तमिति चोद्यं निराकृतम् । भल्लैस्ताडने कृते पुनर्हरिप्रियाया युद्धे प्रवृत्तिर्जातेत्यत्र तात्पर्यात् ॥ ७ ॥

ततस्तदनन्तरं वित्तपः कुबेरः शतगुणमितरमुद्गरापेक्षया शतगुणाधिकमत एव घोरं भयङ्करं दानवभीषणं न केवलं दानवेतरेषां भीषणं किन्तु दानवानामपि भीषणं मुद्गरमादाय भ्रामयित्वा देव्यै चिक्षेपेति । एतेन शतवारं भ्रामयित्वेति वक्तव्यं शतगुणं भ्रामयित्वेति कथनमयुक्तमिति चोद्यं परास्तम् । शतगुणमित्येतद्भ्रमणक्रियाविशेषणमित्यनङ्गीकृत्य मुद्गरविशेषणमित्यभ्युपगमात् ॥ १८ ॥

देवासुरयुद्धे देवासुरकृतयुद्धवेलायां यथा बलिवासवयोर्युद्धं समभवत्तथैव तयोः पूर्वप्रकृतयोस्तार्क्ष्य-जलेशयोर्गरुडवरुणयोर्घोरं युद्धं समभवदिति । एतेन यथेत्यनेन पूर्णत्वादिवेत्येतद्व्यर्थमिति दूषणं परिहृतम् । तथेत्यध्याहारं कृत्वेवेत्यस्यैवार्थकत्वमङ्गीकृत्य तथैवेत्यर्थस्योक्तत्वात् ॥ २३ ॥

चतथाशब्दौ परस्परसमुच्चये । पावकश्च पञ्चभिर्बाणैर्निमित्तैस्तथा मारुतस्त्रिभिर्बाणैर्निमित्तै-र्हृषीकेशमायोधयत्सम्यग्योधयामास । तद्बाणैस्ताडनं कृत्वा कृष्णस्य प्रवृत्त्युपपादनमद्भुतमिवा-भूतमेवाभवदिति ॥ २८ ॥

॥ इति श्रीभागवतटिप्पण्यां षट्षष्ठितमोऽध्यायः ॥ १०-६६ ॥

॥ हरिः ॐ ॥ हरिः कृष्णो देवराजेन क्षुरप्रेण वक्षसि विद्धः सन् प्रहस्य । हे शक्र । त्वं साधुशक्रोऽसि सम्यक् शक्तोऽस्यतस्ते तव मद्वक्षसि क्षुरप्रेण ताडनं युक्तमित्यब्रवीच्चेति । एतेन साधुशक्तोऽसीति वक्तव्यं साधुशक्रोऽसीति कथनमयुक्तमिति शङ्का परास्ता । शुक्लकेशावित्यस्मा-त्कर्तरि रप्रत्यये शक्र इति रूपं निष्पन्नमित्यभ्युपेत्य साधुशक्रोऽसीत्यस्य साधुशक्तोऽसीत्यर्थ-स्योक्तत्वात् ॥ ५ ॥

सकृदित्यस्य सहसेत्यर्थः । एतेन वत्सस्य क्षीरपानार्थं बहुवारमागमनस्य विद्यमानत्वात् सकृदेत्येति कथनमयुक्तमिति चोद्यं निरस्तम् । सकृदित्यस्यैकवारमित्यर्थ इत्यनङ्गीकारात् ॥ २२ ॥

पूजितस्तैर्यथोचितमित्यस्य तैर्यथोचितमनतिक्रम्य पूजित इत्यर्थः । एतेन यथोचितत्वमिति वक्तव्यं यथोचितमिति कथनमयुक्तमिति चोद्यं पराकृतम् । उचितमिति भावप्रधानो निर्देश इत्यङ्गीकारात् ॥ ४३ ॥

योषित्स्वार्थ्येन भूरिणेत्यस्य भूरिणा महता योषित्स्वार्थ्येन योषितः सत्यभामायाः स्वार्थ्येन स्वार्थरूपेण पारिजातवृक्षेण सहेत्यर्थः । योषितोऽर्थेनैवोक्तेऽर्थस्य योषिदपेक्षितत्वस्य सिद्धावप्यत्यपेक्षितत्वज्ञापनार्थं स्वेत्युक्तम् । एतेन योषितेत्यनेन पूर्णत्वात् स्वार्थ्येन भूरिणेत्येतव्द्यर्थमिति दूषणं परिहृतम् । पारिजातवृक्षेण सहेत्यस्य शेषमङ्गीकृत्य योषित्स्वार्थ्येन महता योषितः स्वार्थरूपेण पारिजातवृक्षेण सहेत्यर्थ इत्युक्तत्वात् ॥ ४६ ॥

सर्वे मुकुन्दस्य समीपं समेताः प्राप्ताः सन्तस्तं मुकुन्दं लाजाप्रसवतण्डुलैर्मूर्ध्नि यथाजोषं स्पृष्ट्वा स्वं स्वं निवेशनं ययुरिति । एतेन मुकुन्दस्येत्येतदनन्वितमिति दूषणं परास्तम् । समीपमित्यस्य शेषेणान्वयस्योक्तत्वात् । ननु मुकुन्दस्य मूर्ध्नि लाजाप्रसवतण्डुलान्स्थापयित्वेति वक्तव्यं मुकुन्दस्य लाजाप्रसवतण्डुलैर्मूर्ध्नि स्पृष्ट्वेति कथनमयुक्तमिति चेन्न । मुकुन्दस्य लाजाप्रसवतण्डुलैर्मूर्ध्नि स्पृष्ट्वेत्यस्य मुकुन्दस्य मूर्ध्नि लाजाप्रसवतण्डुलान्स्थापयित्वेत्यर्थतात्पर्यात् ॥ ५३ ॥

॥ इति श्रीभागवतटिप्पण्यां सप्तषष्टितमोऽध्यायः ॥ १०-६७ ॥

॥ हरिः ॐ ॥ पुत्रस्नेहाकुला मृतप्रजा ते माता कुररीव विवत्सा गौरिव दीना दुःखिताऽऽतुराऽऽतुरयति दुःखयतीत्यातुरा सती परिशोचतीति । एतेन दीनेत्यनेन दुःखितत्वस्योक्तत्वात् आतुरेत्येतत्पुनरुक्तमिति चोद्यं पराकृतम् । आतुरेत्यनेन स्वशोकेनान्येषां दुःखं जनयतीत्युच्यत इत्यूरीकरणात् ॥ १८ ॥

शम्बरो गदामाविध्य भ्रामयित्वा महात्मने प्रद्युम्नाय महात्मप्रद्युम्नमरणार्थं तरसा गदां प्रद्युम्ने प्रक्षिप्य वज्रनिष्पेषनिष्ठुरं वज्रप्रहारशब्दवन्निष्ठुरं नादं व्यनददकरोदिति । एतेन महात्मप्रद्युम्ने गदां प्रक्षिप्येति वक्तव्यं महात्मने प्रद्युम्नाय गदां प्रक्षिप्येति कथनमयुक्तमिति शङ्का परास्ता । महात्मने प्रद्युम्नायेति महाप्रद्युम्नशब्देन महाप्रद्युम्नमरणं गृहीत्वा प्रद्युम्नायेति शब्दस्यार्थवशात्प्रद्युम्न इति विपरिणामं स्वीकृत्य महात्मप्रद्युम्नमरणार्थं प्रद्युम्ने गदां प्रक्षिप्येत्यर्थस्योक्तत्वात् ॥ २२ ॥

असितापाङ्गी वल्गुभाषिणीति विशेषणद्वयेनोपलक्षणत्वेन रुक्मिण्याः सर्वसम्यक् लक्षणसम्पन्नत्वोक्त्या सर्वसम्यक्लक्षणसम्पन्नाया रुक्मिण्याः पुत्रवियोगक्लेशस्य बाधितत्वात् पुत्रवियोगक्लेशप्रदर्शनमात्रम् । वस्तुतः पुत्रवियोगक्लेशो नास्तीति सूचयति । एतेनासितापाङ्गी वल्गुभाषिणीति विशेषणद्वयं व्यर्थमिति चोद्यं पराकृतम् ॥ ३३ ॥

कोऽन्वयं नरवैदूर्य इति पूर्वश्लोकस्थो नरवैदूर्यशब्दोऽत्रानुवर्तते । न केवलं परिदृश्यमानपुरुषो नरवैदूर्यः किन्तु ममात्मजोऽपि नरवैदूर्यः सः सूतिकागृहान्नीतः सन् नष्टो वा कुत्रचिज्जीवति वा । यदि कुत्रचिज्जीवति तर्ह्येतत्समवयोरूपः स्यात् । अत्र रूपशब्देनाकारो गृह्यते इति । एतेन चापिशब्दौ व्यर्थाविति दूषणं परास्तम् । नरवैदूर्यत्वे सर्वथा विशेषो नास्तीति ज्ञापनार्थं न केवलं ममात्मजो नरवैदूर्यः किन्तु परिदृश्यमानपुरुषश्च न केवलं परिदृश्यमानपुरुषो नरवैदूर्यः किन्तु ममात्मजोऽपि नरवैदूर्य इति परस्परसमुच्चयार्थं चापिशब्दावित्यभ्युपगमात् ॥ ३६ ॥

॥ इति श्रीभागवतटिप्पण्यामष्टषष्ठितमोऽध्यायः ॥ १०-६८ ॥

॥ हरिः ॐ ॥ भगवान्परिहासकथां कृत्वा । अनु परिहासकथाया अनन्तरं दूतमुवाच । किमुवाचेत्यत आह– उत्स्रक्ष्य इति । हे मूढ । यैश्चिह्नैस्त्वमेव विकत्थसे तानि चिह्नानि उत्स्रक्ष्यते । अन्तर्णीतण्यर्थोऽयम् । त्याजयिष्यति । एतेन परिहासकथाया अनूवाचेति वक्तव्यम् । परिहास-कथायामनूवाचेति कथनमयुक्तमिति शङ्का निराकृता । कृत्वेति शेषं पूरयित्वा परिहासकथा-मित्यस्यार्थवशात्परिहासकथाया अनन्तरमुवाचेत्यर्थस्योक्तत्वात् ॥ २१ ॥

किमिदमित्यस्येदं वत्क्त्रं किंनिमित्तं देहाद्वियुक्तं सदत्र पतितमित्यर्थः । एतेनेदं वत्क्त्रमिति निश्चयाभावे कस्य वा वत्क्त्रमिति निश्चयायोगेनेदं वत्क्त्रमिति निश्चयस्याङ्गीकर्तव्यत्वात् इदं किमिति संशयिर इति कथनमयुक्तमिति चोद्यं परिहृतम् । किमिदमित्यस्य निमित्तमित्यादीनां शेषेणेदं वत्क्त्रं किन्निमित्तं देहाद्वियुक्तं सदत्र पतितमित्यर्थस्योक्तत्वात् ॥ ३९ ॥

समाधिनेत्यस्यान्तःकरणसमाधानेनेत्यर्थः । एतेन समाधिपूजाया उपाध्यायसापेक्षत्वाभावात् सोपाध्यायः समाधिनाऽर्चयामासेति कथनमनुपपन्नमिति दूषणं पराकृतम् । समाधिनेति समाधिशब्देन ध्यानविशेष उच्यत इत्यनभ्युपगमात् ॥ ४२ ॥

॥ इति श्रीभागवतटिप्पण्यामेकोनसप्ततितमोऽध्यायः ॥ १०-६९ ॥

॥ हरिः ॐ ॥ महत्यां तीर्थयात्रायामित्यस्य महत्यां तीर्थयात्रायां कर्तव्यायामित्यर्थः । एतेन महत्यां तीर्थयात्रायामित्येतदनन्वितमिति चोद्यं प्रत्युक्तम् । कर्तव्यायामिति शेषपूरणेनान्वयस्योक्तत्वात् ॥ ५ ॥

प्रियासार्थैश्च संयुत इत्यस्य प्रियाश्च ते सार्था धनिकाश्च तैश्च संयुत इत्यर्थः । एतेन प्रिय सार्थैरिति वक्तव्यं प्रियेति स्त्रीलिङ्गशब्दप्रयोगोऽनुपपन्न इति चोद्यं परिहृतम् । प्रियेति शब्दः स्त्रीलिङ्गो

न भवति किन्तु सार्थानां महत्वं वक्तुं आङ् संश्लेषेण प्रियेति दीर्घान्त प्रियाशब्दः प्रयुक्त इत्यभ्युपगमात् ।। ६ ।।

अहो भोजपते । यूयमिह युष्माकं समीपं विद्यमानं योगिनामपि दुर्दर्शं द्रष्टुमशक्यं कृष्णमसकृत्पश्यथ तस्मान्नृणां मध्ये जन्मभाजः सफलजन्मभाजः अहो आश्चर्यमिति । एतेनेहेत्येतद्व्यर्थमिति शङ्का निरस्ता । विद्यमानमिति पदाध्याहारेणेहेत्यनेनासकृद्दर्शनोपपादनार्थं युष्माकं समीपं विद्यमानमित्युच्यत इत्यभ्युपगमात् ।। ३८ ।।

महाभाग्यशीला नन्दगोपश्चेत्येतौ । सुतौ तौ रामकृष्णावुत्सङ्गं समारोप्य बाहुभ्यां परिरभ्य च शुचः शोकान्विजहतुरिति । एतेन यशोदानन्दगोपौ शुचो विजहाविति वक्तव्यम् । विजहतुरिति कथनमयुक्तमिति दूषणं परास्तम् । नन्दगोप इत्येताविति पदानामध्याहारेण यशोदा नन्दगोपश्चेत्येतौ शुचो विजहतुरित्यर्थस्योक्तत्वात् ।। ४५ ।।

हे व्रजेश्वरि । यस्या मैत्र्याः । इहास्मिंल्लोके भूलोके विद्यमानमैश्वर्यमर्थमैश्वर्यं च । ऐन्द्रमैश्वर्यमिन्द्रसम्बन्धिस्वर्गैश्वर्यमपि । प्रतिक्रिया न वा प्रतिक्रिया नैव । तामनुवृत्तां सर्वदा प्रवृत्तां वां युवयोर्मैत्रीं को विस्मरेत न कोऽपीति । एतेनाथवाऽपीहेति पदानां वैय्यर्थ्यमिति चोद्यं प्रत्युक्तम् । लोके विद्यमानमिति पदयोः शेषमैश्वर्यमित्यस्यावृत्तिं चशब्दार्थस्यार्थेतिशब्दस्यापिशब्दस्य च परस्परसमुच्चयार्थत्वं, वेत्यस्यैवार्थत्वं स्वीकृत्येह लोके विद्यमानमैश्वर्यं चैन्द्रमैश्वर्यमपि प्रतिक्रिया नैवेत्यर्थस्योक्तत्वात् ।। ४७ ।।

एतौ रामकृष्णौ । यदा सतां परस्तात्सज्जनेभ्योऽन्यस्मात् । अकुत्रचभयावित्येकं पदम् । कुतोऽपि भयरहितौ न किन्तु सर्वस्मादपि भययुक्तौ । अनेनातिबालावित्युक्तं भवति । अतिबालानां हि सज्जनव्यतिरिक्तमक्षिकादिसर्वप्राणिभयं तिष्ठति तदा भवत्समीपे न्यस्तावद्दष्टपितरौ युवयोः पित्रोः सकाशात्सम्प्रीणनाभ्युदयपोषणपालनानि प्राप्योषतुरित्येतत् स्म प्रसिद्धम् । पालने दृष्टान्तमाह— भवतीति । पक्ष्म यद्वदक्ष्णोः पालकं तथा भवद्भ्यां पालनं कृतमित्येतद्धि प्रसिद्धमिति । एतेन रामकृष्णयोः कुतोऽपि कदाऽपि भयाभावात् यदा सज्जनव्यतिरिक्तमक्षिकादिसर्वप्राणिभययुक्तौ तदा भवत्समीपेन्यस्ताविति कथनमयुक्तमिति दूषणं निरस्तम् । यदा रामकृष्णयोरतिबाल्यं तदा भवत्समीपे न्यस्तावित्यर्थप्रतिपादन एव तात्पर्यात् ।। ४८ ।।

हे सख्यः । यतो वयं स्वानां यदूनामर्थचिकीर्षवः प्रयोजनं कर्तुकामाः । यतश्च कृपणचेतसः कृपणेषु यादवव्यतिरिक्तासमर्थेषु च चेतो येषां ते कृपणचेतसः । यादवव्यतिरिक्तासमर्थकार्यमपि

कर्तुकामा इति यावत् । अतो गतानन्यासङ्गात् अन्यकार्यासक्तेश्चिरायितान् बहुकालमगतानस्मान् स्मरथापि स्मरथ किमिति । एतेन चिरायितानित्येतव्यर्थमिति दूषणं परास्तम् । अयधातोः क्तप्रत्यये इडागमे निष्पन्न अयितशब्दः गतत्ववाची । अयितशब्दस्य आङ् योगे आगतत्वरूपार्थो लभ्यते । अयितशब्दस्य नञा योगे छान्दसत्वान्नुडभावे अनागतत्वरूपार्थो लभ्यते । चिरशब्देन बहुकालमित्यर्थो लभ्यते इत्यभिप्रेत्य चिरायितानित्यस्य बहुकालमनागतानित्यर्थस्योक्तत्वात् ॥ ५१ ॥

हे अङ्गनाः । अहं सर्वभूतानां सर्वप्राणिनामादिः कारणमतः सर्वप्राणिनामन्तरमन्तर्बहिस्तिष्ठा-मीत्येतद्धि प्रमाणप्रसिद्धम् । अत्र दृष्टान्तमाह– भौतिकानामिति । भौतिकानां पदार्थानामन्तर्बहिः खमाकाशो वाऽऽपश्च भूर्वायुर्ज्योतिस्तेज इत्येतानि पञ्चमहाभूतानि यथा भौतिकानां पदार्था-नामन्तर्बहिः स्थितानि तथाऽहं सर्वप्राणिनामन्तर्बहिस्तिष्ठामीति । एतेनाकाशादिपञ्चमहाभूतानि भौतिकानामन्तर्बहिस्तिष्ठन्तीति कथनमयुक्तमिति चोद्यं पराकृतम् । अनुक्तसमुच्चयार्थकेन वाशब्देनापां गृहीतत्वात् ॥ ५५ ॥

यथैतानि प्रत्यक्षसिद्धानि भूतानि भूतकार्याणि भूतेषु ततान्याश्रितान्यात्माऽऽत्मना तत इत्येकवचनानि जातौ यथा चात्माऽऽत्मनोऽधमजीवा आत्मनाऽऽत्मभिः स्वकारणब्रह्मादिजीवै-स्ततस्तताः सम्बद्धा अधमजीवाः स्वकारणेषु ब्रह्मादिषु आश्रिता इति यावत् । एवमुभयं भूतानि जीवाश्चेत्युभयं परेऽक्षरे । कारण इति शेषः । कारणे मय्याततमाश्रितं पश्यथ । भूतानीत्याद्युक्त-दृष्टान्तयोः समुच्चयार्थः चशब्दार्थोऽयं शब्द इति पूर्वश्लोके आकाशादिदृष्टान्तेन भगवतः सर्वेषामन्त-र्बहिरवस्थानमुक्तम् । अस्मिन् श्लोके भूतकार्याद्यधमजीवदृष्टान्ताभ्यां भूतानां जीवानां च भगव-दाश्रितत्वमुच्यत इति विवेको द्रष्टव्यः ॥ ५६ ॥

॥ इति श्रीभागवतटिप्पण्यां सप्ततितमोऽध्यायः ॥ १०-७० ॥

॥ हरिः ॐ ॥ शिशवोऽजतोकानित्यस्य अशिशवो युवानः पुरुषा यथाऽनायासेनाजतोकान् छागशिशून् बध्नन्ति तथेत्यर्थः । एतेन कृष्णस्यातिबलाढ्यताज्ञापनार्थं युवानः पुरुषा यथाऽजतोकान् बध्नन्तीति वक्तव्यम् । शिशवोऽजतोकान् बध्नन्तीति कथनमयुक्तमिति चोद्यं निराकृतम् । यथा शिशव इत्यत्र अशिशव इति पदच्छेदमभ्युपेत्य युवान इत्यर्थे तात्पर्यमित्यूरीकरणात् ॥ १३ ॥

स्वमालामित्यस्य स्वतन्त्रस्य श्रीकृष्णस्य योग्यां मालामित्यर्थस्योक्तत्वात् ॥ २९ ॥

हे राज्ञि । दारुको द्विषतां मिषतां पश्यतां राज्ञां पुरतः काञ्चनोपस्करं रथं चोदयामास । द्विषतां मिषतां राज्ञां पुरतो लक्षणया कृष्णेन च विशिष्टं रथं गृहीत्वा जगामेति यावत् । अत्र

दृष्टान्तमाह – वृकाणामिति । वृकाणां पुरतो मृगराडिव सिंहो यथा स्वभागं गृहीत्वा गच्छति तथा दारुको जगामेति । एतेन सिंहस्य रथचोदनाभावात् मृगराडिव दारुको रथं चोदयामासेति कथनमनुपपन्नमिति दूषणं पराकृतम् । रथं गृहीत्वा दारुको जगामेति तात्पर्यार्थे सिंहदृष्टान्त इत्यभ्युपगमात् । एतेनैव सिंहसाम्यं कृष्णस्य वक्तव्यम् । दारुकस्य सिंहसाम्यकथनमयुक्तमिति चोद्यं परिहृतम् । सारथेर्दारुकस्य सिंहसाम्योक्त्या रथिनः कृष्णस्य सिंहसाम्यं कैमुत्यन्यायेनोक्त-मित्यभिप्रायात् ॥ ३३ ॥

य इत्यस्य विष्णुरित्यर्थः । एतेनाप्तकामोऽपि कृष्णो नः परिणिनायेत्यनेन पूर्णत्वात् य इत्येतद्व्यर्थमिति दूषणं परास्तम् । कृष्णस्याप्तकामत्वोपपादनार्थं य इत्यनेन विष्णुत्वमुच्यत इत्यभ्युपगमात् ॥ ४० ॥

आनंत्यं वा हरेः पदमित्यस्यानन्त्यमनन्तं हरेर्नारायणस्य पदं वा वैकुण्ठस्थानमपीत्यर्थः । एतेनानन्तमपीति वक्तव्यमानन्त्यमिति कथनमयुक्तमिति दूषणं परिहृतम् । आनन्त्यशब्दस्य मत्वर्थी-याजन्तत्वमङ्गीकृत्वाऽनन्तमित्यर्थस्योक्तत्वात् । एतेनैव हरिपादस्य काम्यत्वात् । हरेः पदं न कामयामह इति वचनमयुक्तममिति शङ्का परास्ता । पदशब्देन पाद उच्यत इत्यनभ्युपगमात् ॥४१॥

॥ इति श्रीभागवतटिप्पण्यामेकसप्ततितमोऽध्यायः ॥ १०-७१ ॥

॥ हरिः ॐ ॥ कृष्णदर्शनार्थमागत्य कृष्णदर्शनं गृहीत्वा प्राक् ऋष्यागमनाव्यवहितपूर्वकाले आसीना उपविष्टा नृपादयः पाण्डवा रामकृष्णौ च लोकवन्दितान्स्तान्मुनीन्दृष्ट्वा सहसोत्थाय प्रणेमुरिति । एतेन प्रागासीना इत्येतद्व्यर्थमिति दूषणं पराकृतम् । मुन्यागमनाव्यवहितपूर्वक्षणे उपविष्टा अपि नृपादय उत्थानं चक्रुरित्युक्ते आदरातिशयो ज्ञाप्यतेऽतः प्रागासीना इत्येतत्सार्थक-मित्यभ्युपगमात् ॥ ६ ॥

अनीहः क्लेशकरचेष्टारहित एकोऽपि भगवान् आत्मना स्वेच्छयैव । प्रयोजनमन्तरेति यावत् । बहुधा चतुर्मुखनामकबहुरूपविशिष्टो भूत्वा यथा न बध्यते तथैतज्जगत्सृजत्यवत्यत्ति च । एकस्यैव भगवतो बहुनामरूपत्वं कथमित्यतो दृष्टान्तमाह– भौमैरिति । यथा भूमिर्भौमपदार्थान्सृष्ट्वा भौमैः स्वदृष्टपदार्थनिमित्तैर्बहुरूपिणी भवति तथैकोऽपि भगवान् बहुनामरूपो भवति । विभूम्नो विशेषपूर्णस्य भगवतश्चरितं सृष्ट्यादिव्यापारकरणं विडम्बनं विडम्बयति लोकाननुकरोति उपकरोति । विडम्बनं लोकानामेवोपकारकं न स्वस्यैतद्धि प्रमाणप्रसिद्धम् । अहो आश्चर्यं चेति । एतेन विभूम्नो भगवतश्चरितं विडम्बनं मोहकमिति भगवच्चरितस्य मोहकत्वकथनमसङ्गतमिति दूषणं निराकृतम् । विडम्बनमित्यस्य मोहकमित्यर्थ इत्यनङ्गीकारात् ॥ १७ ॥

यद्यस्मात्तव सङ्गत्या विशिष्टानां नोऽस्माकं श्रेयसां सकाशात्परः पुरुषार्थस्त्वमेवासि तस्मादद्य त्वया सङ्गम्य स्थितान्नोऽस्माकं जन्मसाफल्यं जन्मनः साफल्यं, विद्यायास्तपसो दृशश्च साफल्यं जातमिति ।। २१ ।।

स्वयोगमाययाऽच्छिन्नमहिम्न इत्यस्य स्वेन सर्वदा योगो यस्याः सा स्वयोगा। स्वरूपभूतेति यावत्। मायेच्छा तयाऽच्छिन्नमहिम्न इत्यर्थः। एतेन स्वयोगेत्येतव्द्यर्थमिति चोद्यस्यानवकाशः। जीवेच्छावद्भगवदिच्छाया भिन्नत्वं नास्ति किन्तु स्वरूपत्वमेवेति वक्तुं स्वयोगेत्युक्तमित्यभ्युपगमात् ।। २२ ।।

यस्य भगवतोऽनुभूतिश्चैतन्यं काले संहारानुकूलकालेऽस्य देहस्य लयोत्पत्त्यादिना । आदि शब्देनोपद्रवो गृह्यते । लयोत्पत्त्युपद्रवैरन्यस्मात्पुरुषाद्गुणतः सत्त्वादिगुणतश्च कुतश्चन भूतादेर्न रिष्यति न नश्यतीति यत्स्वत इत्येतद्वै प्रमाणप्रसिद्धम् । जीवचैतन्यस्य देहोत्पत्त्या दुःखप्राप्तिरूपनाशो भवति। स नाश ईश्वरचैतन्यस्य नास्तीति वक्तुं देहोत्पत्त्या नाशो नास्तीत्युक्तम्। एतेन देहोत्पत्त्या नाशस्याप्रसक्तत्वात् देहोत्पत्त्या नाशो नास्तीति कथनमयुक्तमिति चोद्यं पराकृतम् । जीवचैतन्यस्य स्वरूपनाशशून्यत्वं परमेश्वराधीनम् । एवमीश्वरचैतन्यस्य स्वरूपनाशशून्यत्त्वं देहनाशादिप्रयुक्तनाशशून्यत्वमन्याधीनं न भवति इति ज्ञापयितुं स्वत इत्युक्तम्। एतेन स्वतो नाशस्याप्रसक्तत्वात् स्वतो नास्तीति कथनमयुक्तमिति दूषणं परिहृतम् ।। ३० ।।

क्लेशकर्मपरिपाकगुणप्रवाहैः क्लेशापादकानि यानि कर्माणि तेषां परिपाकैर्गुणप्रवाहैः सत्त्वादिगुणप्रवाहैश्चाव्याहतानुभवोऽव्याहतसामर्थ्यमीश्वरमद्वितीयं समाभ्यधिकशून्यं, स्वविषयैः स्वकार्यकरैः प्राणादिभिः । प्राणशब्देन मुख्यवायुरादिशब्देन ब्रह्मरुद्रादयो गृह्यन्ते । मुख्यवायुब्रह्मादिभिरुपगूढमाच्छन्नं भगवन्तं सोऽज्ञः सर्वस्याकर्तारं मेने । अत्र दृष्टान्तमाह– सूर्यमिवेति । अज्ञो मेघहिमोपरागैरुपगूढं सूर्यप्रकाशमप्रकाशमिवाप्रकाशं यथा मन्यते तथेति । अयं भावः ।। मेघादिभिराच्छादनानन्तरं सूर्यस्य प्रकाशो नास्तीति यथा भ्रान्तिर्भवति। एवं ब्रह्मादिभिः स्वस्वव्यापारे कृते भगवतः सर्वकर्तृत्वं नास्तीति भ्रमो भवतीति। एतेन दृष्टान्ते दार्ष्टान्तिके च भ्रान्तिप्रकारो नोक्त इति शङ्का परास्ता। दृष्टान्तेऽप्रकाशमित्यस्य दार्ष्टान्तिके सर्वस्याकर्तारमित्यस्य शेषेण भ्रान्तिप्रकार उच्यत इत्यूरीकरणात् ।। ३१ ।।

श्रद्धया सर्वयज्ञेश्वरं विष्णुं मखैर्यजेदिति यत्तेन कर्मणा एष मोक्षफलदत्वेन प्रमाणप्रसिद्धः । कर्मनिर्धारः साधुनिरूपितः साधुभिर्निरूपित इति। एतेन पूर्वोत्तरार्धयोरनन्वय इति शङ्काऽनवकाशः। इति तेनेति पदयोः शेषेणान्वयस्योक्तत्वात् ।। ३३ ।।

बुधो यज्ञदानैर्विष्णुप्रीत्यापादकयज्ञदानैरनुष्ठितैर्निमित्तैर्वित्तैषणां सुवर्णादिद्रव्येच्छां गृहे सहृदारसुतैषणां च विसृजेत् । एवं यज्ञदानैरेव कालेन कालक्रमेणात्मलोकैषणां स्वशरीरेच्छाम् । शरीराभिमानमिति यावत् । विसृजेदिति । अयं भावः ।। विष्णुप्रीत्यर्थमनुष्ठितयज्ञदानैरन्तःकरणशुद्धौ जातायां विष्णुप्रसादेन वित्तादीच्छा गच्छतीति ।। ३६ ।।

।। इति श्रीभागवतटिप्पण्यां द्विसप्ततितमोऽध्यायः ।। १०-७२ ।।

।। हरिः ॐ ।। पत्नीसंयाजावभृथैश्चरित्वाऽथेत्यस्य पत्नीसंयाजावभृथनामकेष्टिविशेषैः सह कर्तव्यं सर्वं चरित्वा कृत्वेत्यर्थः । एतेन चरित्वेत्यस्य कर्म नोक्तमिति चोद्यस्यानवकाशः । कर्तव्यं सर्वमित्यस्य शेष इत्यभ्युपगमात् ।। १२ ।।

भूयः स्वानेव विषयान् ययुरिति कथनमयुक्तमिति चोद्यं निरस्तम् । पूर्वं विषयप्राप्ते-र्भावात्प्राप्तिविवक्षया भूय इत्युक्त इत्यभ्युपगमात् ।। ३० ।।

।। इति श्रीभागवतटिप्पण्यां त्रिसप्ततितमोऽध्यायः ।। १०-७३ ।।

।। हरिः ॐ ।। महायोगिन् कृष्ण । त्वं सनातनः सङ्कर्षणस्त्वमित्येतौ युवां यद्यस्मात्साक्षा-त्प्रधानपुरुषौ मुख्यतो लक्ष्मीचतुर्मुखनियामकौ तस्मादस्य जगतः सकाशात्परावुत्तमाविति जान इति । एतेन कृष्णेत्यादेरेकवचनान्तत्वात् त्वं जान इति वक्तव्यम् । वां जान इति कथनमनुपपन्नमिति चोद्यं पराकृतम् । कृष्णेत्यादेरध्याहृतत्वमित्यादिशब्दैरन्वयस्योक्तत्वात् । एतेनैव प्रधानपुरुषौपरा-वित्येतत्पुनरुक्तमिति दूषणं परिहृतम् । प्रधानपुरुषावित्यस्योत्तमपुरुषावित्यर्थ इत्यनङ्गीकारात् ।। ३ ।।

अर्थत इत्यस्य यथार्थत इत्यर्थः । एतेनार्थत इत्येतद्व्यर्थमिति दूषणं परास्तम् । भगवन्निष्ठं चन्द्रादिनियामकत्वं मिथ्याभूतमिति मायावादिमतनिरासार्थं यथाशब्दस्याध्याहारेणार्थत इत्यनेन भगवन्निष्ठचन्द्रादिनियामकत्वस्य सत्यत्वमुच्यत इत्यूरीकरणात् ।। ७ ।।

भूतादिरित्यत्र भूतेति भगवतः सम्बोधनं सर्वदा विद्यमानेति तस्यार्थः । एतेन भूतानामादि-रित्यनेन तामसाहङ्कारस्य प्राप्तत्वात् भूतशब्दो व्यर्थ इति चोद्यं प्रत्युक्तम् । भगवतस्तामसाहंकारादि-सर्वनियामकत्वोपपादनार्थं भूतशब्देन मुख्यामुख्यन्यायेन सर्वदा विद्यमानत्वमुच्यत इत्यभ्युपगमात् ।। ११ ।।

हे आर्तबन्धो मिथ्याज्ञाननिमित्तकसंसारदुःखविशिष्टानां बन्धो । यद्यस्मादलमत्यन्तमिन्द्रिय-लालसेनेन्द्रियभोगासक्तेन मया । मर्त्यात्मदृक् मर्त्यदेहमिति दृक् परे सर्वोत्तमे त्वय्यपत्यबुद्धिश्च कृता

तत्तस्मादद्यापन्नसंसृतिभयापहं शरणं प्राप्तानां यत्संसृतिभयं तत्परिहारकं तत्ते पादारविन्दमरणं शरणं गतोऽस्मि । एतावता शरणगमनमात्रेणालमिति ।। अयं भावः । विषयवैराग्याभावाज्जातेन मिथ्या-ज्ञानेन प्राप्तसंसारदुःखं त्वत्पादारविन्दशरणगमनमात्रेण निवृत्तं भविष्यतीति ।। १९ ।।

असौ भगवान् । आविस्तार आ सम्यक् विस्तारो यस्य स आविस्तारो महापरिमाणोऽपि खं आकाशो वायुर्ज्योतिस्तेज आपो भूरित्येतेष्वाकाशादिषु कृतेषु घटादिकार्येषु च यथाशयमाकाशादि-स्थानमनतिक्रम्याल्पभूर्येकनानात्वमल्पपरिमाणत्वं महापरिमाणत्वमेकत्वं नानात्वं यातीति ।। अयं भावः ।। आकाशाद्यधिकपरिमाणोऽपि भगवान् आकाशादिष्वाकाशादिसमपरिमाणः सन् तिष्ठतीति । आकाशस्यैकत्वात् । आकाशे एकेन रूपेण तिष्ठति । आकाशावयवानां बहुत्वात् आकाशावयवेषु बहूरूपेण तिष्ठति । एवं वाय्वादौ सर्वत्रापि तिष्ठतीति ।। २५ ।।

हे विश्वात्मन् । यस्य विष्णोरंशांशभागोनांशांशाकाररूपभागेन येन त्वया विश्वस्थित्युदयौ लय इत्येते भवन्ति । तं सतां गतिं त्वामहं शरणं गताऽस्मीति । एतेन कृष्णशरणगमनकथाप्रसङ्गे मूलरूपविष्णुशरणगमनकथनमनुपपन्नम् । न च वाच्यं तं त्वेति तच्छब्देन कृष्णो गृह्यत इति । यस्येति यच्छब्देन मूलरूपविष्णोर्गृहीतत्वात् । तं त्वेति तच्छब्देन मूलरूपविष्णोर्ग्राह्यत्वादिति दूषणं परास्तम् । अकारान्तयस्येति यच्छब्देन मूलरूपविष्णुं गृहीत्वाऽध्याहृतेन येनेति यच्छब्देन कृष्णं गृहीत्वा तं त्वेति तच्छब्देन कृष्णो गृह्यत इत्यूरीकरणात् । एतेनैवांशांशभागेनेत्यत्र भागशब्दो व्यर्थ इति दूषणं प्रत्युक्तम् । कृष्णे कृष्णकेशत्वमस्तीति ज्ञापनार्थं भागशब्द इत्यभ्युपगमात् ।। ३१ ।।

तस्मिन्सुतले । प्रविष्टौ रामकृष्णावुपलभ्य रामकृष्णयोर्मध्ये विश्वात्मदैवं ब्रह्मादिसमस्तजीवानां दैवं तथाऽऽत्मनो दैवं कृष्णं सुतरामुपलभ्येति । एतेन प्रविष्टावित्यस्य द्विवचनान्तत्वात् विश्वात्मदैव इति वक्तव्यम् । विश्वात्मदैवमित्येकवचनप्रयोगोऽनुपपन्न इति चोद्यस्यानवकाशः । विश्वात्मदैवमित्यनेन कृष्णस्यैव ग्रहणात् । एतेनैव ब्रह्माद्यपेक्षयाऽऽत्मनः सुतरां दैवत्वाभावात् आत्मनः सुतरां दैवमिति कथनमनुपपन्नमिति चोद्यं प्रत्युक्तम् । सुतरामित्यस्य दैवमित्यनेनानन्वय इत्यभ्युपगमात् ।। ३५ ।।

स्वानित्यस्य बहुस्नेहविषयानित्यर्थः । एतेनात्मजानित्यनेन स्वत्वस्य प्राप्तत्वात् स्वानित्येतद्व्यर्थमिति दूषणं निरस्तम् । स्वानित्यनेन सत्वकार्यबहुस्नेहविषयत्वं लक्षणयोच्यत इत्यभ्युपगमात् ।। ४९ ।।

इमे षट् पुनर्मत्प्रसादेन मद्गतिं यास्यन्तीति । एतेन पूर्वं स्वगतिगमनाभावात्पुनर्मद्गतिं यास्यन्तीति कथनमयुक्तमिति शङ्का परास्ता । पुनरित्यस्य मद्गतिं यास्यन्तीत्यनेनानन्वय इत्यङ्गीकारात् ।। ५१ ।।

।। इति श्रीभागवतटिप्पण्यां चतुःसप्ततितमोऽध्यायः ।। १०-७४ ।।

महर्षि श्री वेदव्यासप्रणीतम्

श्रीमद् भागवतम्

श्री आनन्दतीर्थविरचित भागवततात्पर्यनिर्णयेन
श्री सत्यधर्मतीर्थविरचित भागवतविवृत्या
सुमनोरञ्जिन्या च सहितम्

दशमं सम्पुटम्

(दशमस्कन्धस्य उत्तरार्धः)

Edited by

Mahāmahopādhyāya

Prof. K.T. Pandurangi

Formerly Prof. of Sanskrit, Bangalore University

Hon. Director of Dvaita Vedanta Studies and Research Foundation, B'lore.

Associate Editor

Vidwan Krishnacharya Upadhyaya, M.A.

Research Scholar at Dvaita Vedanta Studies and Research Foundation, Bangalore

This volume is published with the grant from the Govt. of Karnataka

2005

Published by

Dvaita Vedanta Studies and Research Foundation

No.11, Uttaradi Matha Compound, Basavanagudi, Bangalore-4.

Śrīmad Bhāgavatam with Tātparyanirṇaya of Śrī Ānanda tīrtha, Bhāgavata vivṛti of Śrī Satyadharmatīrtha and Sumanoranjani. Edited by Prof. K.T. Pandurangi, Hon. Director of Dvaita Vedānta Studies and Research Foundation, Upakulapati, Poornaprajna Vidyapeetha, Bangalore. and Vidwan Krishnachārya Upādhyāya, Research Scholar at Dvaita Vedanta Foundation. Published by Dvaita Vedanta Studies and Research Foundation, No.11, Uttaradi Matha Compound, Basavanagudi, Bangalore-560 004.

No. of Pages : lx+432

Price : Rs. 300/-

Copies can be had from :

Dvaita Vedanta Studies and Research Foundation,
No.11, Uttaradi Matha Compound,
Basavanagudi, Bangalore-560 004.
Phone : 080-2662 7272

Printed at : **Raghavendra Enterprises**, Bangalore-560 085.

Preface

This is the Tenth Volume of Śrīmad Bhāgavatam Uttarārdha contains cantos from 51 to 74, the battles between Kṛṣṇa and Jarāsandha for 18 times, the battle between Kṛṣṇa and Narakāsura, the description of the five fold forts of Pragjyothiśapura. On the way the battle with Mura are described.

The commentary of Śrī Satyadharma is continued. A commentary Sumanoranjani is added.

This volume is edited with the assistance of Vidwan Krishnacharya Upadhyaya.

We record our appreciation of the hard work of the scholar.

We thank Raghavendra Enterprises for neat printing and good getup.

K.T. Pandurangi
Chairman & Hon. Director

Śrīmad Bhāgavatam
Tenth Skandha (Uttarārdha)

Introduction

The cantos from 51 to 74 of Uttarārdha of the tenth skandha of Śrīmad Bhāgavata, the battles between Kṛṣṇa and Jarāsandha for 18 times, the battle between Kṛṣṇa and Narakāsura, the description of the five fold forts of Pragjyothiśapura. On the way the battle with Mura are described.

The episodes of Śrugāla Vāsudeva and Poundraka Vāsudeva who was a cousin of Kṛṣṇa are described. The marriage of Kṛṣṇa with Rukmiṇi, Satyabhāma, Jāmbavantha and Kālindi etc. the eight are narrated.

The battle between the evil force and noble force is found all along in human history. Initially evil force appears to be successful, but finally the noble force puts down the evil force. The battle of Kṛṣṇa with Jarāsandha and Narakāsura described her is a symbolic of a battle between the noble force and evil force.

